ADJUTANT, *s.* सहायः, सहकारिन् *m.*

ADMINISTER, *v. t.* प्रशास् 2 P, निर्वह् c., निर्वृत् c.; 'a. justice' धर्म-न्याय-विवेचनं कृ, न्यायं प्रणी 1 P, or प्रवृत् c.; 'a. an oath' शप् c. 2 दा 3 U, प्रतिपद् c. -ADMINISTRATION, *s.* शासनं, प्रवर्तनं, निर्वाहः; राज्यधुरा; 'during his a.' तस्मिन् राज्यं (प्रजाः) शासति. 2 धर्मविवेचनं. 3 प्रकृति *f.*, सचिवाः. 4 साचिव्यं, मंत्रित्वं. -ADMINISTRATIVE, *a.* शासनदक्ष, कार्यनिर्वाहकुशल. -ADMINISTRATOR, *s.* शासितृ *m.*, राज्यधुरंधरः. 2 प्रवर्तकः, प्रणेतृ *m.*

ADMIRAL, *s.* नौसाधनाध्यक्षः.

ADMIRE, *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, स्तु 2 U. 2 विस्मयेन दृश् 1 P.-ABLE, *a.* श्लाघ्य, अद्भुत, प्रशंसनीय, अनुपम. -ABLY, *adv.* श्लाघ्यप्रकारेण, साधु, अद्भुतं.-ATION, *s.* प्रशंसा, श्लाघा. 2 विस्मयः, आश्चर्यं.-ER, *s.* प्रशंसकः, श्लाघिन् *m.*; 'a. of ladies' कामिन् *m.*, कामुकः.

ADMIT, *v. t.* प्रविश् c., अभ्यंतरीकृ 8 U; 'should be a. ed to all confidential matters' सर्वविश्रंभेष्वभ्यंतरीकरणीया (Ka. 101). 2 अंगी-स्वी-कृ, अभ्युपगम् 1 P, अभ्युपे 2 P; ग्रह् 9 P; 'a. of' ex. by adj. or noun denoting 'capability'; 'his remark a. s of no doubt' तस्य वचनं न संदेहास्पदं; 'her illness a. s of no delay' तस्या विकारो विलंबाक्षमः.-ADMISSION, *s.* प्रवेशनं, प्रवेशः. 2 अभ्युपगमः, अंगीकारः, प्रतिपत्ति *f.* -ADMISSIBLE, *a.* उपादेय, स्वीकरणीय, ग्राह्य.-ADMITTANCE, *s.* प्रवेशः-शनं.

ADMIX, *v. t.* संमिश्र् 10, संयुज् 7 U, 10, संकृ 6 P.-TURE, *s.* मिश्रणं, संकरः.

ADMONISH, *v. t.* उपदिश् 6 P, अनुबुध् c., विज्ञा c. (ज्ञापयति), अनुशास् 2 P. 2 निर्भर्त्स् 10 A, उपालभ् 1 A, *See* CENSURE. -ER, *s.* उपदेशकः, अनुबोधकः.-ADMONITION, *s.* अनुबोधनं, उपदेशः, अनुशासनं; उपालंभः.

ADO, *s.* श्रमः, दीर्घायासः.

ADOLESCENCE, *s.* यौवनदशा, यौवनं. -ADOLESCENT, *a.* युवन् (यूनी *f.*), प्राप्तयौवन.

ADOPT, *v. t.* परिग्रह् 9 P, पुत्रीकृ 8 U. 2 ग्रह्, स्वी-अंगी-कृ, अनुवृत् 1 A. -ED, *a.* परिगृहीत, स्वी-अंगी-कृत; 'a. son' कृतकः पुत्रः, दत्रिमः सुतः, दत्तकः; 'a. daughter,' कृतिका दुहिता, अपत्यकृतिका. -ION, *s.* परिग्रहः, पुत्रीकरणं. 2 अंगी-स्वीकारः, अनुवर्तनं.

ADORE, *v. t.* आराध् c., नमस्यति (D.), नमस्कृ 8 U, अर्च् 1 P, or c., पूज् 10, उपस्था 1 U, उपास् 2 A. -ATION, *s.* पूजा, अर्चनं, नमस्कारः. -ER, *s.* पूजकः, उपासकः, आराधकः, भक्तः, अर्चकः.

ADORN, *v. t.* वि-,भूष् 10, अलंकृ 8 U, परिष्कृ, संस्कृ, मंड् 10, प्रसाध् c., शुभ् c. -ING, *s.* अलंकारः, भूषणं, प्रसाधनं, मंडनं.

ADRIFT, *adv.* इतस्ततः प्लवमान *a.* 2 अशरण-अनाथ-निरालंब-*a.*

ADROIT, *a.* निपुण, दक्ष, धूर्त, चतुर. -LY, *adv.* सनैपुण्यं, चतुरं &c. -NESS, *s.* नैपुण्यं, दक्षता, &c.

ADULATION, *s.* चाटूक्ति *f*, अतिप्रशंसा, श्लाघा, स्तुतिपूर्वकः अनुनयः, स्तवोक्तिः, अतिस्तुति *f.* -ADULATORY, *a.* चाटूक्तिपूर्ण, प्रशंसागर्भ, अतिप्रशंसायुक्त.

ADULT, *s.* प्रौढः, प्राप्तयौवनः, प्राप्तव्यवहारदशः, युवन् *m.*

ADULTERATE, *v. t.* अपद्रव्येण संमिश्र् 10, अशुद्धीकृ 8 U. -ION, *s.* दूषणं, मिश्रणं.

ADULTERY, *s.* व्यभिचारः; पारदार्यं, परभार्यालंघनं; (of a woman) परपुरुषसंगति *f.*, पतिलंघनं. -ADULTERER, *s.* परस्त्रीगामिन् *m*, पारदारिकः भुजंगः, विटः, जारः. -ADULTERESS, *s.* व्यभिचा-

रिणी, जारिणी, पुंश्चली, परपुरुषसंगता, बंधकी. —ADULTERINE, *s.* जारजः.

ADUMBRATION, *s.* प्रतिच्छाया, प्रतिबिंबं. 2 पांडुलेख्यकरणं.

ADVANCE, *v. i.* प्र-उत्-चल् 1 P, प्र-अभि-या 2 P, अभिमुखं या, or -गम्-व्रज् 1 P, प्रगम्, प्रस्था 1 A; शत्रोरभिमुखं याति 'a. s against the enemy.' 2 वृध् 1 A, प्र-उप-चि pass., उन्नतिं या, उत्कर्षं या; 'a. ed some steps to receive' सादरमभिमुखदत्ताविरलपदः (Ka.95); 'a. ed in age' परिणतवयस्, वयोवृद्ध, प्रवयस्; 'a. ed in knowledge' ज्ञानवृद्ध.—*v. t.* उच्चल् c., पुरस्कृ 8 U, अग्रे नी 1 P. 2 वृध् c., परिपुष् 4 P. 3 उपक्षिप् 6 P, उपन्यस् 4 P, पुरो निधा 3 U. 4 प्राक् दा 3 U. —*s.* उच्चलनं, प्रगमनं, प्रयाणं. 2 उन्नति *f.*, क्रमशो वृद्धि *f.*, उत्कर्षः, वर्द्धनं; 'price of a book in a.' पुस्तकप्रकाशनात्पूर्वं दत्तं मूल्यं. —MENT, *s.* उत्कर्षः, उन्नति *f.*, अभ्युदयः, वृद्धि *f.*, आगमः, उपचयः; 'a. in knowledge' विद्यागमः; 'a. of learning' ज्ञानोत्कर्षः.

ADVANTAGE, *s.* लाभः, हितं, गुणः, फलं, अर्थः. 2 अवसरः, अवकाशः. 3 आधिक्यं, उत्कर्षः; taking a. of my weak point' मम छिद्रेण लब्धावकाशः; 'show or set off to a.' लक्ष्मीं-शोभां-तन् 8 U, *See* ADD; 'they had an a. over their enemy in bravery' शौर्ये ते शत्रुभ्योऽत्यरिच्यंत. —*v. t.* उपकृ 8 U, अनुग्रह् 9 P, लाभाय भू. —OUS, *a.* फलद, हितावह, लाभकर, हितकर (री *f.*). —OUSLY, *adv.* सफलं, सलाभं. 2 सावकाशं.

ADVENT, *s.* आगमनं, प्रवृत्ति *f.*; 'a. of spring' वसंतसमयावतारः, मधुप्रवृत्तिः. —ITIOUS, *a.* बाह्य, औपाधिक-आगंतुक (की *f.*), आहार्य.

ADVENTURE, *s.* साहसं, अद्भुतं कर्म. 2 दैवाधीनं कर्मचेष्टितं. 3 वृत्तांतः, चरितं, चेष्टा, चेष्टितं, क्रिया. —*v. i.* दैवाधीनं कर्म कृ 8 U. 2 साहसेन व्यवसो 4 P or प्रयत् 1 A. —ER, *s.* साहसिकः, साहसव्यवसायिन् *m.* —OUS, *a.* साहसिक (की *f.*), प्रगल्भ, निर्भय. 2 संदिग्ध, दैवायत्त.

ADVERB, *s.* क्रियाविशेषणं, अव्ययं.

ADVERSE, *a.* प्रतिकूल, विपक्ष, वैरिन् (णी *f.*), विपरीत, वाम, विरुद्ध, पराङ्मुख (खी *f.*). —ARY, *s.* शत्रुः, अरिः, *See* ENEMY. —ITY, *s.* विपद् *f.*, आपद् *f.*, विपत्ति *f.*, आपत्कालः, व्यसनं, दुःखं.

ADVERT (to), *v. i.* उदाहृ 1 P, अनुलक्ष् 10; अधिकृत्य-उद्दिश्य-वद् 1P or वच् 2 P. 2 अव-सं-ईक्ष् 1A, मनः समाधा 3 U, अवधा, अवधानं दा 3 U. —ENCE, *s.* अवधानं, अवहितता, मनोयोगः, अवेक्षा.

ADVERTISE, *v. t.* विज्ञा c. (ज्ञापयति), निविद् c., प्रकाश् c., बुध् c., वि-उद्-घुष् 10. —ER, *s.* प्रकाशकः, ज्ञापकः. —MENT, *s.* विज्ञापना, घोषणा.

ADVISE, *v. t.* उपदिश् 6 P, अनुशास् 2 P. 2 बुध् c., निविद् c., ज्ञा c. (ज्ञापयति). —*v. i.* विचर् c., आलोच् 10.—ABLE, *a.* उचित, योग्य, युक्त. 2 उपदेष्टव्य. —EDLY, *adv.* सुविचारतः, ज्ञानतः, बोधपूर्वं. 2 सावधानं, अवधानेन. —ER, *s.* उपदेशकः, उपदेष्टृ *m.* 2 सचिवः, अमात्यः, मंत्रिन् *m.* —ADVICE, *s.* उपदेशः, अनुशासनं, बोधनं. 2 समाचारः, वार्ता.

ADVOCATE, *v. t.* परार्थं वद् 1 P, पक्षं समर्थ् 10 or रक्ष् 1 P. —*s.* परार्थं वक्तृ *m*, पक्षसमर्थकः, वक्तृ *m.* 2 आश्रयः, रक्षकः, प्रतिपालकः.

ADZE, *s.* कुठारिका, तक्षणी.

AERIAL, *a.* *See* under AIR.

AFAR, *adv.* दूरात्, आरात्; दूरे-रं; 'a. off' दूरस्थ *a.*

AFFABLE, *a.* सुजन, सुशील. 2 मधुरालाप, प्रियवादिन् (नी *f.*). —AFFABILITY, *s.* मधुरालापता, सुशीलत्वं, सौजन्यं, प्रश्रयः. —AFFABLY, *adv.* चाटूक्त्या, मृदुवचनेन, सुजनवत्, सप्रश्रयं.

AFFAIR, *s.* कार्यं, व्यापारः, कर्मन् *n.*, अर्थः.

AFFECT, *v. t.* (To act upon) अभिभू 1 P, आकुलीकृ 8 U, उपहन् 2 P, विकृ, उपसृज् 6 P, संस्कृ; क्लेशलेशैरभिन्नं (S. 2) 'not a. ed by the slightest fatigue'; 'a. ed by a devil' वेतालोपहत; 'a. ed with many diseases' अनेकव्याध्युपसृष्ट; 'our position is not in the least a. ed (it does not a. us in the least)' न नः किंचिच्छिद्यते (S. B. 345). 2 (Pretend) Ex. by छद्म-छलं कृ, मिथ्या in comp., by कृतक-कृत्रिम-*a.* कृ; 'a. ing a quarrel or anger' कृतककलहं-कोपं-कृत्वा. 3 आकुलीकृ, आर्द्रीकृ, द्रु c.; अवकाशं-पदं-ग्रह् 9 P; 'my words a. ed his heart' मम वचसा तस्य हृदयं द्रवीभूतं, मम वचस्तस्य हृदये दृढं पदं लेभे. 4 मन् 4 A; 'he a. s learning' पंडितंमन्योसौ. —ATION, *s.* अहंकारः, आटोपः; मिथ्यागौरवं. 2 छद्मन् *n.*, *See* PRETEXT. 3 विलासः, अभिनयः, हावः.—ED, *a.* आकुल, अभिभूत, उपहत, विकृत. 2 मिथ्या in comp.; कृतक, कृत्रिम; 'by an a. courage' मिथ्याप्रतापमात्मन्यारोप्य. 3 अहंकारिन् (णी *f.*), मानिन् (नी *f.*), सदर्प.—EDLY, *adv.* साहंकारं, साटोपं.—ING, *a.* करुण, मर्मभेदिन् (नी *f.*). —INGLY, *adv.* करुणं. —ION, *s.* प्रेमन् *m. n.*, अनुरागः, स्नेहः, प्रणयः, प्रीति *f.*, वात्सल्यं, (with loc.). 2 धर्मः, संस्कारः, विकारः, अनुभावः, वृत्ति *f.*, भावः, विक्रिया, रागः.—IONATE, *a.* स्निग्ध, स्नेहशील, प्रणयिन् (नी *f.*), सप्रणय, सानुराग, वत्सल.—IONATELY, *adv.* सप्रेमं, सस्नेहं, स्निग्धं, सानुरागं.

AFFIANCE, *v. t.* प्रतिश्रु 5 P, वाचा दा 3 U.—*s.* वाग्दानं. 2 विश्वासः, श्रद्धा.

AFFIDAVIT, *s.* शपथपत्रं, सशपथं लिखितो लेखः.
AFFILIATE, *v. t.* संश्लिष् c., संयुज् 10.
AFFINITY, *s.* संबंधः, संपर्कः, योगः. 2 बंधुता-त्वं, सादृश्यं, साम्यं.
AFFIRM, *v. t.* प्रतिज्ञा 9 A, वद् 1 P, वच् 2 P, उपक्षिप् 6 P, उपन्यस् 4 P. 2 सनिश्चयं वद्, तथेति दृढं ब्रू 2U. 3 दृढीकृ 8U, निश्चित *a.* कृ, प्रमाणीकृ.–ATION, *s.* उक्ति *f*, दृढवचनं, प्रमाणीकरणं, सनिश्चयं वचनं. 2 प्रतिज्ञा, पक्षः. – ATIVE, *a.* स्वीकार-अंगीकार-द्योतक-सूचक ; 'two negatives make one a.' द्वौ नञौ प्रकृतार्थं गमयतः. 2 पक्षानुकूल.
AFFIX, *s.* आगमः. – *v. t.* अनुबंध् 9 P, सं-आ-युज् 7U, 10.
AFFLICT, *v. t.* क्लिश् 9 P, दु 5P, परि-सं-तप् c., व्यथ् c. (व्यथयति), पीड् 10, बाध् 1 A, आयस् c. – ED, *a.* आर्त, दुःखित, अभिभूत, पीडित, आतुर. 'to be a. for' तम् 4 P, पर्युत्सुक *a.* भू. –ION, *s.* क्लेशः, बाधा, पीडा, कष्टं, व्यथा, दुःखं. –ING,–IVE *a.* क्लेशावह, व्यथाकर (री *f.*).
AFFLUENCE, *s.* समृद्धि *f.*, सधनता, धनबाहुल्यं. –AFFLUENT, *a.* समृद्ध, धनाढ्य, बहु-महा-धन; 'a. circumstances' सधनता, सुस्थिति *f.* 2 एकस्थानं प्रति प्रवाहक.–AFFLUX, *s.* एकस्थाने प्रवाहः.
AFFORD, *v. t.* दा 3 U. 2 (To be able) शक् 5 P, समर्थ-क्षम-*a.* भू 1 P.
AFFRAY, *s.* कलहः, द्वंद्वं, युद्धं.
AFFRIGHT, *v. t.* संत्रस् c., भी c. (भापयते-भीषयते), उद्विज् c.–*s.* भयं, सं-,त्रासः, साध्वसं.
AFFRONT, *s.* अवज्ञा, निकृति *f.*, अपमानः, तिरस्कारः, मानभंगः.–*v. t.* (संमुखं-प्रत्यक्षं) अवज्ञा 9 U, अवमन् 4 A, अधिक्षिप् 6 P, तिरस्कृ 8 U.
AFFUSION, *s.* आसेकः.
AFLOAT, *a.* प्लवमान; 'a rumour is a.' वार्ता प्रसृता.
AFOOT, *adv.* पद्भ्याम् ; 'set a.' प्रारभ् 1 A, *See* BEGIN; 'the army is a.' प्रचलितं सैन्यं; 'going a.' पादग, पादचारिन्.
AFORE, *adv.* अग्रे, पुरः, संमुखं. 2 पूर्वं, पुरा, गतकाले; 'a. said' पूर्वोक्त, प्रागुक्त.
AFRAID, *a.* भीत, भयान्वित, शंकान्वित; 'to be a.' त्रस् 1, 4 P, भी 3 P, (with abl.). 2 आ-शंक् 1 A, मन् 4 A.
AFRESH, *adv.* पुनरपि, अभिनवं.
AFTER, *prep.* अनु pr. to roots, पश्चात्; 'to go a.' अनुगम्, अनुसृ, 1 P. 2 (of time) परं, अनंतरं, ऊर्ध्वं, (with abl.); 'a. that,' तस्मात्परं, तदूर्ध्वं; 'a. one another' आनुपूर्व्येण, अनुपूर्वशः; 'a. 10 years' दशवर्षे व्यतीते; 'a. eating' भोजनानंतरं; पश्चात् (gen.), अनु in comp.; 'a. a few days' दिनेषु गच्छत्सु; by gerund, or पूर्वकं in comp.; (अनामयप्रश्नपूर्वकं S. 5); 'he waters tree a. tree' वृक्षं वृक्षं सिंचति; 'in a. time' आगामिकाले, उत्तरकाले. 3 अनुसारेण-सारतः, अनुरूपं; 'you write a. his hand' लेखने तस्यानुकरोषि; 'he is called a. his grandfather' स पितामहनाम्नाऽभिधीयते-आहूयते ; *See* NAME. In comp. e. g. 'a.-ages,' ex. by उत्तर; 'a.-ages' उत्तरकालः; पुत्रपौत्राः; 'a.-inquiry,' उत्तरजिज्ञासा ; 'a.-crop' शस्यस्य द्वितीयसंग्रहः; 'a.-life' आयुःशेषः, उत्तरवयस् *n.*; 'a. noon' *s.* अपराह्णः, पराह्णः, विकालः;(*a.*) अपराह्णतन (नी *f.*), वैकालिक (की *f.*); 'a. all' अंते, शेषे; 'a.-wards' पश्चात्, अनंतरं, ततः परं, परं.
AGAIN, *adv.* पुनः, भूयः; 'a. and a.' भूयो भूयः, वारंवारं ; 'as much a.' द्विगुण *a.* 2 अपरं च, अन्यच्च, अपि च. 3 (With verbs) by प्रति pr.
AGAINST, *prep.* प्रति-अभि pr. to nouns ; प्रतिवातं 'a. the wind' &c. 2 अभिमुखं, प्रतिमुखं, संमुखं, in comp. or with gen. 3 विरुद्धं, प्रतिकूलं, or by अतिक्रम्य; 'a. my order' मम शासनस्य विरुद्धं, शासनमतिक्रम्य-उल्लंघ्य ; 'assist him a. his brother' भ्रातरि बद्धवैरस्य तस्य साहाय्यं कुरु. 4 अर्थे, अर्थं; आपदर्थे धनं रक्षेत् 'should lay by wealth a. (as a provision for) calamities.'
AGAPE, *a.* जृंभमाण; 'with eyes a. with astonishment' विस्मयोत्फुल्ललोचन.
AGE, *s.* युगं, कालः, समयः. 2 वयस् *n.*; 'a. of the world' कल्पः; 'old a.'; वृद्धत्वं, वार्धक्यं, वृद्धभावः, परिणतं वयः; 'come of a.' प्राप्तव्यवहार ; 'of the same a.' समकालीन, समानवयस्क ; 'of age' ex. by वर्षीय *a.* वर्षात्मक *a.* ; '5 years of a.' पंचवर्षीय-वर्षात्मक; 'about 8 years of a.' अष्टवर्षदेशीय ; 'a. of majority' यौवनदशा, यौवनावस्था; 'he reached the 16th year of his a.' षोडशवर्षवयोवस्थामस्पृशत्. –ED, *a.* वृद्ध, जीर्ण, पुराण.
AGENT, *s.* प्रतिहस्तः, प्रतिनिधिः. 2 (in grammar) कर्तृ *m.*; कारकः, कारः in comp. 3 हेतुः, कारणं, साधनं; शक्ति *f.* –AGENCY, *s.* कर्तृत्वं, निर्मातृत्वं; 'the action was done through his a.' तत्कर्तृका क्रिया, तस्य साहाय्येन संपादिता क्रिया. 2 कारणं. 3 नियोगपदं, नियोज्यत्वं.
AGGLOMERATE, *v. t.* संचि 5 U, एकत्र-राशी-कृ 8 U.
AGGLUTINATE, *v. t.* संयुज् 10, संश्लिष् c., संलग्न *a.* कृ 8 U, संसंज् c.
AGGRANDIZE, *v. t.* वि-सं-प्र-वृध् c., आप्ये c., एध् c., स्फाय् c. (स्फावयति), उत्कृष् 1 P, उपचि 5 U. –MENT, *s.* विवृद्धि *f.*, उन्नति *f.*, अभ्युदयः, उत्कर्षः, उपचयः, उदयः.

Aggravate, *v. t.* वृध् c., उपचि 5 U, प्रवृद्धिं नी 1 P. 2 प्रकुप् c., संक्षुभ् c., उद्दीप् c. –ion, *s.* वृद्धि *f.*, उपचयः. 2 प्रकोपनं-णं, उद्दीपनं.

Aggregate, *s.* संग्रहः, समाहारः, राशिः, समूहः, समुदायः.–*v. t.* संग्रह् 9 P, राशीकृ 8 U, संचि 5 U, एकत्र कृ. –ed, *a.* एकीकृत, समुदित, संचित, समाहृत. –ion, *s.* संग्रहणं, राशीकरणं. 2 समूहः, *See* (*s.*) above.

Aggress, *v. i.* (प्रथमं) आक्रम् 1 U, 4 P, लंघ् 1 A, 10, हिंसारंभं कृ 8 U. –ion, *s.* आ-अतिक्रमः, लंघनं. 2 प्रथमापकारः, हिंसारंभः. –ive, *a.* प्रथमापकारिन् (णी *f.*); 'a. step' हिंसारंभः, प्रथमाक्रमः. –or, *s.* प्रथमापकारकः, आक्रामकः.

Aggrieve, *v. t.* अर्द् 1 P or c., दुःखाकुलीकृ 8 U, *See* Afflict.

Aghast, *a.* सत्रास, भयाभिभूत. 2 विस्मयाकुल, आश्चर्यचकित.

Agile, *a.* लघु, चपल, लघुशरीर.

Agitate, *v. t.* सं-वि-प्र-क्षुभ् c., आकुलीकृ 8 U, उद्विज् c.; धू 5, 9 U, प्रमंथ् 9 P, विलुड् c. (water). 2 Discuss, q. v.–ed, *a.* क्षुब्ध, विह्वल, आकुल, विक्लव, पारिप्लव. 2 प्रमथित, विलोडित; 'to be a.', क्षुभ् 4, 9 P, 1 A, विह्वल &c. भू. –ion, *s.* संक्षोभः, उद्वेगः, उपप्लवः, आकुलत्वं. 2 विलोडनं. 3 विचारणा, वादानुवादः. –or, *s.* क्षोभकः.

Agnate, *a.* संबंधिन् (नी *f.*), संबद्ध.

Ago, *adv.* पूर्वं, प्राक्, (with abl.); 'long a.' पुरा; 'not long a.' नातिचिरात्प्राक्, अनतिपूर्वं.

Agony, *s.* व्यथा, यातना, वेदना, संतापः; 'in the a. es of death' मृत्युवेदनाभिभूत ; 'sharp a.' तीव्रयातना-वेदना &c. –ize, *v. i.* व्यथ् 1 A.–*v. t.* Afflict, q. v.

Agrarian, *a.* भूमिविषयक, क्षेत्रसंबंधिन् (नी *f.*).

Agree, *v. i.* संमन् 4 A, तथा-एवं-मन् ; 'I don't a. with you' नैवमहं मन्ये. 2 एकचित्तीभू, एकमत *a.* भू; 'birds in their nests a.' स्नेहभावेनैकत्र वसंति ; 'they all a. on this point' अस्मिन्विषये सर्वेषां तेषामैकमत्यम्. 3 ग्रह् 9 P, स्वीकृ 8 U, अनुमन् 4 A, अनुज्ञा 9 U. 4 संक्लृप् c., समयं-संविदं-कृ, प्रतिपद् 4 A, अभ्युप-इ 2 P or गम् 1 P, प्रतिश्रु 5 P. 5 आरोग्याय क्लृप् 1 A, हिताय भू, हितमावह् 1 P; '(living in) Bombay does not a. with my health' मुंबापुरनिवासो ममारोग्याय न कल्पते. 6 Resemble, q. v. –able, *a.* रम्य, सुख in comp. (सुखस्पर्शता शिलाविशेषस्य M. 4); मनोज्ञ, प्रिय, सूनृत, अभिमत, सुभग. 2 अनुरूप, योग्य, तुल्य, सदृश (शी *f.*) –ably, *adv.* यथासुखं. 2 अनुरूपं, अनुसारतः; 'a. to one's nature' सत्त्वानुरूपं. –ment, *s.* समयः, संविद् *f.* 2 ऐक्यं, संमति *f.*, ऐकमत्यं. 3 सादृश्यं, संवादः. 4 अभ्युपगमः, स्वीकारः, प्रतिपत्ति *f.*

Agriculture, *s.* कृषि *f.*, कर्षणं ; 'science of a.' कृषिकर्मविद्या. –Agriculturist, *s.* कृषीवलः, कर्षकः, कृषिजीविन् *m.*, क्षेत्रिन् *m.* 2 वैश्यः, विश *m.*

Aground, *adv.* तटस्थ *a.*, उत्तीरं.

Ague, *s.* कंप-शीत-ज्वरः, विषमः ; 'tertian a.' त्र्याहिकविषमः; 'quartan a.' चातुर्थिकविषमः.

Ah, *interj.* आः, हंत, हा, अहो, अहह.

Ahead, *adv.* अग्रे, पुरतः, पुरः. 2 अधोमुख, अवाक्शिरः.

Ajar, *adv.* अर्धविवृत *a.*

Aid, *v. t.* उपकृ 8 U, साहाय्यं कृ (with gen.). –*s.* साहाय्यं, उपकारः. 2 सहायः, उपकारकः. –less, *a.* असहाय. *See* Help.

Ail, *v. t.* पीड् 10; दु 5 P, तप् c.; 'what a. s thee' किं त्वां व्यथयति or का ते पीडा. –ing, *a.* पीडित, क्षुद्ररोगपीडित. –ment, *s.* पीडा, आतंकः. 2 क्षुद्ररोगः-व्याधिः.

Aim, *v. t.* लक्षीकृ 8 U, उद्दिश् 6 P, संधा 3 U; 'well a. ed arrow' साधुकृतसंधानः शरः (S. I). 2 आप् desid. (ईप्सति), आकांक्ष् 1 P, लभ् desid. (लिप्सते); 'a. ed at the crown' राजपदं लिप्सांचक्रे &c. 3 लक्ष्यं प्रति क्षिप् 6 P or अस् 4 P. –*s.* लक्ष्यं-क्षं, शरव्यं. 2 संधानं; 'taking a.' शरसंधानं कुर्वन्. 3 अभिप्रायः, आशयः, वांछा, कांक्षा, हेतुः, चिकीर्षितं; 'friend, where are you going without any definite a.' हला क्वानिर्दिष्टकारणं गम्यते (V. 2).

Air, *s.* व्योमन् *n.*, आकाशः, नभस् *n.*, विहायस् *n.*; 'to take the a.' वातमासेव् 1 A; 'take a.' प्रकाशतां गम् 1 P. 2 वायुः, वातः, समीरणः. 3 तालः, रागः, मूर्छना. 4 रूपं, आकारः, मुद्रा; 'with a dignified a.' सगौरवाकारेण ; 'a. of conceit' अवलेपमुद्रा ; 'with the a. of one who is offended' निकृतमिवात्मानं संदर्श्य. 5 गति *f.*, विधिः, प्रकारः, रूपं ; 'through a.' विहायसा, नभोवर्त्मना ; 'to build castles in the a.' गगनकुसुमानि चि 5 U; 'a. balloon' आकाशयानं, व्योमयानं ; 'a. bladder' वायुकोषः; 'a. hole' वातायनं, गवाक्षः, जालं; 'a. born', 'aerial', आकाशज ; आकाशस्थ, नभःस्थ. –y, *a.* वायव (वी *f.*), वायुमय (यी *f.*). 2 सुवात, प्रवात; 'a. place' प्रवातं; प्रवातशयनं 'a bed in an a. place (in the current of wind)'. 3 असार, फल्गु, खपुष्पवत् *ind.* –Aeronaut, *s.* वैमानिकः.

Akin, *a.* सगोत्र, सनाभि, सजातिय. 2 सदृश (शी *f.*), समान, संबंधिन् (नी *f.*).

Alack, *See* Alas.

ALACRITY, *s.* औत्सुक्यं, उत्साहः. 2 शीघ्रत्वं, क्षिप्रता, अविलंबः.

ALARM, *s.* त्रासः, शंका, भयं, साध्वसं. 2 सान्नहनिकं. 3 भयध्वनिः, भयाक्रंदनं ; 'a. bell' भयसूचको घंटानादः. -*v. t.* प्राक् सूचनां दा 3 U. 2 भी c., संत्रस् c, उद्विज् c. -ED, *a.* भीत, उद्विग्न, भयार्त, चकित. -ING, *a.* भयावह, उद्वेगकर (री *f.*), त्रासजनन (नी *f.*), भयप्रद. -IST, *s.* भयोत्पादकः. -ALARUM, *s.* सान्नहनिकं, भयध्वनिः, प्रबोधनघंटा.

ALAS, *interj.* कष्टं, हा, हंत, हा धिक्, अहह, अहो बत. 2 अत्याहितं, अब्रह्मण्यं.

ALBEIT, *adv.* यद्यपि.

ALBUGO, *s.* शुक्रं ; चक्षूरोगः.

ALCHEMY, *s.* रसविद्या, रससिद्धि *f.*-ALCHEMIST, *s.* रसायनविद् *m.*, रसज्ञः.

ALCOHOL, *s.* मद्यसारः.

ALCOVE, *s.* कुंजः, पर्णशाला, निभृतस्थानं.

ALDERMAN, *s.* पुराध्यक्षः ; वृद्ध-गुरु-जनः.

ALE, *s.* यवसुरा-रं, मद्यं; 'a. house, ' शुंडा, पानं ; 'keeper of an a. house' शौंडिकः.

ALERT, *a.* जागरूक, दक्ष, सावधान, अवहित, अतंद्र, उद्यमिन्-उद्योगिन् (नी *f.*). -NESS, *s.* जागरूकता, अवधानं, दक्षता.

ALGEBRA, *s.* बीजगणितं. -ICAL, *a.* बीजविषयक.

ALIEN, *a.* विदेशीय, अन्यदेशीय. 2 विरक्त ; विरुद्ध, भिन्न, अप्रस्तुत. -ATE, *v. t.* (affection) विघट् c., विश्लिष् c., विनश् c., विभिद् 7 P or c., विच्छिद् 7 P or c. 2 (person) विरंज् c., वि-अप-रक्त *a.* कृ 8 U. 3 पराधीन *a.* कृ, परस्वत्वे प्रतिपद् c. -ATION, *s.* विघटनं, विरागः, विरक्ति *f.*

ALIGHT, *v. i.* अवतॄ 1 P, उपविश् 6 P, अव-निपत् 1 P.

ALIKE, *a.* सदृश (शी *f.*), तुल्य, समान, सम.

ALIMENT, *s.* आहारः, भोजनं, पौष्टिकं. -AL, -ARY, *a.* पोषक, पुष्टिप्रद, शक्तिवर्धन (नी *f.*). -ATION, *s.* पोषणं, भरणं.

ALIVE, *a.* जीवत् (न्ती *f.*), सजीव, सचेतन ; 'I caught him a.' जीवग्राहमग्रहीषं (D. K. II. 4). 2 अभिज्ञ (with gen.), or विद् 2 P, *See* KNOW.

ALKALI, *s.* क्षारः, सर्जिका, *See* NATRON. -ALKALINE, *a.* क्षारस्वभाव, क्षारविशिष्ट.

ALL, *s.* सर्वं, अखिलं, साकल्यं. - *a.* सर्व-विश्व, *pron. a.*, अखिल, सकल, कृत्स्न, निखिल, समस्त ; 'not at a.' न किमपि, न मनागपि ; 'at a. times' सर्वदा; 'a. but' प्राय, कल्प, in comp.; 'a. but dead' मृतप्राय ; छिन्नप्राय 'a. but cut'; 'a. of a sudden' अकस्मात्, सहसा, सपदि, एकपदे; 'this is not a.' एतावतापि दोषो &c. न समाप्यते; 'a. I can' यथाशक्ति, यथासामर्थ्यं; 'this is a. I can do to serve you' एतावान्मे विभवो भवंतं सेवितुं (M. 2); 'by a. means' सर्वथा ; 'a.-in-a. of one's life' जीवितसर्वस्वं ; 'a. at once' युगपत् ; 'a. round' सर्वतः, सर्वदिक्षु, समंततः ; 'in a.' साकल्येन, पिंडीकृत्य, मिलित्वा ; 'give me 20 rupees in a.' एवं पिंडीकृत्य मह्यं विंशतिं रूप्यकान्देहि; सर्वे मिलित्वा सप्त वयं 'we are 7 in a.'; 'a.-bearing' सर्वसह ; 'a.-conquering' सर्वदमन, सर्वंजय, सर्वंदम ; 'a.-destroying' सर्वंकष ; 'a.-knowing' सर्वज्ञ, सर्वविद् ; 'a.-pervading' सर्वव्यापिन् (नी *f.*), विश्वात्मन्, सर्वगत ; 'a. powerful' सर्वशक्तिमत् (ती *f.*).

ALLAY, *v. t.* प्र-उप-शम् c. (शमयति), नियम् c.; निर्वा c. (वापयति); 'a. ing of heat' निर्वापणं. 2 सांत्व् 10, तुष् c.-ER, *s.* शमकः, शांतिदः-करः. -MENT, *s.* प्रशमनं, सांत्वनं ; 'a. of hunger' क्षुत्प्रतीकारः.

ALLEGE, *v. t.* प्रतिज्ञा 9 A, वद् 1 P, दृढं ब्रू 2 U; 'the charges a. ed against me' मयि समारोपिता दोषाः. 2 छद्म कृ 8 U, व्यपदिश् 6 P, मिथ्या वद्. 3 उदाहृ 1 P. -ATION, *s.* प्रतिज्ञा, उक्ति *f.*, वचनोपन्यासः. 2 दोषारोपः, मिथ्याभियोगः. 3 व्यपदेशः, छद्मन् *n.*, व्याजः.

ALLEGIANCE, *s.* निष्ठा, भक्ति *f.*, अनुरागः; 'a. to the king' राजनिष्ठा.

ALLEGORY, *s.* रूपकं, दृष्टांतः. -ICAL, *a.* लाक्षणिक (की *f.*), रूपकमय (यी *f.*). -ICALLY, *adv.* दृष्टांततः, दृष्टांतेन. -IZE, *v. t.* दृष्टांतयति (D.), रूपकेण दृश् c.

ALLEVIATE, *v. t.* उप-प्र-शम् c., नियम् c., सांत्व् 10 ; निर्वा c. (वापयति), लघयति (D.), लघूकृ. -ION, *s.*उप-प्र-शमः, निर्वापणं ; 'a. of sorrow' दुःखनिर्वापणं. -IVE, *a.* शांतिद, शमक.

ALLEY, *s.* उद्यानपथः, वीथि-थी *f.* 2 दुर्गममार्गः, संबाधपथः.

ALLIGATE, *v. t.* सं-अनु-बंध् 9 P. -ION, *s.* संबंधः, संयोजनं.

ALLIGATOR, *s.* नक्रः, ग्राहः.

ALLITERATION, *s.* अनुप्रासः.

ALLOT, *v. t.* परिक्लृप् c., दा 3 U, विभज् 1 U. -MENT, *s.* विभागः, विभजनं. 2 अंशः, भागः.

ALLOW, *v. t.* अनुज्ञा 9 U, अनुमन् 4 A, अनुमुद् 1 A. 2 Give, q. v. 3 ग्रह् 9 P. *See* ADMIT. 4 उप-ईक्ष् 1 A, विषह् 1 A ; स कस्मादार्येणापक्राम-न्नुपेक्षितः (Mu. 3); 'I a. my feet to be burnt' दह्यमानावपि चरणावुपेक्षे. 5 (for) न्यूनीकृ, न गण् 10.-ABLE, *a.* अनुज्ञेय, अनुमोद्य; 'a. mistake' क्षमार्होपराधः ; 'not a.' प्रति-नि-षिद्ध.

-ANCE, *s.* अनुज्ञा, अनुमति *f.*, अनुमोदनं. 2 वेतनं, निरूपितमूल्यं, वृत्ति *f.* 3 स्वीकारः; न्यूनीकरणं.

ALLOY, *s.* मिश्रणं, दोषः, न्यूनता. 2 अपद्रव्यं, कुप्यं, मिश्रधातुः. -ED, *a.* मिश्रित, दूषित ; 'un-a. pleasure' केवलं-दुःखासंभिन्नं-सुखं.

ALLUDE, *v. t.* उद्दिश्य-अधिकृत्य वद् 1 P or वच् 2 P or अभिधा 3 U; उद्दिश् 6 P, सूच् 10, लक्षीकृ ; अनुसंधा ; 'this story a. s to myself' इयं कथा मामेव लक्षीकरोति (S. 7). -ALLUSION, *s.* उद्देशः, उदाहरणं, कीर्तनं ; इंगितं, सूचनं; 'in a. to' अधिकृत्य, समुद्दिश्य.

ALLURE, *v. t.* हृ 1 P, आकृष् 1 P. वि-प्र-लुभ् c. -ING, *a.* प्रलोभक, हारिन् (णी *f.*), आकर्षक; 'a. things' प्रलोभनवस्तूनि. -MENT, *s.* प्र-विलोभनं ; वंचनं, विकारहेतुः, आकर्षणं.

ALLUVIUM, *s.* पुलिनं, नदीरयसमाहृता मृत्तिका.-ALLUVIAL, *a.* पलिनमय (यी *f.*).

ALLY, *s.* मित्रं, सहायः, पक्ष्यः, सहकारिन् *m.* - *v. t.* संबंध् 9 P. 2 संधा 3 U; संयुज् 10, संश्लिष् c. -ALLIANCE, *s.* संधिः; 'friendly a.' सख्यं, मैत्री. 2 संबंधः, संपर्कः; 'matrimonial a.' विवाहसंबंधः.

ALMANAC, *s.* पंजिका, पंचांगं.

ALMIGHTY, *a.* सर्वशक्तिमत् (ती *f.*), अमितौजस् ; सर्वशक् , सर्वसमर्थ.

ALMOND, *s.* वातामफलं.

ALMONRY, *s.* भिक्षादानगृहं, भैक्ष्यशाला. -ALMONER, *s.* भिक्षादाने अधिकृतः.

ALMOST, *adv.* प्राय, भूयिष्ठ, कल्प, affixed to adj.; 'a. dead' मृतकल्प, मृतप्राय; 'when the night had a. worn away' क्षीणभूयिष्ठायां क्षपायां ; 'it is a. dawn now' अधुना प्रभातप्राया-कल्पा शर्वरी. 2 प्रायः, प्रायशः; 'a. all' प्रायः सर्वे. 3 (With num.) ex. by आसन्न, उप, in comp. ; उप-आसन्न-दशाः &c.

ALMS, *s.* भैक्ष्यं, भिक्षा, भिक्षादानं ; 'beg a.' भिक्षाटनं कृ 8 U, भिक्ष्-याच् 1 A; 'a.-giving' भिक्षादानं, त्यागः; 'a. house' अनाथगृहं, भिक्षागेहं; 'a. man' भिक्षुकः, भिक्षाशिन् *m.*

ALOE, *s.* सहा ; कुमारीरसोद्भवो बोलः.

ALOFT, *adv.* ऊर्ध्वं, उपरि; 'a. in the air' विहायसा, व्योमवर्त्मना.

ALONE, *a.* एक, अद्वितीय, एकाकिन् (नी *f.*). 2 एव, केवलं, मात्र in comp.

ALONG, *prep.* अनु in comp. or with acc.; or by instr.; 'a. the way' अनुमार्गं; 'a. the city of Ayodhyâ' अयोध्यानगरीमनु; 'a. a road' मार्गेण. 2 पुरः, अग्रे, पुरस्तात् ; 'a. with' सह, सार्धं, *See* WITH; 'all a.' आप्रथमं, प्रथमावधि; 'a. side' पार्श्वतः; समीपं-पे.

ALOOF, *adv.* दूरे, अंतरे, पृथक् ; 'standing a.' दूरस्थ; 'keep a.' पृथक् निधा 3 U, न गण् 10.

ALOUD, *adv.* उच्चैः, उच्च-तार-स्वरेण. 2 प्रकाशं, प्रउत्-मुक्तकंठं (weep a.); 'call a.' शब्दायते (D.).

ALPHABET, *s.* वर्णमाला.-ICAL, *a.* वर्णक्रमानुसारिन् (णी *f.*).-ICALLY, *adv.* वर्णक्रमेण, वर्णानुसारेण.

ALREADY, *adv.* पूर्वं, पुरा, प्राक्, with एव; sometimes by एव alone; 'the moon has a. risen' उदित एव हिमरश्मिः.

ALSO, *adv.* अपि, च. 2 अपरंच, पुनश्च, अपिच. 3 तद्वत्.

ALTAR, *s.* वेदि-दी *f.*, चैत्यं, स्थंडिलं.

ALTER, *v. t.* अन्यथा कृ 8 U, विपर्यस् 4 P, विपर्यासं नी 1 P, परिवृत् c. 2 विकृ, विरूप् 10; 'a. ed in appearance' भिन्नाकार इव लक्ष्यमाण.-*v. i.* परिवृत् 1 A, अन्यथा-अन्यरूप *a.* भू; विपर्यासं या 2 P.-ATION, *s.* परि(री)वर्तः, विकारः, विकृति *f.*, विपर्यासः.

ALTERCATE, *v. i.* विवद् 1 A, कलहायते (D.). -ION, *s.* विवादः, कलहः, वाग्युद्धं.

ALTERNATE, *a.* Ex. by पर्याय in comp.; 'a. service' पर्यायसेवा.-*v. t.* परिवृत् c.; ex. by a verb with पर्यायेण.-ION, *s.* विपर्ययः, परिवृत्ति *f.*, पर्यायः. -IVE, *s.* विकल्पः, पक्षः, पक्षांतरं; gen. ex. by words like गतिः, शरणं &c.; 'there is no other a.' अन्या गतिर्नास्ति, अन्यच्छरणं नालोक्यते (Ka. 152).2 विकल्पः, विभाषा (in grammar). -LY, *adv.* पर्यायेण, यथाक्रमं.

ALTHOUGH, *conj.* यद्यपि, अपि.

ALTITUDE, *s.* उच्चत्वं, उच्छ्रायः, उत्सेधः.

ALTOGETHER, *adv.* सर्वथा, सर्वतः, अशेषतः, साकल्येन. 2 सहित-संहत-एकीकृत-*a.* ; समं, एकीकृत्य.

ALUM, *s.* स्फटी, तुवरी, सौराष्ट्री, स्फाटिकी.

ALWAYS, *adv.* सदा, सर्वदा, अनिशं, सततं, सर्वकालं, निरंतरं, अनवरतं.

AMAIN, *adv.* प्रसभं, प्रसह्य, बलात्, सवेगं, जवेन.

AMALGAM, *s.* कांस्यं, मिश्रधातुः, पारदसंसृष्टधातुः. -ATE, *v. t.* संमिश्र् 10. 2 संयुज् 10, एकीकृ 8 U, संश्लिष् c.-ATION, *s.* धातुसंमिश्रणं. 2 संयोजनं, संयोगः, संमेलनं.

AMANUENSIS, *s.* लेखकः, लिपिकारः.

AMARANTH, *s.* अम्लानपुष्पं. 2 अम्लानः, महासहा.

AMASS, *v. t.* संचि 5 U, संग्रह् 9 P, संभृ 3 U, राशी-एकी-कृ 8 U.-MENT, *s.* संचयः, संग्रहः, &c.

AMATORY, *a.* कामिन् (नी *f.*), प्रेमशील, शृंगारप्रिय.

AMAZE, *v. t.* विस्मि c. (विस्माययति, विस्मापयते), विस्मयाकुल-साश्चर्य-*a.* कृ 8 U. -ED, *a.* विस्मापित, विस्मित, विस्मयाकुल, साश्चर्य. -MENT, *s.* विस्मयः, आश्चर्यं, विस्मयाकुलत्वं. - EDLY, *adv.* सविस्मयं; सा-

अर्थ. -ING, *a.* विस्मयकारिन् (णी *f.*), विचित्र, अद्भुत. 2 अतिरिक्त; अति pr.

AMBAGES, *s.* वक्रोक्ति *f.*

AMBASSADOR, *s.* दूतः, राजदूतः, प्रणिधिः, संदेशहरः. -SHIP,-AMBASSAGE, *s.* दौत्यं, प्रणिधिकार्यं.

AMBER, *s.* तृणमणिः.

AMBIDEXTROUS, *a.* उभयहस्तकुशल.

AMBIENT, *a.* व्यापक; निपातिन् (नी *f.*), गामिन् in comp.

AMBIGUOUS, *a.* द्व्यर्थ, संदिग्धार्थ, अव्यक्त, अस्पष्ट, संदिग्ध. -LY, *adv.* अस्पष्टं, वक्रोक्त्या, द्व्यर्थतः. -NESS,-AMBIGUITY, *s.* वक्रोक्ति *f.*, संदिग्धार्थता, संदेहार्थः.

AMBIT, *s.* मंडलं, चक्रवालं, वर्तुलं.

AMBITION, *s.* स्पृहा, आकांक्षा. 2 कीर्तिस्पृहा, ऐश्वर्याकांक्षा, उच्चपदवांछा; 'a. to get a throne,' राज्यलोभः -तृष्णा. -AMBITIOUS, *a.* सस्पृह, साकांक्ष, ऐश्वर्येप्सु, यशस्काम; 'who, a. of your throne, has roused your envy' केनाभ्यसूया पदकांक्षिणा ते जनिता (K. III. 4). 2 (Of hopes) दूराधिरोहिन्-उत्सर्पिन् (णी *f.*). -LY, *adv.* ऐश्वर्याकांक्षया &c.

AMBLE, *v. i.* ललितं वल्ग् 1 P, प्लु 1 A; धोर् 1 P. -*s.* धोरितं. -ER, *s.* धोरितगामिन् *m.*

AMBROSIA, *s.* अमृतं, सुधा, पीयूषं. -AL, *a.* अमृतमय (यी *f.*), अमृततुल्य, (*s.*) in comp.

AMBULATE, *v. i.* विचर् 1 P, परिक्रम् 1 U, 4 P, इतस्ततश्चर्. -ION, *s.* परिक्रमः, पर्यटनं.

AMBUSH, AMBUSCADE, *s.* (पराबस्कंदनार्थं) निभृतं स्थानं; निभृतावस्थिति *f.*; 'they all lay in a.' सर्वे एव ते निभृतं तस्थुः.

AMELIORATE, *v. t.* वृध् c., श्रेयस्-साधीयस् (सी *f.*)-कृ 8 U, समुन्नतिं नी 1 P, *See* IMPROVE.-ION, *s.* वर्धनं, समुन्नति *f.*, श्रेयस्त्वं.

AMEN, *adv.* ओम्, भवतु, एवमस्तु, तथास्तु.

AMENABLE, *a.* परानुयोगाधीन, अनुविधायिन् (नी *f.*), आज्ञाकर (री *f.*), आयत्त, वशं यात ; 'a. to another's power' पराधिकारवशः.

AMEND, *v. t.* सं-वि-परि-शुध् c., समा-प्रतिसमा-धा 3 U ; 'a. one's life' पापान्निवृत् 1 A, पापं त्यक्त्वा धर्ममाचर् 1 P. -*v. i.* शुध् 4 P ; समाधा pass., भद्रतर *a.* भू. -MENT, *s.* संशोधनं ; प्रतिसमाधानं. 2 दोषशोधनं &c. -AMENDS, *s.* प्रमार्जनं, निस्तारः, निष्कृति *f.*, शोधनं ; 'to make a. for' प्रमृज 2 P ; शुध् c. ; *See* ATONE.

AMENITY, *s.* रम्यता, मनोज्ञता.

AMERCE, *v. t.* *See* PUNISH.

AMIABLE, *a.* सुशील, सुप्रिय, सुजन. 2 प्रियदर्शन, रमणीय. -NESS, *s.* सौजन्यं, सद्भावः, सुशीलत्वं. -AMIABLY, *adv.* सुशीलतया, प्रीत्या, स्नेहभावेन.

AMICABLE, *a.* मैत्र (त्री *f.*), हित, स्नेहशील ; मित्रभावेन; 'a. settlement' मित्रभावेन निर्णयः. -NESS, *s.* मित्रत्वं, सख्यं, सौहार्दं. -AMICABLY, *adv.* मित्रवत्, मित्रभावेन, सौहार्देन.

AMID,-ST, *prep.* मध्ये, अंतरे, अभ्यंतरे, (with gen.) ; मध्यगत-स्थित *a.* ; 'a. these thoughts he was pierced by an arrow' एवं विचारयन् -एवं विचारनिमग्नः सन्-बाणेन हतः.

AMISS, *a.* दोषिन् (णी *f.*), अपराधिन् (नी *f.*). 2 अनुचित, अयोग्य.-*adv.* अनुचितं, अयुक्तं ; 'take a.' *See* MISUNDERSTAND.

AMITY, *s.* मैत्री, स्नेहभावः, सख्य, संधिः.

AMMUNITION, *s.* युद्धसामग्री, युद्धोपकरणानि.

AMNESTY, *s.* (राजकृता) दोषक्षमा, दोषाद्विमोचनं.

AMONG,-ST, *prep.* मध्ये, अभ्यंतरे, (with gen.) ; ex. by loc. or gen. of noun ; 'a. cows the black one gives much milk' गवां गोषु वा कृष्णा बहुक्षीरा (S. K.) ; काव्येषु नाटकं रम्यं &c.

AMOROUS, *a.* कामुक, प्रेमशील, रसिक, शृंगारप्रिय. 2 सविलास, सविभ्रम, ललित ; 'a. sport' सविलासक्रीडा. -LY, *adv.* सकामं, सानुरागं ; सविलासं, सविभ्रमं, ललितं.

AMOUNT, *v. i.* उपचि-संख्या-pass. ; संपद् 4 A ; 'a. ing to' संख्यक in comp.; 'a. to 100' शतसंख्य-संख्याक ; 'they a. in all to 24 men' एवं पिंडीकृत्य चतुर्विंशतिर्नराः संपद्यंते ; 'thus the families a. to 14' एवमेतान्येकत्र चतुर्दश कुलानि (Ka. 136) ; 'your whole speech a. s to this' एतावता-एवंच ; एष तव वचसो निष्कर्षः -पिंडितार्थः ; 'your exertions do not a. to even a hundredth part of mine' तव व्यवसायो ममोद्योगस्य शततमीमपि कलां न स्पृशति. -*s.* राशिः, परिमाणं, समुदायः, संख्या, समुच्चयः ; 'by any a. of labour' महता श्रमेणापि ; 'to the a. of 100' शतसंख्यं.

AMPHIBIOUS, *a.* स्थलजलचर. 2 द्विधागति.

AMPHITHEATRE, *s.* रंगः, रंगभूमि *f.*

AMPLE, *a.* विशाल, विपुल, बृहत् (ती *f.*), विस्तीर्ण, विस्तृत. 2 प्रचुर, प्रभूत, बहुल, यथेष्ट. -NESS, *s.* विशालता. 2 प्राचुर्य. -AMPLY, *adv.* सविस्तरं, प्रचुरं, यथेष्टं ; 'he was a. rewarded' तस्मै प्रभूतं पारितोषिकं दत्तं. -AMPLIFY, *v. t.* सविस्तरं -विस्तरेण -वर्ण् 10. 2 तन् 8 U, वृध् c., विस्तृ 9 U. -AMPLIFICATION,-AMPLITUDE, *s.* विस्तारः, वृद्धि *f.* 2 महत्त्वं, प्राचुर्य.

AMPUTATE, *v. t.* अंगं छिद् 7 P or निकृत् 6 P. -ION, *s.* छेदः, कर्तनं.

AMULET, *s.* रक्षाकरंडः.

AMUSE, *v. t.* विनुद् c., रम् c., नंद् c.; 'a. oneself' विहृ 1 P, विलस् 1 P, क्रीड् 1 P.—MENT, *s.* विनोदः, विनोदनं, क्रीडा, केलि *f.*, विलासः, कौतुकं. —ING, *a.* विनोदिन् (नी *f.*), विनोदनशील, हृदयंगम, रम्य.

ANACHRONISM, *s.* कालगणनायां प्रमादः or भ्रमः.

ANALOGY, *s.* सादृश्य, समानता, संबंधः. —ICAL, —OUS, *a.* सदृश (शी *f.*), तुल्यरूप, समान, अनुरूप, संबंधिन् (नी *f.*), आनुषंगिक (की *f.*). —LY, *adv.* सादृश्येन, औपम्येन.

ANALYZE, *v. t.* व्याकृ 8 U, विभज् 1 U, विच्छिद् 7 P, विभिन्न *a.* -खंडशः -पृथक् -कृ, विश्लिष् c. —ANALYSIS, *s.* विभागः, व्यवच्छेदः, विभेदः, व्याकरणं. 2 सारः.

ANARCHY, *s.* अशासनं, अनीश्वरता, राजविप्लवः, अराजकता; 'when the country is in a.' अराजके जनपदे.

ANATHEMA, *s.* अभिशापः, शापः, आक्रोशः. —TIZE, *v. t.* शप् 1 U, आक्रुश् 1 P.

ANATOMY, *s.* पृथक्करणं, विच्छेदः. 2 शरीरव्यवच्छेदविद्या-शास्त्रं. —IZE, *v. t.* (शरीरं) व्यवच्छिद् 7 P, पृथक् कृ. 2 विवृ 5 U, व्याख्या 2 P. —IST, *s.* व्यवच्छेदकः.

ANCESTOR, *s.* पूर्वपुरुषः; a. s पूर्वजाः (pl.), पितरः (pl.), पितृलोकः.—ANCESTRAL, *a.* पितृक, पैतृक (की *f.*); 'a. property' पित्र्यं रिक्थं. —ANCESTRY, *s.* पितरः, पितृश्रेणी. 2 वंशः, अन्वयः.

ANCHOR, *s.* नौबंधनकीलः-लं, लांगलं. — *v. t.* कीलेन बंध् 9 P, स्थिरीकृ, गतिं निरुध् 7 U or प्रतिहन् 2 P.

ANCHORITE, *s.* यतिः, आरण्यकः, संन्यासिन् *m.*, वनवासिन् *m.*, वानप्रस्थः.

ANCIENT, *a.* पुराण, पुरातन (नी *f.*), पूर्व, प्राक्कालीन, प्राक्तन, प्राचीन. —*s.* (a. s) वृद्धाः-प्राचीनपुरुषाः (pl.). 2 ध्वजः, पताका. 3 पताकिन् *m.*—LY, *adv.* पुरा, पूर्वं, पूर्वकाले. —NESS, *s.* प्राचीनता, पुरातनत्वं, &c.

AND, *conj.* च repeated after each word joined, or after all. In the case of nouns, ex. by Dvandva comps.; 'the Sun and the Moon' आदित्यचंद्रौ. 2 (With adjectives) gen. ex. by Karm. comps.; अलसलुलितमुग्धानि अंगकानि; (with numerals) by a comp. with अधिक, उत्तर; '100 a. 8' अष्टाधिकं-अष्टोत्तरं शतं. 3 (In the case of verbs) ex. by the use of gerunds; 'go a. tell him' गत्वा तस्मै कथय; sometimes by वा in questions; जात अस्ति ते माता स्मरसि वा तातं (U. 4). 4 अपि च, अन्यच्च, किं च. 'A. then' अथ, तदनु, ततः; 'a. yet,' तथापि, or ex. by च-च (असुलभा सकलेंदुमुखी च सा किमपि चेदमनंगविचेष्टितं V. 2).

ANECDOTE, *s.* कथा, उपाख्यानं, आख्यायिका.

ANENT, *prep.* उद्दिश्य, अधिकृत्य, विषये in comp.

ANEW, *adv.* पुनः, पुनरपि. 2 अभिनवं.

ANGEL, *s.* देवदूतः, ईश्वरप्रेष्यः, स्वर्गदूतः, 'you are my a.' त्वं मे प्रियतमा, प्राणप्रेयसी. —IC,-ICAL *a.* दिव्य, देवदूतोपम, अमानुष (षी *f.*).

ANGER, *s.* क्रोधः, कोपः, अमर्षः, रोषः, मन्युः.—*v. t.* प्रकुप् c., क्रुध् c. — ANGRY, *a.* जातामर्ष, रुष्ट, सामर्ष, सरोष, कोपिन् (नी *f.*), कुपित, क्रुद्ध, समन्यु; 'to be a.' कुप्-क्रुध्-रुष्- 4 P, (with dat.). —ANGRILY, *adv.* सकोपं, सरोषं, कोपात् &c.

ANGLE, *s.* अस्रः, कोणः. — *v. i.* बडिशेन मत्स्यान् ग्रह् 9 P, उद्धृ-हृ 1 P. — ER, *s.* मत्स्यवेधकः. — ING, *s.* मत्स्यग्रहणं. — ANGULAR, *a.* कोणविशिष्ट, अस्रोपेत.

ANGUISH, *s.* परितापः, पीडा, बाधा, वेदना, यातना, आतंकः; 'a. of mind' मनस्तापः.

ANHELATION, *s.* उच्छ्वसनं, हृदयकंपः, वेपथुः.

ANIMADVERT, *v. i.* निंद् 1 P, उपालभ् 1 A; *See* CENSURE. 2 परीक्ष् 1 A, चर्चां कृ. —ANIMADVERSION, *s.* निंदा, उपालंभः. 2 परीक्षणं, चर्चा.

ANIMAL, *s.* जंतुः, प्राणिन् *m.*, जीविन् *m.*, जीवः, जन्मवत् *m.* 2 पशुः, मृगः, तिर्यंच् *m.* —*a.* प्राणिसंबंधिन् &c. 2 चेतन; 'a. food' मांसाहारः; 'a. pleasures' विषयाः, विषयसुखानि; 'a. passions' (carnal) षड् रिपवः-इंद्रियाणि; 'a. kingdom' प्राणिवर्गः.—CULE, *s.* क्षुद्रजंतुः.

ANIMATE, *v. t.* जीव् c., सम-आ-श्वस् c., प्राण् c. 2 प्रोत्सह् c., जीवं संचर् c., उत्तिज् c., उद्युज् 10, परानुद् c.—ED, *a.* सजीव, चेतन, चर, प्राणिन्. 2 प्रोत्साहित, आश्वासित. 3 प्रफुल्ल, प्रोत्साहनाप्रेरित, सारवत् (ती *f.*); 'a. by passion' मदोल्लासित, समद. —ION, *s.* जीवसंचारणं, जीवप्रदानं. 2 प्रोत्साहनं, प्रफुल्लता, उल्लासः. —OR, *s.* प्राणदः, प्रोत्साहकः &c.

ANIMOSITY, *s.* द्वेषः, वैरं, विरोधः, मात्सर्यं.

ANISE, *s.* छत्रा, सालेयः.

ANKLE, *s.* गुल्फः, घुटिका.

ANKLET, *s.* नूपुरः-रं, मंजीरं.

ANNALS, *s.* वार्षिकवृत्तांतः, वार्षिकवृत्तेतिहासः. 2 पुरावृत्तकथा, चरित्राख्यानं. —ANNALIST, *s.* चरित्रलेखकः.

ANNEX, *v. t.* संयुज् 10, अनुबंध् 9 P, उपाधा 3 U; 'Oudh was a. ed to the British territory' अवधदेश आंग्लराज्यांगं कृतः,-राज्येन संयोजितः. 2 अंते निर्दिश् 6 P; 'a list of names is a. ed' नामावली लेखांते दत्ता, नामानि लेखांते निर्दिष्टानि.

-ATION, *s.* संयोजनं, अनुबंधनं; 'a thing annexed' अनुबंधः. -ED, *a.* संयोजित, उपाहित.

ANNIHILATE, *v. t.* उत्-समुत्-छिद् 7 P, उन्मूल् 10, अव-उत्-सद् c., नश् c., विलुप् c. -ION, *s.* उच्छेदः, क्षयः, अवसादनं, विलोपः, विनाशः; प्रलयः (of the world).

ANNIVERSARY, *a.* सांवत्सरिक-वार्षिक (की *f.*).-*s.* सांवत्सरिको विधिः; 'a. of birth' जन्मदिवसः; 'a. of death' मृततिथिः.

ANNOTATE, *v. t.* टीकां-भाष्यं-लिख् 6 P (with gen.), व्याख्या 2 P, व्याचक्ष् 2 A. -ION, *s.* टीका, व्याख्यानं, भाष्यं, टिप्पनी. -OR, *s.* टीकाकारः, टीका-भाष्य-कृत् *m.*

ANNOUNCE, *v. t.* आख्या 2 P or c., निविद् c., विघुष् 10, प्रकाश् c. -ER, *s.* आख्यायकः, संदेशहरः. -MENT, *s.* ख्यापनं, निवेदनं, विघोषणा. 2 वार्ता, समाचारः, संदेशः.

ANNOY, *v. t.* बाध् 1 A, पीड् 10, दु 5 P, *See* AFFLICT. -ANCE, *s.* पीडा, व्यथा, क्लेशः, बाधा, दुःखं; 'a source of a.' कंटकः.-ER, *s.* पीडा-व्यथा-करः.-ING, *a.* बाधक, दुःखप्रद.

ANNUAL, *a.* वार्षिक-सांवत्सरिक-आब्दिक (की *f.*); प्रति°. -LY, *adv.* प्रतिवर्षं, प्रतिसंवत्सरं, वर्षे वर्षे.

ANNUITY, *s.* वार्षिकं वेतनं.

ANNUL, *v. t.* वि-अव-लुप् c., निरस् 4 U, निरर्थक *a.* कृ. -MENT, *s.* लोपः.

ANNULAR, *a.* मंडलाकार, वलयाकार.

ANNULET, *s.* क्षुद्रवलयः-यं.

ANODYNE, *s.* शूलघ्नं.

ANOINT, *v. t.* लिप् 6 P, दिह् 2 U, अंज् 7 P, समालभ् 1 A. 2 अभिषिच् 6 P; 'a. ed as king' राज्येऽभिषिक्तः. -ER, *s.* अभिषेचकः, विलेपकः.-ING, *s.* विलेपनं, अभ्यंजनं, अभिषेकः-षेचनं, समालंभः.

ANOMALY, *s.* विधि-नियम-विरोधः, अनियमः, व्यभिचारः. -OUS, *a.* विधि-नियम-विरुद्ध, अविधि. -OUSLY, *adv.* अनियमतः, विधिविरुद्धं.

ANON, *adv.* सपदि, शीघ्रं, झटिति; 'ever and a.' मुहुर्मुहुः.

ANONYMOUS, *a.* अविदित-अनिर्दिष्ट-लेखकनामन्, नामसंज्ञा-हीन. -LY, *adv.* नाम विना, नामनिर्देशं विना.

ANOTHER, *a.* अन्य-इतर-पर-अपर, *pron. a.*; or अंतरं in comp.; नगरांतरं 'a. city;' 'in a. place' अन्यत्र; 'in a. manner' अन्यथा; 'at a. time' अन्यदा; 'a. day' अन्येद्युः, परेद्युः; 'one after a.' अनुपूर्वशः, एकैकशः.

ANSWER, *v. i.* उत्तरं दा 3 U or प्रतिपद् 4 A, प्रतिवच् 2 P, प्रतिभाष् 1 A.; 'he a. ed in the affirmative' बाढं-तथा-इति स प्रत्युवाच. 2 संवद् 1 P, अनुरूप-तुल्य-भू. 3 प्रतिभूः स्था 1 P, प्रातिभाव्यं स्वीकृ, उत्तरं दा 3U.-*v. t.* (a question) कथ् 10, ब्रू 2 U, उत्तरं दा (with gen.); 'a. my letter' मम लेखस्योत्तरं प्रहिणु-प्रेषय. 2 Refute, q. v. 3 कॢप् 1 A (dat.), उपयुक्त *a.* भू; 'this will a. my purpose' अनेन मे प्रयोजनं भवेत्, इदं मे इष्टसिद्धये कल्पेत. -*s.* उत्तरं, प्रतिवचनं, प्रत्युक्ति *f.*, प्रतिवाच् *f.*, प्रत्युत्तरं. -ABLE, *a.* परानुयोगाधीन, प्रष्टव्य.

ANT, *s.* पिपीलिका.-HILL, *s.* वल्मीकः-कं, वामलूरः, कूलकः.

ANTAGONIST, *s.* प्रतिपक्षः, विपक्षः, शत्रुः, वैरिन् *m.*, *See* ENEMY. -IC, *a.* विरुद्ध, विरोधिन् (नी *f.*). -ANTAGONISM, *s.* विरोधः, वैरं.

ANTARCTIC, *a.* दक्षिणकेंद्रीय. -*s.* दक्षिणकेंद्रं.

ANTECEDENT, *a.* पूर्वगामिन् (नी *f.*), पूर्वगत. -*s.* पूर्वचरितं-वृत्तं. 2 पूर्वगामी शब्दः-शब्दसमूहः.

ANTEDILUVIAN, *a.* विश्वप्रलयात् प्राग् वर्तमान, अतिपुराण.

ANTELOPE, *s.* कृष्णसारः, हरिणः, एणः, मृगः, कुरंगः.

ANTERIOR, *a.* प्राक्तन (नी *f.*), पूर्व.

ANTHEM, *s.* ईश्वरस्तुति *f.*, स्तुतिरूपं गीतं.

ANTHROPOPHAGI, *s.* क्रव्याशिनः (pl.), राक्षसाः.

ANTIC, *s.* भंडः, वैहासिकः. -*a.* भंडसदृश (शी *f.*), अयोग्य, असंगत.

ANTICHAMBER, *s.* उपशाला.

ANTICIPATE, *v. t.* पूर्वं-प्रागेव-ज्ञा 9 U or निरूप् 10 or ग्रह् 9 P. 2 अग्रतः अनुभू 1 P or भुज् 7 A, पूर्वास्वादनं कृ. -ION, *s.* पूर्वमेव ज्ञानं, पूर्वभुक्ति *f.*, पूर्वास्वादनं.

ANTIDOTE, *s.* विषघ्नोऽगदः, प्रतिविषं; 'a. against anxiety' चिंताविषघ्नोऽगदः, 'dealer in a. s' विषवैद्यः, जांगुलिकः. 2 प्रतिकारः. -AL, *a.* विषघ्न (घ्नी *f.*).

ANTIMONY, *s.* स्रोतोंजनं, यामुनं, सौवीरं.

ANTIPATHY, *s.* विरोधः, वैरं, द्वंद्वभावः, विद्वेषः; 'natural a.' शाश्वतिको विरोधः.

ANTIPHONY, *s.* प्रतिध्वनिः, प्रतिगानं.

ANTIPODES, *s.* प्रतिलोमं; 'living in a' प्रतिलोमाः.

ANTIQUARY,-RIAN, *s.* प्राक्कालीनविषयकोविदः-पंडितः.-*a.* प्राक्कालीन, प्राक्तन (नी *f.*).

ANTIQUATED, ANTIQUE, *a.* प्राचीन, पुरातन-प्राक्तन (नी *f.*), पुराण; (style) अप्रचलित, लुप्तप्रयोग (भाषासरणिः). -ANTIQUITY, *s.* Ancients, q. v. 2 प्राक्कालः, पूर्वकालः. 3 पुरातनत्वं, प्राक्कालीनत्वं.

ANTISEPTIC, *a.* पूतिनाशक.

ANTITHESIS, *s.* प्रतिपक्षता, विरोधः, अर्थवैपरीत्यं.

ANTITYPE, *s.* मूलमूर्ति *f.*, आदर्शः.

ANTLER, *s.* हरिणशृंगं, मृगविषाणं. -ED, *a.* शृंगवत् (ती *f.*), विषाणिन् (नी *f.*).

ANUS, *s.* गुदं, अपानं, पायुः.

ANVIL, *s.* शूर्मः-र्मी, स्थूणा.

ANXIETY, *s.* चिंता, उत्कंठा, औत्सुक्यं, व्यग्रता, मनस्तापः, चित्तोद्वेगः, आकुलत्वं, उत्कलिका, रणरणकः. —ANXIOUS, *a.* व्याकुलित, उद्विग्न, उत्कंठित, चितापर, व्यग्र. 2 उत्सुक, ईप्सु, सकाम ; 'he thus passes a. nights' एवमुद्विग्नस्य यांति रजन्यः ; 'to be a. (for)' उत्कंठ् 1 A, उत्सुकायते (D.), उत्तम् 4 P; 'he is a. to see you near' उत्कंठते युष्मत्सन्निकर्षस्य (U. 6.). 3 चिंताप्रद, उद्वेगकर (री *f.*) —LY, *adv.* सोद्वेगं, सोत्कंठं, सचिंतं.

ANY, *a.* Ex. by चित्, चन, or अपि with the forms of किम्; 'a. man' कोपि नरः ; 'a. woman' काचित्स्त्री &c., 'at a. time' कदाचित्. 2 (Any whosoever) Ex. by forms of यत् with the above ; यः कश्चनागच्छतु 'let a. come'; 'I may be a. one' यो वा को वा भवाम्यहं ; 'a. how' कथंचित्, येन केन प्रकारेण, यथा कथंचित्; 'a. longer' पुनः, इतः-अतः-परं ; 'a. where' कुत्रापि, क्वचिदपि ; 'a. thing' ईषदपि, स्तोकमपि.

APACE, *adv.* सत्वरं, शीघ्रं, *See* QUICKLY.

APART, *adv.* पृथक् ; वि-प्र-गत *a.*; 'having knees a.' प्रज्ञुः. 2 निभृतं, रहसि, विजने, एकांते, विविक्ते. 3 दूरे. 4 स्वगतं, जनांतिकं. 'a. from this consideration', 'this consideration a.' इदं कारणं विहाय-त्यक्त्वा, एतदर्थभिन्न *a.* ; 'excellence of virtues a., a woman must have modesty at least' गुणसंपत्स्त्रिया मा नाम भवतु, शालीनता पुनरवश्यं स्यादेव.—MENT, *s.* कोष्ठः, शाला, कक्षा, आवासः, सौधं; 'inner a. s' अंतःपुरं, अंतर्वेश्मन् *n.*

APATHY, *s.* औदासीन्यं, उदासीनता, वैराग्यं. —ETIC, *a.* उदासीन. 2 वीतस्पृह-राग, निःस्पृह, निरीह, निरपेक्ष. 3 निरुत्साह.

APE, *s.* वानरः, कपिः, प्लव (वं) गः. 2 अनुकारिन् *m.* —*v. t.* वानरवत् अनुकृ 8 U (gen.). —APISH, *a.* कापेय (यी *f.*), वानरोपम.

APEPSY, अजीर्णं.

APERIENT, *s.* रेचकं, रेचनं.

APERTURE, *s.* छिद्रं, रंध्रं, सूक्ष्मं द्वारं.

APETALOUS, *a.* दलहीन, निष्पत्र, निर्दल.

APEX, *s.* शिखा, चूडा, अग्रं; शिरस् *n.*, मस्तकं.

APHORISM, *s.* सूत्रं, वचनं.

APIARY, *s.* करंडः, आधारः, समुद्गकः.

APIECE, *adv.* एकैकशः, पृथक् पृथक्, एकैकं.

APOCRYPHAL, *a.* संदिग्धप्रमाण.

APOLOGY, *s.* क्षमाप्रार्थना, क्षमायाचना, स्वदोषस्वीकारः. 2 व्यप-अप-देशः, छद्मन् *n.* —IST, *s.* स्वदोषस्वीकारिन् *m.*, व्यपदेष्टृ *m.* —IZE, *v. i.* क्षमां याच् 1 A or प्रार्थ् 10 A, स्वदोषं स्वीकृ-अंगीकृ 8 U. 2 व्यपदिश् 6 P, व्यपदेशं-छद्म-कृ. —APOLOGETIC, *a.* व्यपदेशक.

APOLOGUE, *s.* उपकथा, उपाख्यानं.

APOPHLEGMATIC, *a.* कफनाशन (नी *f.*).

APOPHTHEGM, *s.* सूत्रं, वचनं, नीतिवचनं.

APOPLEXY, *s.* अंगविकृति *f.*, संन्यासः.

APOSTATE, *s.* स्वधर्मत्यागिन् *m.*, स्वधर्मभ्रष्टः-च्युतः, पतितः.—APOSTACY, *s.* स्वधर्मत्यागः, धर्मभ्रंशः, परधर्माश्रयः. —APOSTATIZE, *v. i.* स्वधर्मात् भ्रंश् 1 A, 4 P or पत् 1 P, परधर्ममाश्रि 1 U.

APOSTLE, *s.* ईश्वरप्रेरितः, ईश्वरदूतः.

APOSTROPHE, *s.* संबोधनं.—IZE, *v. t.* संबुध् c., आमंत्र् 10 A.

APOTHECARY, *s.* औषधानां विक्रेतृ *m.*, भेषजविक्रयिन् *m.*

APPALL, *v. t.* सं-वि-त्रस् c., भी c., उद्विज् c., व्याकुलीकृ 8 U; 'he was a. ed with fear' भयेन विवर्णीभूतः ; 'a. ing sight' महात्रासजनकं स्थानं.

APPARATUS, *s.* उपकरणं, सामग्री.

APPAREL, *s.* वेशः-षः, वस्त्रं, परिधानं, आभरणं.—*v. t.* वस् c., प्रावृ 5 U, संव्ये 1 P.

APPARENT, *a.* व्यक्त, अभिव्यक्त, स्फुट, स्पष्ट, प्रत्यक्ष, प्रकाश, आविर्भूत. 2 मिथ्या *ind.*, अवास्तव (वी *f.*) ; 'a. praise' व्याजस्तुति *f.* 3 बाह्य, बहिः in comp.; 'to make a.' आविष्कृ, स्पष्टी-प्रकटीकृ. —LY, *adv.* व्यक्तं, स्पष्टं &c. 2 बहिः ; 'a wise man acts a. agreeably' विद्वान् जनो बही रमणीयं व्यवहरति (Mal. 1).

APPARITION, *s.* आभासः, छाया, आकारः. 2 वेतालः, पिशाचः.

APPEAL, *v. i.* पुनर्विचारं प्रार्थ् 10 A. 2 प्रमाणीकृ 8 U, प्रमाणयति (D.); or by प्रमाणं; 'I a. to your lordship in this case' अत्र विषयेऽत्रभवंतं प्रमाणीकरोमि, अत्रभवान् प्रमाणं.—*s.* पुनर्विचारप्रार्थना; प्रमाणीकरणं.

APPEAR, *v. i.* उदि 2 P, उद्गम् 1 P, प्रकाश् 1 A, प्रादुर्भू 1 P, आविर्भू. 2 उपस्था 1 U, सन्निधा pass. 3 प्रतिभा 2 P, अवभास् 1 A, दृश् pass., लक्ष् pass.; so as to a. dead' मृतमिवात्मानं संदर्श्य; 'the witness did not a.' साक्षी नोपतस्थौ. —ANCE, *s.* उदयः, प्रादुर्भावः, आविर्भावः. 2 उपस्थिति *f.* 3 आकारः, आकृति *f.*, रूपं; 'good in a.' शोभनाकृति, सुदृश्य, प्रेक्षणीय. 4 आभासः, छाया, आभा ; your story has an a. of truth' तव कथा सत्येव प्रतिभाति-अवभासते. 5 अनुमानं.

APPEASE, *v. t.* सां(शां)त्व् 10, प्र-उप्-शम् c. (शमयति), तुष् c., प्रसद् c., अनुनी 1 P; to be a.

ed ' प्रसद् 1 P, प्रशम् 4 P.—ING, *s.* सांत्वनं, प्र-उप-शांति *f.*, प्रसादनं, अनुनयः.

APPELLATION, *s. See* NAME.—APPELLATIVE, *a.* अभिधायिन् (नी *f.*). 2 सामान्य.

APPEND, *v. t.* अनुबंध् 9 P, उपाधा 3 U, आसंज् c. —AGE, *s.* अनुबंधः; उपाहितभागः. 2 उपकरणं. —ED, *a.* संयोजित, उपाहित. —IX, *s.* परिशिष्टं, शेषसंग्रहः.

APPERTAIN, *v. i. See* BELONG. —APPERTENANCE, *s.* अनुबंधः, उपकरणं, उपस्करः, सामग्री.

APPETITE, *s.* कामः, रागः, अभिलाषः, इच्छा, रुचि *f.* 2 बुभुक्षा, क्षुधा-भ् *f.*; ' sensual a. ' विषयरुचिः, विषयोपरागः.

APPLAUD, *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, अभिनंद् 1 P, स्तु 2 U. 2 उपगै 1 P.—APPLAUSE, *s.* प्रशंसा, श्लाघा, स्तुति *f.* 2 प्रशंसावाचः (pl.), धन्यवादः; ' he rose to speak amidst loud a. ' उच्चैः प्रशंसावाच उदीरयत्सु श्रोतृषु स वक्तुमुदतिष्ठत्.—APPLAUSIVE, *a.* श्लाघान्वित; स्तुतिमय (यी *f.*).

APPLE, *s.* आताम्रवृक्षः,-फलं. 2 (Of the eye) तारा, कनीनिका; ' a. of discord भेद-कलह-बीजं.

APPLY, *v. t.* संयुज् 10, न्यस् 4 P, ऋ c. (अर्पयति). निविश् c., निधा 3 U, आरुह् c.; ' a. your shoulder to the wheel ' चक्रमंसेन उत्तंभय; ' a. ing the hand to my shoulder ' अंसे हस्तं निवेश्य &c. 2 विधा 3 U; प्रयुज् 7 A, 10; ' they do not a. the word विषय to happiness ' सुखार्थे विषयशब्दं न प्रयुंजते, -शब्दस्य प्रयोगो न दृश्यते. 3 आश्रि 1 U; याच् 1 A, अर्थ् 10 A. 4 (Oneself to) अनुष्ठा 1 P, मनः-चित्तं-समाधा, or बंध् 9 P, अभियुज् pass. (एते वयं स्वकर्मण्यभियुज्यामहे Mu. 3). — *v. i.* लग् 1 P, सं-अनु-बंध् 9 P. 2 प्रयुज् pass., उपपद् 4 A; oft. by गम् 1 P, इ 2 P; ' this our title does not a. to any one else ' द्वितीयगामी न हि शब्द एष नः (R. III. 49); राम इत्ययं शब्द उच्चारित एव मामगात् (R. XI. 73); विषय in comp.; ' the word ईश्वर not a. ing to anybody else ' ईश्वर इत्यनन्यविषयः शब्दः (V. 1). 3 (to, for) याच् 1 A, प्र-अभि-अर्थ् 10 A; ' a. ed for further orders' कोपरो नियोगोऽनुष्ठीयतामिति प्रार्थयामास—APPLIANCE, *s.* उपायः, उपकरणं, सामग्री.—APPLICATION, *s.* योजनं, विधानं, प्रयोगः, संप्रयोगः, निवेशनं, न्यासः, अर्पणं. 2 मनोनियोगः, चित्तासक्ति *f.*, अभ्यसनं, अध्यवसायः, अभिनिवेशः, आसक्ति *f.*, अनुष्ठानं. 3 उपयोगः, प्रयोजनं. 4 संबंधः; ' a. of this speech to Râma' अस्य वचनस्य रामगामी संबंधः. 5 प्रार्थना. —APPLICABLE, *a.* लगत् (न्ती *f.*), प्रयोज्य. 2 संगत, संबद्ध.—APPLICANT, *s.* प्रार्थयितृ *m.*, अर्थिन् *m.*, याचकः, प्रणयिन् *m.*

APPOINT, *v. t.* युज् 7 U, 10, स्था c. (स्थापयति), निधा 3 U. 2 अधिकृ, नियुज् 7 A (with loc.) य इमामाश्रमधर्मे नियुंक्ते (S.1); व्यादिश् 6 P. 3 निर्दिश् 6 P, निरूप् 10; ' a. ed lesson ' निर्दिष्टपाठः ; ' a. ed time ' कृतः कालावधिः, कृतसंकेतः, समयः. —MENT, *s.* नियोगः, अधिकारः, पदं. 2 नियमः, विधिः, आज्ञा, शासनं. 3 उपकरणं. 4 निरूपणं, स्थापनं. 5 समयः, संकेतः ; ' keep your a. ' समयमनुरुध्यस्व-वर्तस्व ; ' Queen, let us keep (to) our a. ' देवि सामयिका भवामः (M. 1.).

APPORTION, *See* DIVIDE.

APPOSITE, *a.* युक्त, यथार्थ, संगत. —LY, *adv.* स्थाने, यथार्थतः.

APPOSITION, *s.* समानाधिकरणं, एकान्वयः.

APPRAISE, *v. t.* (goods) (मूल्यं) निरूप् 10, निर्धृ 10. —ER, *s.* मूल्यनिरूपकः.

APPRECIATE, *v. t.* (गुणागुणं) ज्ञा 9 U, अवगम् 1 P, ग्रह् 9 P, विविच् 7 P; ' appreciator of merits ' गुणग्रहीता, गुणज्ञः, मर्मज्ञः. 2 बहु मन् 4 A. — ION, *s.* गुणग्रहणं, गुणागुणज्ञानं-विवेचनं.

APPREHEND, *v. t.* ग्रह् 9 P, परामृश् 6 P, आसिध् 1 P, आक्रम् 1 U, 4 P, धृ 1 P. 2 आ-वि-परि-शंक् 1 A. 3 मन् 4 A, शंक् 1 A; तर्क् 10, ऊह् 1 U, अनुमा 3 A. 4 अव-अधि-गम् 1 P, उपलभ् 1 A. —APPREHENSION, *s.* ग्रहणं, आसेधः; आ-वि-परिशंका, अनुमानं, तर्क, मति *f.*, बुद्धि *f.*; 'of quick a.' तीक्ष्णमति; ' of dull a. ' मंदधी, स्थूलबुद्धि. —APPREHENSIVE, *a.* आशंकमान, शंकित; ' a. of danger ' भयमाशंकमानः.

APPRENTICE, *s.* शिल्पविद्याशिष्यः, अंतेवासिन् *m.*, शिष्यः. —SHIP, *s.* सेवाकालः.

APPRISE (of) *See* INFORM.

APPROACH, *v. t.* उप-समुप-अभि-गम् 1 P, °इ-या 2 P, °सृ-सृप् 1 P; समीपं-निकटे गम् (with gen.). —*v. i.* उप-समुपा-स्था 1 U, °गम्; प्रत्यासद् 1 P. —*s.* आगमः, अवतारः, उपास्थिति *f.*; ' a. of night ' दोषागमः, रजन्युपस्थितिः. 2 संनिकर्षः, आसन्नता. 3 प्रवेशः, उपसर्पणमार्गः. —ING, *a.* आसन्न; ' his death a. ' आसन्नमरणे तस्मिन्; संनिकृष्ट, समुपस्थित. —ABLE, *a.* उपसर्पणीय, समुपगम्य.

APPROPRIATE, *v. t.* आत्मसात् कृ 8 U, स्वाधीनस्वायत्त.—*a.* कृ. 2 प्र-विनि-उप- युज् 7 A, 10, उपक्लृप् c. —*a.* उपपन्न, संगत, उचित, युक्त; ' a. to the occasion ' प्रस्तावसदृशं. 2 स्वकीय. —LY, *adv.* उपपन्नं, युक्तं, स्थाने, यथार्थतः. —ION, *s.* आत्मसात्करणं; विनियोगः, उपकल्पनं.

APPROVE, *v. t.* अनुमुद् 1 A, अनु-सं-मन् 4 A, प्रशंस् 1 P, अभि-प्रति-नंद् 1 P, रुच् 1 A ; एतयोर्विवाद एव मे न रोचते (M. 1) ' I do not a. of their very quarrel'; ' I do not a. of your

speech ' न ते वचोऽभिनंदामि (S. 2). 2 प्रमाणयति (D.), विभू c. –AL, s. अनुमोदनं, अभिनंदनं; संमति f., प्रशंसा; ' he got the a. of his mother ' मात्रानुमोदितः. –ED, a. संमत, प्रशस्त &c., परीक्षित. –APPROBATION, s. सं-अनु-मति f. 2 साधु-धन्य-वादः, प्रशंसा.

APPROXIMATE, v. t. उपनी 1 P, उपस्था c. (स्थापयति). –v. i. समीपं-निकटं-वृत् 1 A, आसन्न a. भू, See APPROACH. 2 Resemble, q. v. –a. समीप, आसन्न, संनिकृष्ट; ' a. to 10 ' आसन्नदशाः. –ION, s. आसन्नता, उपगमः &c.

APRIL, s. चैत्रः, मधुमासः, वैशाखः.

APRON, s. (मलनिवारणार्थं) कटिप्रच्छदः, मलवस्त्रं.

APROPOS, adv. अनुरूपं, यथा in comp.

APT, a. उचित, योग्य, युक्त. 2 Ex. by शील in comps., प्रायः with pot. pass. part.; ' youths are a. to forget ' युवानो विस्मरणशीलाः; ' lazy boys are a. to be bad boys ' अलसैर्बालकैः प्रायो दुर्वृत्तैर्भवितव्यं; ' over-affection is a. to suspect evil ' अतिस्नेहः पापशंकी (S. 4); आलु in comp.; ' a. to take pity ' दयालुः; ' a. to break ' भंगुर. 3 दक्ष, कुशल, अभिज्ञ, See SKILFUL. 4 त्वरित, चपल, उद्युक्त. –ITUDE, s. योग्यता, पात्रता, औचित्यं. 2 °शीलता, स्वभावः, शीलं. –LY, adv. यथोचितं, यथोपपन्नं, स्थाने, चातुर्येण, सकौशलं. –NESS, s. योग्यता; कौशलं, पाटवं. 2 शक्ति f., सामर्थ्यं.

AQUATIC, a. जल in comp., जलोद्भव, वारिचर; ' a. animal ' जलजंतुः, यादस् n. 2 जलचर, जलज, वारिज.

AQUEDUCT, s. जलप्रणाली, जलमार्गः, परीवाहः.

AQUEOUS, a. जलमय (यी f.), अम्मय, सजल, अनूप.

AQUILINE, a. शुकसदृश (शी f.); वक्र, कुंचित; ' having an a. nose ' शुकनासः.

ARABLE, a. कर्षणीय, कृषियोग्य.

ARBITER, s. मध्यस्थः; निर्णेतृ m., प्रमाणपुरुषः. 2 ईशः, प्रभुः. —ARBITRATE, v. विचर् c., निर्णी 1 P; मध्यस्थतां गृहीत्वा निर्णी or परिच्छिद् 7 P. –ION, s. मध्यस्थकृतनिर्णयः; विचारणं, निर्णयः. 2 माध्यस्थ्यं. –OR, s. मध्यस्थः, निर्णेतृ m., विचारकः.

ARBITRARY, a. स्वेच्छाचारिन् (णी f.), कामचारिन्, स्वच्छंद, स्वैरवृत्त. 2 अनियंत्रण, उद्दाम. 3 चपल, अविहित. –LY, adv. स्वेच्छया, स्वकामतः, स्वैरं, निर्यंत्रणं.

ARBOUR, s. लतागृहं, निकुंजः-जं, पर्णशाला.

ARC, s. वृत्तखंडं, धनुस् n.

ARCADE, s. छत्रपथः-मार्गः, गूढमार्गः.

ARCH, s. खंडमंडलं, वृत्तखंडं; ' a. of heaven ' नभोमंडलं. 2 तोरणः-णं. –v. t. मंडलीकृ; तोरणरूपेण निर्मा 3 A, गोलाकारेण आच्छद् 10; a. ed सतोरण, न्यस्ततोरण; भुग्न, कुंचित, वक्र, तोरणाकार. –a. विदग्ध, धूर्त, चतुर; मुख्य, श्रेष्ठ, उत्तम, प्रधान, अग्रणी; ' a. fiend ' पिशाचाग्रणीः; ' a. angel ' प्रधानदूतः; ' a. bishop ' मुख्यो धर्माध्यक्षः.

ARCHAISM, s. प्राचीन-आर्ष-प्रयोगः.

ARCHAIOLOGY, s. पुराणवस्तुशास्त्रं.

ARCHER, s. धन्विन् m., धानुष्कः, इषुधरः, निषंगिन् m., धनुर्धरः. –Y, s. धनुर्विद्या, शराभ्यासः, धनुर्वेदः.

ARCHETYPE, s. मूलरूपं, आदर्शः.

ARCHITECT, s. स्थपतिः, शिल्पिन् m; ' man is the a. of his own fortune ' लोके गुरुत्वं विपरीततां वा स्वचेष्टितान्येव नरं नयंति (H. 2). –URE, s. शिल्पं, वस्तुनिर्माणकौशलं, निर्माणशिल्पं.

ARCHIVES, s. ग्रंथरक्षागारं. 2 पुरावृत्तं.

ARCTIC, a. उत्तर, उदीचीन, उत्तरकेंद्रीय.

ARDENT, a. उत्तप्त, प्रचंड, उत्कट, उत्सुक, कुतूहलिन्-उत्साहिन् (नी f.), व्यग्र; ' a. love ' निरतिशयोनुरागः; ' a. looks ' सतृष्णा दृष्टिः. – LY, adv. उत्कटं, सतृष्णं, सानुरागं. –ARDOUR, s. उत्तापः, अत्यंतता, निरतिशयः, अतिरेकः, उत्कटता, उत्साहः, व्यग्रता, कुतूहलं, औत्सुक्यं.

ARDUOUS, a. दुष्कर, यत्नसाध्य, दुःसाध्य, सु-अति-दुष्कर. 2 प्रांशु, दुरारोह, उच्च.

AREA, s. फलं; ' a. of a field ' क्षेत्रफलं. 2 अंगणं-नं; ' inner a. ' प्रकोष्ठः.

ARENA, s. रंगः, रंगभूमि f., मल्लभूः.

ARGENT, a. राजत (ती f.), रौप्य (प्यी f.).

BEFORE, *prep.* (Time) प्राक्, पूर्वं, अर्वाक्, (with abl.). 2 (Place) पुरः, पुरतः, अग्रे, अग्रतः, पुरस्तात्, (with gen.); समक्षं, साक्षात्, प्रत्यक्षं.–*adv.* (place) *See* above. 2 (Time) पूर्व in comp.; 'not heard b.' अश्रुतपूर्व. –*conj.* यावत् न-तावत्; 'study your lesson b. he comes' यावदसौ नागच्छति तावत्पाठमधीष्व; एकस्य दुःखस्य न यावदंतं गच्छामि तावद्द्वितीयं समुपस्थितं मे; 'b. hand' प्रागेव, पूर्वमेव, प्रथममेव, अग्रे; 'b. mentioned' पूर्वोक्त, प्रागुक्त; 'as b.' यथा पुरा, यथापूर्वं; पूर्ववत्; 'in times gone b.' पुरा, गतकाले.

BEFOUL, *v. t.* दुष् c. (दूषयति); *See* STAIN.

BEFRIEND, *v. t.* अनुग्रह् 9 P; उपकृ 8 U, साहाय्यं कृ (with gen.).

BEG, *v. i.* भिक्ष् 1 A, भिक्षाटनं कृ 8 U, भिक्षां याच् 1 A. –*v. t.* अंजलिं बद्ध्वा-पादयोः पतित्वा विज्ञा c. (ज्ञापयति) or निविद् c. 2 याच् 1 A; अभि-प्र-अर्थ् 10 A; 'b. s. to say' विज्ञापयति; 'b. favour of' प्रसद् c., अनुनी 1 P. –GING, *s.* यांचा, प्रार्थना. 2 भिक्षा, भिक्षाटनं. —BEGGAR, *v. t.* दरिद्रीकृ 8 U, सर्वस्वं हृ 1 P; 'b. s description' वर्णनातीत. *s.* –प्रार्थकः, अर्थिन् *m.*, भिक्षुः, याचकः, दरिद्रः.–LY, *a.* निर्धन, कृपण. 2 नीच, अपकृष्ट. –Y, *s.* दैन्यं, कार्पण्यं, दारिद्र्यं, भैक्ष्यं.

BEGET, *v. t.* जन् c. (जनयति), उत्पद् c.; प्रसू 2 A, सृज् 6 P. –TER, *s.* जनकः, उत्पादकः, जनयितृ *m.*

BEGIN, *v. t.* आ-प्रा-रभ् 1 A; प्र-उप-क्रम् 1 A, प्रस्तु 2 U, (प्रस्तूयतां भोः), प्रवृत् 1 A; 'the wind began' वातोप्रसरोभूत्. –NER, *s.* आरब्धृ *m.*, नवच्छात्रः. –NING, *s.* आरंभः, उपक्रमः. 2 आदि *m.*; 'having no b.' अनादि. 3 मूलं, योनि *f.*, प्रभवः; 'b. with' आदि-आद्य- in comp.; 'in the b.' आदौ; 'from the b.' आमूलात्, आदितः; 'god has neither b. nor end' अनाद्यनंत ईश्वरः.

BEGIRD, *v. t.* परिवेष्ट् 1 A or c., अवरुध् 7 U, आ-परि-वृ 5 U; वलय, रसना, in comp.; समुद्ररसना-उदधिवलया-पृथ्वी 'earth begirt by sea'.

BEGONE, *interj.* अपेहि, अपसर, अपयाहि.

BEGREASE, *v. t.* वसया लिप् 6 P, or स्निग्धीकृ 8 U.

BEGRIME, *See* SOIL.

BEGRUDGE, *See* ENVY, *v. t.*

BEGUILE, *v. t.* विनुद् c., अतिवह् c. (of time) (कथाभिर्दिवसमत्यवाहयत). 2 व्यामुह् c., वंच् 10, विप्रलभ् 1 A, आकृष् 1 P; प्र-वि-लुभ् c.

BEHALF, (on or in) अर्थं, अर्थे, हेतोः, कारणात्, कृते (with gen.).

BEHAVE, *v. i.* आचर् 1P, वृत् 1 A, व्यवहृ 1 P; *See* ACT. 2 वृत्तिं कृ 8 U, अनुष्ठा 1 P; 'well b. ed' सदाचारः. –BEHAVIOUR, *s.* आचारः, वृत्ति *f.*, व्यवहारः, चेष्टितं, चरितं, आचरणं.

BEHEAD, *v. t.* शिरः (*n.*) छिद् 7 P or कृत् 6 P. –ING, *s.* शिरच्छेदः; 'worthy of b.' शीर्षच्छेद्यः.

BEHEST, *See* COMMAND (*s.*).

BEHIND, *prep.* पश्चात्, पृष्ठतः, (with gen.); अनु (with acc.); 'concealing his body b. the creepers' लतांतरित–लताव्यवहितविग्रहः; 'he is far b. (backward)' मंदः, मंदधीः; 'b. the scenes' नेपथ्ये. –*adv.* पृष्ठतः; 'from b.' पश्चादेत्य, पृष्ठेनागत्य. 2 अवरतः, अधस्तात्. 3 दूरे, दूरतः; 'b. part' पश्चाद्देशः, पृष्ठं, नितंबः.

BEHOLD, *v. t.* दृश् 1 P, ईक्ष् 1 A; *See* SEE. –EN, *a.* उपकारज्ञ, कृतोपकारेण पराधीन. –ER, *s.* प्रेक्षकः, दर्शकः, द्रष्टृ *m.*

BEHOOF, *s.* अर्थः, फलं, वृद्धि *f.*, लाभः.

BEHOVE, *v. t.* Ex. by pot. pass. part., pot. mood, or अर्ह् 1 P; 'it b. s thee to assist me' त्वया मम साहाय्यं कर्तव्यं, साहाय्यं कर्तुमर्हसि &c., *See* BECOME, *v. t.*

BELABOUR, *v. t. See* BEAT.

BELAY, *v. t.* प्रति-उप-रुध् 7 U.

BELCH, *v. t.* उद्वम् 1 P, उद्गॄ 6 P. –ING, *s.* उद्वमनं, उद्गिरणं, उद्गारः.

BELEAGUER, *See* BESIEGE.

BELIE, *v. t.* असत्यं आरुह् c. (रोपयति); मिथ्याभियोगं कृ 8 U; परि-अप-वद 1 A.

BELIEVE, *v. t.* विश्वस् 2 P (with loc.), श्रद्धा 3 U (with loc. of person and acc. of thing); प्रति-इ 2 P, (with acc.). 2 संभू c., तर्क् 10, मन

4 A. -ER, *s.* विश्वासिन् *m.*, श्रद्धालुः, श्रद्धान्वितः. -BELIEF, *s.* विश्वासः, विश्रंभः, प्रत्ययः. 2 श्रद्धा, आस्तिक्यबुद्धि *f.* 3 मति *f.*, बुद्धि *f.*; 'it is my b.' इति मे मतिः मतं, इत्यहं मन्ये.

BELIKE, *adv.* अपि नाम, किंस्वित्.

BELL, *s.* घंटा; 'small b.' किंकिणी; 'b. metal' कांस्यं, पीतलोहं; 'b. clapper' घंटावादकः.

BELLE, *s.* सुंदरी, रूपवती स्त्री; सुभगंमन्या.

BELLIGERENT, *a.*, *s.* बद्धसमर; योधनशील, युयुत्सु.

BELLOW, *v. i.* नद् 1 P, निनद्. गर्ज् 1 P, रस् 1 P, रट् 1 P, नर्द् 1 P. -ING, *s.* गर्जितं, निनादः, गर्जनं, रसितं.

BELLOWS, *s.* भस्त्रा, दृति *f.*, भस्त्री, चर्मप्रसेविका.

BELLY, *s.* उदरं, जठरं, तुंदं, कुक्षिः; 'b. ache' उदरशूलः-लं; 'b. full' आकंठं; उदरपूरणं (*s.*); 'b. bound' आनद्ध; बद्धोदर; 'b. god' उदरंभरिः, औदरिकः; 'b. worm' क्रिमिः; कृमिः.

BELONG, *v. i.* अस् 2 P, विद् 4 A, भू 1 P, with gen.; or by an adj. from noun; 'this book belongs to me' ममेदं पुस्तकं, or मदीयमेतत् पुस्तकं, 'b. ing to Râma' रामसकाशवर्तिन्; 'b. ing to spring' वासंतिक (की *f.*); 'b. ing to the king;' राजकीय. 2 संबंध् pass.; 'this does not b. to you' नायं तव व्यापारः.

BELOVED, *a.* प्रिय, इष्ट, दयित, वल्लभ; 'b. person' दयितजनः, &c.

BELOW, *prep.* अधः, अधस्तात्, तले, (with gen.). 2 ऊन in comp. 3 अयोग्य, अनर्ह, अननुरूप, असदृश (शी *f.*); 'the gods are b. Hari' अनु हरिं सुराः (S. K.) -*adv.* अधः, अधस्तात्; अधोभागे-लोके (in hell). 2 नीचे, अवरतः. 3 इह, इह लोके.

BELT, *s.* मेखला, रस (श) ना, कांची. -*v. t.* मेखलारूपेण परिवृ 5 U or परिवेष्ट् 1 A.

BEMANGLE, *See* MANGLE.

BEMIRE, *v. t.* पंकेन मलिनयति (D.) or दुष् c. (दूषयति).

BEMOAN, *See* LAMENT.

BENCH, *s.* पीठं; फलकः; 'b. of justice' धर्मासनं, व्यवहारासनं.

BEND, *v. t.* नम् c. (न-ना-मयति), अव-आ-नम् c. (नमयति), नम्रीकृ 8 U, आवृज् 10, वक्रीकृ, भुज्-, वि-आ-, 6 P; 'bent under the load of breasts' कुचभारानमिता, स्तनभरेण नम्रतामानीता, स्तनभारेणावर्जिता; 'b. the brow' भ्रूभंगं कृ; 'he bent his mind again to his task' स पुनरपि स्वकार्ये मनो न्यदधात्-बबंध-न्यवेशयत्; 'b. to one's will' वशीकृ. -*v. i.* आ-अव-प्र-नम् 1 P, नम्र-लीन- *a.* भू 1 P; 'trees b. down under the load of fruits' भवंति नम्रास्तरवः फलागमैः (S. 5) -BENT, *a.* आनमित; ना-न-मित, आभुग्न; प्रवण, प्रह्व, आवर्जित; 'b. on' कृतनिश्चय, सुनिश्चय, कृतसंकल्प, विहितप्रतिज्ञ; 'eagerly b. on (killing) each other' परस्परवधोद्यतौ. -*s.* नति *f.*, वक्रता, जिह्मता. 2 वंकः, पुटभेदः. 3 शीलं, वांछा, निश्चयः, प्रवृत्ति *f.*, अभिनिवेशः. -ING, *s.* नति *f.*, नमनं, अवनमनं.

BENEATH, *prep*, *adv.* *See* BELOW.

BENEDICTION, *s.* आशिस् *f.*, आशीर्वादः; नांदी (in dramas); आशास्यं, धन्यवादः. 2 स्तवः, स्तुति *f.* -BENEDICTORY, *a.* मांगलिक (की *f.*); 'b. stanza' नांदीश्लोकः; नांदी.

BENEFACTION, *s.* उपकारः, उपकृतं, हितं.

BENEFACTOR, *s.* उपकर्तृ *m.*, उपकारिन् *m.*, हितकृत् *m.*, उपकारकः, हित-प्रिय-करः.

BENEFICE, *s.* धर्मशिक्षकवृत्ति *f.*

BENEFICENCE, *s.* उपकारशीलता, परोपकारः; उपकारः, हितं, दया, कृपा, त्यागिता.

BENEFICENT, *a.* दान-त्याग-शील, परोपकारिन् (णी *f.*), उपकारपर. 2 (things) हितकर (री *f.*), हितकारिन्, हितावह.

BENEFICIAL, *a.* हित, हितावह, उपकारक, लाभजनक; कल्याणकारक, सुखप्रद.

BENEFIT, *s.* उपकारः, हितं, अनुग्रहः. 2 फलं, लाभः; 'for public b.' प्रजार्थं.-*v. t.* उपकृ 8 U, अनुग्रह् 9 P, हितं कृ, लाभं दा 3 U.

BENEVOLENCE, *s.* परहितेच्छा, परोपकारिता, दया, कृपा, उदारता. —BENEVOLENT, *a.* हितैषिन् (णी *f.*), उपकारपर, परोपकारशील, दयालु, परहितेच्छु.-LY, *adv.* परहितेच्छया, कृपया, दयापूर्वं.

BENIGHT, *v. t.* तमसा आच्छद् 10.-ED, *a.* तमोवृत, नैशतमसाक्रांत; (fig.) अज्ञानतमोवृत.

BENIGN, BENIGNANT, *a.* दयालु, प्रेमपर, सदय, सुखप्रद, कृपालु.-ITY, *s.* दया, प्रीति *f.*, कृपा, अनुग्रहः, दयालुत्वं.

BENISON, *s.* आशिस् *f.*, आशीर्वादः.

BENUMB, *v. t.* जडयति (D.), जडीकृ 8 U, स्तंभ् 9 P.

BEQUEATH, *v. t.* मृत्युसमये इच्छापत्रेण दा 3 U or ऋ c. (अर्पयति), or प्रतिपद् c.-BEQUEST, *s.* रिक्थप्रदानं.

BEREAVE, *v. t.* विनाकृ 8 U, वियुज् 10, (with instr. for 'of'); 'b. ed of Madana' मदनेन विनाकृता. 2 अपनी 1 P, भ्रंश् c., 'to be b. ed' परिहा pass., वियुज् pass.-ED, BEREFT, *a.* रहित, हीन, वियुक्त, हत-गत in comp.-MENT, *s.* विप्रयोगः, वियोगः; विरहः.

BERRY, *s.* गुली, गुटिका.

BESCATTER, *See* SCATTER.

BESEECH, *v. t.* अनुनी 1 P, प्रसद् c., विनयेन याच् 1 A or प्रार्थ् 10A.-ER, *s.* प्रार्थकः, याचकः, अर्थिन् *m.*

BESEEM, -LY, *See* BECOME.

BESET, *v. t.* रुध् 7 U, आकुलीकृ 8U, आक्रम् 1 U, 4 P, संबाध् 1 A, उपपीड् 10, अभिभू 1 P. -*a.* आकुल, अभिभूत; 'b. with difficulties or dangers' संकटाकुल, अनर्थसंबाध, विपदभिभूत.

BESHREW, *v. t.* अमंगलं प्रार्थ् 10 A.

BESIDE, *prep.* पार्श्वे, समीपं -पे; अभितः, परितः (acc.); निकटं-टे (gen.). 2 असंबद्ध *a.*; 'b. oneself with joy' आनंदपरवशः, आनंदेन विगतचेतन इव भूत्वा; 'this is b. the question' अप्रास्ताविकं-अप्रासंगिकं- एतत्, अप्रकृतं.

BESIDES, *prep.* Ex. by भिन्न, व्यतिरिक्त, अपर, इतर, in comp., or with abl. -*adv.* अपरंच, अन्यच्च, किंच, अपिच, अधिकं.

BESIEGE, *v. t.* रुध् 7 U, अव-उप-रुध्, परिवेष्ट् 1 A or c., आक्रम् 1 U, 4 P.-ER, *s.* अव-उप-रोधकः.-ING, *s.* उप-अव-रोधः, रोधनं.

BESLAVE, *v. t.* वशीकृ 8 U, दम् c. (दमयति).

BESMEAR, *v. t.* वि-आ-अनु-लिप् 6 P, अंज् 7 P, दिह् 2 U.-ED, *a.* लिप्त, अक्त, दिग्ध; विषदिग्धः शरः 'b. with poison'; रक्ताक्तः 'b. with blood'.

BESOM, *s.* मार्जनी, शोधनी.

BESORT, *v. i.* युज् pass., उपपद् 4 A.

BESOT, *v. t.* मुह् c., जडीकृ 8 U.-TED, *a.* मूढबुद्धि, मूढात्मन्.

BESPANGLE, *v. t.* वलयैः अनुव्यध् 4 P or उप-शुभ् c. or भूष् 10.

BESPATTER, *v. t.* मलेन सिच् 6 P, मलिनयति (D.), कलुषयति (D.).

BESPEAK, *v. t.* सूच् 10, दृश् c., कथ् 10, *See* INDICATE; आकृतिरेवानुमापयत्यमानुषतां (Ka. 132) 'b. s its being superhuman.'

BESPECKLE, BESPRINKLE, *See* SPECKLE, SPRINKLE.

BEST, *a.* प्रशस्ततम, उत्तम, श्रेष्ठ, परम, परार्घ्य; 'to the b. of one's capacity or power' यथाशक्ति, यावच्छक्यं; 'to the b. of one's belief' यथामति; 'b. of' ex. by रत्न or वर in comp.; स्त्रीरत्नं, मुनिवरः.

BESTAIN, *See* STAIN.

BESTEAD, *v. t.* लाभाय भू 1 P, हिताय क्लृप् 1 A.

BESTIAL, *See* under BEAST.

BESTIR, (oneself) चेष्ट् 1 A, घट् 1 A, प्रयत् 1 A, उद्यमं कृ 8 U, व्यवसो 4 P.

BESTOW, *v. t.* दा 1P, 3 U, प्रदा, प्रतिपद् c., (with dat.) विन्द् 1 P (with loc.). 2 प्रयुज् 7 A, 10, निक्षिप् 6 P; 'b. ing wealth on proper persons' वित्तस्य पात्रे व्ययः; 'great care seems to be b. ed on this picture' इदं मालेख्यं प्रयत्नतः-सुनिपुणं-निर्मितमिति अनुमीयते; 'b. oneself' सेव् 1 A, आस्था 1 A, मनो निविश् c. -AL, *s.* दानं, प्रतिपादनं. -ER, *s.* दातृ *m.*, प्रदः in comp.

BESTRAUGHT, *a.* व्यग्र, चिंताकुल; *See* ANXIOUS.

BESTREW, *v. t.* आस्तृ-स्तृ 5-9 U.

BESTRIDE, *v. t.* पादौ पृथक् कृत्वा आ-अधिरुह् 1 P or अधिक्रम् 1 U, 4 P.

BESTUD, *v. t.* अनुव्यध् 4 P, खच् 10.

BET, *s.* पणः, प्रतिज्ञा. -*v. t.* पण् 1 A (with gen. of thing staked); शतस्य पणते (S. K.).

BETAKE, (oneself to) *v. t.* आश्रि 1 U, अंगीकृ 8 U; अरण्यवासमंगीचकार 'betook himself to forest residence'.

BETEL, *s.* (tree) तांबूली, पुन्नागवल्ली, नागलता; 'b. box' तांबूलकरंकः, पूगपात्रं; 'b. nut' पूगं, तांबूलं; 'b. box bearer' तांबूलकरंकवाहिन् (नी *f.*).

BETHINK, *v. t.* अनुध्यै 1 P, विमृश् 6 P; *See* THINK.

BETIDE, *v. t.* आपत् 1 P, उपस्था 1 U, (gen.), *See* BEFALL; 'may woe b. him' अभद्रं तस्य भूयात्.

BETIMES, *adv.* प्रभाते, प्रातः, प्रत्यूषे. 2 यथासमयं, वेलायां, यथावसरं.

BETOKEN, *v. t.* सूच् 10, दृश् c., *See* INDICATE.

BETRAY, *v. t.* शत्रुकरेषु ऋ c. (अर्पयति), विश्वासघातेन ऋ c. 2 भिद् 7 U; 'b. ed the secret' रहस्यं बिभेद. 3 Indicate, q. v. 4 वंच् 10; *See* CHEAT; 'b. themselves' आत्मस्वरूपं प्रकटयंति. -ER, *s.* विश्वासघातकः; वंचकः.

BETRIM, *v. t.* भूष् 10, अलंकृ 8 U.

BETROTH, *v. t.* (वाचा) दा 3 U, प्रतिपद् c., प्रतिश्रु 5 P, (dat.). -AL, *s.* वाग्दानं, वाक्प्रदानं.

BETRUST, *See* ENTRUST.

BETTER, *a.* श्रेयस् (सी *f.*), भद्रतर, गरीयस्, प्रशस्ततर, साधीयस्; 'b. than' वरं-न; 'better death than disgrace (I prefer death to disgrace)' वरं मृत्युर्न पुनरपमानः. 2 (In health) ex. by विशेषः; 'I am b. to-day' अस्ति मे विशेषोऽद्य (S. 3). -*adv.* वरं, श्रेयः, भद्रतरं, अधिकतरं, अधिकं. 2 (With verbs) ex. by तरां; 'he cooks b. than Râma' रामात्पचतितरां. -*s.* श्रेष्ठता, प्रमुखत्वं, वर्चस्वं; 'get the b. of' अभिभू 1P, अतिरिच् pass., *See* EXCEL. -*v. t.* वृध् c.; कृ with (*a.*) -BETTERS, गुरुजनः, गुरवः (pl.).

BETWEEN, BETWIXT, *prep.* मध्ये, अभ्यंतरे, अंतरे, मध्यस्थाने; oft. ex. by gen. of nouns; देशयोरंतरं 'distance b. the two countries'; 'b. joy and sorrow (tears)' शोकानंदमध्यवर्तिनी (Ka. 318).

BEVERAGE, *s.* पानं, पेयं, पानीयं; 'b. of the Gods' अमृतं.

BEVY, *s.* गणः, संघः, समवायः.

BEWAIL, *v. t.* विलप् 1 P, शुच् 1 P, *See* LAMENT.–ING, *s.* शोकः, विलापः, परिदेवनं.

BEWARE, *v. i.* सावधान-अप्रमत्त-अवहित-*a.* भू 1 P; 'b. of your enemies' शत्रुविषये सावधानो भव; 'b. lest you will be seduced by pleasures' सावधानो भव नोचेद्विषयैः प्रलोभ्येथाः; or तथा प्रयतेथा यथानाक्षिप्यसे विषयैः (Ka. 109).

BEWEEP, BEWET, *See* WEEP, WET.

BEWILDER, *v. t.* आकुलीकृ 8 U, विक्लवीकृ, व्यासं-मुह् c., संभ्रम् c. (भ्रमयति), जडीकृ. –ED, *a.* विक्लव, आकुलीभूत, आ-व्या-कुल, विमूढ, विह्वल, संभ्रांत; 'b. what to do' किंकर्तव्यतामूढः, प्रतिपत्तिमूढः. –MENT, *s.* संभ्रमः, वैक्लव्यं, संमोहः, व्याकुलत्वं.

BEWITCH, *v. t.* मुह् c., सं-वि-परि°, वशीकृ 8 U, मद् c. (मनो मदयंति ये Mal. 2); मंत्रेण वशीकृ. 2 मनो हृ or आकृष् 1 P. –ING, *a.* मोहन (नी *f.*), हारिन् (णी *f.*). –MENT, *s.* मोहनं, मोहः, वशीकरणं, माया, आकर्षणं.

BEWRAY, *See* BETRAY.

BEYOND, *prep.* परतः (with abl.), अतिक्रम्य, अतीत्य, (with acc.); 'b. the forest is the Kailâsa' तदरण्यमतिक्रम्य कैलासगिरिः (Ka. 121); 'Oh! Change b. belief' अहो विश्वासातिक्रांतो (अविश्वास्यः) दशाविपर्यासः; 'b. comprehension' अगम्य, दुर्ज्ञेय, दुर्बोध; 'b. expectations' मनोरथानामभूमिः (S. 7); gen. ex. by अति pr.; अधिकं; 'b. measure' अतिमात्रं; 'b. human power' अतिमानुषं; 'b. this continent' द्वीपांतरे; 'lives b. his means' आयाधिकं व्ययं करोति. –*adv.* दूरे, पारे-रं; 'go or pass b.' अतिक्रम् 1 U, अति-इ 2 P.

BIAS, *s.* स्पृहा, अभिलाषः. 2 शीलं, भावः. 3 पक्षपातः, पक्षपातित्वं. 4 प्रोत्साहनं, प्रवर्तनं. –*v. t.* प्रवृत् c., प्रणुद् 6 P, प्रोत्सह् c. 2 साचीकृ 8 U; दुष् c. (दूषयति).

BIBBER, *s.* मद्यपायिन् *m.*, सुरापः, मद्यपः.

BIBLIOGRAPHY, *s.* पुस्तकविद्या.

BIBLIOMANIA, *s.* दुर्लभपुस्तकसंग्रहणोन्मादः or -व्यग्रता.

BIBULOUS, *a.* जलशोषक.

BICKER, *v. i.* कलहं कृ 8 U, विवद् 1 A, वाग्युद्धं कृ. –ING, *s.* कलहः, विवादः, कलिः. 2 डिंबाहवः.

BID, *v. t.* आ-व्या-दिश् 6 P, आज्ञा c. (ज्ञापयति). 2 मूल्यं ख्या c. (ख्यापयति) or उद्घुष् 10. 3 निमंत्र् 10 A; 'b. welcome' स्वागतं वद् 1 P, or व्याहृ 1 P; 'b. adieu or farewell' आमंत्र् 10A, आपृच्छ् 6 A; 'b. defiance' धृष् 5 P, आह्वे 1 A. –DER, *s.* क्रेतृ *m.* –DING, *s.* आज्ञा, आदेशः, शासनं. 2 मूल्यख्यापनं, अर्घघोषणा.

BIDE, *v. t.* स्था 1 P, वृत् 1 A. –*v. t.* प्रतीक्ष् 1A. 2 सह् 1 A.

BIDENTAL, *a.* द्विदत् (ती *f.*), द्विरद.

BIENNIAL, *a.* द्विवार्षिक (की *f.*), द्विवर्षीण, द्वैवर्षिक.

BIER, *s.* शवयानं, कटः, खाटः-टी.

BIFOLD, *a.* द्विगुण, द्वैध (धी *f.*).

BIFORMED, *a.* द्विरूप.

BIFURCATE, *v. t.* द्विधा कृ 8 U, विभिद् 7 P or c. –ED, *a.* द्व्यग्र. 2 विश्लेषित, द्विधा कृत.

BIG, *a.* महाकाय, बृहत्काय (of animate creatures); महाप्रमाण, अतिप्रमाण, स्थूल, विपुल, बृहत् (ती *f.*), पृथु (थुः, थ्वी *f.*). 2 Pregnant, q. v. 3 संकुल, पूर्ण, संकीर्ण, आकीर्ण; 'as b. as' परिमाण, परिमित, मात्र, in comp.; बिल्वमात्र 'b. as Bilwa.' –NESS, *s.* स्थूलता, वैपुल्यं &c. 2 परिमाणं, प्रमाणं.

BIGAMY, *s.* (एककाले) द्वीपत्नीकरणं; द्विभर्तृकरणं. –IST, *s.* द्विपत्नीकः; द्विभर्तृका.

BIGOTRY, *s.* स्वमतासक्ति *f.*, स्वमताग्रहः, सनिर्बंधं स्वमतालंबनं.–BIGOTED, *a.*, BIGOT, *s.* निर्बंधशील, (अविचार्य) स्वमतरक्षिन् (णी *f.*), निर्बंधेन स्वमतावलंबिन्.

BILBO, *See* SWORD.

BILE, *s.* पित्तं, मायुः. –OUS, पैत्तिक (की *f.*), मायुमय (यी *f.*).

BILINGUOUS, *a.* द्विजिह्व.

BILK, *See* CHEAT.

BILL, *s.* पत्रं, लेखः. 2 चंचु (चू) *f.*, तुंडं. –*v. t.* *See* KISS, or EMBRACE.

BILLET, *s.* पत्रं, लेखः, लेख्यं. 2 काष्ठखंडं. – *v. t.* सैन्यानि वस् c.

BILLION, *s.* खर्वः.

BILLOW, *s.* महोर्मि *f.*, कल्लोलः, तरंगः. –*v. i.* तरंगायते (D.). –Y, *a.* कल्लोलमालाकुल, प्रचलदूर्मिमालाकुल; तरंगित.

BIN, *s.* कुशूलः, धान्यकोष्ठः.

BINARY, *a.* द्विगुण. द्वैध (धी *f.*).

BIND, *v. t.* बंध् 9 P, (lit. & fig.); नि-सं-यम् 1 P; 'bound by affection' स्नेहनिबद्धः; नियंत्र् 10; 'I am not bound by these rules' नाहमेभिर्विधिभिर्नियंत्रितोस्मि. 2 आनह् 4 P, पिनह्; 'b. together' सं-बंध्, संश्लिष् c.; ग्रंथ् 9 P, संहृ 1 P, संयुज् 7 U, 10; 'b. oneself' प्रतिज्ञा 9 U, प्रतिश्रु 5P; 'b. by oath' शप् c.; 'b. on' ex. by pot. pass., part., or अर्ह् 1 P; 'the protection of your wife is b. ing on you' त्वया भार्यापोषणम-

वश्यमेव कर्तव्यं. -ING, *s.* बंधः, बंधनं, वेष्टनं, पट्टः, आवरणं. -BOUND, *a.* बद्ध, निबद्ध, संयत, नियंत्रित, आनद्ध; 'you are b. to obey my orders' त्वया ममादेशा अनुरोद्धव्या एव, आदेशाननुरोद्धुमर्हसि; 'where are you b.' कुत्र गंतुं कृतनिश्चयोसि-कुत्र गंतुकामोसि.

BINACULAR, *a.* द्विनेत्र, द्विनयन.

BIOGRAPHY, *s.* चरितं, जीवनवृत्तांतः. -ER, *s.* वृत्तांतलेखकः-आख्यातृ *m.*, चरितनिवेदकः.

BIPARTITION, *s.* द्विधाकरणं.

BIPED, *s.* द्विपाद् *m.*, or द्विपदः.

BIRCH, *s.* भूर्जः, मृदुत्वचः, प्रतिविषा. -EN, *a.* भूर्जमय (यी *f.*), भूर्जनिर्मित.

BIRD, *s.* विहगः, विहंगः,-गमः, पक्षिन् *m.*, खगः, शकुंतः, पतत्रिन् *m.*, गरुत्मत् *m.*, द्विजः, पत्रिन् *m.*, शकुंतिः, अंडजः, पतंगः, शकुनिः; 'bird's eye-view' उच्चस्थानादालोकनं, स्थूलदर्शनं, असूक्ष्मदृष्टिः.

BISCUIT, *s.* अपूपः, पिष्टकः, पूपः.

BISECT, *v. t.* समांशद्वयेन विभज् 1 U, द्विखंडीकृ 8 U, द्विधा छिद् 7 P.

BISHOP, *s.* धर्माध्यक्षः. -RIC, *a.* धर्माधिकारः.

BIT, *s.* खलीनः-नं, कविका. 2 खंडः, लवः, भागः; 'not a b.' न मनागपि, न स्तोकांशेनापि; गंधः (क्रियायाः गंधमात्रस्यापि अनुप्रवेश इह नोपपद्यते S. B. 74). 3 पिंडः, ग्रासः. -*v. t.* खलीनेन नियंत्र् 10.

BITCH, *s.* शुनी, कुक्कुरी, सरमा.

BITE, *v. t.* दंश् 1 P; 'bit off a large piece' दंतैर्महाखंडं संदष्टवान्-चर्वितवान्; उत्पट् 10, चर्व् 1 P, खाद् 1 P. 2 शीतेन पीड् 10. 3 अधिक्षिप् 6 P, *See* CENSURE. 4 पीड् 10, अर्द् 1 P, 10. -*s.* दंशः, दंशनं. 2 दंतपदं, दशनांकः. -ING, *s.* दंशनं; 'b. of conscience' मनसोनुतापः. -*a.* दंशक. 2 पीडाकर (री *f.*).

BITTER, *a.* कटु, तिक्त. 2 (Touching) मर्मभिद्-छिद्. 3 उग्र, निष्ठुर, परुष, तीक्ष्ण, कठोर. -LY, *adv.* निष्ठुरं, परुषं. 2 अत्यंतं. 3 प्रमुक्तकंठं (weeping b.). -NESS, *s.* कटुता, शुक्तता, तीक्ष्णता. 2 दुःखातिरेकः, उग्रशोकः; 'in b. of soul' दुर्मनायमानचित्त *a.*, समन्युना चेतसा. 3 कठोरता, परुषता, निष्ठुरता. 4 मात्सर्यं, पैशुन्यं.

BITUMEN, *s.* शिलाजतु *n.*, गिरिपुष्पकं, गैरेयं, गिरिजं, अश्मजं, अर्थ्यं.

BIVALVE, *a.* द्विकोष.

BLAB, *v. i.* रहस्यं भिद् 7 P. -BER, *s.* रहस्यभेदकः.

BLACK, *a.* कृष्ण, श्याम, कृष्णवर्ण, काल. 2 निष्प्रभ, तिमिर, असित, नील, मेचक. 3 (fig.) निंद्य, घोर, दारुण; 'b. deed' अपयशोमलिनं कर्म; 'b. guard' दुर्वृत्तः, दुराचारः, अधमः, खलः. -*s.* कृष्णः, कृष्णवर्णः; 'clothed in b.' नीलवस्त्रः. -EN, *v. t.* कृष्णीकृ 8 U, श्यामी-नीलीकृ. 2 दुष् c. (दूषयति), कलंकयति (D.) *See* STAIN. -ISH, *a.* ईषत्कृष्ण, आनील. -NESS, *s.* कृष्णिमन् *m.*, श्यामत्वं, नीलता, कालिमन् *m.*, तमस् *n.*, तिमिरं. -SMITH, *s.* कर्मकारः, लोहकारः, अयस्कारः.

BLADDER, *s.* मूत्राशयः, वस्ति *m.*, *f.*

BLADE, *s.* (Of a sword) धारा, पत्रं, फलं. 2 (Of grass) दलं, कांडं, अंकुरः. 3 स्कंधास्थि *n.*

BLAIN, *s.* स्फोटः, व्रणः-णं.

BLAME, *v. t.* निंद् 1 P, गर्ह् 1, 10 A, उपालभ् 1 A; दोषं क्षिप् 6 P or आरुह् c. (रोपयति), *See* CENSURE; 'I am not to b.' नाहमपराधी, न ममायं दोषः. -*s.* दोषः, अपराधः. 2 गर्हा, आक्षेपः, उपालंभः, निंदा, जुगुप्सा; 'lays the b. on another' अन्यस्मिन्दोषं क्षिपति. -ABLE, *a.* निंद्य, निंदनीय, गर्हणीय, गर्ह्य, वाच्य; 'he is not b. or to blame' स न दोषास्पदं-दोषपात्रं. -ER, *s.* निंदकः, परिवादकः, अधिक्षेपकः. -LESS *a.* अनिंद्य, निर्दोष, निष्कलंक, विशुद्ध (pure). -LESSNESS, *s.* अनिंद्यता, अनवद्यता (अहो अनवद्यता रूपस्य M. 2), अवाच्यता, दोषाभावः.

BLANCH, *v. t.* शुक्लीकृ 8 U, धवलीकृ. 2 निस्तुषयति (D.), त्वचं निष्कृष् or अपनी 1 P. 3 Avoid, q. v.

BLAND, *a.* मृदु, कोमल, मसृण, सौम्य, श्लक्ष्ण; 'b. in speech' प्रियंवद. -ISH, *v. i.* शां(सां)त्व् 10, चाटूक्तिभिः तुष् c., अनुनी 1 P, उपच्छंद् 10. -ISHMENT, *s.* विलासः, विभ्रमः. 2 प्रियवाक्यं, चाटूक्ति *f.*, मधुरभाषितं, उपच्छंदनं, अनुनयः.

BLANK, *a.* शुभ्र, शुक्ल; 'b. with fear' भयविवर्णः-विवर्णाननः. 2 शून्य, रिक्त, लेखारहित. 3 एकांत, अत्यंत; 'b. despair' एकांततो नैराश्यं. 4 अनुप्रास-यमक-हीन (verse). -*s.* लेखाशून्यं पत्रं. 2 शून्यता; रिक्तं, शून्यं.

BLANKET, *s.* कंबलः, ऊर्णायुः, रल्लकः.

BLASPHEME, *v. t.* ईश्वरं निंद् 1 P or अवमन् 4 A or अभिशप् 1 U. -OUS, *a.* ईश्वरनिंदक, पाषंडीय. -Y, *s.* पाषंडता, ईश्वरनिंदा.

BLAST, *s.* वात्या, वातः, वायुवेगः, प्रभंजनः, जवानिलः. 2 ध्मानं (of horns). 3 विनाशः, क्षयः, अपायः. -*v. t.* विनश् c., विहन् 2 P, म्लानीकृ 8 U, विशॄ c., क्षै c. (क्षपयति); 'b. ed by lightning' अशनिहतः. -ER, *s.* विनाशकः.

BLAZE, *v. i.* ज्वल् 1 P, प्र-उत्°-, दीप् 4 A, सं-उत्-प्र-°; 'b. ing' उज्ज्वल, प्रदीप्त, देदीप्यमान, भास्वर, *See* BRIGHT; 'b. abroad' प्रकाश् c., प्रख्या c. (ख्यापयति). -*s.* प्रभा, अर्चिस् *f.*, *n.*, दीप्ति *f.*, ज्वाला; 'b. of light' रश्मि-अंशु-जालं.

BLAZON, *v. t.* भूष् 10, अलंकृ 8 U. 2 प्रख्या c. (ख्यापयति), प्रकाश् c., उद्घुष् 10.

BLEACH, *v. t.* निर्णिज् 3 U, धाव् 1 P, 10, धवली-

कृ 8 U. -ED, *a.* धौत, निर्णिक्त. -ER, *s.* धावकः, वस्त्रनिर्णेजकः.

BLEAK, *a.* अतिशीत (winter); शिशिर, हैमंत (ती *f.*), हिमशीत. 2 (fig.) निरानंद, असुभग.

BLEAR-EYED, *a.* क्लिन्नाक्ष, चुल्ल, चिल्ल, पिल्ल; 'b. eye' चुल्लः &c.

BLEAT, *v. i.* रेभ् 1 A, मेंमें शब्दं कृ 8 U, रु 1 A. -ING, *s.* रेभणं, मेषरुतं, उरभ्रनादः.

BLEED, *v. t.* रक्तं-रुधिरं &c. (blood) मुच् c. or स्रु c. or मोक्ष् 10, with gen. of person or part bled; 'they b. the wound' क्षतेः रक्तमोक्षणं कुर्वंति. -*v. i.* रक्तं-रुधिरं स्रु 1 P, or मुच् 6 P, or प्रवह् 1 P; 'his hand b. s' तस्य हस्ताद्रुधिरं स्रवति; 'b. ing profusely' रुधिरप्राग्भारनिस्यंदिन् (Mal. 5); 'to b. for one's country' स्वदेशार्थे जीवितं त्यज् 1 P. -ER, रक्तस्रावकः-मोचकः. -ING, *s.* रक्तस्रावः, रक्तमोक्षणं, रक्तस्रुति *f.*, रुधिरक्षरणं.

BLEMISH, *s.* दोषः, कलंकः, छिद्रं; 'un-b. ed' निष्कलंक, निर्दोष. 2 अपयशस् *n.*, अकीर्ति *f.* -*v. t.* मलिनयति (D.), कलंकयति (D.), दुष् c. (दूषयति).

BLENCH, *v. i.* सहसा संकुच् 1 P. 2 सहसा अपसृ 1 P or अपक्रम् 1 U, 4 P or निवृत् 1 A; पराङ्मुख (खी *f.*) भू 1 P.

BLEND, *v. t.* मिश्र् 10, संयुज् 10, एकत्र कृ 8 U; 'to be b. ed' संकॄ pass.; संमिल् 6 P, एकीभू 1 P. -ED, *a.* संमिश्र, व्यामिश्र, संकीर्ण, संसृष्ट, मिश्रीकृत. 2 एकरूप, एकीभूत.

BLESS, *v. t.* Gen. ex. by Imperative or Benedictive of verb; 'I b. that you may get a son' पुत्रं लभस्व or लप्सीष्ठाः. 2 आशास् 2 A, आशिषं दा 3 U; वितॄ 1 P (with loc.); त्वयि वितरतु भद्रं (U. 3) 'b. you with auspicious good.' 3 सुखिन् (नी *f.*)-धन्य *a.* कृ 8 U; 'was b. ed with a son' सुतलाभेन कृती बभूव. -ED, *a.* धन्य, महाभाग, कल्याण (णी *f.*), मंगल, सुखिन्, सुखभाज्; 'of b. memory or name' सुगृहीतनामन् *a.* (म्नी *f.*), पुण्यश्लोक. -EDNESS, *s.* धन्यता, कृतार्थता. 2 परमानंदः, परमसुखं; परं पदं, अपवर्गः. -ING, *s.* आशिस् *f.*, आशीर्वादः, आशीर्वचनं. 2 वरः. हितं. उपकारः, कुशलं, धन्यत्वं; लाभः, सुखं.

BLIGHT, *v. t.* विफलीकृ 8 U, नश् c., *See* BLAST; 'schemes of policy b. ed by opposing fate' विगुणविधियोगान्नयाः फलैर्हीनाः (Mu. 6). -*s.* नाशः, क्षयः.

BLIND, *a.* अंध; 'born b.' जन्मांधः; 'b. following the b.' अंधपरंपरा; 'b. of one eye' अक्ष्णा काणः. 2 अज्ञान, हतज्ञान. -*v. t.* अंधीकृ 8 U, अंधयति (D.); 'b. ed by rage' क्रोधांधः; कामांधः, &c. -*s.* तिरस्कारिणी, व्यवधानं, यवनिका. 2 छद्मन् *n.*, कपटं. -FOLD, *v. t.* वस्त्रेण नयने पिधा 3 U or बंध् 9 P or अवरुध् 7 U; b. ed बद्धनेत्र, अवरुद्धनयन. -LY, *adv.* अंधवत्, असमीक्ष्य, रभसा, साहसेन. -NESS, *s.* अंधता. 2 अज्ञानं, मोहः.

BLINK, *v. i.* निमील् 1 P, निमिष् 6 P. -*s.*, -ING, निमि (मे) षः, दृष्टिनिपातः, निमीलनं.

BLISS, *s.* परमसुखं, सुखातिशयः, प्रहर्षः, धन्यता, अत्यंतसुखं. 2 अपवर्गः; *See* BEATITUDE. -FUL, *a.* आनंदमय (यी *f.*), धन्य, सानंद, परमसुखभाज्; सुखावह. -FULLY, *adv.* परमानंदपूर्वकं, सानंदं, ससुखं. -LESS, *a.* सुखहीन-रहित, निरानंद.

BLISTER, *s.* त्वक्स्फोटः, शोफः; व्रणः-णं, 'b. on the foot' पादस्फोटः, विपादिका. 2 स्फोटजननः उपनाहः. -*v. t.* स्फोटं उत्पद् c.

BLITHE, BLITHESOME, *a.* हृष्ट, प्रमुदित, सानंद, प्रसन्नवदन. -LY, *adv.* सहर्षं, सानंदं, हृष्टमनसा. -NESS, *s.* प्रहर्षः, आह्लादः, आनंदः.

BLOAT, *v. t.* श्वि c., आप्यै c., पीनीकृ 8 U. -*v. i.* स्फाय् 1 A, श्वि 1 P, आप्यै 1 A. -ED, *a.* शून पीन, स्फीत, आप्यायित.

BLOCK, *s.* काष्ठं; शिला (of stone); 'b. of snow' शिलीभूतं हिमं, घनं हिमं. 2 वध्यशिला-काष्ठं. 3 उपरोधः, प्रत्यूहः, अंतरायः. 4 पिंडः, भारः. -up, *v. t.* नि-,अव-,प्रति-,रुध् 7 U, स्तंभ् 9 P, प्रतिबंध् 9 P, आवृ 5 U, (आवृत्य पंथानमजस्य तस्थौ R. VII. 31). -ADE, *v. t.* रुध् 7 U, *See* BESIEGE. -*s.* उप-अव-रोधः, परिवेष्टनं. -HEAD, *s.* मृत्पिंडबुद्धिः, स्थूलधीः, मूढः, दुर्बुद्धिः, मूर्खः.

BLOOD, *s.* रक्तं, रुधिरं, शोणितं, लोहितं, अस्रं, असृज् *n.*; 'shed b.' रुधिरार्पणेन जीवितं त्यज् 1 P; 'take one's b.' हन् 2 P. 2 गोत्रं, वंशः, कुलं; 'of whole b.' सोदर, सोदर्य, सगर्भ; सनाभि; 'of noble b.' कुलीन, अभिजात; 'of royal b.' राजकुलप्रसूत. 3 (Temper) शीलं; 'hot-b. ed' तीव्रकोप, सुलभकोप; 'b. rising to the cheeks' कोपप्रदीप्ताननः. -*v. t.* रक्तेन लिप् 6 P or अंज् 7 P. -LESS, *a.* रक्तहीन. 2 रक्तस्रावं विना. -LETTER, *s.* रक्तस्रावकः, रुधिरमोक्षकः. -RED, *a.* रक्त-लोहित-वर्ण. -SHED, *s.* रक्तस्रावः-पातः, नृहत्या. -SHOT, *a.* रक्तपूर्ण, शोणिताप्लुत. -THIRSTY, *a.* रुधिरप्रिय; जिघांसु, वधोद्यत. -VESSEL, *s.* रक्तवाहिनी, नाडी, शिरा, असृग्वहा, धमनी. -Y, *a.* रक्तमय (यी *f.*), रक्ताक्त. 2 क्रूर, मारात्मक, नृशंस; 'a b. battle it was' तस्मिन् युद्धे महारक्तस्रावोऽभूत्.

BLOOM, *s.* *See* BLOSSOM below; 'b. of youth' यौवनभरः, नवयौवनं; 'in the b. ing youth' प्रथमे वयसि, नवयौवने. 2 रागः (कपोलरागः). -*v. i.*

फुल्ल् 1 P, विकस् 1 P, स्फुट् 6 P. 2 वृध् 1A, एध् 1 A.

BLOSSOM, *s.* पुष्पं, कुसुमं, मुकुलः-लं, प्रसवः, पल्लवः, प्रवालः. –*v. i.* स्फुट् 6 P, प्रफुल्ल् 1 P, भिद् pass.; विकस् 1 P, मुकुलैः संनद्ध *a.* भू. –ED, –ING, *a.* स्फुटित, प्रफुल्ल, विकसित, भिन्न, विकच, स्फुटितकुसुम; स्मित.

BLOT, *s.* कलंकः, दोषः, लक्ष्मन् *n.*, अपयशस् *n.* 2 लोपः, व्यामर्षः. –*v. t.* मलिनयति (D.), दुष् c. (दूषयति), कलंकयति (D.), कृष्णीकृ 8 U. 2 अस्पष्टीकृ; ‘b. out’ विनश् c., उच्छिद् 7 P, विलुप् c., व्यामृज् c., व्यामृश् c.; ‘b. ing paper’ मसीशोषकः, °कं पत्रं.

BLOTCH, *s.* किलासं, सिध्मं; स्फोटः, विस्फोटः, व्रणः-णं, सिध्मन् *n.*; ‘having b. es’ किलासिन्, सिध्मल. –*v. t.* मलिनयति (D.).

BLOW, *s.* आ-अभि-घातः, प्रहारः; पातनं, निर्घातः; ‘Oh! the hard b. of Fate’ अहह दारुणो दैवनिर्घातः (U. 2); ‘b. with the fist’ मुष्टिघातः-प्रहारः; ‘to strike a b.’ मुष्टिना तड् 10 or हन् 2 P or प्रह 1 P or अभि- आ- हन् 2 P; युध् 4 A, युद्धार्थं संमिल् 6 P. 2 स्फुटनं, विकासः, फुल्लनं. –*v. i. See* BLOSSOM; oft. by स्मि 1 A; ‘b. n Pâtala flower’ स्मितपाटलं. 2 वा 2 P, वह् 1 P, प्रवह्. 3 श्वस् 2 P, उच्छ्वस्, विनिश्वस्. –*v. t.* उद्-हन् 2 P, उद्-धू 9 U, उत्-क्षिप् 6 P, वह्. 2 उत्-, श्वि c., स्फाय् c. (स्फावयति).; ‘dust b. n by wind’ अनिलोद्धतं रजः. 3 (As an instrument) ध्मा 1 P, मुखमारुतेन पूर् 10, (स्नानशंखानामापूर्यमाणानां Ka. 16); ‘b. hot and cold’ निग्रहानुग्रहौ (युगपत्) प्रकटयति (D.). –away, उद्-हन्, उद्धू, उत्क्षिप्. –out, निर्वा c. (निर्वापयति). –up, वि-उत्-धू, सहसा उन्मूल् 10. –upon, वीज् 10. –ING, *s.* विकासः, व्याकोशः, स्फुटता, प्रोत्फुल्लता. 2 नादः; ध्मानं. –PIPE, *s.* धमनी; वेणुधमनी.

BLUBBER, *s.* तिमिमेदस् *n.* –*v. i.* अतिरोदनात् उच्छूनमुख *a.* (खी *f.*) भू. –ED, *a.* उच्छून, स्फीत.

BLUDGEON, *s.* लगुडः, गदा.

BLUE, *a.* नील, श्याम. –*s.* नीलः, नीलिमन् *m.*, नीलवर्णः. –ISH, *a.* आनील, ईषन्नील.

BLUFF, *a.* स्थूल; *See* BIG. 2 रूक्ष, परुष, उग्र.

BLUNDER, *s.* प्रमादः, स्खलितं दोषः. –*v. i.* प्रमद् 4 P, स्खल् 1 P, भ्रम् 1, 4 P. –ER, *s.* प्रमादिन् *m.*, स्खलनशीलः. –ING, *a.* प्रमादिन् (नी *f.*), प्रमत्त, अनवधान, अदक्ष. –INGLY, *adv.* सप्रमादं, स्खलनपूर्वं.

BLUNT, *a.* धाराहीन, अतीक्ष्ण, कुंठित, निस्तेजस्. 2 स्थूल, घन; मंद, अविदग्ध. 3 सरल, अजिह्म, ऋजुप्रकृति. 4 रूक्ष, परुष, कर्कश, असभ्य. –*v. t.* कुंठीकृ 8 U, तीक्ष्णतां विलुप् c.; कृ with (*a.*); तेजो हृ 1 P. 2 न्यूनीकृ, शम् c. (शमयति). –LY, *adv.* सरलतया, अजिह्मं; परुषोक्त्या, सपारुष्यं; अविदग्धं. –NESS, *s.* अतीक्ष्णता, स्थूलता, पारुष्यं, &c.

BLUR, *s.* कलंकः, मलं, दूषणं. –*v. t.* मलिनयति (D.), मलेन लिप् 6 P.

BLURT, *v. t.* असमीक्ष्य-अविचार्य-वद् 1 P.

BLUSH, *v. i.* लज्जां नट् 10, ह्री 3 P. लज्ज् 6 A, त्रप् 1 A; व्रीडया-त्रपया-अधोमुख *a.* (खी *f.*) भू 1 P. 2 अरुणीभू, लोहितायते (D.). –*v. t.* अरुणीकृ 8 U. –*s.* अरुणिमन् *m.*, रक्तिमन् *m.*, कपोलरागः. 2 लज्जा, व्रीडा, त्रपा, ह्रीः; ‘put to b.’ ह्री c. (ह्रेपयति). –ING, *a.* प्रफुल्ल, विकसित; ‘bears b. honors’ संमानरूपाणि विकसितकुसुमानि धारयति, संमानरूपपुष्पभरेणानतः. 2 (Blushful) लज्जित, सव्रीड, सत्रप, लज्जावनत, ह्रीपरिगत, त्रपाधोमुख (खी *f.*).

BLUSTER, *v. i.* गर्ज् 1 P, तुमुलं-कोलाहलं कृ 8 U, उच्चैः आरट् 1 P, उत्क्रुश् 1 P. 2 विकत्थ् 1 A, श्लाघ् 1 A. 3 तर्ज् 10 A, भर्त्स् 10 A. –ER, *s.* कलहकारः, दांभिकः, विकत्थिन् (नी *f.*); आत्मश्लाघापरः. –*s.*, –ING, *s.* गर्जनं, तुमुलं, कोलाहलः; उच्चैः आरटनं, उत्क्रोशः.

BOA-CONSTRICTOR, *s.* अजगरः, शयुः, वाहसः.

BOAR, *s.* वराहः, किरिः-रः, शू(सू) करः, कोलः, घृ(गृ)ष्टिः, पोत्रिन् *m.*, किटिः, दंष्ट्रिन्-घोणिन्-स्तब्धरोमन् *m.*, क्रोडः, भूदारः. –ISH, *a.* वाराह (ही *f.*). 2 असभ्य, ग्राम्य.

BOARD, *s.* फलकः-कं; भोजनासनं, काष्ठखंडं. 2 ग्रासः, भोजनं, आहारः. 3 सभा, परिषद् *f.*, समाजः, गणः, वर्गः. 4 नौकातलं-पृष्ठं; ‘to go on b. a ship’ पोतं आ-अधि-रुह् 1 P; ‘on b.’ नौकारूढ *a.*, नौतले. 5 अष्टापदं, शारिफलं. –*v. t.* बलात् नावं आरुह् 1 P. 2 फलकैः आस्तृ-स्तॄ 5, 9 U. –ER, *s.* निरूपितमूल्येन भोक्तृ *m.*

BOAST, *v. i.* विकत्थ् 1 A, दृप् 4 P, (with instr.) नात्मना दृप्यति; आत्मानं श्लाघ् 1 A, गर्वं वह् 1 P (with gen.); (मुधा यौवनगर्वं वहसि M. 4). –ER, *s.* आत्मश्लाघिन् *m.*, विकत्थनशीलः, शूरंमन्यः. –FUL, *a.* आत्मश्लाघापर, विकत्थन, दृप्त, गर्वित, अवलिप्त. –FULLY, *adv.* गर्वेण, सदर्पं, विकत्थनपूर्वं. –ING, *s.* आत्मश्लाघा, अहंकारोक्ति *f.*, दर्पः, विकत्थनं, गर्वः. –INGLY, *adv.* सगर्वं, सदर्पं.

BOAT, *s.* नौः, तरीः, तरणि-णी *f.*; ‘a small b.’ उडुपं, नौका, प्लवः, कोलः; ‘b. man,’ *s.* नाविकः, पोतवाहः, औडुपिकः; ‘b. swain,’ *s.* मुख्यनाविकः, कर्णधारः.

BOB, *v. t.* तड् 10; *See* BEAT. 2 Crop, q. v. –*v. i.* इतस्ततो लुठ् 6 P, 1 A, स्फुर् 6 P, चंच् 1 P.

BOBBIN, *s.* तंतुकील:, कपालनाडिका.
BOBTAIL, *s.* छिन्नपुच्छधारिन् *m.*
BODE, *v. t.* शुभाशुभं सूच् 10 ; आविद् c., कथ् 10 प्राक् शंस् 1 P, *See* PREDICT ; 'absence of delay b. s future success' अव्याक्षेपो भविष्यंत्याः कार्यसिद्धेर्हि लक्षणं (R. x. 6) ; 'b. s evil to the country' जनपदस्य अनिष्टशंसि-सूचकं, अशुभचिह्नं-लक्षणं. –MENT, *s.* शुभाशुभलक्षणं ; पूर्वचिह्नं, निमित्तं.
BODICE, *s.* कंचुक:, चोल:, कूर्पासक:-कं.
BODKIN, *s.* सूचि-ची *f.* 2 छुरिका, वेधनिका, कृपाणिका.
BODY, *s.* शरीरं, काय:, देह:, विग्रह:, अंगं, वपुस् *n.*, कलेवरं, तनु-नू *f.*, गात्रं ; 'dead b.' शव:-वं, कुणप:. 2 (Some b.) क:-का-किम्-अपि-चित्-चन ; जन:, लोक:. 3 पदार्थ:, वस्तु *n.* 4 समवाय:, समूह:, संघात:, वृंदं, समाज:, समुदाय: ; 'in a b.' समेत *a.*, संहत *a.*, एकत्र मिलित *a.* 5 समागम:, श्रेणी. 6 कांड:-डं, स्कंध: ; 'b. of the house' गर्भ:, अभ्यंतरं, उदरं ; 'b. of troops' सैन्यदलं ; 'b. guard' आसन्नपारिचारक:-रिका, परिवारगण:. –BODILESS, *a.* अ (अन्) in comp. with (*s.*) ; अनंग, &c. –BODILY, *a.* शारीरिक-दैहिक-कायिक (की *f.*) ; gen. (*s.*) in comp. ; 'b. pain' शरीरवेदना, देहक्लेश: &c. –*adv.* सशरीरं, सांगं. 2 साकल्येन.
BOG, *s.* अनूप:, कच्छभू:, पंक:. –BOGGY, पंकिल, आनूप (पी *f.*).
BOGGLE, *v. i.* वि-आ-शंक् 1 A, संदिह् 2 U, विक्लृप् 1 A. –ER, *s.* शंकितमति:, शंकाशील:.
BOIL, *v. t.* पच् 1 P, उत्क्वथ् 1 P, श्रा 2 P. –*v. i.* क्वथ् pass., तप्-पच् pass. ; 'b. ing with anger' कोपपरीतमानस:, संतप्तचित्त:. 2 फेनायते (D.), –*s.* व्रण:-णं, स्फोट:, विस्फोट:, पिटक:, पिट (टि)-का, गंड:. –ED, *a.* उख्य, पक्व, स्थालीपक्व. 2 श्राण, शृत. –ER, *s.* स्थाली, पिठर:-रं ; उखा.
BOISTEROUS, *a.* गर्जनकारिन् (णी *f.*) ; प्रचंड, उत्कट ; 'b. noise' कोलाहल:, तुमुलरव:, उच्चैराक्रोश:. 2 कलह-तुमुल-कारिन् (णी *f.*) ; 'b. laugh' अट्टहास:. –LY. *adv.* प्रचंडं, उत्कटं, कोलाहलेन. –NESS, *s.* प्रचंडता, &c.
BOLD, *a.* शूर, साहसिक (की *f.*), साहसपर. 2 (Of things) साहसाभास, साहसं, (इति वचनं साहसमात्रं S. B. 79). 3 (Rude) धृष्ट, निर्लज्ज, अविनीत. 4 प्रगल्भ, निर्विशंक, निर्भय, निर्भीक. 5 सुप्रकाश, स्पष्ट; 'he made b. to say' स निर्भयमुवाच ; 'to be b.' धृष् 5 P. –LY, *adv.* साहसेन, निर्भयं, प्रगल्भं ; धृष्टतया. –NESS, *s.* साहसं, शौर्यं. 2 धृष्टता, अविनय:. 3 प्रगल्भता, निर्भयता.
BOLE, *s.* स्कंध:, प्रकांड:.
BOLL *s.* नाडि डी *f.* ; कांड:-डं.
BOLSTER, *s.* उपधानं, उपबर्ह: ; बंध:; आलंब:. –*v. t.* (up) संस्तंभ् 9 P, समालंब् 1 A.
BOLT, *s.* अर्गलाबंध:, अर्गलं, कालकं, कील:-लं. 2 शूल:-लं, शंकु:, शर:. –*v. t.* अर्गलेन रुध् 7 U or पिधा 3 U or बंध् 9 P ; कीलयति (D.). 2 तितउना शुध् c. or चल् c. –*v. i.* (away, out) सहसा-अलक्षितं निर्गम्-नि:सृ 1 P, or अपक्रम् 1 U, 4 P, or अपया 2 P.
BOMB, *s.* अग्न्यस्त्रं. –ARD, *v. t.* अग्न्यस्त्रेण अवमृद् 9 P, or भिद् 9 U, 10, or चूर्ण् 10.
BOMBAST, *s.* दर्पवचनं, अतिशयोक्ति *f.*, असारं वाक्यं, नि:सारा उक्ति:. –IC, –ICAL, *a.* असार ; दर्पध्मात.
BOND, *s.* बंध:, बंधनं, पाश:, जालं ; (fig. also) ; निगडा: (pl.) ; 'b. of love' प्रेमबंध:-पाश:. 2 संश्लेष:, संहति *f.*, संधि:, संबंध:. 3 प्रतिज्ञापत्रं-लेख्यं, समयपत्रं. 4 समय:, नियम:, संविद् *f.* –AGE, *s.* बंधनं, दासत्वं ; 'died in b.' कारागृहे-दासावस्थायां मृत: ; 'bond-maid' दासी, चेटी ; 'bond-man' दास:, भृत्य:, किंकर:.
BONE, *s.* अस्थि *n.* ; 'set a b.' त्रुटितास्थि संधा 3 U. –LESS, *a.* अस्थिहीन, निरस्थि. –Y, *a.* अस्थिमय (यी *f.*). 2 अस्थिमत् (ती *f.*), अस्थिपूर्ण.
BONFIRE, *s.* जयसूचक: अग्नि:.
BONNET, *s.* स्त्रीधृतं शिरोवेष्टनं, शिरस्कं.
BONNY, *a.* सुंदर (री *f.*); रूपवत् (ती *f.*); *See* BEAUTIFUL. 2 हृष्ट, सुप्रीत, प्रमुदित. 3 हृष्टपुष्ट, सुललित.
BOOBY, *s.* मंदबुद्धि:, मूढ:, मूर्ख:.
BOOK, *s.* पुस्तकं, ग्रंथ: ; 'part of a b.' अध्याय:, पर्वन् *n.* ; 'b. case' ग्रंथाधार:, ग्रंथकुटी ; 'b. mate' सहाध्यायिन् *m.* ; 'b. worm' ग्रंथवाचनासक्त: . – *v. t.* लेख्ये आरुह् c. –ISH, *a.* पुस्तकपठनालुब्ध; व्यवहारविसंवादिन् (नी *f.*), अव्यवहार्य.
BOON, *s.* वर:, प्रसाद:, अनुग्रह:. –*a.* हृष्ट, विलासिन् (नी *f.*), उदार, प्रमुदित.
BOOR, s. ग्राम्य: जन:, ग्रामिक:, वृषल:. –ISH, *a.* ग्राम्य, अशिष्ट, असभ्य.
BOOT, *v. t.* or *s.* *See* AVAIL. –*s.* उपानह् *f.*, पादुका, पादत्रं. –LESS, *a.* निष्फल, व्यर्थ, निरर्थक, मोघ, निर्गुण.
BOOTH, *s.* पटमंडप: , उपकार्या, पटभवनं.
BOOTY, *s.* लोप्त्रं, लुंठितं, लुंठनं, लोत्रं.
BORAX, *s.* रसशोधन:, बिडं.
BORDER, *s.* पर्यंत:-तं, प्रांत:; परिसरभूमि *f.*, उत्संग:, उपांत:. 2 (Of a garment) अंचल:, दशा. 3 समंत:, सीमा, सामंतं. 4 तीरं, कूलं, तटं (of a river); 'b. of a forest' वनांत:. –*v. i.* (on, upon) Ex. by वृत् 1A, स्था 1 P, with (*s.*); जनस्थानपर्यंतानि दीर्घारण्यानि (U.2) 'large forests b. ing on Janasthâna'; 'his age b. s on 20' विंशतिवर्षवयोवस्थां स्पृशति,

विंशतिवर्षदेशीयोसौ. 2 कल्प, प्राय, in comp.; 'his condition b. s on poverty' तस्य दशा दारिद्र्यात्किंचिदूना, दारिद्र्यकल्पा. –*v. t.* प्रांतयति (D.), पर्यंतं कृ 8 U; पर्यंते निविश् c.; 'garment b. ed with silk' निर्मितकौशेयप्रांतं वसनं. –ING, *a.* प्रत्यंत, पर्यंतस्थ, निकटस्थ.

BORE, *s.* छिद्रं, रंध्रं. 2 वेधनी. 3 सुषिरं, छिद्रव्यासः. –*v. t.* व्यध् 4 P, छिद्रं कृ 8 U. –ER, *s.* वेधकः.

BOREAL, *a.* उदीचीन, उत्तर.

BOREAS, *s.* उत्तरवायुः.

BORROW, *v. t.* ऋणं कृ 8 U or प्रार्थ् 10 A or ग्रह् 9 P. 2 अन्यस्मात् ग्रह् or आदा 3 A, or लभ् 1 A. –ER, *s.* ऋणकर्तृ-ग्रहीतृ *m.*, ऋणयाचकः.

BOSOM, *s.* वक्षस् *n.*, उरस् *n.*, क्रोडं, वक्षःस्थलं. 2 गर्भः, अभ्यंतरं. 3 हृदयं, चित्तं, मनस् *n.*; 'b. friend' हृदयंगमः सखा, प्रियसुहृद्. 4 स्तनः, कुचः, वक्षोजः.

BOSS, *s.* गंडः. –ED, *a.* गंडानुविद्ध.

BOTANY, *s.* उद्भिद्विद्या, ओषधिशास्त्रं, वनस्पतिशास्त्रं. –IST, *s.* ओषधिशास्त्रज्ञः.

BOTCH, *s.* व्रणः-णं, स्फोटः. 2 छिद्रं, दोषः. –*v. t.* जीर्णवस्त्राणि सिव् 4 P, सूच्या संधा 3 U.

BOTH, *pron. a.* उभौ, उभे; उभय-द्वि in comp.; उभयं, द्वयं; 'b. sides' उभयपक्षौ; 'on b. sides' उभयतः; 'in b. ways' उभयथा; 'in b. places' उभयत्र. 2 Ex. by च-च, तथा; 'does b. good and bad' शुभं चाशुभं च विदधाति.

BOTHER, *v t.* क्लिश् 9 P, पीड् 10, बाध् 1 A.

BOTTLE, *s.* काचकूपी-पात्रं-भाजनं. –*v. t.* काचकूप्यां निविश् c.

BOTTOM, *s.* तलं, अधोभागः; 'examine it to the b.' आमूलं-तलं परीक्षस्व तत्; 'you are at the b. of this plot' अस्य कपटप्रबंधस्य त्वं मूल-प्रधान-कारणं, त्वं प्रधानः प्रवर्तकः. 2 दरी, उपत्यका, निम्नभूः, पादः. 3 मलं, शेषं, अवशेषं. –*v. i.* (upon) आलंब् 1 A, मूल in comp. –LESS, *a.* अगाध, अतलस्पर्श.

BOUGH, *s.* शाखा, विटपः.

BOUNCE, *v. i.* प्रपत् 1 P, अभि-उत्-प्लु 1 A, सत्वरं-सवेगं-धाव् 1 P or पलाय् 1 A. 2 स्वन्-ध्वन् 1 P. 3 Boast, q. v. –*s.* ध्वनिः, अकस्मादाघातः.

BOUND, *s.* प्लुति *f.*, प्लुतं, वल्गनं. 2 मर्यादा, सीमन् *f.*, सीमा, प्रांतः, पर्यंतः, अंतः. 3 प्रतिघातः, उत्पतनं. –*v. t.* Ex. by सीमा, प्रांत; 'b. ed on the south by the ocean' अस्य दक्षिणा सीमा सागरः; 'b. ed by dales on all sides' दरीपरिगतः; *See* BORDER. 2 नियम् 1 P, निग्रह् 9 P. –*v. i.* उत्प्लु 1 A, वल्ग् 1 P. –up, उत्पत् 1 P. –LESS, *a.* अनंत, अमित, निःसीम, निरवधि. –BOUNDARY, *s.* सीमा, सीमन् *f.*, मर्यादा, पर्यंतः, प्रांतः, अवधिः.

BOUNTEOUS, BOUNTIFUL, *a.* वदान्य, उदार, मुक्तहस्त, दान-त्याग-शील. –LY, *adv.* अतित्यागेन, उदारवत्, मुक्तहस्तं. –BOUNTY, –NESS, *s.* औदार्यं, वदान्यता, मुक्तहस्तता, त्यागिता. 2 प्रदानं, पारितोषिकं. 3 कृपा, अनुग्रहः, प्रसादः.

BOUQUET, *s.* कुसुमस्तवकः, पुष्पगुच्छः.

BOURN, *See* BOUNDARY.

BOUT, *s.* वारः; 'drinking b.' संपीति *f.*

BOW, *v. i.* नम् 1 P, प्रणम् (acc. or dat.); अभिवद् c., अभिवंद् 1 A, प्रह्वीभू; चरणयोः पत् 1 P. 2 अंगीकृ 8 U, अभ्युप-इ 2 P, °गम् 1 P; oft. by प्रमाणं; 'I b. to your decision' आर्यमिश्राः प्रमाणं (M. 1) or भवतो निर्णयो मे प्रमाणं. –*v. t.* अव-आ-वि-नम् c. (नमयति), प्रह्वी-नम्रीकृ; 'b. ing the head down' प्रणम्य शिरसा; 'b. ed down with age' जरानमितकायः; 'b. ing down the head on the ground' अवनितलनिवेशित-लोल-शिरस् *a.*; 'b. ed in silence' अलक्षितं लयं गच्छत्. –*s.* प्रणामः, प्रणति *f.*, नमस्कारः. 2 धनुस् *n.*, चापः-पं, कार्मुकं, शरासनं, कोदंडं, इष्वासः, शरावापः; 'b. man' धन्विन् *m.*, धनुष्मत् *m.*, धनुर्धरः, धनुर्भृत् *m.*, धानुष्कः, निषंगिन् *m.*; 'b. string' *s.* ज्या, मौर्वी, गुणः, शिंजिनी; 'b. shot' बाणगोचरं, शरपथः-विषयः. –*interj.* नमः (with dat.).

BOWELS, *s.* अंत्राणि (pl.). 2 (fig.) अभ्यंतरं, गर्भः.

BOWER, *s.* कुंजः-जं, लतामंडपः. 2 कुटीरः, पर्णशाला. –*v. t.* परिवेष्ट् 1 A, परिवृ 5 U or c. –Y, *a.* कुंजवत् (ती *f.*), लतापरिच्छन्न.

BOWL, *s.* पात्रं, भाजनं, शरावः. 2 गुलिका. 3 विषं. –*v. i.* गुलिकाभिः क्रीड् 1 P.

BOX, *s.* पेटिका, समुद्गकः, संपुटः, पिटकः, मंजूषा. 2 मुष्टिप्रहारः-घातः, पाणिघातः. –*v. i.* मुष्टीमुष्टि प्रहृ 1 P; बाहूबाहवि युध् 4 A or तड् 10; मल्लयुद्धं कृ 8 U. –*v. t.* मुष्टिना प्रहृ or तड्. 2 संपुटके निधा 3 U. –ER, *s.* मल्लयोधः, बाहुयोधिन् *m.* –ING, *s.* मल्लयुद्धं, बाहुयुद्धं, बाहूबाहवि *ind.*

BOY, *s.* बालः-लकः, शिशुः, कुमारः-रकः, दारकः. –HOOD, *s.* बाल्यं, कौमारं, शैशवं, बालभावः. –ISH, *a.* बालिश, बालेय. 2 शिशुयोग्य; बालसदृश (शी *f.*), बालभावसुलभ; 'b. nature' बालभावः, शिशुत्वं, बालिशता.

BRABBLE, *See* QUARREL.

BRACE, *s.* युग्मं, युगं, युगलं, द्वयं, युगुलं. 2 बंधः-धनं, चर्मबंधः. –*v. t.* बंध् 9 P. 2 दृढीकृ 8 U, संस्तंभ् 9 P or c., शक्ति-बलं-वृध् c.

BRACELET, *s.* कंकणं, कटकः-कं, आवापकः, पारिहार्यः, हस्तसूत्रं, वलयः-यं; करभूषणं; 'marriage b.' विवाहकौतुकं.

BRACKET, *s.* नागदंतः. 2 अर्धचंद्रद्वयं.

BRACKISH, *a.* क्षार, क्षाररसयुक्त.

BRAG, *v. i.* विकत्थ्-, श्लाघ् 1 A; *See* BOAST. –*s.* आत्मश्लाघा, विकत्थनं, वृथास्तुति *f.* –INGLY, *adv.* साहंकारं, आत्मश्लाघापूर्वं. –BRAGGART (BRAGGADOCIO), *s.*, *a.*, विकत्थनशीलः, आत्मश्लाघिन् *m.*, आत्मश्लाघापरः, पिंडीशूरः.

BRAHMAN, *s.* ब्राह्मणः, विप्रः, द्विजः, द्विजन्मन् *m.* अग्रजन्मन् *m.*, भूसुरः, भूदेवः; 'a pseudo b.' ब्राह्मणब्रुवः. –ICAL, *a.* ब्राह्म (ह्मी *f.*) ; ब्राह्मणजातीय.

BRAID, *s.* कबरी, वेणि-णी *f.*, धम्मिल्लः, केशबंधः-पाशः.–*v. i.* वेणीकृ 8 U, वेण्यारूपेण केशान् संग्रंथ् 9 P or रच् 10. 2 संग्रंथ्, वे 1 P, संश्लिष् c., संसिव् 4 P.

BRAIN, s. मस्तिष्कं, मस्तिकं, गोर्दं. 2 बुद्धि *f.*, मति *f.* –LESS, *a.* बुद्धिहीन, निर्बुद्धि. –PAN, *s.* कपालः-लं, शिरोस्थि *n.* –SICK, *a.* मूढमति, भ्रांतचित्त, संभ्रांत.

BRAKE, *s.* गुल्मगहनं, कंटकवनं. 2 कंटकखलीनं, खलीनः-नं.

BRAMBLE, *s.* कंटकः, कंटकगुल्मः, गोक्षुरः.

BRAN, *s.* तुषः, धान्यत्वच् *f.*, बुसं, कडंगरः.

BRANCH, *s.* शाखा, विटपः. 2 अंगं, शाखा, एकदेशः-भागः. 3 उपनदी, अल्पसरित् *f.* 4 अपत्यं, कुलसंतानं; वंशः. –*v. i.* शाखारूपेण विसृ pass., or भिद् pass. 2 सविस्तरं वद् 1 P; 'the family b. ed into 8 parts' निरोष्टधा विप्रससार वंशः (R. XVI. 3). –Y, –ING, *a.* शाखिन् (नी *f.*), शाखामय (यी *f.*), शाखासनाथ; विस्तीर्ण, विस्तारयुक्त.

BRAND, *s.* अलातं, उल्का, दग्धकाष्ठं. 2 कलंकः, अंकः, लांछनं, अपकीर्तिचिह्नं. –*v. t.* तप्तलोहेन अंक् 10 or चिह्न् 10; 'b. ed with disgrace' अपयशोंकितः, उपक्रोशमलीमसः. –ED, *a.* तप्तलोहेन चिह्नित, दुष्कीर्तिचिह्नांकित.

BRANDISH, *v. t.* परि-भ्रम् c. (भ्रमयति), विधू 5, 9 U.

BRANDY, *s.* सुरा, आसवं, वारुणी, सीधु *f.*

BRANGLE, *s.* कलहः, व्याक्रोशः.

BRASS, *s.* पित्तलं, आरकूटः-टं, रीति-ती *f.* –Y, *a.* पित्तलमय (यी *f.*). –BRAZEN, *a.* (fig.) निर्लज्ज, धृष्ट, निस्त्रपावरण. –BRAZIER, *s.* ताम्र-कांस्यकारः. –EFFLORESCENCE, *s.* रीतिपुष्पं, पुष्पकेतु, पुष्पकं, कुसुमांजनं.

BRAT, *s.* शिशुः, बालः, बटुः.

BRAVE, *v. t.* भर्त्स् 10 A, तर्ज् 10 A. 2 धृष् 5 P; आ-समा-ह्वे 1 A. –*a* वीर, शूर, विक्रांत, धीर, पराक्रमवत् (ती *f.*), वीर्य-विक्रम-शालिन् (नी *f.*), साहसिक (की *f.*); उदार, तेजस्विन् (नी *f.*); 'fortune favours the b.' साहसे श्रीः प्रतिवसति. –*s.* शूरंमन्यः. 2 समाह्वानं. –LY, *adv.* सधैर्यं, निर्भयं, सविक्रमं, शूर-वीर-वत्. –RY, *s.* वीर्यं, शौर्यं, धैर्यं, परा-वि-क्रमः, साहसं. 2 (BRAVADO) विकत्थनं, आत्मश्लाघा.

BRAVO, *interj.* साधु, साधु साधु. –*s.* घातकः, आततायिन् *m.*

BRAWL, *s.* कलिः, कलहः, विवादः, द्वंद्वं, विप्रतिपत्ति *f.* –*v. i.* विवद् 1 A, कलहं कृ 8 U, कलहायते (D.).

BRAWN, *s.* शूकरमांसं. 2 स्नायुः; बाहुः. –Y, *a.* मांसल; दृढांग (गी *f.*); संनद्धशरीर.

BRAY, *v. i.* चीत्कारशब्दं कृ 8 U, आरट् 1 P. –*v. t.* चूर्ण् 10, पिष् 7 P. –*s.*, –ING, *s.* ची(चि) त्कारः, खरनादः.

BREACH, *s.* छिद्रं, रंध्रं. 2 भंगः, भेदनं; अतिक्रमः, लंघनं; 'b. of promise' प्रतिज्ञाभंगः; आज्ञाभंगः. 3 भेदः (सुहृद्भेदः); 'b. in a wall' संधिः, सुरंगा.

BREAD, *s.* अपूपः, पिष्टकः, कांदवं. 2 अन्नं, आहारः.

BREADTH, *s.* *See* under BROAD.

BREAK, *v. t.* भंज् 7 P (fig. also), खंड् 10. 2 क्षुद्-पिष् 7 P, चूर्ण् 10, मृद् 9 P. 3 अतिक्रम् 1 U, 4 P, उल्लंघ् 1 A, 10, अतिचर् 1 P; विलुप् c. 4 भिद् 7 U, विघट् c. (घटयति); विदॄ 9 P, 10, स्फुट् c., (as heart); 'b.- fast' पारणां निर्वृत् c., प्रातराशं-कल्यवर्तं सेव् 1 A; 'b. wind' गुदरवं कृ 8 U, पर्द् 1 A ; 'b. the way for' अपसृ 1 P, अप-इ 2 P, अपक्रम्. 5 विनश् c., उच्छिद् 7 P. –*v. i.* भिद्-दॄ-भंज्- pass., त्रुट् 6, 4 P, स्फुट् 6 P (स्फुटति हृदयं), दल् 1 P. 2 प्रभा 2 P; 'the day broke' उषाः समागता, प्रभाता रजनी, दृष्टं दिनमुखं. 3 क्षि pass., अवसद् 1 P, विशॄ pass., ध्वंस् 1 A, जॄ 4, 9 P. –*s.* विच्छेदः, निवृत्ति *f.*, विरामः, भंगः; 'b. of day' प्रभातं, उषःकालः, अरुणोदयः; 'the story has suffered a b.' विच्छेदमाप कथाप्रबंधः (Ka. 239). –down, चूर्ण् 10; (*v. i.*) *See* FAIL. –in upon, प्रसह्य-सहसा-प्रविश् 6 P. –into, विनी 1 P, दम् c. (दमयति). –into, (a house) संधिं कृत्वा प्रविश्. –loose, प्रमुच्, विमुच् pass.; 'the elephant broke loose from the post' आलानस्तंभं भंक्त्वा निर्जगाम. –off, भंज्, भंगं कृ 8 U; (*v. i.*) अकस्मात् विरम् 1 P, त्यज् 1 P, निवृत् 1 A. –open, बलात्-सहसा-उद्घट् c. or अपवृ 5 U. –out, (*v. i.*) उद्भू 1 P, उत्पद् 4 A, प्रादुर्भू, उदि 2 P. 2 निर्गम् 1 P. –through, निर्भंज्, अपानुद् 6 P, निरस् 4 P; *See* DISPEL. –up, (*v. t.*) *See* BREAK (*v. i.*) 'the party broke up' सभ्याः स्वं स्वं स्थानं प्रतिजग्मुः. –upon, आहन् 2 A; 'the dawn broke upon his eyes' तस्याक्ष्णोः प्रभातमासीत् (S. 2). –with, विवद् 1 A, कलहं कृ. –ER, *s.* भंजकः, भेदकः. –FAST, *s.* प्रातराशः, कल्यवर्तः.

BREAST, *s.* उरस् *n.*, क्रोडं, वक्षस् *n.* 2 स्तनः, पयोधरः, वक्षोजः, कुचः, (of human beings). 3 हृदयं, अंतःकरणं, चित्तं, मनस् *n.*; 'b. high' वक्षोदघ्न

(शी *f.*); 'b. plate' कवचं, उरस्त्राणं; 'b. work' वक्षःप्रमाणः प्राकारः.

BREATHE, *v. i.* श्वस् 2 P; प्राण् 2 P. 2 अन् 2 P, जीव् 1 P, वृत् 1 A. 3 निर्गम् 1 P, विप्रकृ pass. 4 आ-प्र-उद्-सम्-श्वस्; 'b. deep' दीर्घ-स्थूलं-स्थूलं निश्वस्; 'b. freely' उच्छ्वस्; 'b. the last' *See* DIE. —*v. t.* (out) उद्गॄ 6 P, अव-प्र-सं-कॄ 6 P. 2 प्रवा 2 P. —BREATH, *s.* श्वासः, निश्वासः, उच्छ्वसितं. 2 प्राणाः (pl.); प्राणायामः 'holding the b.'; असवः (pl.). 3 विरामः, उपशमः. 4 उद्गारः. 5 मंदानिलः, मृदुवातः; 'in the same b.' एकावसरे, समकालमेव. —ING, *s.* श्वासः, श्वसितं. 2 स्पृहा, इच्छा; 'b. through nose' नासिकंधमः; 'b. hole' वातायनं, गवाक्षः. —LESS, *a.* प्राणहीन, निरुच्छ्वास, विचेतन. 2 मृत, उत्क्रांतवायु; यष्टिप्राण.

BREECH, *s.* पश्चाद्भागः, नितंबः, कटिदेशः. —ES, *s.* कटिवस्त्रं, शाटकः.

BREED, *v. t.* जन् c. (जनयति), उत्पद् c., प्रसू 2 A. 2 पुष् 1, 4, 9 P or c., संवृध् c. 3 विनी 1 P. —*v. i.* वृध् 1 A, प्रजन्-उत्पद् 4 A. 2 गर्भवती भू, *See* CONCEIVE; 'b. ing season' गर्भधारणकालः, उत्पत्तिसमयः. —*s.* वंशः, कुलं, जाति *f.* 2 अपत्यं, प्रजा. 3 समुत्पन्नः शावकगणः, शिशुजातं. —BRED, *a.* जनित; संवर्द्धित; विनीत; 'well b.' सुविनीत, सदाचार; 'ill b.' दुर्विनीत, दुराचार. —ER., *s.* जनकः, पोषकः, विनेतृ *m.* —ING, *s.* पोषणं, पालनं, संवर्द्धनं. 2 शिक्षणं, विनयः. 3 सभ्यता, सुशीलता; 'of good b.' सुविनीत, सुशील. 4 गर्भधारणं, गर्भाधानं.

BREEZE, *s.* मृदुपवनः, मंदानिलः. 2 वातः, अनिलः, *See* WIND; 'agreeable b.' सुखस्पर्शः-सुखः-वायुः. —Y, *a.* वातवत् (ती *f.*), वातैरुपवीजित.

BREVIARY, *s.* संहिता, संग्रहः. 2 स्तोत्रसंग्रहः.

BREVITY, *s.* संक्षेपः, समासः, संहारः, संग्रहणं.

BREW, *v. t.* (यवसुरं) पच् 1 P or क्वथ् 1 P. 2 प्रचित् 10, प्रक्लृप् c. —AGE, *s.* निष्क्वाथः. —ERY, *s.* यवसुरापचनस्थानं.

BRIBE, *s.* उत्कोचः, उपायनं. —*v. t.* उत्कोचं दा 3 U, उत्कोचदानेन वशीकृ 8 U. —RY, *s.* उत्कोचदानं-ग्रहणं. 2 उत्कोचदानादानापराधः.

BRICK, *s.* इष्टका, सुधा; 'burnt b.' पक्वेष्टका; 'b. bit' इष्टकाशकलं; 'b. kiln' आपाकः, पचनस्थानं; 'b. layer' लेपकः, सुधाजीविन् *m.*; 'b. work' इष्टकानिर्मितं.

BRIDAL, *s.* विवाहोत्सवः, उद्वाहकर्मन् *n.* —*a.* वैवाहिक (की *f.*), विवाहयोग्य.

BRIDE, *s.* वधूः, नववधूः; पाणिगृहीता, नवोढा. 2 कन्या, कुमारी. —GROOM, *s* वरः, परिणेतृ *m.*, परिग्रहीतृ *m.*, पाणिग्राहकः; 'bride and b.' वधूवरं-रौ. —MAID, *s.* जन्या.

BRIDGE, *s.* सेतुः, धरणं, संवरः. 2 आली-ली *f.*, धरणः (small); 'make a b.' सेतुं निर्मा 3 A, or कृ 8 U, or बंध् 9 P; 'fort b.' संक्रमः; 'b. of the nose' नासावंशः. —*v. t.* सेतुना बंध् 9 P, संवृ 5 U.

BRIDLE, *s.* वल्गा; रश्मिः; 'giving the b. to the passions' रागाधीनः, रागवशः. 2 निग्रहः, संयमः. —*v. t.* वल्गासनाथ *a.* कृ, रश्मिभिः यम् 1 P. 2 निग्रह् 9 P, नि-सं-यम्; *See* CONTROL; 'by un-b. ed tongue' निर्यंत्रणया वाचा.

BRIEF, *a.* स्वल्प, अचिर, अल्पकाल, क्षणिक (की *f.*), अचिरस्थायिन् (नी *f.*); संक्षिप्त, परिमित, संहृत, अदीर्घ, संकुचित; 'to be b.' किं बहुना 2 संग्रहः, संक्षेपः. 3 सारपत्रं. —LY, *adv.* संक्षेपतः, संक्षेपेण, समासतः, समासेन. 2 अचिरेण, आशु, क्षिप्रं. —NESS, *s.* संक्षेपः, समासः, संहारः, परिमितता.

BRIER, BRIAR, *s.* गोक्षुरः, कंटकगुल्मः. —Y, *a.* कंटकावृत.

BRIGADE, *s.* चमूः, वाहिनी, सैन्यदलं, गुल्मः-ल्मं. —IER, *s.* वाहिनीपतिः, चमूपतिः.

BRIGAND, *s.* दस्युः, चौरः.

BRIGHT, *a.* उज्ज्वल, प्रदीप्त, भासुर, रुचिर, तेजस्विन् (नी *f.*), भास्वत् (ती *f.*), भ्राजमान, प्रभावत्, दीप्तिमत्, देदीप्यमान. 2 विशद, निर्मल, शुचि. 3 विश्रुत. —EN, *v. t.* प्र-उत्-द्युत् c., प्र-उत्-दीप् c., उद्भास् c, भ्राज् c., विराज् c. 2 विमलयति (D.), विशदीकृ 8 U. —*v. i.* विमलीभू 1 P, प्रसद् 1 P, प्रसादं गम् 1 P, विशदीभू, (दिशः प्रसेदुः R. III. 14). 2 शुभ्-द्युत् 1 A; *See* SHINE. —LY, *adv.* उज्ज्वलं, विमलं, तेजसा, कांत्या. —NESS, *s.* तेजस् *n.*, औज्ज्वल्यं; द्युतिः, रुचिः, कांतिः, प्रभा, दीप्तिः, शोभा, (all fem.); भासुरत्वं, तेजस्विता; 'b. of intellect' प्रदीप्ता प्रज्ञा.

BRILLIANCE, BRILLIANT, *See* BRIGHT.

BRIM, *s.* कंठः, प्रांतः, मुखं, धारः, कर्णः; 'to the b.' आमुखं, आकंठं. 2 (of a river) तीरं, तटः-टं. 3 अंचलः, दशा (of a cloth). —FUL, *a.* परिपूर्ण, आकर्णं पूर्ण; ex. by मय (यी *f.*), निर्भर; 'b. of joy' हर्षनिर्भरः.

BRIMSTONE, *s.* गंधकः. —Y, *a.* गंधकपूर्ण-विशिष्ट.

BRINDLE, *s.* चित्रता, चित्रांगत्वं, शबलत्वं. —ED, *a.* शबल, चित्रित, कल्माषित.

BRINE, *s.* लवणजलं. 2 बाष्पः, अश्रु *n.*, अस्रं.

BRING, *v. t.* आनी 1 P, आ-उपा-हृ 1 P, आवह् 1 P. 2 प्राप् c., आगम् c. (गमयति). 3 अनुनी 1 P, आकृष् 1 P. 4 जन् c. (जनयति), उत्पद् c.; ex. by प्रभू 1 P, जन् 4 A; 'poverty b. s one to shame' दारिद्र्याद् ह्रियमेति (Mr. 1); 'b. to end' समाप् c., निर्वृत् c., अवसो 4 P; 'brought by the setting sun' सूर्योढः; 'b. to ruin' नश् c., नाशकारणं भू; 'b. word' निविद्

c., वार्तां आख्या 2 P; 'b. action' अभियुज् 7 A. –about, (to pass) साध् 5 P, 10 ; घट् c. (घटयति), संपद् c., आवह् 1 P; क्लृप् 1 A, संपद् 4A, (with dat.). –down, नि-अव-पत् c., अपकृष्, अभिभू. –forth, *See* Beget. –forward, उपन्यस् 4 P, उदाहृ 1 P, उपक्षिप् 6 P, उपानी, पुरस्कृ. 2 अग्रे-पुरः-आनी, प्रसू c. –on, आवह् 1 P, or with dat. ; 'disgrace b. s on despair' परिभवः निर्वेदमावहति, निर्वेदाय (भवति); oft. by प्रभू, जन्; 'avarice b. s on anger' लोभात् क्रोधः प्रभवति-जायते &c. –out, प्रकाश् c., प्रकटीकृ. –together, समा-नी, समुपाहृ ; *See* Assemble. –under, आनम् c. (नमयति); 'b. one's power' वशं नी, दम् c. (दमयति), अभिभू. –up, संवृध् c , पोषणं-पालनं-कृ 8 U (with gen.); पुष् 10.

Brink, *s.* तीरं, तटः-टं. कूलं. 2 प्रांतः, अंतः, पर्यंतः; धारा, उत्संगः, परिसरः, कंठः.

Brisk, *a.* चपल, त्वरित, क्षिप्र, अविलंब. 2 प्रबल, ससार, तीव्र; 'b. shower' धारासंपातः –ly, *adv.* सत्वरं, क्षिप्रं, आशु. –ness, *s.* तेजस् *n.*, सारः, सत्त्वं.

Bristle, *v. i.* पुलकित-रोमांचित-कंटकित *a.* भू 1 P; 'his body b. ing with joy' हर्षरोमांचित-पुलकित-तनुः; हृष् 4 P (of hair). –*s.* शूकः-कं, दृढलोमन् *n.* 2 शूकरलोमन् *n.* –ing, *a.* हृषित, पुलकित, रोमांचित.

Brittle, *a.* भंगुर, भिदुर, सुखभेद्य, सुभंग.

Brize, *s.* दंशः ; गोमक्षिका.

Broach, *s.* शूलः, शंकुः; कीलः-लं. –*v. t.* अपावृ 5 U. 2 निविद् c., प्रकाश् c., कथ् 10. 3 छिद्र् 10.

Broad, *a.* विस्तीर्ण, पृथु, विपुल, विस्तृत, विशाल, परिणाहवत् (ती *f.*), आयत ; '10 yojanas b.' दशयोजनमायता (नगरी). 2 असभ्य, अश्लील, गर्हित ; 'b. day-break' सुप्रभातं; स्पष्टे जाते प्रत्यूषसि (Ka. 26); 'b. day light' प्रखरतेजसि सवितरि ; 'b. awake' प्रबुद्ध, उन्निद्र : 'b. breasted' व्यूढोरस्कः; विशालवक्षस्. –ness, Breadth, *s.* विस्तारः, परिणाहः, आयामः, विशालता, पृथुता ; 'five fingers in b.' पंचांगुलं (दारु).

Brocade, *s.* कार्मिकवस्त्रं.

Brogue, *s.* प्राकृतभाषा, अपभ्रंशः.

Broider, *v. t.* चित्र् 10, सूच्या वस्त्रे पुष्पादिकं सिव् 4 P. –y, *s.* सूचिकर्मन् *n.*

Broil, *v. i.* तप्-पच्-pass. –*v. t.* भ्रस्ज् 6 P ; (fig.) संक्षुभ् c , प्रकुप् c., उद्दीप् c. –*s.* कलहः, द्वंद्वं, कलिः, तुमुलं.

Broker, *s.* निरूपितमूल्येन कार्यनिर्वाहकः. –age, *s.* कार्यनिर्वाहणार्थं दत्तं द्रव्यं.

Bronze, *s.* *See* Brass.

Brooch, *s.* वक्षोभूषणं, उरोमणिः.

Brood, *v. i.* (lit.) (अंडानां) उपरि-सद् 1 P. निविश् 6 P; (fig.) नि-ध्यै 1 P, पुनः पुनर् आलोच् 10; चिंताव्यग्र *a.* भू. –*s.* प्रजा, संतति *f.*, अपत्यं. 2 समसुत्पन्नः शावकगणः, अपत्यजातं.

Brook, *s.* कुसरित् *f.*, स्रोतस् *n.*, क्षुद्रनदी, क्षुद्र-अल्प-सरित्. –*v. t.* सह् 1 A, क्षम् 1 A, मृष् 4 P, 10.

Broom, *s.* संमार्जनी, शोधनी. 'b. stick-staff' मार्जनीदंडः; दीर्घ-कूर्च-यष्टिः.

Broth, *s.* सूपः, यू(जू)षं.

Brothel, *s.* वेशः, वेश्यालयः, गणिकागृहं.

Brother, *s.* भ्रातृ *m.*, सोदरः, सहोदरः, सोदर्यः. 2 बंधुः, सहकारिन् *m.*, संसर्गिन् *m* ; 'spiritual brethren' एकगुरवः. –hood, *s.* भ्रातृभावः,-त्वं, सौभ्रात्रं. 2 साहचर्यं, बंधुता, संसर्गः, समाजः. –ly, *a.* भ्रात्रीय, भ्रातृसदृश (शी *f.*); 'b. in law,' *s.* श्यालः, देवृ *m.*, देवरः (husband's brother.).

Brow, *s.* कटकः, उत्संगः; *See* Edge. 2 भ्रूः, भ्रूलता ; 'knit the b. s' भ्रूभंगं कृ 8 U, भ्रुकुटिं बंध् 9 P, भ्रुकुटिरचनां कृ. 3 ललाटं; वदनं, आननं. –beat, *v. t.* भ्रूभंगेण-कटाक्षेण-तर्ज् 10, or निरीक्ष् 1 A. –bound, *a.* किरीटिन् (नी *f.*).

Brown, *a.* कपिश, पिशंग (गी *f.*), पिंगल, कपिल, श्याव. –ish, *a.* ईषत्कपिश, आपिंगल. –ness, *s.* कपिशः, पिंगलवर्णः.

Browse, *v. t.* अद् 2 P, चर्व् 10, लंघ् 1 A, (पल्लवान् लंघितुमागच्छति M. 4), भक्ष् 10, संदंश् 1 P. –*s.*, –ing, *s.* किसलयः-यं, नवपल्लवः-वं; नवतृणं, शाद्वलं.

Bruise, *v. t.* अपकृ 8 U, क्षण् 8 P, प्रहारेण हिंस् 7 P. 2 मृद् 9 P, पिष् 7 P. –*s.* क्षतं, अपकारः, प्रहारः, आघातः. 2 पिच्चितव्रणः.

Bruit, *s.* ध्वनिः. 2 वार्ता, जनप्रवादः. –*v. t.* ख्या c. (ख्यापयति), घुष् 10.

Brunette, *s.* श्यामा, श्यामवर्णा.

Brunt, *s.* भारः; 'b. of battle' रणधुरा ; संघट्टः, प्रथमाक्रमः ; प्रहारः, आघातः.

Brush, *s.* आघर्षणी; लोममयी मार्जनी or शोधनी. 2 तूलिका, शलाका, वर्तिका. 3 संघट्टः, समाघातः. –*v. t.* मृज् 2 P, घृष् 1 P, घर्षणेन शुध् c. 2 मृद् तड् 10, लघुगत्या प्रहृ 1 P. –*v. i.* (by) लघु घृष्. 2 अपधाव् 1 P, विसृप् 1 P. –wood, *s.* गुल्मः, जंगलं. –y, *a.* लोमश.

Brute, *s.* पशुः, तिर्यंच् *m.* 2 नृपशुः, दुर्वृत्तः, क्रूराचारः. –*a.* अ-वि-चेतन, अज्ञान. 2 क्रूर-कर्मन्, असभ्य. –al.–ish, *a.* नृशंस, क्रूर, पशु in comp.; *See* Cruel. 2 पशुशील, पाशव (वी *f.*), पशुसदृश (शी *f.*), पशुतुल्य. –ally, *adv.* पशुवत् ; निर्दयं, अतिक्रौर्येण.

Bubble, *s.* बुद्बुदः, डिंबिका. 2 (fig.) असारं वस्तु,

मायां, वंचकः, मोहः, मायाजालं. –*v. i.* बुद्बुदायते (D.) –*v. t. See* CHEAT.

BUBBY, *s. See* BREAST.

BUCK, *s.* हरिणः, मृगः. 2 वस्त्रधावनार्थं जलं. 3 सुभगंमन्यः.

BUCKET, *s.* अरघट्टः, उदंचनं, घटीयंत्रं. 2 पात्रं, द्रोणी, सेचनी-नं.

BUCKLE, *s.* कुडुपः, गंडकः. –*v. t.* कुड्डपेन बंध् 9 P; 'to be b. ed to' परायण-आसक्त *a.* भू 1 P. –ER, *s.* फलकः-कं, चर्मन् *n.*

BUCKRAM, *s.* स्थूलपट्टं-पटः.

BUD, *s.* कलिका, कोरकः-कं, मुकुलः-लं, कुड्मलः; जालं, कोशः-षः, प्ररोहः, अंकुरः, पल्लवः-वं. –*v. t.*, –ED, *See* under BLOSSOM.

BUDGE, *v. i.* प्रचल् 1 P, अपसृ 1 P, नि-परा-वृत् 1 A, त्यज् 1 P.

BUDGET, *s.* शाणपुटः, दृति *f.* 2 कोषः, संग्रहः, संचयः. 3 आयव्ययगणना, °पत्रं.

BUFF, *s.* महिषचर्मन् *n.* 2 पांडुवर्णः.

BUFFALO, *s.* महिषः; 'she-b.' महिषी; 'b. milk' माहिषं पयः.

BUFFET, *s.* मुष्टिप्रहारः, कराघातः, चपेटिका. 2 कुशूलः. –*v. t.* मुष्टिना तड् 10 or प्रहृ 1 P.

BUFFOON, *s.* विदूषकः, वैहासिकः, भंडः. –ERY, *s.* परिहासः, हास्यं, नर्मन् *n.*

BUG, *s.* मत्कुणः, उद्दंशः; 'b. bear' महाभयास्पदं, भयहेतुः.

BUGLE, *s.* काहलः-ला, व्याधशृंगं-विषाणं. 2 शृंगं, विषाणं.

BUILD, *v. t.* निर्मा 3 A or c. (मापयति), प्रक्लृप् c., विधा 3 U, विरच् 10; 'b. upon' समालंब् 1 A, आ-समा-श्रि 1 U. –ER, *s.* निर्मातृ *m.*, विधायकः. 2 स्थपतिः, शिल्पिन् *m.*, दारुकर्मन् *m.* –ING, *s.* निर्माणं, विधानं. 2 भवनं, गृहं, हर्म्यं.

BULB, *s.* कंदः-दं, गोलमूलं. –OUS, *a.* कंदिन् (नी *f.*), कंदविशिष्ट. 2 कंदाकृति.

BULGE, *v. i.* वहिर्लंब् 1 A, उदराकारेण प्रलंब्.

BULK, *s.* प्रमाणं, परिमाणं, मात्रा. 2 स्थूलता, बृहत्त्वं. 3 प्रधान-अधिक-भागः, भूयस् *m.* –Y, *a. See* BIG.

BULL, BULLOCK, *s.* वृषः, वृषभः, बलीवर्दः, ऋषभः, अनडुह् *m.*, उक्षन् *m.*, ककुद्मत् *m.* 2 वाग्दोषः, महास्खलितं, सुस्पष्टो वचनविरोधः.

BULLET, *s.* सीसकगुलिका.

BULLETIN, *s.* शरीरस्थितिज्ञापकं पत्रं.

BULLION, *s.* हिरण्यं; रूप्यं.

BULLY, *s.* पिंडीशूरः, शूरंमन्यः; दांभिकः, कलहकारिन् *m.* –*v. t.* तर्ज् 10, भर्त्स् 10 A; आह्वे 1 A.

BULWARK, *s.* वप्रः-प्रं, प्राकारः. 2 आश्रयः, शरणं, संश्रयस्थानं, आलंबः, रक्षणसाधनं.

BUM, *s.* नितंबः, कटिप्रोथः.

BUMP, *s.* स्फोटः, गंडः, शोफः. –*v. i.* श्वि 1 P. 2 BEAT, q. v.

BUMPER, *s.* अतिपूर्णं पात्रं; चषकः; 'b. crops' अतिप्रचुरः शस्यागमः; 'b. house' जनाकीर्णं प्रेक्षागृहं.

BUMPKIN, *s.* वृषलः, जानपदः, ग्राम्यजनः.

BUNCH, *s.* गुच्छः, स्तबकः. 2 पिंडः, गंडः. 3 ग्रंथिः, शेखरः-रं. 4 पोट्टली, संघातः, संहतद्रव्यं. –*v. i.* (out) पिंडीभू 1 P.

BUNDLE, *s.* भारः, कूर्चः, पोटलिका, गुच्छः, संघातः; 'b. of goods' भांडकं. –*v. t.* (up) गुच्छीकृ 8 U, एकत्र समाहृ 1 P.

BUNG, *v. t.* छिद्रं निरुध् 7 U or पिधा 3 U. –HOLE, *s.* पात्रच्छिद्रं, पात्रधारा.

BUNGLE, *v. i.* अदक्षतया कार्यं निर्वह् c., प्रमद् 4 P, स्खल् 1 P. –*s.* प्रमादः, स्खलितं, दोषः. –ER, *s.* अदक्षः, प्रमादिन् *m.*, अनिपुणः. –INGLY, *adv.* सप्रमादं, प्रमादतः, अदक्षतया.

BUNTER, *See* HARLOT.

BUOY, (up) *v. t.* उत्तंभ् 9 P, उद्धृ 1P, 10, आलंब् 1 A. 2 प्लु c. –ANCY, *s.* लघुता, लाघवं, प्लवनशीलता.

BURDEN, *s.* भारः, भरः, धुर् *f.* (राज्यधुरा); 'beast of b.' धुर्यः, धुरीणः. 2 ध्रुवकं, अनुपदं. 3 पीडाकर *a.* (री *f.*), पीडाहेतुः, भारभूत *a.* –*v. t.* भारं न्यस् 4 P or निविश् c. –ED, *a.* भाराक्रांत, आरोपितभार. –SOME, *a.* दुर्वह, दुर्भर, दुरुद्वह. 2 पीडाकर, दुःखावह.

BUREAU, *s.* आधारः. 2 लेखनस्थानं, लेखनसाधनाधारः.

BUREAUCRATIC, *a.* अनियंत्रितशासन.

BURGH, *s.* नगरं, पुरं. –ER, BURGESS, *s.* नगरजनः; पौरः. 2 नगरप्रतिनिधिः, पुरप्रतिनिधिः. –ERSHIP, *s.* नगरजनाधिकारः, पौराधिकारः.

BURGLAR, *s.* संधिचौरः, गृहभंगकृत् *m.*, कुड्यच्छेदिन् *m.*, संधिच्छेदकः. –Y, *s.* भित्तिचौर्यं, गृहभंगः.

BURGOMASTER, *s.* नगराध्यक्षः.

BURLESQUE, *a.* परिहासकर (री *f.*), हासजनन (नी *f.*), परिहास्य. –*s.* परिहासः, भांडं, नर्मन् *n.* –*v. t. See* LAUGH.

BURLY, *a. See* BIG.

BURN, *v. t.* दह् 1 P, प्लुष् 1 P, ज्वल् c. (ज्वलयति), तप् 1 P or c., उष् 1 P, दीप् c. –*v. i.* ज्वल् 1 P, दह् pass., तप् 4 A, दीप् 4 A; 'b. after' उत्कंठ् 1 A, स्पृह् 10; 'b. out' शम् 4 P; 'b. up' निर्दह्. –ER, *s.* दाहकः, तापकः, दीपकः. –ING, *s.* दाहः, दहनं, प्लोषः, तापः, ज्वलनं; 'b. ground' श्मशानं. –*a.* दाहक, तापक. 2 चंड, प्रखर; 'b. glass' सूर्यकांतः, सूर्योपलः.

BURNISH, *v. t.* प्रमृज् 2 P (प्रमृष्टं चामीकरं); तिज् c., परिष्कृ 8 U. –ER, *s.* तेजकः, धावकः.

BURROW, *s.* बिलं, विवरं, गर्तः -र्ता. –*v. i.* बिले-गर्ते-वस् 1 P.

BURSAR, *s.* धनाध्यक्षः, कोषाधिपतिः. –Y, *s.* कोषः, धनागारं.

BURST, *v. i.* स्फुट् 6 P, दल् 1 P, वि-दॄ-शॄ-pass., भिद्-भंज् pass.; 'b. in pieces' शकलीभू, खंडशो भिद् pass.; 'b. into tears' सहसा रोदितुमारेभे, सहसा प्रावर्तताश्रुधारा. –*v. t.* भिद्-भंज् 7 P, स्फुट् c., दॄ 9 P, 10, शकलीकृ 8 U, दल् c. (दलयति); 'she b. herself' हृदयस्फोटनेन मृता. –*s.* स्फोटनं, विदलनं, भंगः, भेदः; 'there was a b. of applause' संभूय प्रशंसागिरः उदतिष्ठन्; 'b. of laughter' अट्टहासः, उच्चैर्हासः.

BURTHEN, *s. See* BURDEN.

BURY, *v. t.* निखन् 1 P, निगुह् 1 U, (श्मशाने-भूमौ) निधा 3 U, स्था c. (स्थापयति), निक्षिप् 6 P; निर्-हृ 1 P; 'this buried the king into sorrow' एतेन (वचसा) राजा दुःखमग्नो-दुःखोदधिमग्न इव-बभूव. –ING, *s.* निखननं, श्मशाने स्थापनं; 'b. ground' श्मशानं, प्रेतावासः, परेतभूमि *f.*, पितृवनं, पितृसद्मन् *n.*

BUSH, *s.* गुल्मः-ल्मं, क्षुपः, स्तंबः; 'why do you beat about the b.' अप्रस्तुतं किमिति अनुसंधीयते, (निरर्थकं किमिति वनमालोडयसि); 'a bird in the hand is worth two in the b.' ध्रुवाणि परित्यज्य अध्रुवनिषेवणं नेष्टं, अध्रुवाद् ध्रुवं वरं, वरं तत्कालोपनता तित्तिरिः न पुनर्दिवसांतरिता मयूरी, or वरमद्य कपोतो न श्वो मयूरः. –Y, *a.* गुल्मावृत, निबिड; गाढ, अविरल. 2 घन, स्थूल; लोमश.

BUSS, *See* KISS.

BUST, *s.* ऊर्ध्वकायप्रतिमा-प्रतिकृति *f.*

BUSINESS, *s.* कार्यं, अर्थः, कृत्यं, कर्मन् *n.*, व्यवसायः, व्यवहारः; व्यापारः; नियोगः (duty). 2 अर्थः, प्रयोजनं; 'what b. had you to talk with him' तेन सहालापेन किं तव कार्यमासीत्. 3 वृत्ति *f.*, जीविका; 'a man of b.' कार्यकुशलः, दृष्टकर्मन् *m.* —BUSY, *a.* व्यापृत (with loc.); कार्यसमाकुल, कार्यव्यग्र; 'with what work are you b.' कस्मिन्कार्ये व्यापृतोसि, किमारंभस्त्वं; कार्योद्युक्त, सोद्योग, अतंद्रित, अनलस, व्यग्र. –*v. t.* व्यापृ c., कार्ये नियुज् 10 or अधिकृ 8 U. –BODY, *s.* पराधिकारचर्चकः. –LY, *adv.* अतंद्रितं, सोत्साहं, मनोभिनिवेशेन, औत्सुक्येन, व्यग्रतया.

BUSTLE, *s.* संभ्रमः, आकुलत्वं, त्वरा, व्यग्रता. 2 कोलाहलः, तुमुलरवः. –*v. i.* कार्यव्यापृतत्वाद् इतस्ततो धाव् 1 P or गम् 1 P or चेष्ट् 1 A, or व्यवसो 4 P. –ER, –ING, *s.*, *a.* चपलप्रकृतिः, व्यवसायिन् *m.*

BUT, *prep.* अन्य, इतर, ऋते with abl., विना; विहाय, मुक्त्वा (acc.). –*adv.* एव, केवलं, मात्रं. –*conj.* तु, पुनः, (not at beginning); in 'not only but' अपि takes the place of '*but*'; न केवलं रूपे शिल्पेप्यद्वितीया मालविका (M. 2); 'b. for' (=If it were not) यदि न; 'all b.' *See* ALMOST; 'next b. one' एकांतर *a.*

BUTCHER, शौ(सौ)निकः, आखेटकः, मांसिकः, विशसितृ *m.* –*v. t.* विशस् 1 P, निषूद् 10, हन् 2 P. –Y, *s.* वधः, हननं, विशसनं. 2 शूना, वधस्थानं.

BUT-END, *s.* घनाग्रं, स्थूलाग्रं.

BUTT, *s.* लक्ष्यं, शरव्यं. 2 उपहासास्पदं, परिहासभूमि *f.* 3 आशयः, अभिप्रायः. 4 पात्रं; (सुरा-) भाजनं-भांडं. –*v. t.* शिरसा-शृंगेण-आहन् 2 U.

BUTTER, *s.* नवनीतं, नवोद्धृतं; दधिजं, किलाटः; 'clarified b.' घृतं, सर्पिस् *n.*, आज्यं; 'b. man' नवनीतविक्रयिन् *m.*; 'b. milk' (*s.*) तक्रं, अरिष्टं, कालशेयं, दंडाहतं, गोरसः; 'b. of last day's milk' हैयंगवीनं. –*v. t.* नवनीतेन लिप् 6 P.; (fig.) चाटूक्तिभिः प्रसद् c. or अनुनी 1 P.

BUTTERFLY, *s.* चित्रपतंगः.

BUTTOCK, *s.* नितंबः, कटिप्रोथः; जघनं, श्रोणि-णी *f.*

BUTTON, *s.* गंडः, कुडुपः; 'b. hole' गंडाधारः. –*v. t.* गंडेन बंध् 9 P.

BUTTRESS, *s.* वप्रः-प्रं, आधारार्थं कृतः प्राकारः. 2 आश्रयः, आधारः.

BUXOM, *a.* सानंद, प्रफुल्लवदन, हृष्ट. 2 सरस, सविलास, ललित. –LY, *adv.* सानंदं, सरसं, ललितं. –NESS, *s.* लीला, लालित्यं, विलासः.

BUY, *v. t.* क्री 9 U; 'b. off' मूल्यदानेन परिक्री. –ER, *s.* क्रेतृ *m.*, क्रयिकः, क्रयिन् *m.*

BUZZ, *v. i.* गुंज् 1 P, विरु 2 P. –*s.*, –ING, गुंजितं, गुंजारवः, कलरवः.

BY, *prep.* Gen. ex. by instr. of noun; रामेण हतः, बाणेन हतः, &c. 2 (Near) उप in comp., or समीपे-निकटे-पार्श्वे with gen.; 'b. her father' उपजनकं, पितुः पार्श्वे-समीपे; 'by this time' अनेन समयेन; 'day b. day' अनुदिवसं-दिनं, दिने दिने; 'b. god' ईश्वरं साक्षीकृत्य-ईश्वरसमक्षं; 'b. and b.' अचिरात्; अचिरेण, क्रमशः, शनैः शनैः; 'b. the b.' अपरंच; 'b. degrees' क्रमशः; 'b. hundreds' शतशः; 'one b. one' एकैकशः, आनुपूर्व्येण; 'b.-end' स्वार्थः, स्वहितं; 'b. oneself' रहसि, निभृतं, रहः; 'b.-gone' अतीत, अतिक्रांत, गत; 'b.-path' विमार्गः; विपथः, उपमार्गः, गूढपथः; 'b.-law' उपव्यवस्था, उपविधिः; 'b.-name' उपाधिः; 'b.-stander' पार्श्वस्थः, प्रेक्षकः, समीपस्थः; 'b.-word' उपहासास्पदं.

C.

CABAL, *s.* गूढमंत्रणा, कुविचारणा. –*v. i.* निभृतं मंत्र्

10 A, कूटार्थं संमिल् 6 P. -LER, *s.* कुमंत्रणकृत् *m.*, गूढमंत्रिन् *m.*, भेदकरः.

CABALA, *s.* गूढशास्त्रं, गुप्तविद्या. —CABALIST, *s.* गूढशास्त्रज्ञः. -IC, *a.* निगूढार्थ, गुप्तार्थ.

CABBAGE, *s.* शाकं, हरितकं.

CABIN, *s.* कुटि-टी *f.*, शाला, कोष्ठः. 2 नौकाभ्यंतरे कोष्ठः. 3 वेश्मन् *n.*, कुटीरः. 4 Tent, q. v. -ET, *s.* वेश्मन् *n.*, कक्षांतरं, उपरोधकं. 2 शिष्टसभा, धीसचिवसभा; गूढमंत्रणं. 3 रत्नकोष्ठः. 4 समुद्गकः, संपुटः; *See* BOX.

CABLE, *s.* नौरज्जु *f.* -ED, *a.* रज्जुबद्ध.

CACHEXY, *s.* दोषत्रयं, त्रिदोषं.

CACHINATION, *s.* अट्टहासः, प्रहासः.

CACKLE, CACKLING, *s.* कूजनं, हंसरुतं; अव्यक्तरवः. 2 जल्पितं, प्रलापः. -*v. i.* कूज् 1 P, अव्यक्तं रु 2 P. -ER, *s.* कूजकः.

CADAVEROUS, *a.* शवतुल्य, शवसवर्ण.

CADENCE, *s.* पातः, च्युति *f.* 2 स्वरः, विरावः, निन्हादः; स्वरसंक्रमः, स्वरावरोहः.

CADET, *s.* अनुजः, अवरजः.

CADGER, *s.* आपणिकः.

CÆSURA, *s.* विच्छेदः, विरामः.

CAGE, *s.* पंजरः-रं, पिंजरं, वीतंसः. 2 Prison, q. v. -*v. t.* पंजरे रुध् 7 U or बंध् 9 P.

CAIRN, *s.* उपल-पाषाण-राशिः, शिलासमुच्चयः, प्रस्तरचिति *f.*

CAITIFF, *s.* खलः, शठः, दुर्वृत्तः; *See* WICKED.

CAJOLE, *v. t.* लल् 10, उपच्छंद् 10. 2 CHEAT, q. v. -RY, *s.* चाटूक्ति *f.* 2 वंचनं, छलं, &c.

CAKE, *s.* पूपः, पिष्टकः, अपूपः. -*v. i.* पिंडीभू 1 P.

CALAMITY, *s.* विपद् *f.*, आपद् *f.*, व्यसनं, अनर्थः, उपद्रवः, दुःखं, संकटं, अत्याहितं. 2 उत्पातः, दैवी आपद्. -OUS, *a.* विपद्ग्रस्त, व्यसनार्पित, विपदापन्न, दुर्गत, विधुर.

CALAMUS, *s.* वेत्रः, वेणुः.

CALASH, *s.* केलिरथः, क्रीडायानं.

CALCAREOUS, *a.* शार्करीय.

CALCINE, *v. t.* भस्मीकृ 8 U.

CALCULATE, *v. t.* गण् 10, परिसं-सं-ख्या 2 P, संकल् 10. 2 निरूप् 10; चित् 10, प्रक्लृप् c. -ED, *a.* गणित, संख्येय. 2 युक्त, पर्याप्त, उचित, अलं with inf. -ION, *s.* गणनं-ना, संख्यानं. -OR, *s.* गणकः.

CALCULOUS, *a.* शिला-अश्म-मय (यी *f.*).

CALCULUS, *s.* अश्मरी, मूत्रकृच्छ्रं.

CALDRON, *s.* पिठरः रं, उखा, कुंडं, स्थाली.

CALEFY, *v. t.* तप् 1 P.

CALENDAR, *s.* पंजी, पंजिका.

CALENDS, *s.* प्रतिपद् *f.*; प्रथमदिवसः.

CALF, *s.* गोवत्सः, वत्सः, तर्णकः. 2 जंघापिंडः, पिंडिका.

CALIBRE, *s.* छिद्रं; छिद्रव्यासः. 2 परिमाणं. 3 प्रकारः, जाति *f.*

CALICO, *s.* चित्रितकार्पासपटः.

CALIGATION, *See* DARKNESS.

CALIGRAPHY, *s.* शोभनलेखनकला-शिल्पं.

CALIX, *s.* पुष्पगर्भः, पुष्पकोशः.

CALL, *v. t.* ह्वे 1 P, आह्वे, शब्दायति (D.), आकृ c. 2 अभिधा 3 U, आख्या 2 P, आह्वे, चक्ष् 2 A, नाम कृ 8 U; कृत् 10; 'c. ed her by the name of Pârvatí' तां पार्वतीति नाम्ना जुहाव (बंधुजनः) (K. I. 26), तस्याः पार्वतीति नाम चकार; वच् 2 P, उदाहृ 1 P, ब्रू 2 U. 3 नि-आ-मंत्र् 10 A; 'c. by name' नामग्राहमाह्वे, संबुध् c.; 'c. to mind' स्मृ 1 P, मनसि कृ 8 U; 'c. to account' किं किं कृतमिति प्रच्छ् 6 P or अनुयुज् 7 A or अनुसंधा 3 U; 'c. to witness' साक्षिणं कृ, तमेव (अग्निं) चाधाय विवाहसाक्ष्ये (R. VII. 20). -*s.* आह्वानं; इच्छा; निमंत्रणं; संबोधनं. 2 प्रयोजनं. 3 अभिगमः; नियोगः; 'I have many c. s upon me to-day' मयाद्य कर्तव्या बहवो नियोगाः संति. -back, प्रत्यादिश् 6 P, निवृत् c.; खंड् 10, निरस् 4 P. -for, अर्ह् 1 P; 'this matter c. s for consideration' अयमर्थो विचारणामर्हति; or अत्र विचारणया प्रयोजनं; अपेक्ष् 1 A. -forth, प्रोत्सह् c., उद्युज् 10; प्रकटीकृ, प्रकाश् c. -out, पठ् 1 P; उत्क्रुश् 1 P. 2 तारस्वरेण-उच्चैः आह्वे, घुष् 10. -upon, on, अर्थ् 10 A, याच् 1 A. 2 द्रष्टुं गम् 1 P, अभिगम्. -up, (from sleep) प्रबुध् c. -ED, *a.* आहूत. 2 अभिहित, उक्त, उदाहृत; gen. ex. by नाम *ind.*, नामन्, अभिधान, आख्या, अभिधा, संज्ञा, नामधेय, in comp.; 'a boy c. Râma,' रामो नाम, रामनामा, रामसंज्ञः, &c. बालः. -ING *s. See* (*s.*). 2 वृत्ति *f.*, जीवनसाधनं, उपजीविका; व्यवसायः.

CALLOUS, *a.* कठिन, घन. 2 कठोर, निर्दय, कर्कश; 'c. to contempt' तिरस्कारमगणयन्, तिरस्कारानभिज्ञः. 3 निर्लज्ज, धृष्ट; अविनीत. -NESS, *s.* काठिन्यं, निर्दयता, &c. -CALLOSITY, *s.* किणः, त्वग्दृढता.

CALLOW, *a.* अजातपक्ष, पक्षहीन.

CALM, *a.* प्र-उप-शांत, निश्चल, प्रसन्न, स्तिमित, अनुत्तरंग, अक्षुब्ध, निष्कंप, निर्वात, अव्याकुल; 'to be c.' शम् 4 P, प्रसद् 1 P; 'heart, be c.' हृदय प्रसीद, मा उत्ताम्य. -*s.* निर्वातः, शांति *f.*; प्रसादः, विश्रामः. 2 शांतता, स्तिमितता; ex. by (*a.*). -*v. t.* उप-प्र-शम् c. (शमयति), उप-परि-सांत्व् 10; तुष् c., प्रसद् c. 2 लघूकृ 8 U, अपनी 1 P. -LY, *adv.* निश्चलं, अक्षोभं, शांत्या, प्रशांतं. -NESS, *s.* प्र-उप-शांति *f.*, निर्विकारता, प्रसादः, अव्याकुलता, असंभ्रमः. 2 निर्वातत्वं, अक्षोभः, स्तिमितता.

CALORIFIC, *a.* तापकर (री *f.*); तापजनक.

CALVE, *v. i.* वत्सं सू 2 A; प्रजन् 4 A.

CALUMNIATE, *v. t.* परि-अप-वद् 1 U; निर्भर्त्स् 10 A, निंद् 1 P, अपभाष् 1 A; मिथ्या अभियुज् 7 A, 10; आ-अधि-क्षिप् 6 P. -OR, *s.* परिवादकः, परिवादिन् *m.*, निंदकः, अभ्यसूयकः, अभिशापकः, पिशुनः, आक्षेपकः. —CALUMNY, *s.* परिवादः, पैशुन्यं, अभ्यसूया, अलीकप्रवादः, मिथ्याभिशापः, पिशुनवचनं, आक्षेपः, मिथ्याभियोगः. -OUS, *a.* पिशुन, कलंकमय (यी *f.*). -OUSLY *adv.* सापवादं, परिवादेन, साभ्यसूयं.

CALX, *s.* चूर्णं, भस्मन् *n.* 2 रीतिपुष्पं.

CAMBRIC, *s.* अंशुकं, दुकूलं.

CAMEL, *s.* उष्ट्रः ; क्रमेलकः, मयः, महांगः ; 'young c.' करभः ; 'she-c.' उष्ट्री.

CAMISADO, *s.* रात्रियुद्धं.

CAMOUS, *a.* चिपिट.

CAMP, *s.* शिबिरं, निवेशनस्थानं, निवेशः. 2 सैन्यनिवासः. -*v. t.* सैन्यं निविश् c.

CAMPAIGN, *s.* समरभूमि *f.*, -स्थलं. 2 युद्धकालः, युद्धप्रवृत्ति *f.*

CAMPHOR, *s.* कर्पूरः-रं, घनसारः, सिताभ्रः, हिमवालुका, चंद्रः, सोमः. -ATED, *a.* कर्पूरसंमिश्र-संसृष्ट.

CAN, *v. i.* शक् 5 P, प्रभू 1 P, or समर्थ-क्षम-शक्त *a.* भू, with inf. of verb ; *See* ABLE; oft. by ईश् 2 A; पृ 10. 2 In pass. ex. by pot. pass. part.; 'c. be done' करणीय *a.*, कार्य, &c; 'I cannot but go' मयावश्यं गंतव्यमेव. -*s.* कंसः, भाजनं, धातुपात्रं, चषकः.

CANAL, *s.* कुल्या, प्रणाली.

CANCEL, *v. t.* अव-वि-लुप् 6 P or c., व्या-अप-निर्-मृज् 2 P; निरस् 4 P, खंड् 10, निवृत् c.

CANCER, *s.* कर्कटः, कर्कः. 2 कुलीरः. 3 मांसार्बुदं; तनुव्रणः, विस्फोटः. -ATE, *v. i.* व्रणीभू 1 P.

CANDENT, *a.* *See* HOT.

CANDID, *a.* निष्कपट, निर्व्याज, सरल, स्फुट-स्पष्ट-वादिन् (नी *f.*), ऋजु, निर्मल, शुद्धात्मन्, निर्व्यलीक; शुचि. -LY, *adv.* निष्कपटं; स्फुटं, निर्व्याजं. -NESS, -CANDOUR, *s.* निष्कापट्यं, निर्व्याजता; आर्जवं, सरलता, अमाया, दाक्षिण्यं, निर्व्यलीकता, शौचं.

CANDIDATE, *s.* अर्थिन् *m.*, याचकः, प्रार्थकः, पदान्वेषिन् *m.*

CANDIFY, *v. t.* धवलीकृ 8 U, शुक्लीकृ.

CANDLE, *s.* दीपः, दीपिका, वर्ति-र्ती *f.* -HOLDER, *s.* दीपहस्तः-वाहः. -STICK, *s.* दीपपादपः, दीप-शिखावृक्षः .

CANDY, *v. t.* घनी-खंडी-सांद्री-कृ 8 U, स्त्यै c. -*v. i.* स्त्यै 1 A, घनीभू 1 P. -*s.* शर्करा, सितोपला, खंडमोदकः.

CANE, *s.* वेतसः, वेत्रः, वेणुः, वंशः, वानीरः. 2 वेत्रयष्टि *f.* -दंडः ; 'sugar-c.' इक्षुः; 'seat of c.' वेत्रासनं; 'made of c.' वैणव (वी *f.*), वैदल (ली *f.*). -*v. t.* वेत्रेण तड् 10 or हन् 2 P or प्रहृ 1 P.

CANINE, *a.* कुक्कुरीय, श्वन् in comp.

CANKER, *s.* विद्रधिः; व्रणः. 2 फलनाशी कीटः. 3 कलंकः; विषं. 3 दूषणं, विलयनं, विनाशः. -*v. t.* विनश् c., विली c., दुष् c. (दूषयति). -*v. i.* विली 4 A, दुष् 4 P.

CANNIBAL, *s.* नृभुज् *m.*, पिशिताशः -शनः, पुरुषादः, क्रव्याशिन् *m.* -ISM, *s.* क्रव्याशित्वं, &c.

CANNON, *s.* गुलिप्रक्षेपणी लोहनाडि-डी *f.* -BALL, *s.* आग्नेयास्त्रं, रणगुलि *f.*

CANOE, *s.* लघुनौका, उडुपं, प्लवः, कोलः.

CANON, *s.* विधिः, नियमः ; शास्त्रं, व्यवस्था. 2 पौरोहितधर्मशास्त्रं. 3 धर्मपुस्तकसंहिता. -ICAL, *a.* वैधिक (की *f.*), नियमानुसारिन् (णी *f.*). -ICALLY, *adv.* विधिवत्, यथाविधि,-शास्त्रं. -IZE, *v. t.* सिद्धजनमध्ये आरुह् c. (रोपयति) or गण् 10 or संख्या 2 P.

CANOPY, *s.* वितानं, उल्लोचः, आच्छादनं, पिधानं.-*v. t.* वितानीकृ 8 U, वितानेन आच्छद् 10.

CANOROUS, *a.* सुस्वर, मधुस्वन.

CANT, *s.* परिभाषा, कल्पितसंज्ञा. 2 अपभाषा. 3 वाक्छलं, दंभोक्ति *f.*, दांभिकवचनं. -*v. i.* परिभाष् 1 A. 2 दांभिकतया वद् 1 P. -ATION, *s.* गानं, गीतं. -ER, *s.* अर्थवल्गितं. 2 दांभिकः, धर्मध्वजिन् *m.* -ICLE, *s.* उपगानं.

CANTHARIDES, *s.* विस्फोटकीटकः.

CANTHUS, *s.* अपांगः-गं, नेत्रपर्यंतः.

CANTLE, CANTLET, *s.* खंडः, भागः.

CANTO, *s.* सर्गः, पर्वन् *n.*, परिच्छेदः ; अध्यायः, स्कंधः, (of different compositions).

CANTON, *s.* चक्रं ; भूभागः, प्रदेशः. -*v. t.* खंडशो विभज् 1 P. 2 आवासं कॢप् c. -MENT, *s.* सैन्यावासः, शिबिरं.

CANVASS, *v. t.* Beg, q. v. 2 परि-ईक्ष् 1 A, विचर् c., निरूप् 10 ; अनुसंधा 3 U. -*s.* स्थूलपटः, शाणं. 2 वातवस्त्रं. -ER, *s.* प्रार्थकः.

CAP, *s.* शिरस्त्राणं, शिरस्कं, शिरोवस्त्रं, शिरोवेष्टनं. -*v. t.* पिधा 3 U; *See* COVER. -*v. i.* अभिवादनार्थं शिरस्त्रमुन्मुच् 6 P or अपनी 1 P or अपवृत् c.

CAPABLE, *a.* समर्थ, शक्त, क्षम, योग्य, उचित ; gen. ex. by शक्य with inf., or pot. pass. part.; 'c. of being defeated' पराजेतुं शक्यः, पराजेतव्यः, 'Râma is not c. of such atrocity' नेदृशं नृशंसचरितं रामेण कर्तुं शक्यते, रामे संभाव्यते; 'c. person' पात्रं, गुणवत् (ती *f.*); 'to be c.' शक् 5 P, उत्सह् 1 A, कॢप् 1 A (with dat.). -CAPABILITY, *s.* सामर्थ्यं, शक्ति *f.*, पात्रता, योग्यता.

CAPACIOUS, *a.* विशाल, उरु, प्रसृत; *See* BROAD. 2 विपुल, प्रचुर.

CAPACITATE, *v. t.* उपयुक्त-क्षम *a.* कृ 8 U.

CAPACITY, *s.* धारणशक्ति *f.*, ग्रहणसामर्थ्यं (lit. & fig.); 'c. for all knowledge' अशेषविद्याग्रहणसामर्थ्यं. 2 बलं, शक्ति *f.*, सामर्थ्यं. पात्रता, योग्यता. 3 परिमाणं, विस्तारः. 4 (Relation) gen. ex. by इति or रूपेण; 'he served the king in the c. of a servant' सेवकरूपेण राजानं सिषेवे; अवस्था, भावः, वृत्ति *f.*, विषयः; विधेयविषये सभवान्नियुंक्ते (Mal. 1) 'employs me in the c. of a servant.'

CAP-A-PIE, *adv.* नखशिखांतं, सर्वांगं.

CAPARISON, *s.* आस्तरणं; अश्वसज्जा-प्रसाधनं, अश्वालंकाराः (pl.). –*v. t.* विभूष् 10, अलंकारैर्भूष्.

CAPCASE, *s.* समुद्गकः, संपुटः.

CAPE, *s.* भूशिरस् *n.*, अंतरीपः-पं. 2 स्कंधप्रावरणं, ग्रीवाप्रच्छदः.

CAPER, *s. See* LEAP.

CAPILLAMENT, *s.* केशरः-रं, किंजल्कः.

CAPILLARY, *a.* केशोपम; सूक्ष्म, केश in comp.; 'c. attraction' केशाकर्षणं.

CAPITAL, *a.* श्रेष्ठ, परम, मुख्य, प्रधान, विशिष्ट, वरिष्ठ, उत्तम, उत्कृष्ट; 'c. punishment' उत्तमसाहसं, देहदंडः, प्राणदंडः; 'c. crime' वधार्ह पातकं; वधदंडयं पापं. –*s.* राजधानी. 2 मूलं, मूलद्रव्यं. 3 शीर्षं, अग्रं. –IST, *s.* द्रव्यवत् *m.*, कोटीश्वरः. –LY, *adv.* उत्तमसाहसेन; प्राणदंडेन. 2 परमं, श्लाघ्यप्रकारेण, विशिष्टतया.

CAPITATION, *s.* एकैकशः परिगणनं; मस्तकसंख्या.

CAPITULATE, *v. i.* शत्रुहस्ते आत्मानं ससमयं सम्-ऋ c. (अर्पयति), शत्र्वधीन *a.* भू, वशं गम् 1 P. 2 संक्षेपतः लिख् 6 P or कथ् 10. –ION, *s.* समयपूर्वकं समर्पणं; वशीभवनं, शत्रुकरार्पणं.

CAPRICE, *s.* कामचारः, चापल्यं, मनोलौल्यं; 'c. of fortune' दैवविलसितं-विजृंभणं; दैवस्य कामचारः (Mu. 2). —CAPRICIOUS, *a.* कामचारिन् (णी *f.*), चपल, चंचलप्रकृति, लोल-चल-चित्त, लोल, अस्थिर, स्वैरवृत्त, स्वैरिन्. –LY, *adv.* लोलचेतसा, चापल्येन; कामतः, स्वैरं, कामचारेण. –NESS, *s.* चापल्यं, लोलता, कामचारिता, &c.

CAPSULE, *s.* बीजकोषः, पुटः-टं. –AR, *a.* पुटाकार.

CAPTAIN, *s.* सेनानीः, गुल्मपतिः, दंडनायकः. 2 पोताध्यक्षः. 3 नायकः, नेतृ *m.*, मुखरः, अग्र-पुरो-गः.

CAPTATION, *s.* लोकरंजनं, जनश्लाघासेवनं.

CAPTIOUS, *a.* दोषैकदृश्, छिद्रान्वेषिन् (णी *f.*); विवादशील. 2 भ्रांतिकर (री *f.*). –LY, *adv.* विवादेच्छयैव, छिद्रान्वेषिवत्. –NESS, *s.* छिद्रान्वेषिता; विवादशीलता.

CAPTIVATE, *v. t.* मुह् c., ग्रह् 9 P; हृ 1 P; विलुभ् c. (eye, ear, &c.); 'c. s the eye' विलोभयति चक्षुः. 2 दासीकृ 8 U, बंदीकृ, वशीकृ, दम् c. (दमयति). –ING, *a.* मनोहर, चित्तहारिन् (णी *f.*), मनोज्ञ, हृदयग्राहिन् (णी *f.*), हारिन्, मोहिन्. –ION, *s.* बंदी-दासी-करणं, &c.

CAPTIVE, *s.* बंदी, बंदि *f.*; कारागतः ; 'made c.' (taken prisoner) बंदीकृत, बंदिग्राहं गृहीत. 2 दासः. –*a.* बंदीकृत, दासीकृत, शत्रुवश, कारास्थ. –ITY, *s.* बंधनं, बंदित्वं, कारावासः. 2 दासत्वं, दासभावः.

CAPTOR, *s.* जेतृ *m.*, बंदीकर्तृ *m.*

CAPTURE, *v. t.* ग्रह् 9 P, बंदी-दासी-कृ 8 U; (a fort) भंज् 7 P, लंघ् 10, आक्रम् 1 U, 4 P. –*s.* ग्रहः, ग्रहणं; लोप्त्रं, लोत्रं; 'c. of a fort' दुर्गलंघनं; 'c. of cattle' गोग्रहः, धेनुहरणं.

CAR, *s.* रथः, वाहनं, चक्रयानं, प्रवहणं; 'heavenly c.' विमानं; 'war c.' स्यंदनः.

CARACOLE, *s.* तिर्यक्प्लुतं, वक्र-कुटिल-गति *f.* –*v. i.* तिर्यक् प्लु 1 A, or वल्ग् 1 U.

CARAVAN, *s.* सार्थः, संघः; 'leader of c.' सार्थवाहः. –SARY, *s.* पथिकावासः, पांथनिवासस्थानं.

CARBUNCLE, *s.* विस्फोटः; वल्मीकं. 2 पद्मरागः.

CARCANET, *s.* मुक्तावलि *f.*, मणिमाला.

CARCASS, *s.* शवः-वं, कुणपः, मृतं शरीरं.

CARD, *s.* पत्रं; क्रीडापत्रं. 2 ऊर्णामार्जनी. –*v. t.* ऊर्णां संमृज् 2 P or घृष् 1 P. –ER, *s.* ऊर्णामार्जकः.

CARDAMOM, *s.* एला, निष्कुटि-टी *f.*, पृथ्वीका, चंद्रवाला, बहुला; 'small c.' उपकुंचिका, तुत्था, कोरंगी, त्रिपुटा, त्रुटि-टी *f.*

CARDINAL, *a.* प्रधान; *See* CAPITAL, *a.*; 'c. point' दिग्भागः. –*s.* धर्माध्यक्षः.

CARE, *s.* चिंता, औत्सुक्यं, उद्वेगः; *See* ANXIETY. 2 यत्नः, प्रयत्नः, आदरः, मनोयोगः; 'brought up with c.' प्रयत्नसंवर्धितः, सादरं परिपालितः. 3 सूक्ष्मता, निपुणता; 'searching with c.' निपुणमन्विष्य; 'thinking with c.' सुनिपुणं विमृश्य. 4 रक्षा; अवेक्षा; 'leave under the c. of' *See* CHARGE. 5 अप्रमादः, सावधानता, अवधानं; 'have a c. what you do' यत्कर्तव्यं तद्विमृश्य-समीक्ष्य-कुरुत. –*v. i.* अव-अप-ईक्ष् 1 A, चिंत् 10, मनो धा 3 U; oft. ex. by the several nouns above; 'I do not c. now' अधुनाहं वीतचिंतः; 'I c. very much for your protection' तव रक्षणे बलवान्ममादरः. 2 गण् 10, (न तृणमपि गणयति शत्रुं), आदृ 6 A (न त्यागमाद्रियते); ईक्ष् 1 A, (the sense being clear); न कामवृत्तिर्वचनीयमीक्षते (K. v. 82) 'a self-willed person c. s not for blame'. –take c. रक्ष् 1 P, अव-ईक्ष् 1 A (श्लाघ्यां दुहितरमवेक्षस्व जानकीं U. 1), चिंत् 10 (तातस्त्वां चिंतयिष्यति). 2 लल् 10; संवृध् c., पा c. (पालयति), विनी 1 P. 3 अप्रमत्त-सावधान-*a.* भू 1 P, अवधा 3 U, 'let c. be taken of each character' प्रतिपात्रमाधीयतां यत्नः (S. 1); 'do not c. to think' सावधानेन चेतसा

विचारयति, इति विचारं नाद्रियते.—FUL, *a.* Anxious, q. v. 2 अप्रमत्त, सावधान, अभियुक्त, अवहित, दक्ष. —FULLY, *adv.* सावधानं, प्रयत्नतः, अप्रमत्तं, सादरं, निपुणं.—LESS, *a.* प्रमत्त, अनवधान, निरपेक्ष, निरवधान, असमीक्ष्यकारिन् (णी *f.*); 'to be c. in' प्रमद् 4 P (with abl.), स्वाधिकारात्प्रमत्तः (Me. 1). —LESSLY, *adv.* सप्रमादं, अनवधानेन, &c.

CAREER, *s.* चर्या; धावनं. 2 गति *f.*, क्रमः, चलनं, चरितं; 'c. in life' जीव-लोक-यात्रा; 'during his c.' तस्मिन् (भुवं) शासति.—*v. i.* वेगेन धाव् 1 P.

CARESS, *v. t.* परामृश् 6 P, आलिंग् 1 P, परिरभ् 1 A; *See* CLASP. 2 लल् 10.—*s.* परिरंभः-णं, लालनं, आलिंगनं, परिष्वंगः.

CARET, *s.* काकपदं, हंसपादाकृति चिह्नं.

CARGO, *s.* पोतभारः, पोतस्थं द्रव्यं-भांडं.

CARICATURE, *s.* हास्यजनकं चित्रं; हास्यचित्र. —*v. t.* चित्रेण हास्यास्पद नी 1 P; हास्यप्रकारेण चित्र् 10. —IST, *s.* हास्यप्रतिमाकृत् *m.*

CARIOUS, *a.* गलित, क्षीण, पूयपूर्ण. —CARIES, CARIOSITY, *s.* अस्थिक्षयः-शोषः.

CARK, *v. i.* चिंताकुल *a.* भू 1 P.

CARLE, *s.* दुर्वृत्तः; *See* WICKED.

CARMINATIVE, *a.* वायुनाशिन् (नी *f.*), अग्निद, अग्निवर्धक.

CARMINE, *s.* जतुजरंगः.

CARNAGE, *s.* वधः, विशसनं, संहारः, हत्या.

CARNAL, *a.* कायिक-शारीरिक (की *f.*). 2 ऐहिक (की *f.*). 3 विषयिन् (णी *f.*), विषयासक्त, विषयोपसेविन् (नी *f.*); 'c. pleasure' विषयसुखं; 'c. desires' विषयवासनाः; 'c. union' संभोगः, अभिगमः. —ITY, *s.* विषयासक्ति *f.*, विषयोपसेवा, कामुकता. —LY, *adv.* कामुकवत्.

CARNATION, *s.* मांसवर्णः; लोहितवर्णः.

CARNIVOROUS, *a.* क्रव्याद्, मांसभुज्, पिशिताशन, क्रव्यभोजन.

CARNOSITY, *s.* गंडः; मेदोग्रंथिः.

CAROCHE, *s.* क्रीडारथः, चातुरं.

CAROL, *s.* हर्ष-आनंद-गीतं. 2 स्तोत्रं, भक्तिगीतं.—*v. t.* हर्षेण गै 1 P; उपगै, स्तु 2 U.

CAROUSE, *v. i.* अतिपानं कृ 8 U, पानोत्सवं कृ, अतिपानेन क्षीव *a.* भू. —*s.*, —AL, *s.* अतिपानं, पानोत्सवः. —ER, *s.* पानरतः, अतिपायिन् *m.*

CARP, *s.* शफरी, प्रोष्ठः-ष्ठी. —*v. i.* (at) छिद्रं अन्विष् 4 P; दोषं दृश् 1 P or निरूप् 10, निंद् 1 P; *See* CENSURE.—ER, *s.* छिद्रान्वेषिन् *m.*, दोषैकदृश् *m.* —ING, *s.* गर्हा, निंदा, छिद्रान्वेषः.

CARPENTER, *s.* तक्षकः, सूत्रधारः, रथकारः, स्थपतिः, त्वष्टृ *m.*, तक्षन् *m.* —CARPENTRY, *s.* दारुकर्मन् *n.*, तक्षकक्रिया, तक्षशिल्पं.

CARPET, *s.* कुथः-था, आस्तरणं; 'brought on the c.' प्रस्तुत, उपक्षिप्त.

CARRION, *s.* पूतिमांसं, अखाद्यमांसं; कुणपः.—EATER, *s.* कुणपभुज् *m.*

CARRY, *v. t.* वह् 1 P, नी 1 P, भृ 3 U, हृ 1 P; 'c. ed a dog on his shoulder' स्कंधेन श्वानमुवाह. 2 साध् 5 P or c.; 'c. a fort' दुर्गं लंघ् 1 A, 10 or भंज् 7 P, or वशीकृ 8 U; 'the enemy c. ed the day' शत्रवो जयमापुः; 'c. one's point' अभीष्टं लभ् 1 A, प्रतिज्ञां पूर् 10; 'c. oneself' आचर् 1 P; *See* ACT; 'c. arms' शस्त्राणि ग्रह् 9 P; सैनिकवृत्तिं आस्था 1 A. —away, —off, अपवह्, अपनी, अपहृ; अप-उह् 1 U, अपकृष् 1 P. —on, प्रवृत् c., प्रणी, विधा 3 U; 'c. on war' युद्धं-संग्रामं कृ, विग्रह् 9 P. —out, अनुष्ठा 1 P, कृ 8 U, साध् 5 P or c. —through, पारं नी; 'c ing through all difficulties' आपदां पारं नयनं. —CARRIAGE, *s.* वाहनं, यानं, रथः, प्रवहणं, शकटः-टं; 'closed c.' कर्णीरथः, प्रवहणं, डयनं; 'c. road' रथ्या; 'c. horse' रथ्यः. 2 आचरणं, व्यवहारः, गति *f.*, चरितं, चेष्टा. 3 निर्वाहः, प्रणयनं. —CARRIER, *s.* वाहकः, हरः, in comp. 2 भांडवाहनजीविन् *m.*

CART, *s.* शकटः-टं, शकटिका, वाहनं, प्रवहणं, यानं. —*v. t.* शकटेन वह् 1 P. 2 शकटे निधा 3 U. 'Carter', 'c. man' शाकटिकः, शकटवाहः; 'c. horse' शकटवाहनः; धुर्यः, धुरीणः; 'c. load' शाकटं, शलाटः, शाकटो भारः; 'c. rut' शकटाचिह्नं पदवी-पद्धति *f.*; 'c. wright' शकटकारः.

CARTEL, *s.* युद्धाह्वानपत्रं.

CARTILAGE, *s.* कोमलास्थि *n.* —CARTILAGINOUS, *a.* तरुणास्थिविशिष्ट.

CARTOON, *s.* चित्रितपटः, विचित्रमालेख्यं, हास्योत्पादकं चित्रं.

CARUNCLE, *s.* गंडः, मांसपिंडः.

CARVE, *v. t.* कृ 6 P, तक्ष् 1, 5 P, उत्कृ, (उत्कीर्णा इव वासयष्टिषु V. 3); उल्लिख् 6 P. 2 कृत् 6 P, छिद् 7 P; कॢप् c.; विभज् 1 U; 'c. out (a plan)' युज् 10; प्रकॢप् c.; प्रतियुज् 10; चिंत् 10, निरूप् 10. —ER *s.* तक्षकः, कारुः, त्वष्टृ *m.*, तष्टृ *m.* 2 परिकल्पकः.

CASCADE, *s.* प्रपातः, प्लवणं, वारिप्रवाहः, निर्झरः, उत्सः.

CASE, *s.* अवस्था, भावः, दशा, स्थिति *f.*, वृत्ति *f.*; 'what is the c. with him' किं तस्य वृत्तं. 2 पदं. 3 अर्थः. 4 कार्यं, पक्षः. 5 पुटः, पिधानं, कोषः, आवेष्टनं. 6 भांडं, आधारः. 7 स्थानं, स्थलं. 'In c.' यदि, चेत्; 'this being the c.' एवं सति-गते; 'in this c.' अत्र, अत्र विषये; 'in the c. of' gen. ex. by gen., or विषये in comp.; 'in the c. before us,' 'in the present c.' प्र-

स्तुतविषये, प्रकृते; 'if such be the c.' यद्येवं, तेन हि; 'in both c. s' उभयथा, उभयपक्षे. –*v. t.* भांडे निधा 3 U or निविश् c. 2 पिधा 3 U, आवृ 5 U.

CASEMENT, *s.* गवाक्षः, वातायनं, जालं.

CASH, *s.* टंकः, मुद्रा, नाणकं. –KEEPER, –IER *s.* टंकाधीशः, रक्षकः.

CASHIER, *v. t.* अधिकाराद् भ्रंश् c. or च्यु c. or निरा-कृ 8 U or अपास् 4 P.

CASK, *s.* भांडं, भाजनं, पात्रं.

CASKET, *s.* समुद्गकः, भांडं, मंजूषा, करंडकः, संपुटः-टकः.

CASQUE, *s.* शिरस्त्राणं, शिरस्कं.

CAST, *v. t.* क्षिप् 6 P, प्र-वि-°; अस् 4 P, मुच्-सृज् 6 P, पत् c. 2 (about) विगण् 10, आकल् 10, चिंत् 10, विचर् c. 3 विलाप्य संधा 3 U; 'c. glance' दृशं क्षिप्, दृष्टिं-चक्षुः &c. दा 3 P (कृष्णसारे ददचक्षुः S. I); 'c. skin' कंचुकं विमुच्; 'c. lots' गुटिकां पत् c.; 'why c. pearls before swine' किमिष्टमन्नं खरसूकराणां. –*s.* क्षेपः; पातः. 2 मूर्ति *f.*; घटनना; 'c. of characters' भूमिकासंविभागः. –aside, अपाकृ 8 U, निराकृ. –away, अपास्, परित्यज्, उत्क्षिप्. –down, अव-वि-सद् 1 P, म्लै 1 P; विषण्ण *a.* भू 1 P; 'with a face c.' खिन्न-विषण्ण-वदनः; 'c. look' अधोदृष्टि *f.* 2 निपत् c., अधः क्षिप्. –forth, उत्सृज्, उद्वम् 1 P, उद्गॄ 6 P. –off, विमुच्; अप-निर्-अस्. –out, अपाकृ, निःसृ c., निष्कस् c., प्रत्यादिश् 6 P. –AWAY, *s.* त्याज्यः; अपांक्तेयः. –LING, *s.* गर्भपतितः, गर्भच्युतः.

CASTE, *s.* वर्णः, जाति *f.*, कुलं; 'of the same c.' सवर्णः; 'low c.' हीनवर्णः, नीचः, निकृष्टजातिः; 'high c.' उत्तमवर्णः; 'mixture of c. s' वर्णसंकरः; 'low c. man' अंत्यजः; 'loss of c.' जातिभ्रंशः; 'out of c.' अपसदः, चांडालः, जातिहीनः; 'c. man' सजातीयः.

CASTIGATE, *v. t.* दंड् 10; तड् 10. –ION, *s.* कशाघातः, तीव्रप्रहारः; दंडः, निग्रहः.

CASTLE, *s.* दुर्गं, कोटः. –CASTELLAN, *s.* दुर्गाधिपतिः. –CASTELLATED, *a.* दुर्गाकार.

CASTOR-OIL, *s.* एरंडतैलं.

CASTRATE, *v. t.* वृषणौ कृत् 6 P or उत्पट् 10 or छिद् 7 P. –ED, *a.* छिन्नमुष्क, निर्वृषण. –ION, *s.* मुष्क-वृषण-छेदः, पुंस्त्वहरणं.

CASTREL, *s.* श्येनः.

CASUAL, *a.* अतर्कित, अचिंतित; आकस्मिक-आपातिक-आगंतुक-दैविक (की *f.*), दैवायत्त. –LY, *adv.* अचिंतितं, दैवात्, समापत्त्या, दैवयोगात्. –TY, *s.* दैवयोगः-घटना, संगति *f.*, समापत्ति *f.* 2 अदृष्टं, आकस्मिकी आपद्.

CASUIST, *s.* धर्माधर्मविचारकः. –RY, *s.* धर्माधर्मविचारणा. 2 विवेचनविद्या.

CAT, *s.* मार्जारः, बिडालः, ओतुः, आखुभुज् *m.*; 'cat o'-nine-tails' नवरज्जुयुक्ता चर्मयष्टिः.

CATACLYSM, *s.* पृथ्वीप्लावः, भूतसंप्लवः.

CATALEPSIS, *s.* अपस्मारः; ग्रहामयः.

CATALOGUE, *s.* परिसंख्या, परिगणना; 'c. of names' नामावलि-ली *f.*

CATAPLASM, *s.* प्रलेपः, उपनाहः.

CATARACT, *s.* निर्झरः, प्रपातः, प्रस्रवणं, उत्सः. 2 नेत्रपटलं, मंथः, शुक्रः; काचः.

CATARRH, *s.* अभिष्यंदः. 2 श्लेष्मन् *m.*, कफः, (variety of c.). –AL, *a.* अभिष्यंदिन्-कफिन् (नी *f.*), श्लेष्मल.

CATASTROPHE, *s.* परिणामः, निर्वाहः, निर्वहणं. 2 आपद् *f.*; *See* CALAMITY.

CATCH, *v. t.* धृ 1 P, 10, ग्रह् 9 P, बंध् 9 P (in a net &c.). 2 परामृश् 6 P, अवलंब् 1 A. 3 प्रलुभ् c., आकृष्-हृ- 1 P; 'the house caught fire' ज्वलनमुपगतं-अग्निदीप्तं-गेहं; 'caught cold' शीताकुलो बभूव, पीनसोपहतः, अभिष्यंदाकुलः; 'c. in the act' (red-handed) कर्मगृहीत, रूपाभिग्राहित, लोप्त्रेण गृहीतः; 'Sir, you are c.' भो निगृहीतोऽसि (U. 4); 'c. in his own words' स्ववचनेनैव गृहीतः-निरुत्तरीकृतः. –at, अवलंब् 1A, आश्रि 1 U. –up, अपहृ 1 P, अपनी 1 P. –*s.* तालकं. 2 लाभः, फलं. 3 पर्यायगीतं. –ER, *s.* ग्राहकः, जालिकः. 2 वागुरा, जालं. –ING, *a.* संपर्कीय, संचारक. 2 हारिन् (णी *f.*).

CATECHISM, *s.* प्रश्नोत्तरं, सप्रश्नोत्तरः पाठः. –CATECHIZE, *v. t.* प्रश्नोत्तरद्वारेण-क्रमेण-अधि-इ c. (अध्यापयति) or उपदिश् 6 P or प्रच्छ् 6 P. –CATECHIST, –CHISER, *s.* प्रश्नोत्तरविधिना अध्यापकः-पाठकः.

CATECHU, *s.* खदिरसारः.

CATECHUMEN, *s.* नवशिष्यः-छात्रः.

CATEGORY, *s.* पदार्थः. 2 समानवर्गः, अधिकरणं. –ICAL, *a.* सुव्यक्त, स्पष्टार्थ; नियत, व्यक्त. –ICALLY, *adv.* स्पष्टं, सुव्यक्तं.

CATENATION, *s.* संबंधः, अन्वयः, परस्परान्वयः. 2 शृंखलात्वं, दामता; परंपरा.

CATER, *v. i.* भोजनादि परि-उप-कॢप् c.

CATERPILLAR, *s.* कोषकारः-वासिन् *m.*

CATES, *s.* स्वाद्वन्नं; विशिष्टान्नं.

CATHARTIC, *s.* रेचकं, रेचनं, उदरशोधनं.

CATHEDRAL, *s.* महामंदिरं, महती पूजाशाला.

CATHOLIC, *a.* सर्वसामान्य-साधारण (णी *f.*), सार्वलौकिक (की *f.*). –ISM, *s.* साधारण्यं, सार्वलौकिकता.

CATTLE, *s.* गावः (pl.), गोकुलं, पशुसमूहः, गोव्रजः; 'c. for draught' धुर्यः, धुरीणः; 'keeper of c.' गोपालः, पशुपालः.

CAUL, *s.* शिरोवेष्टनं. 2 अंत्रावेष्टनं. 3 गर्भावेष्टनं.

CAUSE, *s.* कारणं, (oft. with loc. of effect, दैवं नृणां वृद्धौ कारणं), निदानं, बीजं, हेतुः, निमित्तं, मूलं, योनि *f.* 2 कार्यं, प्रयोजनं. 3 स्थानं, अवसरः, पदं. 4 उत्पादकः, प्रवर्तकः. 5 अर्थः, पक्षः, कार्यं; 'material c.' समवायिकारणं; उपादानकारणं, प्रकृतिः; 'efficient (instrumental) c.' निमित्तकारणं; 'primary c.' बीजं, मूल-कारण-कारणं. –*v. t.* Ex. by causal of verbs; 'c. to fall' पातयति; गमयति, &c. 2 उत्पद् c., जन् c. (जनयति): कृ 8 U; oft. ex. by dat. of nouns with or without भू, अस्; यतस्तो स्वल्पदुःखाय (भवतः) (P. I. 1); *See* TEND (to); also ex. by संभव, जन्य, ज, in comp.; स्मरजा पीडा 'torment c. ed by Cupid', &c. –AL, *a.* हेतुक, हेतुमत् (ती *f.*). –*s.* णिच् (of verbs). –ATION, *s.* कारणत्वं, हेतुता. –ATIVE, *a.* उत्पादक, जनयितृ (त्री *f.*). –ER, *s.* कारकः, उत्पादकः, प्रवर्तकः. –LESS, *a.* अकारण, निष्कारण, निर्निमित्त, and sim. comps. –LESSLY, *adv.* अकारणं, अहेतुकं, निर्निमित्तं, निष्प्रयोजनं.

CAUSEWAY, *s.* सेतुः, धरणं.

CAUSTIC, *a.* दाहक, तिग्म, प्रखर. 2 अरुंतुद, मर्मस्पृश्-छिद्.

CAUTERIZE, *v. t.* दह् c. –CAUTERY, *s.* दाहः; तप्तलोहेन मांसदाहः.

CAUTION, *s.* दक्षता, सावधानता, अप्रमादः, समीक्षा, अवेक्षा, अवधानं. 2 प्रातिभाव्यं, आधिः. 3 प्रत्यादेशनं, प्राक् सूचना or उपदेशः, प्राक् प्रबोधनं. –*v. t.* प्राक् सूच् 10; प्रत्यादिश् 6 P, प्राक् प्रबुध् c.; 'c. ed me against the approaching danger' उपस्थितापद्विषये सावधानो भव इति मामुपादिशत्. —CAUTIOUS, *a.* सावधान, दक्ष, अप्रमत्त; समीक्ष्य-विमृश्य-कारिन् (णी *f.*); अवहित. –LY, *adv.* सावधानं, अवेक्षया, &c. –NESS, *s.* अप्रमादः, दक्षता.

CAVALCADE, *s.* सादियात्रा, अश्वारोहश्रेणी.

CAVALIER. *s.* अश्वारोहः, सादिन् *m.*, तुरगिन् *m.*; 'to treat c. ly' अवमन् 4 A, सावलेपं अवज्ञा 9 U. –C. S, –CAVALRY, *s.* तुरगबलं; अश्वारोहवर्गः, आश्विकं, सादिगणः.

CAVATE, *v. t.* खन् 1 P.

CAVE, CAVERN, *s.* गुहा, दरी, गह्वरं, कंदरः-रा, विवरः-रं.

CAVEAT, *s.* प्राक्सूचनं; निषेधः.

CAVIL, *v. i.* मिथ्या निंद् 1 P; दोषं ग्रह् 9 P; छिद्रं अन्विष् 4 P; मिथ्या विवद् 1 A; मिथ्या अभियुज् 7 A, 10. –*s.* विवादः, वाग्युद्धं, मिथ्याविवादः, विप्रतिपत्ति *f.*; मिथ्याभियोगः. –LER, *s.* विवादशीलः. –LING, *a.* अपवादक, दोषग्राहिन् (णी *f.*), छिद्रान्वेषिन्.

CAVITY, *s.* रंध्रं, छिद्रं, विवरं, बिलं, खातं. 2 पुटः-टं; खं; 'c. of hands' अंजलिपुटः.

CEASE, *v. i.* विरम् 1 P, निवृत् 1 A, विश्रम् 4 P, (with abl.); शम् 4 P, प्र-उप°; 'this said, he c. ed' इत्युक्त्वोपशशाम; 'c. ed to be opulent' निर्धनोभूत्; 'c. to exist' लयं-क्षयं-गम् 1 P, नश् 4 P. 3 गम्, वि-अप-निर्-°, अपया 2 P. –*v. t.* (c.) of roots above. –ING, –CESSATION, *s.* विरामः, उप-प्र-शमः, निवृत्ति *f.*, विरति *f.*, विच्छेदः. –LESS, *a.* अनवरत, निरंतर, सतत, नित्य; अविच्छिन्न. –LESSLY, *adv.* निरंतरं, अनवरतं, नित्यं, &c.

CECITY, *s.* अंधता, तिमिरं.

CEDAR, *s.* देवदारुः.

CEDE, *v. t.* उत्सृज् 6 P, दा 3 U, वितृ 1 P, परित्यज् 1 P. 2 अभ्युपगम् 1 P, वशं या 2 P. –CESSION, *s.* प्रदानं, वितरणं, विसर्जनं.

CEILING, *s.* वितानं, अंतःपटलं, पटलं, अंतश्छादनं.

CELEBRATE, *v. t.* प्रशंस् 1 P, उपगै 1 P, स्तु 2 U, कृत् 10, प्रथ् 10, प्रख्या c. (ख्यापयति), वर्ण् 10. 2 (As a ceremony) यथाविधि अनुष्ठा 1 P; पा c. (पालयति), आचर् 1 P, अभिनंद् c. (महोत्सवेन मज्जन्माभिनंदितवान् Ka. 137); निर्वृत् c. (प्रस्थानकौतुकं निर्वर्तयितुं S. 4), निर्वह् c.'–ED, *a.* प्रथित, वि-प्रख्यात, प्रसिद्ध, विश्रुत; लब्धवर्ण. 2 अनुष्ठित; 'c. in song' उपगीत. –ION, *s.* अनुष्ठानं, पालनं, &c. 2 स्तुति *f.*, वर्णनं, कीर्तनं, प्रशंसा. –CELEBRITY, *s.* यशस् *n.*; कीर्ति-ख्याति-विश्रुति-प्रसिद्धि *f.*, प्रतिष्ठा.

CELERITY, *s.* वेगः, जवः, त्वरा.

CELESTIAL, *a.* दिव्य, अमर्त्य, स्वर्गीय, दिविज; 'c. world' स्वर्लोकः, द्यो *f.*; 'c. damsel' अप्सरस् *f.* 2 (fig.) परम, उत्कृष्ट.

CELIBACY, *s.* अनुद्वाहः, अदारपरिग्रहः, अविवाहः; 'he led a life of c.' अकृतदारः स आयुरत्यवाहयत्.

CELL, *s.* बिलं, रंध्रं, छिद्रं. 2 कुटी, कक्षः-क्षा, कुटीरः. 3 मठः, आश्रमः. –CELLULAR, *a.* सूक्ष्मरंध्रपूर्ण.

CELLAR, *s.* भूमिगृहं, गुप्ति *f.*

CELSITUDE, *s.* *See* HEIGHT.

CEMENT, *s.* लेपः, सुधा. 2 बंधनं, दृढीकरणं, संधिः. –*v. t.* संश्लिष् c., संधा 3 U, संयुज् 10. –ATION, *s.* संयोगः, संश्लेषः, संधानं.

CEMETERY, *s.* श्मशानं, परेतभूमि *f.*, पितृकाननं-वनं, प्रेतावासः.

CENOTAPH, *s.* चैत्यं.

CENSER, *s.* धूपपात्रं-भाजनं.

CENSOR, *s.* गुणदोषविवेचकः, पापापापनिर्णेतृ *m.* 2 दंडप्रणेतृ *m.*, नीतिशास्तृ *m.* –CENSORIOUS, *a.* दोषैकदृश्, अपवादक, निंदक; दोषदर्शिन् (नी *f.*), निंदाशील. –LY, *adv.* सापवादं, निंदापूर्वकं. –NESS, *s.* निंदा, छिद्रान्वेषिता, अपवादप्रियता.

CENSURE, *v. t.* निंद् 1 P, उपालभ् 1 A, निर्भर्त्स् 10 A, गर्ह् 1, 10 A, परि-अप-वद् 1 U, धिक्कृ 8 U,

तिरस्कृ, दुष् c. (दूषयति), आ-अधि-क्षिप् 6 P; कुत्स् 10. –*s.* निंदा, उपालंभः, निर्भर्त्सना, गर्हणं, निर्वादः, वाच्यता, वचनीयता, अप-परी-वादः, आक्षेपः. –ABLE, *a.* निंद्य, उपालभ्य, गर्हणीय, वाच्य, &c. –ER, *s.* निंदकः, उपालंभकः, अप-परि-वादकः, आक्षेपकः.

CENT, *s.* शतं; '3 per c.' त्रिकं शतं; पंचकं शतं वृद्धिर्देया 'interest at 5 per c.' –CENTENARIAN, *s.* शतायुस् *m.* –CENTENARY, *s.* शतकं, शतं. –*a.* शतक, शत्य. –CENTENNIAL, *a.* शताब्द, शतवर्ष. –CENTESIMAL, *a.* शततम (मी *f.*). –CENTIPEDE, *s.* शतपदी, कर्णजलौकस्. –CENTUPLE, *s.* शतगुणः. –CENTUPLICATE, *v. t.* शतगुणीकृ 8 U. –CENTURY, *s.* वर्षशतं, शतवर्षं. 2 शतं, शतकं. –CENTURIAN, *s.* योधशताधीशः.

CENTRE, *s.* मध्यः-ध्यं, मध्यभागः. 2 उदरं, गर्भः. 3 केंद्रं.–*v. t.* एकत्र कृ 8 U, समाहृ 1 P. –*v. i.* संमिल् 6 P, सं-इ 2 P, एकत्र समागम् 1 P, एकीभू; 'all eyes were c. ed on him' नेत्रव्रजास्तस्मिन्निपेतुः (R. VI. 7); त्वयि तु परिसमाप्तं बंधुकृत्यं प्रजानाम् (S. 5); 'is c. ed in you' &c. 2 आश्रि 1 U, आ-अव-लंब् 1 A. –CENTRAL, –CENTRICAL, *a.* मध्य, मध्यम, मध्यस्थ, मध्यगत, मध्यवर्तिन् (नी *f.*). –LY, *adv.* मध्ये, मध्यस्थाने.

CEPHALAGY, *s.* शिरोवेदना.

CERATED, *a.* सिक्थलिप्त,-सिक्थमय (यी *f.*).

CEREBRUM, *s.* मस्तिष्कं, गोर्दं. –CEREBRAL, *a.* मस्तिष्कसंबंधिन् (नी *f.*).

CERECLOTH, CEREMENT, *s.* सिक्थाक्तं वस्त्रं.

CEREMONY, *s.* विधिः, संस्कारः; 'marriage c.' परिणयविधिः. 2 नियमः, आह्निकाचारः, नित्यकर्मन् *n.*, नित्यकृत्यं; 'c. es of religion' वर्णाश्रमधर्मः (as opposed to शाश्वतधर्मः); 'occasional c.' नैमित्तिकं कर्म. 3 शिष्टाचारः, सभ्याचारविधिः. –AL, *a.* वैधिक-नैयमिक-व्यावहारिक (की *f.*). –*s.* व्यवहारः, आचारः, विधिः, नियमः &c.; 'sacrificial c.' यज्ञकर्म; इष्टि *f.* –OUS, *a.* अतिसभ्य, अत्यादरयुक्त, अत्यादृत, अत्यनुनयिन् (नी *f.*).–OUSLY, *adv.* परमादरेण, अतिप्रश्रयेण, सप्रश्रयं, सादरं. –OUSNESS, *s.* अत्यादरः, अतिसौजन्यं, अतिप्रश्रयः.

CERTAIN, *a.* Ex. by चित्-चन & अपि with forms of किं. 2 निश्चित, ध्रुव, असंदिग्ध, असंशय, निःसंशय; अवश्य, नियत; 'I feel c.' इति मे निश्चयः, दृढं मन्ये, 'it is c.' नात्र संशयः, नूनं, खलु. 3 अमोघ, अनिष्फल, अवंध्य. 4 सविशेष, विशिष्ट. –LY, *adv.* (for c.) नियतं, ध्रुवं, खलु, असंशयं, नूनं, नाम; 'oh c.' (as a reply), अथ किं, कः संदेहः, कोऽत्र संशयः. –NESS, –TY, –CERTITUDE, *s.* ध्रुवत्वं, ध्रुवं, निश्चयः, असंशयः, निर्णयः, नियमः; 'leaves c. es' ध्रुवाणि परित्यजति.

CERTIFY, *v. t.* विज्ञा c. (ज्ञापयति). 2 प्रमाणीकृ 8 U, सप्रमाणं कथ् 10; दृढीकृ. –CERTIFICATE, *s.* प्रमाण-निर्णय-पत्रं, आगमः, आगमपत्रं, निदर्शनपत्रं.

CERULEAN, *a.* नील, आकाशवर्ण.

CERUMEN, *s.* कर्णमलं, तोक्मं.

CESS, *s.* करः, शुल्कं, राजस्वं. –*v. t.* राजस्वं दा c. or ग्रह् 9 P.

CHAFE, *v. i.* प्रकुप्-क्रुध्-रुष् 4 P, संतप् pass., क्षोभं या 2 P, क्षुभ् 4 P, 1 A. –*v. t.* बाध् 1 A, प्रकुप् c., संतप् c., क्षुभ् c. 2 निर्घृष् 1 P, घर्षणेन तप् c. –*s.* रोषः, मन्युः, क्षोभः, प्रकोपः.

CHAFF, *s.* तुषः, बुष-सं, कडंगरः. –LESS, *a.* निस्तुष. –Y, *a.* बुसमय (यी *f.*).

CHAFFER, *v. i.* पण् 1 A, क्रयविक्रयं कृ 8 U, व्यवहृ 1 P.

CHAGRIN, *v. t.* उद्विज् c., संतप् c., क्लिश् 9 P, व्यथ् c. (व्यथयति). –*s.* मन्युः, व्यथा, संतापः, क्लेशः.

CHAIN, *s.* शृंखला-लं, निगडः, बंधनं (lit. and fig.); 'a golden c.' कनकसूत्रं. 2 परंपरा, पंक्ति *f.*, श्रेणी, माला; 'c. work' शृंखलारूपं विरलकर्म. –*v. t.* निगडेन-शृंखलया-बंध् 9 P, निगडयति (D.). –ED, *a.* निगडित, शृंखलानिबद्ध, संयत, संदानित.

CHAIR, *s.* विष्टरः, आसनं, पीठं; 'arm c.' आसंदी. –MAN, *s.* अध्यक्षः, सभापतिः, नायकः.

CHAISE, *s.* रथः, यानं, वाहनं.

CHALDRON, *s.* *See* CALDRON.

CHALICE, *s.* पात्रं, भाजनं, शरावः, कंसः.

CHALK, *s.* कठिनी, खटि(डि)का, शुक्लशिला-धातुः, सितोपलः; 'red c.' गैरेयं, शिलाजतु *n.* –*v. t.* (out) निर्दिश् 6 P, प्रकॢप् c., चिंत् 10, निरूप् 10. 2 (lit.) कठिनीखंडेन लिख् 6 P.

CHALLENGE, *v. t.* धृष् 5 P, आह्वे 1 A, युद्धार्थं आकृ c., प्रत्यर्थ् 10 A, स्पर्ध् 1 A. 2 अभियुज् 7 A, 10, दोषं ग्रह् 9 P; निषिध् 1 P. –*s.* आह्वानं, समराह्वानं, अभिग्रहः. –ER, *s.* समाह्वातृ *m.*, अभियोक्तृ *m.*

CHALYBEATE, *a.* लोहसंसृष्ट, अयोगुणविशिष्ट.

CHAMBER, *s.* कोष्ठः, शाला, आगारं, आवासः, कक्षः, वेश्मन् *n.*; 'bed-c.' शय्यावेश्म, शयनागारं, वासगृहं; 'inner c.' कक्षांतरं, उपरोधकं; 'upper c.' चंद्रशाला, शिरोगृहं. –LAIN, *s.* कंचुकिन् *m.*; शयनाधिकृतः, अंतःपुरवर्तिन् *m.*, महत्तरः; 'female c.' महत्तरिका. –MAID, *s.* शयनपरिचारिका, अंतःपुरदासी.

CHAMELEON, *s.* कृकलासः, सरटः.

CHAMOIS, *s.* वातप्रमीः.

CHAMP, *v. t.* चर्व् 1 P, परि-सं-दंश् 1 P.

CHAMPION, *s.* योधः, वीरः, विक्रांतः, भटः. 2 रक्षकः, रक्षितृ *m.*, गोप्तृ *m.*

CHANCE, *s.* दैवं, दैवयोगः-घटना-गति *f.* 2 संशयः, संदेहपदं-वस्तु *n.*; 'try your c.' आत्मनो दैवपरी-

क्षणं कुरु; 'to try the c. of a battle' रणसंशये आत्मानं पातयितुं; 'birth in a noble family is the work of c.' दैवायत्तं कुले जन्म (Ve. 3); 'depend on c.' दैवपरः, यदृच्छिक्यः; 'by c.' दैवात्, दैववशात्-योगात्, अकस्मात्, असमर्थितं. 3 संभवः. 4 अवसरः, अवकाशः. -v. i. दैवात्-अकस्मात्-आपत् 1 P or समापद् 4 A or उपस्था 1 U or वृत् 1 A; oft. ex. by यदृच्छया, दैवात्, with verbs; 'c. ed to see two Kinnaras' किन्नरमिथुनं यदृच्छयाद्राक्षीत् (Ka. 119); 'I c. ed to see her' सा दैवान्मम लोचनपथं याता; 'whom I c. ed to see' समापत्तिदृष्टः.

CHANCELLOR, s. प्रधानधर्माधिकारिन् m., अध्यक्षः.

CHANDELIER, s. दीपवृक्षः, दीपाधारः.

CHANDLER, s. वार्तावहः, वि(वै)वधिकः.

CHANGE, s. परि(री)वर्तः, परिवर्तनं, परिवृत्ति f., विपर्ययः, (प्रवहणविपर्ययः); विकारः, विकृति f., विक्रिया (of feelings &c.); 'oh, what a c. in the site of the ground' अहो अनवस्थितो भूसंनिवेशः (U. 2); विपरिणामः, विपर्यासः, विवर्तः. 2 अल्पार्घमुद्रा. 3 श्रेष्ठिचत्वरं. 4 विभेदः, वैचित्र्यं. 5 निवर्तनं. -v. i. परिवृत् 1 A; 'in this c. ing world' परिवर्तिनि संसारे; अन्यथा-अन्यरूप a. भू, अंतर affixed to nouns; 'the colour of the water c. ed in a moment' जलं क्षणेनैव वर्णांतरमुपागमत्; विपर्यासं या 2 P, विपर्यस् 4 P, विकृ pass. or विकारं या. -v. t. परिवृत् c., विकृ 8 U; 'nature can't be c. ed' स्वभावो दुरतिक्रमः; विपर्यस् c., अन्यथाकृ; oft. ex. by (s.) with कृ, or अन्य-भिन्न a. कृ. 2 विनि-नि-मे 1 A, प्रतिदा 1 P, 3 U; 'to be c. ed into' ex. by भावेन परिणम् 1 U, भावमापद् 4 A; 'milk is c. ed into curds' क्षीरं दधिभावेन परिणमते (S. B. 475); न हि वायुर्दधिभावमापद्यते (S. B. 476); 'he has c. ed his evil course of life' पापाचरणान्निवृत्तोसौ; 'c. ing his clothes' वेषपरिवर्तनं विधाय. -ABLE, -FUL, a. लोल, चपल, अधीर, अस्थिर; नैकभावाश्रय, अनित्य, चल, अस्थायिन् (नी f.). -LING, s. कृत्रिमपुत्रः, पुत्रप्रतिनिधिः.

CHANNEL, s. स्रोतस् n. 2 प्रणाली, कुल्या, खातं. 3 नदीपात्रं-गर्भः. 4 संकटं; संकट-संकीर्ण-पथः. -v. i. खन् 1 P, कुल्याः कृ 8 U.

CHANT, v. t. गै 1 P, पठ् 1 P. -s. गीतिं, गानं, स्तोत्रं. -ER, s. गातृ m., गायकः.

CHANTICLEER, s. कृकवाकुः, उषाकलः, ताम्रचूडः.

CHAOS, s. संकरः, संकुलं, संकीर्णता, व्यस्तता. -CHAOTIC, a. संकीर्ण, संकुल, अस्तव्यस्त.

CHAP, s. बटुः, माणवकः. 2 गर्तः, छिद्रं, रंध्रं; 'c. s' आस्यं, वदनं. -v. i. (शीतवशात्) विभिद् pass., त्रुट् 4, 6 P, विद् pass., स्फुट् 6 P.

CHAPE, s. बंधनी, ग्रहणी.

CHAPEL, s. देवायतनं, देवालयं.

CHAPLAIN, s. पुरोहितः; कुलगुरुः, कुलाचार्यः.

CHAPLET, s. See GARLAND.

CHAPTER, s. अध्यायः; परिच्छेदः, स्कंधः, उल्लासः, उच्छ्वासः, प्रकरणं (of various compositions).

CHAR, v. t. अंगारीकृ 8 U, ईषद् दह् 1 P. 2 Do, q. v.

CHAR-WOMAN, s. दिनिकाचेटी, सैरंध्री.

CHARACTER, s. अक्षरं, वर्णः. 2 निसर्गः, प्रकृति f., स्वभावः. 3 शीलं, चारित्र्यं, सौजन्यं. 4 कीर्ति f., यशस् n., गौरवं; 'he obtained the c. of a dull boy' मंदमतिरसाविति स विख्यातो बभूव. 5 रूपं, लक्षणं, चिह्नं, अभिज्ञानं; 'assuming the c. of an astrologer' कार्तांतिको नाम भूत्वा. 6 गुणः, विशेषः. 7 भूमिका; 'chief c.' प्रधानपुरुषः, नायकः. -ISTIC, s. स्वभावः, लक्षणं, चिह्नं, विशेषः, विशेषणं, विशिष्टलिंगं. -a. स्वभावानुरूप, स्वाभाविक (की f.). -IZE, v. t. विशिष् c., संलक्ष् 10; विशेषणं दा 3 U. 2 गुणदोषविवेचनं कृ 8 U.

CHARADE, s. सर्वतोभद्रः.

CHARCOAL, s. अंगारः-रं, दग्धकाष्ठं.

CHARGE, v. t. अवस्कंद् 1 P, अभिद्रु 1 P; See ATTACK. 2 Accuse, q. v. 3 आदिश् 6 P, शास् 2 P, आज्ञा c. (आज्ञापयति). 4 मूल्यं प्रार्थ् 10 A; 'you will be c. ed 8 Rupees' अष्टरूपकं त्वया देयं भविष्यति. 5 निक्षिप् 6 P, सम्-ऋ c. (अर्पयति), न्यस् 4 P; नियुज् 7 A, 10; योग्यसचिवे न्यस्तः समस्तो भरः (Rat. 1) 'a competent minister is c. ed with the whole responsibility.' 6 भारं न्यस् or निविश् c.; 'c. ed with water' जलपूर्णःगर्भः (मेघः). -s. निक्षेपः, न्यासः; 'give in c. of' हस्ते निक्षिप्; सम्-ऋ c.; अयं जनः कस्य हस्ते समर्पितः, एषा हस्ते वां निक्षेपः (S. 4); इमां देवीहस्ते निक्षिपता (Rat. 1). 2 रक्षणं, अवेक्षा, गुप्ति f. 3 आदेशः, आज्ञा, शासनं. 4 नियोगः, अधिकारः. 5 अभियोगः, मिथ्यादोषः, दोषारोपः; 'lays a crime to one's c.' कस्मिन्नपि दोषमारोपयति. 6 अवस्कंदः, आक्रमः, संघट्टः, अभिसंपातः. 7 भारः. 8 व्ययः. 9 मूल्यं, अर्घः. -ER, s. युद्धाश्वः, वारकीरः. 2 पात्रं, भाजनं.

CHARIOT, s. रथः, स्यंदनः. -EER, s. सारथिः, सूतः, सव्येष्ट m., नि-,यंतृ m.

CHARITY, s. भूतानुकंपा, दीनवत्सलता, दयालुत्वं, कृपा. 2 दानं, भिक्षादानं, त्यागः; 'out of c.' पुण्यार्थं. -ABLE, a. दीनवत्सल, दानशील, धर्मात्मन्, दरिद्रपालक. 2 सदय, कृपालु, दयार्द्र, अनुकंपारत. 3 अनसूयक

परदोषसहन. -ABLY, *adv.* सदयं, सानुकंपं; अनसूयया, अमत्सरं.

CHARLATAN, *s.* छद्मवैद्यः, मिथ्याचिकित्सकः. 2 छद्मिन् *m.*, मायिन्-कपटिन् *m.*, छाद्मिकः. -ICAL, *a.* दांभिक-छाद्मिक (की *f.*). -RY, *s.* मिथ्याचिकित्सा; छलं, छद्मन् *n.*, माया, वंचनं.

CHARM, *s.* गारुडं, मंत्रः. 2 रक्षाकरंडः. 3 मनोरमत्वं, चित्ताकर्षकत्वं, रामणीयकं, मनोज्ञता, शोभा, कांति *f.*, श्रीः. 3 प्र-वि-लोभनं. -*v. t.* मंत्रैर्वशीकृ 8 U, अभिचर् c. 2 परि-वि-मुह् c., हृ 1 P; ‘I was c. ed by the melody of thy song’ तव गीतरागेण हृतोस्मि (S. 1). -ER, *s.* गारुडिकः, जांगुलिकः. 2 मायिन् *m.*, मोहिन् *m.*, कुहककारः. 3 प्रिया, मुग्धा (of women). -ING, *a.* रमणीय, रम्य, मनोरम, सुभग, कमनीय, चेतोहर, कांत, हारिन्. -INGLY, *adv.* मनोरमं, सुभगं, चारुतया.

CHART, *s.* वेलापटः.

CHARTER, *s.* शासनपत्रं.

CHARY, *a.* परिमित, सावधान, असुक्तहस्त.

CHASE, *v. t.* अनुधाव्-अनुसृ-अनुगम् 1 P, मृग् 10 A. 2 (away) निरस् 4 P, अपानुद् 6 P, विधू 5, 9 U, निराकृ 8 U, विद्रु c. -*s.* मृगया, आखेटः. 2 अनुसरणं, अनुधावनं; ‘gave c.’ अन्वसरत्. 3 जांगलं. -ER, *s.* अनुधावकः, मृगयुः.

CHASM, *s.* रंध्रं, विलं, विवरं, दरी, गर्तः.

CHASTE, *a.* (Of a woman) सती, कुलवधूः, कुलस्त्री, अपांसुला, पतिव्रता, विशुद्धशीला, एकपत्नी. 2 विशुद्ध, निर्मल. 3 जितेंद्रिय, निष्काम, अव्यभिचारिन् (णी *f.*). -CHASTITY, *s.* सतीत्वं, चारित्र्यं, पातिव्रत्यं. 2 विशुद्धि *f.*, शुचिता. 3 इंद्रियनिग्रहः, ब्रह्मचर्यं, जितेंद्रियत्वं.

CHASTISE, CHASTEN, *v. t.* दंड् 10, अनुशास् 2 P. -ER, *s.* दंडप्रणेतृ *m.*, शास्तृ *m.* -MENT, *s.* शासनं, निग्रहः, दंडः.

CHAT, *v. t.* विश्रब्धं आलप् 1 P or संभाष् 1 A or संलप्; वृथाकथां कृ 8 U. -*s.* संलापः, संकथा, संभाषणं, विश्रंभालापः, वृथाकथा.

CHATTELS, *s.* अस्थावरद्रव्यं, विभवः.

CHATTER, *s.* किलकिलारावः. 2 विप्रलापः, जल्पितं, वृथालापः, प्रजल्पः. -*v. i.* प्रजल्प्-प्रलप् 1 P. 2 किलकिलरवं कृ 8 U, कूज् 1 P; ‘with c. ing teeth’ दंतैर्दंतान्निष्पीड्य, दंतवीणां वादयन्. -ER, *s.* जल्पकः, वाचालः, वावदूकः.

CHAW, *v. t.* चर्व् 1 P, परि-सं-दंश् 1 P.

CHEAP, *a.* अल्पमूल्य, अल्पार्घ, सुलभ, सुखक्रेय. -EN, *v. t.* मूल्यं-अर्घं-न्यूनीकृ 8 U or अल्पीकृ; अर्घतः पत् c. -LY, *adv.* अल्पीयसा मूल्येन, अल्पार्घेण, सुलभं.

CHEAT, *v. t.* वंच् 10, प्रतृ c., विप्रलभ् 1 A, अति-अभि-संधा 3 U; छल् 10, शठ् 10, मुह् c. -*s.* वंचनं, कपटं, प्रतारणं, कैतवं, माया, भ्रमः, मोहः. 2 वंचकः, धूर्तः, प्रतारकः, कितवः, कपटिन् *m.* -ING, *s.* प्रतारणं, अतिसंधानं, वंचनं, &c.

CHECK, *v. t.* नि-सं-यम् 1 P, प्रतिबंध् 9 P, प्रतिहन् 2 P, वार् 10; निग्रह् 9 P, निरुध् 7 U, नि-प्रति-षिध् 1 P, विष्टंभ् 9 P. -*s.* प्रतिबंधः, प्रत्यूहः; संरोधः, प्रतिषेधः, निग्रहः, संयमः, निवारणं, निरोधः.

CHEEK, *s.* कपोलः, गंडः, गल्लः, करटः (of elephants); ‘broad c. s’ गंडभित्ती; मांसलकपोलौ; ‘c. bone’ कपोलफलकः.

CHEER, *s.* हर्ष-(द्योतक)निस्वनः, जयध्वनिः-शब्दः. 2 स्थैर्यं, धैर्यं, स्थिरता; ‘be of good c.’ or ‘c. up’ समाश्वसिहि, धैर्यं निधेहि हृदये. 3 आहारः, भोजनं. -*v.t.* आ-समा-श्वस् c. सांत्व् 10. 2 प्रहृष् c., मुदा उल्लस् c., आनंद् c. 3 प्रोत्सह् c., प्रेर् c. 4 प्रसद् c., स्थिरीकृ 8 U (भवतीभ्यामेव स्थिरीकर्तव्या शकुंतला S. 4). -*v. i.* (up) आ-समा-श्वस् 2 P; हृष् 4 P. -FUL, *a.* सहर्ष, प्रफुल्ल, सानंद, हृष्ट, प्रसन्न, आनंदित, उल्लासित. -FULNESS, *s.* प्रसन्नता, प्रसादः, उल्लासः, हर्षः, आनंदः, आह्लादः, प्रमोदः. -LESS, *a.* विषण्ण, निरानंद.

CHEESE, *s.* किलाटः, दधिजं, मथजं; ‘c. curds’ दधि *n.*, क्षीरजं. -MONGER, *s.* दधिजविक्रयिन् *m.*

CHEMISTRY, *s.* रसक्रिया, रसतंत्रं-विद्या. -CHEMIST, *s.* रसज्ञः, रसतंत्रविद् *m.*

CHEQUER, *v. t.* चित्र् 10, कर्बुरीकृ 8 U, शबलीकृ. -ED, *a.* कर्बुरित, शबल, कल्माष, चित्र.

CHERISH, *v.t.* लल् 10, पुष् 1,4,9 P, पा c. (पालयति), संवृध् c., भृ 3 U. 2 धृ 10, बंध् 9 P; ‘c. ed hatred towards him’ तस्मिन् द्वेषं बबंध. 3 भज् 1 U, उपास् 2 A, निविश् c.; ध्यै 1 P; ‘c. ing Hari in his heart’ हरिं मनसा ध्यायन्. 4 Love, q. v; ‘c. those (hearts) that hate thee’ विद्विषोप्यनुनय (Bh. I. 77). -ER, *s.* पोषकः, संवर्धकः, पालकः.

CHERUB, *s.* स्वर्ग-दिव्य-दूतः. -IC, *a.* दिव्य.

CHESS, *s.* चतुरंगं; ‘c. board’ अष्टापदं, शारिफलं; ‘c. man’ शारः, शारिः.

CHEST, *s.* *See* BREAST.

CHEVALIER, *s.* सादिन् *m.*, अश्वारोहः, महावीरः.

CHEW, *v. t.* चर्व् 1 P, संदंश् 1 P; ‘c. the cud’ रोमंथं अभ्यस् 4 P, रोमंथायते (D.). -ING, *s.* रोमंथः, चर्वणं.

CHICANE, *s.* कपटं, छलं, व्यपदेशः, मिथ्यापत्ति *f.* -ER, *s.* मिथ्याविवादिन् *m.* -ERY, *s.* वाक्छलं, मिथ्यावादः, पक्षाभासः; अनृतवाच् *f.*

CHICKEN, *s.* कुक्कुटशावः; ‘c. hearted’ भीरु, कातर.

CHICK-PEAS, *s.* चणकः.

CHIDE, *v. t.* निर्भर्त्स् 10 A, तर्ज् 10 A, निष्ठुरमभिधा 3 U. 2 निंद् 1 P; अधिक्षिप् 6 P; *See* CENSURE.

—*v. i.* उत्क्रुश् 1 P; विवद् 1 A, विप्रवद् 1 U, कलहं कृ 8 U. —ER, *s.* निंदकः.

CHIEF, *a.* प्रधान, अग्रिम, मुख्य, परम, उत्तम, प्रमुख, अग्र्य, विशिष्ट; वर-पुंगव-इंद्र-ऋषभ-in comp. —*s.* प्रधानपुरुषः, अधिपतिः, नायकः, ईशः, अग्रिमः, ईश्वरः, पुरोगः, अध्यक्षः, अधिष्ठातृ *m.*, मुखरः; 'military c.' सेनापतिः, सेनाध्यक्षः, चमूपतिः. —LY, *adv.* प्रधानतः, विशेषेण-षतः, मुख्यशः-तः. —TAIN, *s.* मुखरः, नायकः, पतिः, ईश्वरः. 2 गणपतिः, सामंतः.

CHILBLAIN, *s.* पादस्फोटः, क्षतं.

DETERMINE, *v. t.* निश्चि 5 U, स्था c. (स्थापयति), संक्लृप् c., निरूप् 10, निर्णी 1 P, निर्-अव-धृ 10, निर्दिश् 6 P, लक्ष् 10, परिच्छिद् 7 P. 2 निरूप्, अनुसंधा 3 U, निर्णी (a dispute &c.). -*v. i.* व्यव-अव-सो 4 P, निश्चयं कृ 8 U; 'd. ed to go' गमने कृतसंकल्प, गंतुं व्यवसित. -ATE, *a.* स्थिर, दृढ, निर्धारित, निश्चित, निर्णीत, नियत, सिद्ध, व्यवस्थित. 2 निश्चायक, निर्णायक. 3 (of persons) कृतनिश्चय, दृढसंकल्प, व्यवसित. -ATELY, *adv.* सनिश्चयं, सनिर्णयं, नूनं. -ATION, *s.* निश्चयः, निर्णयः, संकल्पः, निर्धारणं, व्यवसायः, विचारः, निरूपणं, परिच्छेदः, अवधारणं-णा. 2 अभिनिवेशः, अध्यवसायः, निर्बंधः. -ATIVE, *a.* निर्णायक, निर्धारक. -ED, *a.* निश्चित, निर्णीत, सिद्ध, नियत, व्यवस्थित, परिच्छिन्न, अवधारित. 2 (of persons) स्थिरनिश्चय, दृढ-कृत-संकल्प, अभिनिविष्ट, कृतनिश्चय. -EDLY, *adv.* स्थिरचेतसा, दृढं, दृढनिश्चयेन. -ER, *s.* निर्णयकृत् *m.*, निर्णेतृ *m.*

DETEST, *v. t.* विद्विष् 2 U, गर्ह् 1, 10 A, गुप् desid. (जुगुप्सते) (with abl.); *See* ABHOR. -ABLE, *a.* जुगुप्सित, गर्हित, निंद्य, गर्हणीय, विद्वेष्य. -ATION, *s.* गर्हा, जुगुप्सा, घृणा, विद्वेषः. -ER, *s.* द्वेषिन् *m.*, विद्वेष्टृ *m.*

DETHRONE, *v. t.* राज्याद् भ्रंश् c. or च्यु c. or अवपत् c. or अवरुह् c. (रोपयति). -MENT, *s.* राज्यभ्रंशः-च्युति *f.*

DETONATE, *v. i.* सहसा स्तन् 1P or ध्वन् 1 P. -ION, *s.* स्तनितं, आकस्मिकध्वनिः.

DETORT, *See* PERVERT.

DETRACT, *v.* अपकृष्-अपनी 1 P. 2 अपलप् 1 P, अपवद्-भाष्-1 A, अधिक्षिप् 6 P, निंद् 1 P, असूयति (D.) (with dat.); मूल्यं न्यूनीकृ 8 U; लघूकृ; *See* DEPRECIATE. -ION, *s.* अपकर्षः, लघूकरणं, ह्रासः. 2 असूया, अप-परि-वादः, आक्षेपः, गुणनिंदा, पैशून्यं, परदोषाविष्करणं, मात्सर्यं. -OR, *s.* अपवादकः, अधिक्षेपकः, निंदकः, असूयकः, परिवादरतः. -ORY, *a.* अपवादिन्, निंदक, अभ्यसूयक; पिशुन.

DETRIMENT, *s.* हानि *f.*, अपकारः, क्षति *f.*, नाशः, अपायः, बाधा, विरोधः. -AL, *a.* हानिकर (री *f.*), विरोधिन्, अपायकारक.

DETRUDE, *v. t.* अवपत् c., अधः क्षिप् 6 P, भ्रंश् c. -DETRUSION, *s.* अवपातनं.

DETRUNCATE, *v. t.* अवच्छिद् 7 P, निकृत् 6 P, वि-लू 9 U. -ION, *s.* अवच्छेदः, निकर्तनं.

DEUCE, *s.* द्वयं, द्विकं. 2 पिशाचः, भूतः.

DEVASTATE, *v. t.* उच्छिद् 7 P, उत्-अव-सद् c.; उपपीड् 10, वि-उप-द्रु 1 A, प्रबाध् 1 A, निर्जनीकृ 8 U. -ION, *s.* उच्छेदः, उपद्रवः, प्रबाधनं, विनाशः, निर्जनीकरणं.

DEVELOP, *v. t.* पुष् 1, 4, 9 P, प्र-उप-चि 5 U, प्र-सं-वृध् c. ; 'she d. ed her lovely limbs' पुपोष लावण्यमयान् विशेषान् (K. I. 25); also प्रचीयमानावयवा (R. III. 7), उपचितांगी. 2 विकस् c., विस्तॄ c., उद्भिद् c.; तस्य (कार्योपक्षेपस्य) विस्तारमिच्छन् (Mu. 4) 'wishing to d. it'. -*v. i.* प्र-उप-चि pass., उद्भिद् pass., क्रमशः विकस् 1 P, क्रमेण प्र-सं-वृध् 1 A. -MENT, *s.* प्रचयः, उपचयः, संवर्धनं; विस्तारः, विकासः, उद्भेदः.

DEVERGENCE, *See* DIVERGENCE.

DEVIATE, *v. i.* अति-व्यति-इ 2 P, अतिक्रम् 1 U, 4 P, अति-व्यभि-चर् 1 P; 'did not d. even an inch from the beaten path' क्षुण्णाद्वर्त्मनो रेखामात्रमपि न व्यतीयुः (R. I. 17); अप-या-इ 2P, चल् 1 P, प्र-वि-°; च्यु 1 A, भ्रंश् 4 P, 1 A, (with abl.). -ION, *s.* अतिक्रमः, विचलनं, च्युति *f.*, भ्रेषः, भ्रंशः, व्यभिचारः, त्यागः; 'd. from the right path' उत्पथयानं, विमार्गगमनं.

DEVICE, *s.* उपायः, युक्ति *f.*, प्रयोगः, कल्पना, साधनं. 2 अप-व्यप देशः, छलं, माया, छद्मन् *n.*, कैतवं, व्याजः. 3 लक्षणं, चिह्नं, अंकः. 4 निर्माणशक्ति *f.*, कल्पनाचातुर्यं.

DEVIL, *s.* भूतः, वेतालः, पिशाचः; 'I shall not raise a d. for my own destruction' नाहमात्मविनाशाय वेतालोत्थापनं करिष्यामि.

DEVIOUS, *a.* वक्र, कुटिल, जिह्म. 2 मर्यादातिक्रामिन्, व्यभिचारिन्.

DEVISE, *v.* चिंत् 10, उप-सं-क्लृप् c., निरूप् 10, युज् 7 U, 10, आ-पर्या-लोच् 10, घट् c. 2 इच्छापत्रेण प्रदा 3 U. -*s.* इच्छापत्रेण रिक्थदानं. -ER, *s.* धनाधिका-

रिन् *m.* –ER, *s.* उपायज्ञः, परिकल्पकः, प्रयोजकः.

DEVOID (of), *a. See* DESTITUTE (of).

DEVOIR, *s.* स्वकर्तव्यं, कर्तव्यता, धर्मः. 2 सत्कारः, आदरः, पूजा, संमानः.

DEVOLVE, *v. t.* निक्षिप् 6 P, न्यस् 4 P, संक्रम् c., सम्-ऋ c. (अर्पयति), आरुह् c. (रोपयति) ; 'having d. ed their property upon their sons' पुत्रसंक्रांतलक्ष्मीकाः (U. 1); गुणवत्सुतरोपितश्रियः (R. VIII. 11). 2 प्रपत् c., प्रसृ-प्रवह् c. –*v. i.* आगम् 1 P, आया 2 P, पत् 1 P, संक्रम् 1 U, 4 P; न्यस्-निक्षिप्-सम् c. pass.; 'after his death the kingdom d. ed upon his eldest son' मृते तस्मिंस्तस्य ज्येष्ठपुत्रो राजपदभाग्बभूव. 2 अधः पत् 1 P, अवपत्. –DEVOLUTION, *s.* निक्षेपणं, समर्पणं, संक्रामणं.

DEVOTE, *v. t.* प्र-विनि-युज् 7 A, 10, सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, उत्सृज् 6 P, सं-उप-क्लृप् c. 2 (Oneself to) आसंज्-अनुरंज्-pass., मनः युज् or बंध् 9 P or अभिनिविश् c., आसक्त-अभिनिविष्ट *a.* भू (all with loc.); भज् 1 U, आसेव् 1 A. 3 नाशाय क्लृप् c.; *See* DOOM. –ED, *a.* सक्त, आ-प्र-व्या-सक्त; नि-, रत, अभिनिविष्ट, समाहित, पर-तत्पर-परायण in comp. 2 भक्त, दृढभक्ति, अनुरक्त, अनुरागिन्; 'd. to the king' राजनिष्ठ, नृपासक्तचित्त; 'a d. wife' एकपत्नी, पतिव्रता, साध्वी, सती; 'a d. husband' भार्यानिरतः, पत्नीसेवी; 'a d. friend' स्थिरप्रेम मित्रं, रूढसख्यः सुहृद्. –EDLY, *adv.* चित्तैकाग्रतया, भक्त्या, निष्ठया, अभिनिविष्टं, मनोभिनिवेशेन, मनोयोगेन, सुसमाहितं. –EDNESS, *s.* आसक्ति *f*, भक्ति *f*., अभिनिवेशः, परायणता. –EE, *s.* तापसः, यतिः, योगिन् *m.*, तपस्विन् *m.*, मुनिः, व्रती. 2 भक्तजनः, प्रणयिजनः, उपासकः, भक्तः. –ION, *s.* अभियोगः, अभिनिवेशः, अनुरागः, सेवा, उपासना, प्रसक्ति *f.*, आसक्ति *f.*, भक्तिः, निरति *f.*, परायणता. 2 नियमः, धर्मक्रिया, तपस् *n.* 3 ईश्वरभक्तिः-सेवा; 'self-d.' आत्मोत्सर्गः-परित्यागः; 'd. to a husband' पातिव्रत्यं, पतिसेवा; 'to perform d. s' तपश्चर् 1 P or तप् 4 A, तपस्यति (D.). –IONAL, *a.* धर्मपर, धर्मनिष्ठ, भजनशील. 2 धर्मक्रियाविषयक, तपोमय (यी *f.*).

DEVOUR, *v. t.* भक्ष् 10, अद् 2 P, खाद् 1 P, ग्रस् 1 A, गॄ 6 P. 2 उपयुज् 10, उपयोगेन विनश् c. –ER, *s.* भक्षकः, खादकः.

DEVOUT, *a.* धार्मिक, धर्म-परायणशील, धर्मनिष्ठ, धर्मात्मन्, भक्त, ईश्वरनिरत, पुण्यशील, प्रयतात्मन्, पुण्यात्मन्. –LY, *adv.* भक्त्या, भक्तिपूर्वकं, भक्तिपुरःसरं, श्रद्धान्वितं. –NESS, *s.* धार्मिकता, धर्मात्मता, ईश्वरनिष्ठता, भक्ति *f.*

DEW, *s.* नीहारः, अवश्यायः, तुषारः, प्रालेयं, हिम-रात्रिख-जलं. –*v. t.* नीहारेण सिच् 6 P or प्रोक्ष् 1 P; 'd. drop' तुषारकणः-बिंदुः-शीकरः, and sim. comps. –Y, *a.* तुषारमय (यी *f.*), अवश्यायावसिक्त; तुषारकणोपम.

DEXTEROUS, *a.* कुशल, निपुण, पटु, दक्ष, लघुहस्त, करदक्ष. –LY, *adv.* निपुणं, दक्षतया, सपाटवं, हस्तलाघवेन. –DEXTERITY, *s.* दक्षता, पटुता, नैपुण्यं, हस्तकौशलं, हस्तलाघवं.

DEXTRAL, *a.* दक्षिण, अपसव्य, दक्षिणपार्श्वस्थ.

DIABETES, *s.* मधुमेहः, प्रमेहः, बहुमूत्ररोगः.

DIABOLICAL, *a.* पैशाच (ची *f.*), पिशाचोपम. 2 घोर, दारुण, पापिष्ठ, अतिघोर-पाप, अतिनिंद्य.

DIACOUSTICS, *s.* ध्वनिविद्या.

DIADEM, *s.* मुकुटं, किरीटः-टं, मौलिः, उष्णीषः-षं, शिरोवेष्टनं; 'd. ed' किरीटिन्, किरीटधारिन्.

DIAGNOSIS, *s.* रोगनिर्णयः-निरूपणं, रोगनिदानं; मीमांसा, चिकित्सा.

DIAGNOSTIC, *s.* रोगलक्षणं-चिह्नं.

DIAGONAL, *s.* कर्णः, श्रुति *f.* –LY, *adv.* कोणाकोणि, कर्णाकर्णि.

DIAGRAM, *s.* चित्रं.

DIAL, *s.* शंकुयंत्रं, सूर्यघटी.

DIALECT, *s.* प्राकृतभाषा, भाषा (as opposed to संस्कृत). 2 भाषणं, वचनं, उक्ति *f.*

DIALECTIC, *s.* तर्कः, न्यायः, हेतुविद्या, आन्वीक्षिकी विद्या. –AL, *a.* तार्किक (की *f.*), न्यायिन्. –IAN, *s.* तार्किकः, नैयायिकः, न्यायविद् *m.*

DIALOGUE, *s.* संलापः, संवादः, संकथा, संभाषणं, प्रश्नोत्तरं, कथोपकथनं. –DIALOGIST, *s.* संवादकः, उत्तरप्रत्युत्तरदायकः.

DIAMETER, *s.* व्यासः, विष्कंभः. –DIAMETRICALLY, *adv.* विपरीतं, प्रतिकूलं, अत्यंतं, एकांततः.

DIAMOND, *s.* वज्रः-ज्रं, हीरं, हीरकः ; 'd. cutter' हीरकारः-मार्जकः.

DIAPASON, *s.* स्वराष्टकं, स्वरग्रामः.

DIAPER, *s.* चित्रितं क्षौमं. –*v. t.* क्षौमं चित्र् 10 or कर्बुरीकृ, &c.

DIAPHANIC, *a.* स्वच्छ, विशद; *See* CLEAR.

DIAPHORETIC, *a.* स्वेदन (नी *f.*), स्वेदजनक, घर्मोत्पादक; 'd. medicine' स्वेदनं.

DIAPHRAGM, *s.* शरीरमध्यदेशः.

DIARRHOEA, *a.* अतिसारः, प्रवाहिका; ग्रहणी-, रुज् *f.*

DIARY, *s.* दिनपत्रिका, दैनिकवृत्तपुस्तकं.

DIATRIBE, *s.* अधिक्षेपः, कुत्सात्मको लेखः.

DIBBLE, *s.* लघुखनित्रं.

DICTATE, *v. t.* आज्ञापूर्वकं कथ् 10, आदिश् 6 P, आज्ञा c. (ज्ञापयति). 2 सूच् 10, प्रोत्सह् c., प्रचुद् 10, प्रेर् c. ; 'd. ed by good motives' सदाशयप्रेरित. –*s.* आज्ञा, आदेशः, शासनं. 2 चोदनं-ना, प्रेरणं-णा. –ION, प्रोत्साहनं. 2 आज्ञापनं, आज्ञापूर्वकं कथनं. –OR, *s.* एकाधिपतिः, अनन्याधीनः शास्ता, अ-

नियंत्रणः प्रभुः. 2 आदेशकः, शासितृ *m.* –ORIAL, *a.* अवलिप्त; *See* ARROGANT.

DICTION, *s.* भाषा, वाणी, वाक्सरणि *f.*, वचोविन्यासः.

DICTIONARY, *s.* कोशः-षः, शब्दसंग्रहः, अभिधानं.

DICTUM, *s.* वचनं, आदेशः, विधिः, नियमः.

DIDACTIC,–AL, *a.* उपदेशपर, प्रबोधक.

DIE, *s.* अक्षः, पाशकः, देवनः; 'a loaded d.' कूटाक्षः. —DICE, (pl.) अक्षाः, &c. –*v. i.* अक्षैः दिव् 4 P, ग्लह् 1 P. –ER, *s.* अक्षधूर्तः, अक्षदेविन् *m.*, धूर्तः, कितवः. –ING, *s.* द्यूतं, अक्षक्रीडा; 'd. board' अष्टापदं, शारिफलं; 'd. box' अक्षाधारः; 'the die is cast' कृतं दैवाधीनं (अप्रतिविधेयं) कर्म, अधुना यद्भावि तद्भवतु.

DIE, *v. i.* मृ 6 A, प्राणान्-असून्-जीवितं त्यज् 1 P or उत्सृज् 6 P or हा 3 P, पंचत्वं या 2 P or गम् 1 P, उपरम् 1 P; परासु-गतासु- *a.* भू 1 P, देहं-तनुं त्यज्, प्र-इ 2 P, विपद् 4 A, संस्था 1 A, प्रमी pass. 2 विनश् 4 P, प्रली 4 A, ध्वंस् 1 A, क्षि pass., अवसद् 1 P. 3 म्लै 1 P, विशॄ pass. –DEAD, *a.* मृत, उपरत, संस्थित, प्रेत, परेत, परासु, गतासु, विपन्न, गतप्राण, विचेतन, प्राणहीन, प्रमीत. 2 निश्चल, निश्चेष्ट, जड, निस्तेजस्, निःसत्व, असार, निष्फल. 3 सुप्त, स्तब्ध (as of limbs); 'd. body' शवं, मृतशरीरं; कुणपः; 'd. language' अप्रचलिता भाषा; 'd. sleep' घोर-गाढ-निद्रा; 'd. loss' परिपूर्णा-सकला हानिः; 'd. letter' लुप्तार्थं वचनं; 'd. soul' निरभिमानः आत्मा. –*s.* (Of night) मध्यरात्रः, निशीथः, अर्धरात्रः. 2 मध्यं; *See* DEPTH. –EN, *v. t.* दुर्बलीकृ 8 U, शिथिलीकृ, तेजो हृ 1 P, नश् c., म्लानीकृ. –*v. i.* म्लै 1 P, शिथिलीभू. –LY, *a.* प्राणापहारक, जीवितापह, मारात्मक, निधनकारिन्, प्राणांतक, प्राणहारिन्, प्राणनाशक, जीवितघ्न (घ्नी *f.*). 2 अशाम्य; 'd. enmity' आमरणांतिकं वैरं, अशाम्यं वैरं; 'd. poison' हाला(ल)हलं विषं. –*adv.* मृतवत्; प्राणांतिकं; 'd. wounded' भिन्नमर्मन्; 'd. pale' प्रेतसवर्ण. –NESS, *s.* दौर्बल्यं, निःसत्वता, जडत्वं, स्तंभः; वैकल्यं, विरक्ति *f.*, शिथिलता. —DEATH, *s.* मरणं, मृत्युः, उपरमः, निधनः-नं, अंतः, पंचत्वं-ता, संस्थिति *f.*, कालधर्मः, दिष्टांतः, प्रलयः, अत्ययः, नाशः, प्राणनाशः, तनुत्यागः, &c. 2 यमः, कालः, कृतांतः. 3 वधः, घातः, व्यापादनं; 'he was pelted to d.' सलोष्टघातं हतः; 'he was sentenced to d.' तस्य प्राणदंड आदिष्टः; 'to put to d.' हन् 2 P, व्यापद् c., वधं आदिश् 6 P; 'a violent d.' अपमृत्युः; अपघातः; 'angel of d.' यमदूतः; 'd. by fasting' प्रायः, प्रायोपवेशनं; 'd. bed' मृत्युशय्या. –LESS, *a.* अमर, अनश्वर, अमर्त्य, चिरस्थायिन्.

DIET, *s.* आहारः, अन्नं, भोजनं, भक्ष्यं. 2 पथ्यं, पथ्यान्नं, पथ्याशित्वं. 3 राजसभा, शिष्टसभा. –*v. t.* पुष् c., भृ 3 U. 2 पथ्यं निर्दिश् 6 P.

DIFFER, *v. i.* भिद् pass., प्र-वि-°; विशिष् pass., (न कारणात्स्वाद्बिभिदे कुमारः R. v. 35); gen. ex. by (*s.*); 'they two do not d.' न तयोर्भेदः, विशेषः, &c. 2 अन्यथा मन् 4 A, न संमन्, विवद् 1 A, भिन्नमत *a.* भू, विप्रतिपद् 4 A, (एवं हि विप्रतिपन्नाः प्राणियत्तां प्रति श्रुतयः S. B. 702); 'I d. from you' मम मतं त्वन्मताद्भिन्नं. 3 वि-प्रति-रुध् pass. –ENCE, *s.* भेदः, विशेषः, अंतरं, (with gen.). 2 पार्थक्यं, इतरत्वं, भिन्नत्वं, व्यतिरेकः; 'that makes no d.' तेन न कोपि विशेषो जायते. 3 विरोधः, वैपरीत्यं, विपर्ययः, वैलक्षण्यं. 4 विप्रतिपत्ति *f.*, मतिभेदः, विसंवादः, वैमत्यं; कलिः, कलहः, विवादः. 5 असाम्यं, असादृश्यं; 'd. in quantity' वैषम्यं. –ENT, *a.* भिन्न, वि-प्र-भिन्न, इतर-अन्य-पर-*pron. a.*, व्यतिरिक्त, विपरीत, पृथक्, विशिष्ट, (with abl.); अंतर in comp.; 'she is not d. from my body (myself)' अव्यतिरिक्तेयमस्मच्छरीरात् (Ka. 151); 'a d. sense' अर्थांतरं. 2 असदृश (शी *f.*), असमान, विषम, असम. 3 विविध, नानाप्रकार, नाना in comp.; तत्तत् *pron. a.*, 'd. S'âstras' तानि तानि शास्त्राणि; 'in a d. way' अन्यथा, भिन्नप्रकारेण. –ENTIAL, *a.* भेदकर (रीं *f.*), विशेषक. –ENTLY, *adv.* अन्यथा, इतरथा, भिन्नरूपेण; अन्यप्रकारेण, पृथक्.

DIFFICULT, *a.* असुकर, दुश्चर, कठिन, दुष्कर, दुःसाध्य, कष्ट. 2 गहन, विषम, दुर्बोध, असुगम, कष्टज्ञेय, गूढार्थ, दुर्ज्ञेय. 3 (With inf.) ex. by दुर्, दुःख, कष्ट, in comp.; 'd. to get' दुष्प्राप, दुराप, कष्टसाध्य; दुरारोह, दुःखछेद्य, &c.; 'a d. case' सशल्योर्थः; 'a d. road' दुर्गसंचा(च)रः, संक्रमः; 'a d. place' विषमस्थानं, दुर्गं, दुर्गमस्थलं. –LY, *adv.* दुःखेन, कष्टेन, कृच्छ्रेण, कष्टं, आयासेन, दुर् pr. –Y, *s.* असौकर्यं, वैषम्यं, कठिनता, दुष्करत्वं, कष्टता, दुःसाध्यता. 2 आयासः, वैक्लव्यं, विरोधः. 3 कृच्छ्रं, संकटं, विघ्नः, आयासः, दुर्गं, दुःखं, विरोधः, क्लेशः, बाधा, कष्टः-ष्टं. 4 विषमपदं, असुबोध-दुर्बोधं पदं, असुगमं स्थानं; 'without d.' अनायासेन, सुखं; 'with d.' कथमपि, कथं कथमपि, कथंचित्, दुःखेन, कृच्छ्रेण; 'a commentary explaining the d. es' विषमपदविमर्शिनी टीका; 'beset with d. es' सशल्य, सकंटक; 'overcoming d. es' दुर्गलंघनं.

DIFFIDENCE, *s.* अविश्वासः, अप्रत्ययः, आ-, शंका. 2 (In oneself) अप्रगल्भता, विनयः, ह्रीः, लज्जा. —DIFFIDENT, *a.* अविश्वासिन्, शंकाशील, अप्रत्यय, साशंक; 'the mind feels d. of itself' आत्मन्यप्रत्ययं चेतः (S. 1). 2 अप्रगल्भ, अधृष्ट, विनीत, ह्रीमत्, लज्जावत्. –LY, *adv.* अप्रगल्भं, साशंकं, लज्जया, सविनयं.

DIFFRACT, *v. t.* वियुज् 7 A, 10, विश्लिष् c.

DIFFUSE. *v. t.* प्रसृ c., वि-परि-स्तॄ c., विसृप् c., प्रचर् c., विकॄ 6 P, तन् 8 U, अभि-प्र-वृध् c. 2 प्र-लु c., विदॄ c., प्रक्षिप् 6 P. 3 (Itself) व्याप् 5 P, विसृ-विसृप् 1 P, विस्तॄ pass., व्यश् 5 A, सर्वत्र गम् 1 P or प्रविश् 6 P. —*a.* वितत, सविस्तर, विस्तृत, असंक्षिप्त, विस्तीर्ण, सप्रपंच. —LY, *adv.* सविस्तरं, विस्तरेण, विस्तरशः, प्रपंचेन, असंक्षेपतः, असमासेन. —ION, *s.* प्रसारः, प्र-वि-सरः, विस्तारः, अभिवृद्धि *f.*, वितति *f.*, प्रचारणं, प्रसरणं. —IVE, *a.* वि-प्र-सारिन्, व्यापक, व्यापिन्, प्रसरणशील. —IVENESS, *s.* विस्तारः, विस्तृति *f.*, व्यापकत्वं. 2 वाग्विस्तारः, प्रपंचः, वाक्यविस्तरः.

DIG, *v. t.* खन् 1 P; 'd. down' (भूमिं) अवदॄ 10, भिद् 7 P; 'd. in' निखन्. 2 निर्भिद्, छिद् 10, व्यध् 4 P. —GER, *s.* खनकः, खनित् *m.*

DIGEST, *v. t.* (जठरे) जॄ c. (जरयति), पच् 1 P, परिपाकं नी 1 P, परिणम् c. (णमयति), दह् 1 P. 2 क्रमेण-यथाक्रमं-विन्यस् 4 U or रच् 10 or ग्रंथ् 9 P or लिख् 6 P. 3 मनसा विचर् c. or चिंत् 10. 4 Suffer, q. v. —*v. i.* जॄ 4 P, पच् pass., परिणम् 1 P. —ER, *s.* पाचकं, जारणं, अग्निवर्धनं, रोचनं, रोचकं. —ION, *s.* पाकः, वि-परि-पाकः, पचनं, परिणामः. 2 जठराग्निः, जठरानलः, अग्निः; 'slowness of d.' अग्निमांद्यं; 'having a good d.' प्रदीप्ताग्निः. —IVE, *a.* पाचन (नी *f.*), पाचक, अग्निवर्धक, परिपाकिन्.

DIGHT, *See* ADORN.

DIGIT, *s.* कला, लेखा, रेखा. 2 अंकः.

DIGNITY, *s.* महिमन् *m.*, माहात्म्यं, औदार्य. 2 अनुभावः, प्रतापः, तेजस् *n.*, प्रौढि *f.*, प्रौढत्वं-ता. 3 प्रतिष्ठा, गौरवं, पदं, उत्कृष्ट-परम-पदं, उत्कर्षः, उन्नति *f.*, आभिजात्यं, प्रतिपत्ति *f.*, ओजस्विता, उच्चत्वं, कुलीनता; 'd of style' ओजस् *n.* 4 मानः, अभिमानः, गर्वः, दर्पः; 'd. of expression' प्रौढत्वं वचसां. —DIGNIFY, *v. t.* संमन् c., सत्कृ 8 U, पूज् 10. 2 उत्कृष्टपदे नियुज् 7 A, 10, परमपदं प्राप् c., उत्कर्षं नी 1 P. —ED, *a.* महानुभाव, अनुभाववत्, ग(गं)भीर, ओजस्विन्, प्रौढ; महाप्रताप; 'd. in mien' गंभीराकृति. 2 मानिन्, महाशय, महेच्छ. 3 उत्कृष्टपदनियुक्त, प्रतिपत्तिमत्, परमपदारूढ. —DIGNITARY, *s.* मान्यजनः, शिष्टजनः, कुलीनपुरुषः.

DIGRESS, *v. i.* प्रस्तुतं न अनुसंधा 3 U, अप्रस्तुतं वद्-भण् 1 P or वच् 2 P, प्रकृत-कथायोगं त्यज् 1 P; 'you are d. ing' न त्वया प्रस्तुतमनुसंधीयते. 2 उत्क्रम् 1 U, 4 P, विचल् 1 P, प्रच्यु 1 A, भ्रंश् 1 A, 4 P; *See* DEVIATE. —ION, *s.* प्रकृतत्यागः, अप्रस्तुतानुसंधानं; प्रसंगः, प्रासंगिकं वचनं; 'enough of d.' अलं प्रासंगिकेन or प्रसंगेन, प्रकृतमेवानुसंधीयतां. 2 उत्क्रमः, विचलनं, भ्रंशः, च्युति *f.*, त्यागः. —IVE, *a.* अनन्वित, अप्रस्तुत, अप्रकृत, असंगत, असंबद्ध.

DIKE, *s.* सेतुः, सेतुबंधः, पिंडलः, धरणः, कूलकः-कं. 2 कुल्या, परिखा, खातं, प्रणालः-ली.

DILACERATE, *See* TEAR.

DILAPIDATE, *v. i.* जॄ 4 P, विनश् 4 P, क्षि-उच्छिद्-pass., अवसद् 1 P. —*v. t.* उच्छिद् 7 P, अवसद् c., प्रध्वंस् c., क्षि c., विनश् c.; *See* DESTROY. —ION, *s.* क्षयः, ध्वंसः, नाशः, उच्छेदः, अवसादः.

DILATE, *v. t.* विस्तॄ c., वितन् 8 U, प्र-वि-सृ c., दीर्घीकृ 8 U. 2 (upon) प्रपंचयति (D.), सविस्तरं विवृ 5 U or व्याचक्ष् 2 A, अति-विवृ. —*v. i.* वितन्-विस्तॄ-विवृ pass., आयतीभू, दीर्घीभू. —ED, *a.* वितत, व्यायत; उत्फुल्ल, विकसित. —ION, *s.* विस्तारः, वितति *f.*, विस्तरणं, विवृति *f.*; विकासः-सनं, उत्फुल्लता.

DILATORY, *a.* दीर्घसूत्रिन्, दीर्घसूत्र, विलंबिन्, मंद, मंथर, चिरक्रिय, अक्षिप्रकारिन्. —LY, *adv.* सविलंबं, मंदंमंदं, कालक्षेपेण. —NESS, *s.* दीर्घसूत्रता, विलंबः, कालक्षेपः, मांद्यं, कार्यजडता.

DILEMMA, *s.* उभयसंभवः, विकल्पः.

DILIGENT, *a.* उद्योगिन्, व्यवसायिन्, उद्युक्त, सोद्योग, उद्यमिन्, अनलस, अभिनिविष्ट, उद्यम-व्यवसाय-पर, उद्योगतत्पर. 2 (Of things), अनवरत, सतत, नित्यप्रवृत्त, प्र-आ-सक्त, अभ्यस्त, प्रसित, अविच्छिन्न. —LY, *adv.* प्रयत्नतः, सोद्योगं, सोद्यमं; अनवरतं, प्रसक्तं. —DILIGENCE, *s.* उद्यमः, अध्यव-व्यव-सायः, उद्योगः, अभियोगः, अभिनिवेशः, प्रयत्नः, अभ्यासः, प्रसक्ति *f.*, उत्साहः. 2 सातत्यं, अविच्छेदः, अविरामः, नैरंतर्य.

DILL, *s.* सालेयः, मधुरिका.

DILUTE, *v. t.* जलेन मिश्र् 10 or संसृज् 6 P, विली c., तनूकृ 8 U, क्षीणीकृ; मिश्रणेन शक्तिं तनूकृ. —ION, *s.* जलसंसर्गः, जलमिश्रणं; तनूकरणं. —DILUENT, *s.* विलयनं, तनूकरणं.

DIM, *a.* मंदद्युति, मंदप्रभ, मलिनकांति, मलिन, निष्प्रभ, निस्तेजस्, सतिमिर. 2 अप्रकाश, अव्यक्त, अस्पष्ट, दुरालोक, दुर्दृष्ट; 'seeing d.-ly' हतदृष्टि, अस्पष्टदृश्; 'of d. understanding' मंदमति, जड-स्थूल-धी-बुद्धि, &c. —*v. t.* अंधीकृ 8 U, अस्पष्टीकृ, कलुषीकृ, निष्प्रभीकृ, मलिनयति (D.). —LY, *adv.* अस्पष्टं, अव्यक्तं, निष्प्रभं, मलिनं. —NESS, *s.* तिमिरं, अस्पष्टता, तेजोहानि *f.*, दुरालोकता, मालिन्यं, अस्पष्टता. 2 स्थूलमतिता, बुद्धिमांद्यं.

DIMENSION, *s.* प्रमाणं, परिमाणं, मात्रा, मानं, विस्तारः.

DIMINISH, *v. t.*, *v. i.* *See* DECREASE. —DIMINUTION, *s.* न्यूनीकरणं, ह्रासः, क्षयः, अपचयः, अवसादः, हानि *f.* —DIMINUTIVE, *a.* अल्पकाय, क्षुद्र, अल्प, स्तोक, सूक्ष्म, लघु. 2 अल्पार्थ (प्रत्ययः); 'कन् is a d. termination' अल्पार्थे कन्.

DIMITY, *s.* दृढं कार्पासवस्त्रं.

DIMPLE, *s.* कपोलभंगः, गंडतरंगः, कपोलोर्मि *f.*; उ-

र्मिः, भंगुरता, दंतुरता, भंगः, तरंगः. -DIMPLY, *a.* भंगुर, ऊर्मिमत्, दंतुर.

DIN, *s.* कलकलः, निनादः, कोलाहलः, तुमुलरवः, निःस्वनः, उच्चघोषः, तुमुलं. -*v. t.* (श्रवणपुटं) जर्जरीकृ 8 U, कर्णौ उपहन् 2 P or जर्जरयति (D.); *See* STUN.

DINE, *v. i.* भुज् 7 A, आहारं-भोजनं-सेव् 1 A or निर्वृत् c., शरीरस्थितिं कृ 8 U or कॢप् c. -*v. t.* भुज् c., अश् c. -DINNER, *s.* भोजनं, आहारः, अशनं; *See* FOOD. 2 उत्सवः, जग्धि *f.*, भोजनोत्सवः.

DING, *v. t.* शब्दायते (D.), नद्-स्वन्-क्वण् 1 P; 'ding dong' घंटानादः-शब्दः, किंकिणीरवः-शब्दः-नादः, सततनादः.

DINGLE, *See* DALE.

DINGY, *See* BLACK.

DINT, *s.* प्रहारः, आघातः, अभिघातः. 2 बलं, प्रभवः, सामर्थ्यं; 'by d. of' बलेन, प्रभावेण, सामर्थ्यात्, योगेन. -*v. t.* प्रहारेण अंकृ 10 or चिह्न् 10.

DIOCESAN, *s.* प्रधानधर्माध्यक्षः.

DIORTHESIS, *s.* वक्रांगचिकित्सा.

DIP, *v. i.* नि,-मस्ज् 6 P (with loc.); अव-वि-गाह् 1 A, प्र-नि-विश् 6 P, आप्लु 1 A, (acc.). 2 व्यापृ 6 A, व्यापृत *a.* भू. -*v. t.* अवगाह् c., मस्ज् c. (मज्जयति), प्रविश् c. 2 सिच् 6 P, क्लिद् c., आर्द्रीकृ 8 U; 'd. in a business' ईषद् व्यापृ or प्रवृत् 1 A; 'd. into books' चुंब् 1 P; अल्पशः अधि-इ 2 A. -*s.* निमज्जनं, अवगाहः, प्रवेशः. 2 अवपातः, नम्रता, आनति *f.*

DIPTHERIA, *s.* मांससंतानिका.

DIPHTHONG, *s.* स्वरद्वयं, संयुक्तस्वरः, संध्यक्षरं.

DIPLOMA, *s.* पदवी-अधिकार-दायकं पत्रं.

DIPLOMACY, *s.* सामन् *n.*, नीति *f.*, दौत्यकर्मन् *n.* 2 राजदूतमंडलं-समूहः. -DIPLOMATICAL, *a.* दूतकार्यविषय. -DIPLOMATIST, *s.* सामप्रयोगज्ञः, राजनीतिकुशलः, दौत्यकार्यनिपुणः, सामकुशलः.

DIRE,-FUL, *a.* दारुण, घोर, उग्र, तीव्र. 2 भीषण, क्रूर, भयानक, रौद्र. -NESS, *s.* दारुणत्वं, घोरता, रौद्रता.

DIRECT, *v. t.* संधा 3 U, लक्ष्यीकृ 8 U, उद्दिश् 6 P, प्रेर् c., अधिकृत्य क्षिप् 6 P, (a missile &c.); 'd. attention or mind' मनो नियुज् 7 A, 10, मनः समाधा or बंध् 9 P or आसंज् c. or निक्षिप्. 2 शास् 2 P, विनियम् 1 P, प्रणी 1 P, निर्वह् c., अधिष्ठा 1 P, अवेक्ष् 1 A. 3 आ-निर्-उप-दिश्, प्रदृश् c. 4 नियुज्, आदिश्, आज्ञा c. (ज्ञापयति), प्रचुद् 10. 5 विधा 3 U, प्र-युज्. 6 (A letter &c.) *See* ADDRESS. -*a.* ऋजु, अवक्र, सरल, अकुटिल, अविलोम, अजिह्म, अनुलोम; 'd. descendants' अनुलोमाः, अनुलोमवंशजाः. 2 क्रमागत, अविप्रकृष्ट. 3 व्यक्त, स्पष्ट, सस्पष्ट-व्यक्त, प्रत्यक्ष, साक्षात् *ind.* -ION, *s.* शासनं, नियोगः, निर्देशः, आज्ञा, आदेशः. 2 संधानं, उद्देशः, प्रेरणं. 3 प्रणयनं, प्रशासनं, विनियमनं, अधिष्ठातृत्वं, अधिष्ठानं, अवेक्षा-क्षणं. 4 दिश् *f.*, दिशा, आशा, काष्ठा, ककुभ् *f.*, हरित् *f.* 5 Address, q. v. -IVE, *a.* निर्देशक, सूचक. -LY, *adv.* सपद्येव, सद्यः, अचिरात्, तत्क्षणात्, अविलंबितं, शीघ्रं, आशु. 2 स्पष्टं, प्रत्यक्षं, सुव्यक्तं, अगूढतया, भिन्नार्थं. 3 अनुलोमं, सरलतया. -OR, *s.* शासितृ-अधिष्ठातृ *m.*, अनुशासकः, अध्यक्षः, अधिकारिन् *m.*, अवेक्षकः, निर्वाहकः. -ORY, *s.* विधिसंहिता. 2 नामधामसूचकं पुस्तकं.

DIREPTION, *s.* अपहरणं, अपहारः, लुंठनं.

DIRGE, *s.* करुणगीतं, करुणरससंगीतं.

DIRK, *See* DAGGER.

DIRT, *s.* मलः-लं, पंकः, कर्दमः, जंबालः-ल, कल्कं, किट्टं. -Y, *a.* मलिन, समल, मलीमस, पंकिल, कलुष, आविल, मलदूषित, सकर्दम. 2 नीच, कुत्सित, खल, गर्ह्य. -*v. t.* मलेन-पंकेन-दुष् c. (दूषयति) or लिप् 6 P, मलिनीकृ 8 U, मलिनयति-आविलयति (D.).

DIRUPTION, *See* ERUPTION.

DISABLE, *v. t.* अनुपयुक्त *a.* कृ 8 U, विहस्तीकृ, (रुजा विहस्तचरणां देवीं M. 4); अशक्त-असमर्थ *a.* कृ. 2 अवसद् c., विकलीकृ, उपहन् 2 P, दुर्बलीकृ. -DISABILITY, *s.* अशक्ति *f.*, असामर्थ्यं, अक्षमता, अयोग्यता; अनुपयोगः.

DISABUSE, *v. t.* भ्रमं निरस् 4 U or उच्छिद् 7 P or अपनी 1 P or हृ 1 P or अपाकृ 8 U, भ्रांतेर्मुच् 6 P.

DISACCUSTOM, *v. t.* अभ्यासं लुप् c.

DISADVANTAGE, *s.* अहितं, अलाभः, अपकारः, अनर्थः, अनिष्टं, अपायः, हानि *f.*, पीडा, बाधा; 'at a d.' विषमावस्थ *a.*, असमवस्थ *a.* -OUS, *a.* अहितकर (री *f.*), प्रतिकूल, आहित, अनुपकारक, विरोधिन्, अपायावह, क्षतिकारक. -OUSLY, *adv.* अहितं, अनिष्टं, सापकारं.

DISAFFECT, *v. t.* विरंज् c., अपरागं उत्पद् c., उपजप् 1 P. -ED, *a.* वि-अप-रक्त, विप्रिय, असंतुष्ट, अप्रीत, अननुरक्त. -ION, *s.* विरागः, असंतोषः, विरक्ति *f.*, अभक्ति *f.*

DISAFFIRMANCE, *s.* प्रत्याख्यानं, प्रत्यादेशः; प्रत्यावर्तनं.

DISAGREE, *v. i.* न संमन् 4A, विवद् 1 A, भिद् pass., विरुध् pass., असदृशीभू; *See* DIFFER. -ABLE, *a.* अनभिमत, अप्रिय, अनिष्ट, अहित, अप्रीतिकर (री *f.*), अरुचिर, अनाह्लादक. 2 विरुद्ध, प्रतिकूल. -MENT, *s.* विसंवादः, विवादः, भेदः, विप्रतिपत्ति *f.*, विमति *f.*; *See* DIFFERENCE.

DISALLOW, *v. t.* न अनुज्ञा 9 U, निषिध् 1 P, निरुध्
1 P. 2 प्रत्याख्या 2 P, प्रत्यादिश् 6 P; *See* DENY. -ANCE, *s.* प्रत्याख्यानं, निषेधः; निवारणं, निरसनं.

DISANIMATE, *See* DISCOURAGE.

DISANNUL, *See* ABOLISH.

DISAPPEAR, *v. i.* अंतर्-तिरः-धा pass., अंतर्-इ 2 P, तिरोभू 1 P, अदृश्य *a.* भू. 2 नश् 4 P, क्षयं-नाशं-या 2 P, प्र-वि-ली 4 A, प्र-वि-ध्वंस् 1 A; 'the pigeons having d. ed' चक्षुर्विषयातिक्रांतेषु, नयनपथातीतेषु, अदृष्टिगोचरेषु, कपोतेषु. -ANCE, *s.* अंतर्धानं, तिरोधानं, अदर्शनं; नाशः, लयः, &c.; better ex. by (*v. i.*).

DISAPPOINT, *v. t.* आशां भंज् 7 P or प्रति-वि-हन् 2 P or विफलीकृ or मोघीकृ 8 U or खंड् 10; विप्रलभ् 1 A; 'he was d. ed in his request' तस्य यच्ञा मोघी बभूव, स भग्नाशो बभूव; 'd. ed in love' खंडितप्रणय, खंडित. -ED, *a.* भग्नाश, मोघाश, भग्नोद्यम, अकृतार्थ, प्रतिहत, मनोहत, प्रतिबद्ध. -MENT, *s.* आशाभंगः, प्रणयवैफल्यं, विफलीकरणं, नैराश्यं, विप्रलंभः.

DISAPPROVE, *v. t.* निंद् 1 P, गर्ह् 1, 10 A, न प्रशंस् 1 P; not 'approve' q. v. -DISAPPROBATION, *s.* निंदा, असंमति *f.*, विरागः, अप्रीति *f.*, विमति *f.*, अनभिनंदनं.

DISARM, *v. t.* अस्त्राणि अपहृ 1 P or अपनी 1 P, निरायुधीकृ 8 U, निःशस्त्रीकृ. 2 (fig.) शम् c. (शमयति), सांत्व् 10. -ED, *a.* निरायुध, निःशस्त्र; 'd. of anger' शांतरोष, क्षीणमन्यु.

DISARRANGE, *v. t.* क्रमं भंज् 7 P, व्यस् 4 U, संकॄ 6 P, संकुलीकृ 8 U. -MENT, *s.* अक्रमः, क्रमभंगः, व्यस्तता.

DISARRAY, *v. t.* अपनह् 4 P, उच्छद् 10, विवस्त्रीकृ 8 U. 2 क्रमं भंज् 7 P. -*s.* व्यूहभंगः, विंजलः, समुत्पिंजः.

DISASTER, *s.* आपद्-विपद् *f.*, व्यसनं, उपप्लवः, विपत्ति *f.*, उपद्रवः, अत्याहितं, अनर्थः. -*v. t.* पीड् 10, बाध् 1 A, उपद्रु 1 A, उपद्रु 1 P. -DISASTROUS, *a.* विपद्युक्त, दुर्भाग्य, दुरंत; अनर्थावह, दारुण, घोर.

DISAVOW, -AL, *See* DENY, DENIAL.

DISBAND, *v. t.* युद्धव्यापाराद् मुच् 6 P or c., सैन्यभंगं कृ 8 U. 2 मुच्, विमोक्ष् 10. -*v. i.* युद्धव्यापारात् मुच् 6 P.

DISBARK, *v. t.* नौकायाः अवतॄ c.

DISBELIEVE, *v. t.* Not 'believe' q. v. -ER, *s.* नास्तिकः, अविश्वासिन् *m.* -DISBELIEF, *s.* अप्रत्ययः, अविश्वासः.

DISBEND, *See* RELAX.

DISBRANCH, *v. t.* निःशाखीकृ 8 U, शाखां लू 9 U.

DISBURDEN, *v. t.* भारं अवतॄ c. or अपनी 1 P, निर्भार-रिक्तभार-*a.* कृ 8 U; 'd. one's mind' मनोगतं अन्यस्मै आख्या 2 P; 'the afflicted should d. their grief' कर्तव्यानि दुःखितैर्दुःखनिर्वापणानि (U. 3).

DISBURSE, *v. t.* व्यय् 10 P (व्ययति), उत्-सृज् 6P, वि-नियुज् 7 A, 10, व्ययीकृ 8 U. -MENT, *s.* व्ययः, उत्सर्गः, विनियोगः, त्यागः; 'receipt and d.' आयव्ययौ.

DISCARD, *v. t.* अपास् 4 U, अवधू 5, 9 U, अपक्षिप् 6 P, निराकृ 8 U, अवसृज् 6 P, अपहा 3 P; निःसृ c., अपनुद् 6 P.

DISCERN, *v. t.* वि-विच् 3, 7 P, विचर् c., परिच्छिद् 7 P, निर्णी 1 P, परीक्ष् 1 A. 2 निर्वर्ण् 10, दृश् 1 P, ईक्ष् 1 A, आलोक् 1 A, 10, आलक्ष् 10, विभू c. -ER, *s.* विवेचकः, ईक्षितृ *m.* -IBLE, *a.* दृश्य, दृष्टिगोचर, विभाव्य, प्रत्यक्ष. -ING, *a.* सूक्ष्मदर्शिन्, दीर्घ-दूर-दृष्टि, विवेकिन्, परिणामदर्शिन्, विचारशील. -INGLY, *adv.* सविवेकं, सविचारं, सपरिच्छेदं. -MENT, *s.* विवेकः, विवेचनं, परिच्छेदः, विचारः-रणा, परीक्षा, दूरदृष्टि *f.*, अवबोधः, विज्ञानं.

DISCERPTION, *s.* व्यवच्छेदः, विभेदनं, विदारणं.

DISCHARGE, *v. t.* (A load &c.) भारं अवतॄ c. or अपनी 1 P. 2 उद्-गॄ 6 P, उद्गॄ c., प्रमुच् 6 P, उच्चर् 10, उत्सृज् 6 P, प्रसु c., उद्वम् 1 P. 3 (Arrow &c.) मुच्, अस् 4 P, विसृज्, क्षिप् 6 P, प्रेर् c. निपत् c.; 'd. a gun' लोहनाडीस्थं आग्नेयं चूर्णं ज्वल् c. 4 (अधिकारात् or पदात्) निःसृ c., अपकृष् 1 P, अवरुह् c. (रोपयति), निष्कस् c., निराकृ 8 U, अपास् 4 U, च्यु c., भ्रंश् c. 5 (Duty) कृ, अनुष्ठा 1 P, विधा 3 U, निष्पद्-संपद् c., निर्वह् c., आचर् 1 P. 6 (Debt) (ऋणं) शुध् c., निर्यत् 10, निराकृ, निस्तॄ c., विनी, आनृण्यं गम् 1 P. 7 मुच्, मोक्ष् 10, विसृज्. 8 (As a river) अवतॄ 1 P, द्रु 1 P; सागरं वर्जयित्वा कुत्र वा महानद्यवतरति (S. 3) 'will d. itself &c'. -*v. i.* मुच् pass.; स्रु 1 P. -*s.* भारावतरणं. 2 उद्गारः, प्रस्रावः, विसर्गः, उद्वमनं, उच्चारणं, उदीरणं. 3 क्षेपण, मोक्षः. 4 अवरोपणं, अधिकारभ्रंशनं, पदच्युति *f.*-भ्रंशः. 5 अनुष्ठानं, निर्वाहः, विधानं, संपादनं. 6 आनृण्यं, ऋणशोधनं-निस्तारः. 7 मोक्षः, मुक्ति *f.*, मोचनं.

DISCIPLE, *s.* शिष्यः, छात्रः, अंतेवासिन् *m.*, विद्यार्थिन् *m.*

DISCIPLINE, *v. t.* विनी 1 P, शिक्ष् c., शास् 2 P, आध-इ c. (अध्यापयति). 2 नियम् 1 P, विनियम्, शास्, दंड् 10, दम् c. (दमयति). 3 व्यायम्; अभ्यस् 4 U. -*s.* विनयः, अनुशासनं, शिक्षा-क्षणं, अध्यापनं, अभ्यासः. 2 नियमः, व्यवस्था, विधिः, शासनं, नीति *f.* 3 दंडः, निग्रहः, दमनं, शिष्टि *f.*, विनियमः-मनं; 'military d.' युद्धाभ्यासः, युद्ध-रण-शिक्षा; 'd. in arms' शस्त्राभ्यासः.

DISCLAIM, -ER, *See* DENY, DENIER.

DISCLOSE, *v. t.* विवृ 5 U, प्रकाश् c., व्यंज् 7 P, प्रकटीकृ 8 U, स्पष्टीकृ, भिद् 7 P or c., निविद् c., ख्या c. (ख्यापयति); 'd. ing secrets' रहस्यभेदः. -URE, *s.* विवृति *f.*, प्रकाशनं, निवेदनं, भेदः.

DISCOLOUR, *v. t.* वर्णांतरं ग्रह् c., कलुषी-मलिनीकृ 8 U, विवर्ण् 10, कृष्णीकृ. –ATION, *s.* वैवर्ण्यं, कालुष्यं, मालिन्यं.

DISCOMFIT, *v. t.* वि-प्र-ध्वंस् c., व्यूहं भंज् or भिद् 7 P (as an army); पराजि 1 A, विद्रु c.; *See* DEFEAT, BAFFLE. –URE, *s.* भंगः, व्यसनं, पराजयः, पराभवः.

DISCOMFORT, *v. t.* पीड् 10, व्यथ् c., बाध् 1 A; *See* AFFLICT. –*s.* अस्वास्थ्यं, दुःखं, पीडा, व्यथा, क्लेशः, बाधा.

DISCOMMEND, *See* CENSURE.

DISCOMPOSE, *v. t.* क्षुभ् c., व्यामुह् c., संभ्रम् c. (भ्रमयति), आकुलीकृ 8 U, बाध् 1 A. –ED, *a.* आकुलित, क्षुब्ध, व्याकुल, कातर, व्याकुलचित्त, अनवस्थित, व्यग्र, भ्रांत, पारिप्लव, विक्लवचित्त. –URE, *s.* क्षोभः, आकुलत्वं, व्यग्रता, वैक्लव्यं, उद्वेगः, अस्वास्थ्यं, अस्थिरता.

DISCONCERT, *v. t.* खंड् 10, मोघीकृ 8 U, प्रति-व्याहन् 2 P; *See* BAFFLE. 2 Discompose, q. v.

DISCONFORMITY, *s.* विरोधः, विरुद्धता, असादृश्यं, असंगति *f.*, विसंवादः, विप्रतिपत्ति *f.*

DISCONNECT, *See* SEPARATE. –ION, *s.* विश्लेषः असंगति *f.*, वियोगः.

DISCONSOLATE, *a.* खिन्न, विषण्ण, दीन, उद्विग्न, म्लान; *See* DEJECTED. –LY, *adv.* सविषादं, सखेदं, सोद्वेगं.

DISCONTENT, *a.* असंतुष्ट, अतृप्त. –*s.* असंतोषः, अतृप्ति *f.*, अप-वि-रागः, विरक्ति *f.*, अप्रीति *f.* –*v. t.* असंतोषं उत्पद् c. or जन् c.

DISCONTINUE, *v. t.* त्यज् 1 P, विच्छिद् 7 P, विरम् c. (रमयति), निवृत् c., उज्झ् 6 P, विलुप् c. –*v. i.* वि-उप-रम् 1 P, निवृत् 1 A, (with abl.); *See* CEASE. –ANCE, –ATION, *s.* विच्छेदः, विरामः, निवृत्ति *f.*; उपशमः, भंगः, अंतरायः.

DISCORD, *v. i.* विसंवद् 1 P, विभिद्-न युज्-विरुध्-pass. –*s.*,–ANCE, *s.* भेदः, भिन्नता, विसंवादः, मतभेदः, विरोधः, विनति *f.*, वैमत्यं, वैपरीत्यं, वैलक्षण्यं; 'd. of sound' स्वरविरोधः, अपस्वरः. –ANT, *a.* विषम, प्रतिकूल, विरुद्ध, विसंवादिन्, परस्परविरुद्ध, विभिन्न, असंगत, विपरीत; 'd. sound' विस्वरः, अपस्वरः, कर्कशध्वनिः,

DISCOUNT, *v. t.* भागं उद्-हृ 1 P. –*s.* उद्धारः, उद्धृतभागः.

DISCOUNTENANCE, *v. t.* न अनुग्रह् 9 P, न उपकृ 8 U, न अनुमुद् 1 A.

DISCOURAGE, *v. t.* उत्साहभंगं कृ 8 U, अव-वि-सद् c., विषादं जन् c., विषण्णीकृ, धैर्यं ध्वंस् c., मनः or आशाः भंज् 7 P. 2 Deter, q. v. –ED, *a.* भग्नोत्साह, हताश, भग्नोद्यम, विषण्ण, अवसन्न, खिन्न, निरुत्साह, मनोहत, प्रतिबद्ध, भग्नाश, धैर्यच्युत, स्खलितधैर्य. –ING, *a.* विषादजनक, धैर्यध्वंसिन्. –MENT, *s.* धैर्यध्वंसः, उत्साहभंगः, आशा-उद्यम-भंगः; विषादः, अवसादः, खिन्नता, धैर्यच्युति *f.*-स्खलनं.

DISCOURSE, *v. i.* संवद् 1 P, संभाष् 1 A, समालप् 1 P. 2 भाष् 1 A, वद्-गद् 1 P, अधिकृत्य वच् 2 P. –*s.* संवादः, संभाषणं, संकथा, संलापः. 2 वचनं, भाषणं, उक्ति *f.*, वचस् *n.*; *See* CONVERSE,–ATION. –ER, *s.* वादिन् *m.*, वक्तृ *m.* –IVE, *a.* तार्किक (की *f.*), ऊहिन्, तर्कविषय.

DISCOURTEOUS, *a.* असभ्य, अशिष्ट, अविनीत, दुःशील, अनार्य. –NESS,-DISCOURTESY, *s.* अविनयः, अनार्यता, असभ्यता; मर्यादातिक्रमः, अशिष्टाचारः.

DISCOVER, *v. t.* विवृ 5 U, दृश् c., प्रकाश् c., आविष्कृ 8 U, स्पष्टीकृ, व्यक्तीकृ, प्रकटीकृ, व्यंज् 7 P, ज्ञा c. (ज्ञापयति), आ-नि-विद् c. 2 निरूप् 10, ज्ञा 9 U, उपलभ् 1 A, निर्णी 1 P. 3 समा-आ-सद् c., प्राप् 5 P, विद् 6 U, दृश् 1 P, अधिगम् 1 P, इ-या 2 P. –ER, *s.* निर्णेतृ-अधिगंतृ *m.*, निरूपकः. –Y, *s.* प्रकाशनं, विवरणं. 2 ज्ञानं, अवगमः, दर्शनं, निर्णयः, उपलब्धि *f.*, समासादनं, निरूपणं, प्राप्ति *f.*

DISCREDIT, *v. t.* न विश्वस् 2 P, न प्रति-इ 2 P, अविश्वास्य *a.* मन् 4 A, प्रामाण्यं लघयति (D.). 2 कलंकयति (D.), अकीर्तिं आवह् 1 P, दुष् c. (दूषयति), मलिनीकृ 8 U, मलिनयति (D.). –*s.* अपयशस् *n.*, अपकीर्ति *f.*, दूषणं, कलंकः, अप्रतिष्ठा, अकीर्तिः; 'bring d. on' दुष् c., मलिनयति; (यदा मेधाविनी शिष्योपदेशं मलिनयति M. 1). –ABLE, *a.* अकीर्तिकर-अयशस्कर (री *f.*), गर्हित, कलंककर, दूषणीय, गर्ह्य, निंद्य.

DISCREET, *a* समीक्ष्य-विमृश्य-कारिन्, विचक्षण, स्ववहित, विचारशील, सावधान, दीर्घ-दूर-दृष्टि. 2 (Of acts) साधु, श्रेयस्. –LY, *adv.* विमृश्य, समीक्ष्य, विचार्य. —DISCRETION, *s.* विवेकः, विमृश्यकारित्वं, समीक्षणं, विचक्षणता, विचारः, विज्ञता. 2 स्वातंत्र्यं, स्वाधीनता; 'having reached the years of d.' प्राप्तव्यवहारदशः 3 विकल्पः, कामः, रुचि *f.*, छंदः; 'at d.' विना समयेन; 'this matter is left to your d.' यथा भवानुचितं मन्यते तथा क्रियतां; स्वरुच्या-कामतः-वर्ततां भवान्; 'at one's own d.' स्वच्छंदं, स्वेच्छया, स्वरुच्या, कामतः. –ALLY, *adv.* स्वेच्छानुसारेण, यथाकामं. –ARY, *a.* स्वाधीन, वैकल्पिक-यादृच्छिक (की *f.*), स्वेच्छानुवर्तिन्.

DISCREPANT, *a.* विभिन्न, विरुद्ध, विपरीत, अ-वि-संगत, विसंवादिन्, विरोधिन्, प्रतिकूल. –DISCREPANCE, –CY, *s.* विभेदः, विरोधः, विप्रतिपत्ति *f.*, असंगति *f.*, विसंवादः, वैलक्षण्यं, वैपरीत्यं.

DISCRETE, *a.* विभिन्न, विविक्त. 2 अवधारणार्थक.

DISCRIMINATE, *v. t.* वि-विच् 3, 7 P, वि-शिष् 7 P or c., परिच्छिद् 7 P, विज्ञा 9 U, विज् 3 U, विचर् c. 2 लक्ष् 10, परीक्ष् 1 A, सं-अव-ईक्ष्. –ION, *s.*

विवेकः, परिच्छेदः, विज्ञानं, विचारणं-णा; विशेषः, अवधारणा; 'd. of proper and improper' पात्रापात्रविचारणा; 'd. of right and wrong' सदसद्विवेकः. -ING, -IVE, *a.* विशेषज्ञ, गुणदोषविद्, विवेकिन्, परिच्छेदक.

DISCURSIVE, *a.* नानाविषय, अनेकप्रसंग; अस्थिर, चंचल, अनवस्थित. 2 तार्किक (की *f.*), ऊहिन्.

DISCUS, *s.* चक्रं.

DISCUSS, *v. t.* विचर् c., पर्यालोच् 10, वितर्क् 10, विमृश् 6 P, परीक्ष् 1 A, निरूप् 10, अनुसंधा 3 U; 'd. in detail, at length, exhaustively' प्रपंचयति (D.), प्रपंचं कृ 8 U, सविस्तरं-विस्तरेण-वर्ण् 10. -*v. i.* विवद् 1 A, वादे व्याप्टृ 6 A. -ION, *s.* विचारः-रणा, वितर्कः, परीक्षा, निरूपणं, विमर्शः, वादविवादः, पर्यालोचनं; 'to turn to the subject under d.' प्रकृतं-प्रस्तुतं-अनुसृ 1 P or अनुवृत् 1 A or अनुसंधा; 'subject under d.' प्रस्तावः, प्रस्तुत-प्रकृत-विषयः, प्रस्तुतं, प्रकृतं; 'result of d.' मथितार्थः.

DISCUSSIVE, DISCUTIENT, *a.* शोथघ्न (घ्नी *f.*), शोथहृत्, दुष्टधातुनाशक.

DISDAIN, *v. t.* अवमन् 4 A, अवज्ञा 9 U, अवगण् 10, तिरस्कृ 8 U; *See* CONTEMN. -*s.* औद्धत्यं, सावज्ञावलेपः, अवमानः-नना, अवहेलना; *See* CONTEMPT. -FUL, *a.* सावज्ञ, सावलेप, अवमानिन्; उद्धत, अवलिप्त, सावमान.

DISEASE, *s.* रोगः, गदः, व्याधिः, आमयः, उपतापः, रुजा, रुज् *f.*, विकारः, पीडा, क्लेशः, अस्वास्थ्यं. -*v. t.* रोगेण व्यथ् c. or पीड् 10 or क्लिश् 9 P. -ED, *a.* व्याधिग्रस्त, रोगोपसृष्ट, रोगार्त, सरोग, सरुज, सामय, आतुर, विकृत, अस्वस्थ.

DISEMBARK, *v. i.* पोतात्-नौकायाः अवतॄ 1 P or अव-रुह् 1 P. -*v. t.* अवतॄ-रुह् c. -ATION, *s.* अवरोहणं, उत्तरणं.

DISEDGE, *See* BLUNT.

DISEMBARRASS, *See* CLEAR.

DISEMBITTER, *v. t.* तिक्तत्वं-कटुत्वं-अपनी 1 P, मधुरीकृ 8 U, सुरस *a.* कृ.

DISEMBODIED, *a.* अशरीर, देहहीन, कायहीन, and sim. comps.

DISEMBOGUE, *v. i.* निर्गम्-निः-सृ 1 P; समुद्रं अवतॄ 1 P or प्रविश् 6 P or प्रस्रु-द्रु 1 P (of a river). -*v. t.* सलिलं सागरे निर्गम् c., &c.

DISEMPLOY, *See* DISCHARGE.

DISENABLE, *See* DISABLE.

DISEMBROIL, *v. t.* उद्वेगात्-संभ्रमाद्-मुच् c. or उद्धृ 1 P.

DISENCHANT, *v. t.* प्रतिकृ 8 U, मंत्रवशाद् उद्धृ 1 P.

DISENCUMBER, *v. t.* प्रतिबंधात् अपनी 1 P or अपनुद् 6 P, निर्विघ्नीकृ 8 U, निष्प्रत्यूह *a.* कृ.

DISENGAGE, *v. t.* वियुज् 7 A, 10, विश्लिष् c. 2 मुच् 6 P or c., मोक्ष् 10, उद्-हृ 1 P; 'd. the mind' मनो निवृत् c. -*v. i.* मुच् pass., निवृत् 1 A, विश्रम् 4 P; आत्मानं निवृत् c. -ED, *a.* मुक्त, उद्धृत, उत्तीर्ण. 2 लब्धक्षण, प्राप्तावकाश, प्राप्तावसर, अव्यापृत, कार्यरहित-शून्य, कार्यविरत, निर्व्यापार. -MENT, *s.* मोक्षणं, &c. 2 अवसरः, क्षणः, अवकाशः.

DISENTANGLE, *v. t.* Disengage, q. v. 2 वियुज् 7 A, 10, विश्लिष् c.

DISENTHRAL, *v. t.* दास्याद् मुच् 6 P or c. or मोक्ष् 10.

DISENTRANCE, *s.* मूर्च्छनात्प्रबुध् c.

DISESTEEM, *v. t.* अवमन् 4 A, अवज्ञा 9 U; *See* CONTEMN. -*s.* अनादरः, अवमानः, अवज्ञा, उपेक्षा.

DISFAVOUR, *v. t.* न अनुग्रह् 9 P, न उपकृ 8 U, न अनुमुद् 1 A. -*s.* अकृपा, अननुग्रहः, अप्रसादः, अनुपकारः, पराङ्मुखता, विरक्ति *f.*, अप-वि-रागः, अप्रीति *f.*, असंतोषः.

DISFIGURE, *v. t.* विरूप् 10, विरूपीकृ 8 U, विकृ 8 U, व्यंगयति (D.), विकलीकृ, विप्रकृ c., (रूपं प्रसाधनैर्विप्रकार्यते S. 4). -ED, *a.* वि-कृ-अप-रूप, विकृताकार, विकृत, व्यंग (गी *f.*). -MENT, *s.* विरूपता, वैकल्यं, व्यंगता, विप्रकारः.

DISFRANCHISE, *v. t.* पौरत्वं-पौराधिकारं-हृ 1 P or विलुप् c.

DISGORGE, *v. t.* उद्-गॄ 6 P, उद्वम् 1 P, विच्छर्द् 10. -MENT, *s.* उद्गारः, उद्वमनं, वमथुः, प्रच्छर्दिका.

DISGRACE, *s.* अपमानः, अव-वि-मानना, परि-अभिभवः, निकृति *f.*, अ-अप-कीर्ति *f.*, अ-अप-यशस् *n.*, कलंकः, दूषणं. 2 कलंकास्पदं, अवमानहेतुः; 'a d. to the family' कुलांगारः, कुलपांसुलः. -*v. t.* अप-अव-मन् c., कलंकयति (D.), अकीर्ति-अयशः-कृ; परि-अभि-भू 1 P, दुष् c. (दूषयति); गर्ह् 1, 10 A, सावज्ञं निर्भर्त्स् 10 A. 2 Degrade, q. v. -FUL, *a.* अयशस्कर (री *f.*), कलंककर (री *f.*); गर्हित, अपमानहेतुक, लज्जाकर (री *f.*), अवमानजनक; निंद्य, दूषणीय. -FULLY, *adv.* गर्हितं; लज्जाकरं, सापमानं. -IOUS, *a.* अप्रसन्न, अननुकूल.

DISGUISE, *v. t.* कपटवेशेन-वेशांतरेण-गुह् 1 U or आच्छद् 10, 'd. ed as' वेष-रूप-धारिन् in comp.; 'd. ed as ascetics' तपस्विव्यंजनोपेताः, तापसच्छद्मना, तापसरूपधारिणः, &c. 2 (Oneself) वेषांतरं-वेषपरिवर्तनं कृ 8 U or विधा 3 U, अन्यवेषं परिधा 3 U, वेषं परिवृत् c.; 'd. ing himself differently' वेषांतरं विधाय, परिहितान्यवेषः; 'd. ed himself with a lion's skin' सिंहचर्मपरिच्छन्नः बभूव.

2 अप-नि-ह्नु 2 A, गुप् 1 P, 10, गुह् ; *See* CONCEAL. —*s.* कपट-छद्म-वेषः, वेषांतरं, आकारगोपनं; विडंबनं, अभिनयः. 2 छद्मन् *n.*, छलं, व्याजः, अप-व्य-प-देशः, लक्षं. —ED, *a.* कपट-छद्म-वेषिन्, कपटवेष, कपटरूप; रूप-वेष, &c., in comp.; 'd. praise' व्याजस्तुति *f.*

DISGUST, *v. t.* उद्वेगं-निर्वेदं उत्पद् c., अरुचिमुत्पद् c., उद्विज् c. ; निर्विद् c. —*s.* जुगुप्सा, उद्वेगः, घृणा, निर्वेदः; अरुचि *f.*, विरक्ति *f.*, बीभत्सं; 'in d.' सनिर्वेदं. —ING,-FUL, *a.* बीभत्स, अरुचिर, कुत्सित, गर्ह्य, उद्वेगकर (री *f.*), जुगुप्सावह; 'to be d. ed with' उद्विज् 6 A (with abl.); निर्विद् pass., निर्विण्ण *a.* भू (with instr.), बाध् desid. (बीभत्सते) (with abl.).

DISH, *s.* शरावः, पात्रं, भाजनं. 2 भोजनं; आहारविशेषः.

DISHABILLE, *a.* विवस्त्र, कुचैल, अकृताभरण. —*s.* लघुवासस् *n.*

DISHEARTEN, *See* DISCOURAGE.

DISHEVELLED, *a.* प्र-वि-कीर्ण, पर्याकुल, स्रस्त; 'having d. hair' मुक्त-स्रस्त-केश.

DISHONEST, *a.* अशुचि, असरल, अनृजु, सव्याज, जिह्म, कुटिल, कापटिक (की *f.*), छाद्मिक (की *f.*), शठ, धूर्त, सव्यलीक; 'a d. woman' असती, भ्रष्टा, व्यभिचारिणी. —LY, *adv.* अन्यायेन, कपटेन, कुटिलं, धूर्ततया, सव्याजं, छलेन. —Y, *s.* अशुचित्वं, कापट्यं, कौटिल्यं, माया, &c.

DISHONOUR, *v. t.* Disgrace, q. v. 2 अवमन् 4 A, अवज्ञा 9 U, अवधीर् 10, अनादृ 6 A; *See* CONTEMN; 'd. a maiden' दुष् c. (दूषयति), सतीत्वाद् भ्रंश् c. —*s.* अपमानः, अनादरः, अयशस् *n.*, अकीर्ति *f.*, कलंकः, अप्रतिष्ठा. —ABLE, *a.* अनार्य, कलंककर (री *f.*); *See* DISGRACEFUL.

DISHUMOUR, *s.* स्वभाववक्रता, वक्रशीलता, प्रकृतिक्लेशत्वं, प्रतीपता.

DISINCLINE, *v. t.* विरंज् c., विरागं जन् c.; or उत्पद् c. —ATION, *s.* अस्पृहा, निरीहत्वं, विरागः, विरक्ति *f.*, द्वेषः, अनीहा, विमुखता, अनिच्छा, अरुचि *f.*, अप्रीति *f.* —ED, *a.* विरक्त, वि-पराङ्-मुख (खी *f.*), अनिच्छु, निरीह, निःस्पृह.

DISINFECTANT, *s.* विषघ्नं.

DISINGENUOUS, *a.* अनुदार, अदक्षिण, असरल; *See* DISHONEST.

DISINHERIT, DISHERIT, *v. t.* रिक्थाधिकाराद् भ्रंश् c., पैतृकं धनं लुप् c.—ED, *a.* अनधिकार, पैतृकधनहीन. —ING, *s.* पैतृकरिक्थच्छेदः-लोपः.

DISINTEGRATE, *v. t.* वियुज् 10, संहतिं भिद् 7 P, विश्लिष् c.; *See* SEPARATE. —ION, *s.* वियोगः, विश्लेषः, संहतिभेदः.

DISINTER, *v. t.* (शवं) उत्खन् 1 P.

DISINTERESTED, *a.* निःस्पृह, उदासीन, निर्मम, निष्काम, मुक्तसंग, निःसंग, अपक्षपातिन्, निरीह, आत्महितानिरपेक्ष, निष्कारण; 'a d. friend' निष्कारणो बंधुः. —LY, *adv.* निर्ममं, स्वार्थनिरपेक्षं, निःस्पृहं. —NESS, *s.* निरीहता, निःसंगता.

DISJOIN, DISJOINT, *v. See* SEPARATE. 2 (Disjoint) विसंधा 3 U, संधिं भंज् 7 P or त्रुट् c. 3 व्यवच्छिद् 7 P, अवकृत् 6 P. —ED, *a.* असंश्लिष्ट, असंहत, असंगत, असंबद्ध, अनन्वित, असंलग्न.

DISJUNCT, *a.* वियुक्त, विश्लिष्ट, असंलग्न, विमिश्र. —ION, *s.* वियोगः, विश्लेषः, विभेदः, असंगतता, असंधानं. —IVE, *a.* वियोगिन्.

DISK, *s.* बिंबं, मंडलं, परिवेषः, परिधिः. 2 चक्रं.

DISLIKE, *s.* अरुचि *f.*, विरागः, विरक्ति *f.*, विमुखता, द्वेषः; *See* DISINCLINATION. —*v. t.* द्विष् 2 U, विरंज् pass. (with loc.), न रुच् 1 A, न अभिनंद् 1 P, न इष् 6 P. —ED, *a.* अप्रिय, अनिष्ट, विद्विष्ट, अनीप्सित.

DISLIKEN, *v. t.* असमीकृ 8 U, अतुल्यीकृ.

DISLOCATE, *v. t.* संधेः चल् c. or च्यु c., संधिं त्रुट् c. or भंज् 7 P, विसंधा 3 U. —ION, *s.* संधित्रोटनं, संधिभंगः, विसंधानं, संधिच्युति *f.*

DISLODGE, *v. t.* अप-निः-सृ c., निरस् 4 P, निष्कस् c.; *See* DRIVE. 2 वि-प्र-वस् c., निर्वस् c., गृहाद्बहिष्कृ 8 U. —*v. i.* अपसृ 1 P, स्थानांतरं गम् 1 P, स्थानांतरे निविश् 6 P.

DISLOYAL, *a.* भक्तिहीन, राजद्रोहिन्, राजापथ्यकारिन्, अराजनिष्ठ, अप-वि-रक्त, असंतुष्ट. —LY, *adv.* भक्तिहीनतया, राजद्रोहेण, अपरागेण. —TY, *s.* राजद्रोहः, अभक्ति *f.*, अप-वि-रागः, राजापथ्यकारिता, असंतोषः.

DISMAL, *a.* उदासीन, अप्रसन्न, सशोक, सखेद, निरानंद, निरुल्लास. 2 उग्र, दारुण, घोर, रौद्र (द्री *f.*), भैरव (वी *f.*), भयप्रद, भयानक. —LY, *adv.* उग्रं, भयानकं. —NESS, *s.* दारुणता, उग्रता; औदासीन्यं.

DISMANTLE, *v. t.* वस्त्रं अपहृ 1 P, विवस्त्रीकृ 8 U. 2 उपकरणादिकं हृ, उपस्करादि अपनी 1 P.

DISMASK, *v. t.* कपटवेशं अवतृ c.

DISMAST, *v. t.* कूपकं भंज् 7 P.

DISMAY, *s.* सं-,त्रासः, साध्वसं, भयं, भीति *f.*, उद्वेगः, सविस्मयः त्रासः, आकुलत्वं; कातर्यं; 'filled with d.' पर्याकुल, संभ्रांतचित्त. —*v. t.* संत्रस् c., विस्मयं-साध्वसं उत्पद् c., भयेन उपहन् 2 P, उद्विज् c.; *See* DAUNT.

DISMEMBER, *v. t.* अंगानि विघट् c. (घटयति) or पृथक् कृ 8 U, अवयवशः छिद् 7 P; विभज् 1 U, विश्लिष् c., वियुज् 7 A, 10.—MENT, *s.* अंगव्यवच्छेदः, अवयवशः विभागः, विश्लेषः, भंगः.

DISMISS, *v. t.* विसृज् 6 P or c., प्रस्था c. (प्रस्थापयति), संप्रेष् c., गंतुं अनुज्ञा 9 U or आदिश् 6 P. 2 (From office &c.) अधिकारात्-पदात् च्यु c. or

भ्रंश् c. or अवरुह् c.; *See* DISCHARGE; 'd. ed from office' अधिकारच्युत-भ्रष्ट, भ्रष्टाधिकार. 3 अपास् 4 P, हा 3 P, उत्सृज्, अपनी 1 P, अपनुद् 6 P, त्यज् 1 P, दूरीकृ 8 U, निरा-अपा-कृ, मुच् 6 P; 'd. all anxiety' सर्वथा वीतचिंतो भव, औत्सुक्यमपाकुरु. 4 प्रत्याख्या 2 P, प्रत्यादिश् 6 P. -ION, -AL, *s.* प्रस्थापनं, विसर्जनं. 2 पदाद् अवरोपणं; अधिकारभ्रंशः-च्युति *f.*, पदहानि *f.* 3 निराकरणं; प्रत्यादेशः, त्यागः, &c.

DISMOUNT, *v. i.* (अश्वात्-अश्वपृष्ठात्) अवतॄ-अवरुह् 1 P. -*v. t.* Causal of roots above.

DISOBEY, *v. t.* (Orders) भंज् 7 P, उल्लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अतिचर् 1 P; प्रतीपं गम् 1 P, न अनुष्ठा 1 P, न अनुवृत् 1 A, न अनुरुध् 4 A; (persons) आज्ञां भंज्, &c.; 'he was never d.-ed' तस्याज्ञा कदापि नोल्लंघिता, &c. -DISOBEDIENCE, *s.* आज्ञाभंगः, आज्ञालंघनं, शासनव्यतिक्रमः, अननुष्ठानं, प्रतीपाचरणं, अननुरोधः. -DISOBEDIENT, *a.* प्रतीपाचार, निदेशलंघिन्, अविधायिन्, अननुवर्तिन्, अवश, प्रतीप; not 'obedient' q. v.

DISOBLIGE, *v. t.* अप्रियं आचर् 1 P, अपराध् 4, 5 P (with gen. or loc.), असंतोषं उत्पद् c., प्रतिकूलं-विप्रियं आचर् or अनुष्ठा 1 P. -ATION, अप्रियं, अपराधः, विप्रियं. -ING, *a.* अननुरोधिन्, अननुकूल, असंतोषकर (री *f.*).

DISORDER, *s.* आकुलत्वं, तुमुलं, विप्लवः, वैक्लव्यं, संभ्रमः, पर्याकुलता. 2 अक्रमः, क्रमभंगः, अव्यवस्था, व्यस्तता, संकरः, संक्षोभः, व्यतिक्रमः. 3 रोगः, पीडा, व्याधिः, आमयः, अस्वास्थ्यं; 'd. of the stomach' जठरामयः, अन्नविकारः; 'd. in the army' समुत्पिंजः, पिंजलः, अत्यंतमाकुलं. -*v. t.* आकुलीकृ 8 U, व्यस् 4 U, व्यामुह् c., संभ्रम् c. (भ्रमयति). 2 पर्यस्, संक्षुभ् c., क्रमं भंज् 7 P, संकरीकृ 8 U, संकुलीकृ. 3 पीड् 10, व्यथ् c., अस्वस्थ *a.* कृ. -ED, *a.* विपर्यस्त, भग्नक्रम, व्यस्त, व्यत्यस्त, संकुल, संकीर्ण, अव्यवस्थित; 'd. in mind' आकुल, संभ्रांत, व्यग्र-मूढ-चित्त. 2 अस्वस्थ, पीडित, आतुर, व्याध्युपसृष्ट, रुग्ण, रुजार्त. -LY, *a.* अव्यवस्थित; *See* above. 2 अनवस्थित, नियमविरुद्ध, अवश, अनियत, उद्दाम, उच्छृंखल, अविधेय. -*adv.* अक्रमं, क्रमभंगेन; ससंभ्रमं. 2 अविधितः, विधि-नियम-विरुद्धं.

DISORGANIZE, *See* DISORDER.

DISOWN, *v. t.* प्रत्याख्या 2 P, प्रत्याचक्ष् 2 A; *See* DENY.

DISPARAGE, *v. t.* परिभू 1 P, उपेक्ष् 1 A, अपकृष् 1 P, अवज्ञा 9 U; *See* CONTEMN. 2 मूल्यं न्यूनीकृ 8 U, अवमन् 4 A, लघूकृ, अपलप् 1 P; *See* DEPRECIATE. 3 अयोग्यविवाहे संबंध् 9 P, अयोग्यसंयोगेन अपकृष्. -MENT, *s.* अवज्ञा, तिरस्कारः, अवमानना, परिभवः, उपेक्षा; अभ्यसूया, परीवादः, गुणापकर्षः, गुणापलापः. 2 अयोग्यसंबंधः. -ER, *s.* निंदकः, अवमानिन् *m.*

DISPARITY, *s.* असाम्यं, विषमता, वैषम्यं, भेदः, असमानता, असंगतता, असंगति *f.*

DISPART, *v. t.* विभज् 1 U, द्विधा भिद् 7 P, वियुज् 7 A, 10.

DISPASSION, *s.* विरागः, प्रशांति *f.*, अक्रोधः; निरीहता, औदासीन्यं, निःसंगता. -ATE, *a.* वीतराग, शांत, असंभ्रांत, उदासीन, अक्रोधन, निरीह, निःसंग, विरक्त, मुक्तसंग, समचित्त, अपक्षपातिन्. -ATELY, *adv.* शांतचेतसा, समबुद्ध्या, असंभ्रमं, अपक्षपातेन.

DISPATCH, *See* DESPATCH.

DISPEL, *v. t.* अप-परा-नुद् 6 P, निर्-अप-अस् 4 U, निराकृ 8 U, प्रति-अप-निः-सृ c., अपनी 1 P, अपऊह् 1 U, अपाकृ, उच्छिद् 7 P, हृ 1 P, नश् c., विभिद् 7 P, वि-प्र-ध्वंस् c., अव-उत्-सद् c., हन् 2 P (gen. in comps.).

DISPENSARY, *s.* औषधशाला, रोगचिकित्सास्थानं.

DISPENSE, *v. t.* विधा 3 U. प्रणी 1 P, निर्वह् c., प्रवृत् c.; 'd. er of laws' राजशासनानां प्रवर्तयिता. 2 विभज् 1 U, पृथक् पृथग् विन्यस् 4 U, or विधा or वितॄ 1 P, परिक्लृप् c. 3 (with) Ex. by न कार्यं or न प्रयोजनं; 'I d. with your services' तव सेवया न मे किमपि कार्यं-प्रयोजनं; उपेक्ष् 1 A, त्यज् 1 P, अवसृज् 6P. -ATION, *s.* विभजनं, विभागः, प्रणयनं, वितरणं, भागकल्पनं, परिकल्पनं. 2 व्यवस्थाभंगानुज्ञा, नियमलंघनानुमति *f.* 3 ईश्वरस्य नरेण संव्यवहारः. -ATOR, *s.* विभजकः, विभागकल्पकः. -ER, *s.* प्रवर्तकः, प्रणेता, निर्वाहकः.

DISPEOPLE, *v. t.* निर्जनीकृ 8 U.

DISPERSE, *v. t.* अप-वि-कृ 6 P, विक्षिप् 6 P, इतस्ततः विद्रु c. or गम् c.; वि-प्र-सृ c., पर्यस् 4 U, दिशि दिशि गम् c.; *See* DISPEL. -*v. i.* अप-सृ 1 U or विद्रु 1 P; *See* BREAK UP. -ER, *s.* विद्रावयितृ *m.*, उच्छेदकः; अपहः, नाशकः, हरः, in comp. -ION, *s.* विद्रावणं, विक्षेपः, विकिरणं.

DISSPIRIT, *See* DISCOURAGE.

DISPLACE, *v. t.* (स्वस्थानात्) विचल् c., अप-निः-सृ c., निरस् 4 U, भ्रंश् c., च्यु c., निराकृ 8 U, अपास्. 2 Discharge, q. v. -MENT, *s.* स्थाननाशः-भ्रंशः, स्वस्थानात्-चलनं-च्युति *f.*

DISPLANT, *v. t.* उन्मूल् 10, उच्छिद् 7 P, उत्पट् 10. 2 निर्वस् c., स्थानाद् भ्रंश् c. or निरस् 4 U.

DISPLAY, *v. t.* दृश् c., प्रकाश् c., व्यंज् 7 P, विवृ 5 U, आविष्कृ 8 U, प्रकटीकृ, स्फुटीकृ. 2 वितन् 8 U, विस्तॄ c., प्रसृ c., विक्रम् c., विलस् c.; 'd. itself' उद्-वि-जृंभ् 1 A. -*s.* उल्लासः, विकासः, प्रकाशनं, दर्शनं, व्यक्ति *f.*, विवरणं, आविष्करणं, विजृंभणं, विजृं-

भितं, विलासः, विलसितं ; ‘ d. of genius ’ मतिविलासः ; ‘ d. of ignorance ’ अज्ञानविजृंभितं.

DISPLEASE, *v. t.* विप्रियं-अनिष्टं-कृ 8 U, असंतोषं-कोपं-जन् c., प्रतिकूलं आचर् 1 P, कुप् c., रुष् c., अपराध् 4, 5 P (with gen. or loc.), वि-अप-रंज् c. –ED, *a.* असंतुष्ट, जातामर्ष, कृतरोष, अप्रसन्न, रुष्ट, कुपित, अप-वि-रक्त. –ING, *a.* अप्रिय, असंतोषजनक, कोपावह. –URE, *s.* असंतोषः, क्रोधः, अप्रसादः, अप-वि-रागः ; *See* ANGER.

DISPLODE, *See* EXPLODE.

DISPLUME, *v. t.* पक्षान् उद्-हृ 1 P or उत्पट् 10.

DISPORT, *v. See* AMUSE, PLAY. –*s.* विहारः, क्रीडा, केलि *f.*, विलासः.

DISPOSE, *v. t.* विन्यस् 4 U, रच् 10, संविश् 3 U. विनियुज् 7 A, 10, व्यूह् 1 U, क्रमेण स्था c. (स्थापयति). 2 विनि-प्र-युज्, निक्षिप् 6 P, दा 3 P, वितॄ 1 P. 3 प्र-उप-क्लृप् c. 4 प्रवृत् c., प्रयुज् 10, प्रोत्सह् c. –of, विनि-उप-प्र-युज् ; ‘ how have you d. ed of my money ’ मम द्रव्यस्य कथं त्वया विनियोगः कृतः ; ‘ d. of goods ’ विक्री 9 A ; ‘ d. of time ’ क्षै c. (क्षपयति), नी 1 P, या c. ; ‘ d. of a girl ’ (विवाहे) दा, वितॄ, प्रतिपद् c. 2 (Perform) समाप् c., अवसो 4 P. –AL, *s.* विन्यासः, रचना, व्यवस्थापनं, परिपाटि-टी *f.* 2 विनियमः. 3 समर्पणं, वितरणं, विनियोगः, परिकल्पनं, प्रविभागः. 4 अधिकारः, वशः-शं, अधीनता, आयत्तता ; ‘ I am at your d. ’ अहं त्वदधीनोस्मि ; ‘ this matter is at your d.’ अयमर्थस्त्वदायत्तः, अत्र भवान् प्रभवति ; ‘ divine d.’ परमेश्वरेच्छा, नियतिः. –ED, *a.* विन्यस्त, व्यवस्थित, रचित. 2 (Inclined) ex. by शील in comp., or काम with inf. ; ‘ d. to quarrel’ कलहशील, कलहकाम ; ‘d. to fall’ पातुक, पतयालु ; ‘ d. to go ’ गंतुकाम ; ‘ well-d. ’ सुस्वभाव, स्निग्ध, सस्नेह. –ER, *s.* प्रदातृ *m.*, विनियोगकृत् *m.* 2 विनियंतृ *m.*, अधिष्ठातृ *m.*, शासितृ *m.* –ITION, *s.* Disposal, q. v. 2 भावः, स्वभावः, शीलः-लं, प्रकृति *f.*; ‘ good d. ’ सद्भावः, साधुशीलत्वं, सौजन्यं, सुशीलं. 3 प्रवृत्ति *f.*, प्रवणता, शीलता-आलुता in comp. –URE, *s.* अधिकारः, शक्ति *f.*, विनियोगसामर्थ्यं. 2 अवस्थानं.

DISPOSSESS, *v. t.* अधिकारात्-स्वत्वाद्-भ्रंश् c. or निराकृ 8 U, स्वत्वं हृ 1 P; ‘ d.ed of one’s right ’ हृताधिकार, अधिकारभ्रष्ट.

DISPRAISE, *See* CENSURE.

DISPREAD, *v. t.* नानादिक्षु विहृ c., बहुधा वि-क्षिप् 6 P.

DISPROPORTION, *s.* वैषम्यं, असमता, अननुरूपता, असंगतता, अयोग्यता. –*v. t.* अयुक्तं संबंध् 9 P or संयुज् 7 U, 10. –ED,-ATE, *a.* विषम, अननुरूप, असम, अयोग्य, अतुल्यगुण, अतुल्य, अनुपयुक्त, असंगत, असंवादिन्. –ATELY, *adv.* अननुरूपं, असमं, अयुक्तं. –ATENESS, *s.* वैषम्यं; *See* (*s.*)

DISPROVE, *v. t.* प्रत्याख्या 2 P, निराकृ 8 U, निरस् 4 U, खंड् 10, बाध् 1 A; *See* CONFUTE. –DISPROOF, *s.* खंडनं, निरसनं, बाधः-धा, निराकरणं, प्रत्याख्यानं. 2 अनिर्णयः, अनिश्चयः, अप्रमाणं.

DISPUTE, *v.* विवद् 1 A, कलहायते (D.), विप्रतिपद् 4 A, विप्रलप् 1 P, वितर्क् 10; ‘ what are you d.ing about ’ किमर्थं विवदध्वे, किंवः विवादवस्तु. 2 विचर् c.; गुरोराज्ञा अविचार्या ‘ not to be d. ed ’ विकॢप् c. –*s.* विवादः, कलहः, वादः, विप्रलापः, विप्रतिपत्ति *f.*, वितर्कः, वाग्युद्धं, वादयुद्धं, वितंडा; ‘ subject under d.’ विवादवस्तु, विवादास्पदं ; ‘ it is a d. ed point ’ वादग्रस्तोर्थः. –ANT,-ER, *s.* तर्किन् *m.*, वि-, वादी, हेतुवादी, नैयायिकः; तार्किकः; ‘ a d. might ask ’ ex. by ननु (followed by अत्रोच्यते or उच्यते), or अत्र कश्चित् प्रत्यवतिष्ठते. –ATION, *s.* वादः, तर्कः; *See* (*s.*). –ATIOUS, *a.* कलहशालि, वादप्रिय, विवादार्थिन्, कलहप्रिय-काम.

DISQUALIFY, *v. t.* अक्षम-अयोग्य *a.* कृ 8 U, अपात्रीकृ. –ICATION, *s.* निर्गुणः, प्रत्यूहः, अपात्रता, अक्षमता.

DISQUIET, *v. t.* आकुलीकृ 8 U, बाध् 1 A, संपीड् 10, क्षुभ् c., उद्विज् c., मुह् c. –*s.*,-NESS,-UDE, *s.* चिंता, उद्वेगः, आकुलत्वं, व्यग्रता, संभ्रमः, बाधा, औत्सुक्यं, वैक्लव्यं, क्षोभः, व्यामोहः, अनिर्वृति *f.* –ED, *a.* उद्विग्न, अनिर्वृत, क्षुब्ध, संभ्रांत, आकुल, व्यग्र, मूढ.

DISQUISITION, *s.* विचारः, परीक्षा, विवेचनं, विमर्शः, निरूपणं.

DISREGARD, *v. t.* उपेक्ष् 1 A, अवधीर् 10, अवज्ञा 9 U, अवमन् 4 A, अवगण् 10, तिरस्कृ 8 U, धिक्कृ, न श्रु 5 P, न आदृ 6 A, न अपेक्ष् 1 A. –*s.* उपेक्षा, अनादरः, अवधीरणा, अवज्ञा, अनपेक्षा, अनवधानं, निरपेक्षता. –FUL, *a.* निरपेक्ष, अनवधान, मंदादर, उपेक्षक, अवमानिन्. –FULLY, *adv.* निरपेक्षं, उपेक्षया, अनपेक्ष्य.

DISRELISH, *s.* अरुचि *f.*, विरागः, विरक्ति *f.*, विमुखता, अप्रीति *f.*, विद्वेषः. –*v. t.* विद्विष् 2 U, न रुच् 1 A.

DISREPUTE, –ATION, *s.* अ-अप-कीर्ति *f.*, अयशस् *n.*, अप्रतिष्ठा, वाच्यता, अपमानः. –ABLE, *a.* अकीर्तिकर (री *f.*), अनार्य, गर्हित, अयशस्कर, कलंककर, निंद्य, दूषणीय.

DISRESPECT, *v. t.* न आदृ 6 A, अवमन् 4 A, उपेक्ष् 1 A, अवज्ञा 9 U, अवगण् 10, न मन् c. ; *See* CONTEMN. –*s.* अवज्ञा, अनादरः, अवमानः, अवधीरणं-रणा, उपेक्षा, परिभवः, तिरस्कारः. –FUL, *a.* सावज्ञ, उपेक्षक, परिभाविन्, अवमानिन्.

DISROBE, *v. t.* विवसनाकृ 8 U, वस्त्रं अपकृष् 1 P, विवस्त्रयति (D.).

DISRUPTION, *s.* भंगः, विदारणं, भेदः.

DISSATISFY, *v. t.* असंतोषं-अतृप्तिं-उत्पद् c. or जन् c. (जनयति) ; न संतुष् c., न तृप् c. ; अप-वि-रंज् c. -ED, *a.* अतृप्त, विरक्त, वितुष्ट, असंतुष्ट, अपरक्त. DISSATISFACTION, *s.* अतृप्ति *f.*, असंतोषः, विरक्ति *f.*, अप-वि-रागः.

DISSECT, *v. t.* (अंगानि) व्यवच्छिद् 7 P, निकृत् 6 P, पृथक् कृ 8 U. 2 सूक्ष्मं विचर् c. or परीक्ष् 1 A. -ION, *s.* व्यवच्छेदः, अंगच्छेदः. 2 सूक्ष्मपरीक्षणं. -OR, *s.* व्यवच्छेदकः.

DISSEMBLE, *v. t.* अप-व्यप-दिश् 6 P, नि-अप-ह्नु 2 A ; *See* CONCEAL. -ER, *s.* छाद्मिकः, दांभिकः, व्यपदेशकः, छद्म-कपट-वेशिन् *m.* -ING, *s.* अपह्नवः, प्रतारणा, गोपनं, अपलापः, छद्मन् *n.*, दंभः, कपटं.

DISSEMINATE, *v. t.* वि-प्र-कृ 6 P, प्रसृ c., विस्तृ c., प्रचर् c., निवप् 1 P. -ION, *s.* प्रसारः, प्रसरणं, विस्तारः, प्रचारणं. -OR, *s.* प्रचारकः, प्रसारकः.

DISSENT, *v. i.* विवद् 1 A, विसंवद् 1 P, न संमन् 4 A, अन्यथा मन्, अन्यमत *a.* भू. -*s.* वैमत्यं, असंमति *f.*, मतिभेदः, विमतिः, विसंवादः, विरोधः, विप्रतिपत्ति *f.* -ER, *s.* भिन्नमतावलंबिन् *m.* 2 साधारणधर्मविरोधिन् *m.* -IENT, *a.* विमत, भिन्नमत, असंवादिन् ; ' without one d. voice' सर्वेषामैकमत्येन.

DISSENSION, *s.* भेदः, कलहः, कलिः, विरोधः, विप्रतिपत्ति *f.*, विवादः; ' seeds of d. ' कलहबीजं ; ' sowing d. ' उपजापः, भेदः; ' a sower of d. ' उपजापकः, भेदकः; ' family d. s ' गृहच्छिद्रं-रंध्रं, अंतर्भेदः.

DISSERTATION, *s.* विवरणं, वचनं, प्रबंधः, निबंधः.

DISSERVE, *v. t.* अपकृ 8 U, न उपकृ, हिंस् 7 P. -ICE, *s.* अपकारः, क्षति *f.*, अपायः, हानि *f.*

ECLIPSE, *s.* ग्रहः, ग्रहणं, ग्रासः, उपरागः, उपसर्गः, उपप्लवः, ग्रहपीडनं. -*v. t.* ग्रस् 1 A, प्र-आ-च्छद् 10, तिमिरयति (D.), ग्रह् 9 P, उपसृज् 6 P, उपप्लु 1 A, उपरंज् c. 2 (fig.) प्र-आ-,छद्, (गुणवत्तरपात्रेण छाद्यंते गुणिनां गुणाः P. I. 10); प्रत्यादिश् 6 P; 'Urvas'i e. s Lakshmi, proud of her beauty' उर्वशी प्रत्यादेशो रूपगर्वितायाः श्रियः (V. 1). -ED, *a.* उपरक्त, उपसृष्ट, ग्रस्त, उपप्लुत, सोपप्लव, ग्रहपीडित. 2 तमोवृत, प्रच्छन्न, मलिनप्रभ. 3 प्रत्यादिष्ट, प्रत्याख्यात.

ECLIPTIC, *s.* क्रांतिवृत्तं-मंडलं, रविमार्गः.

ECONOMY, *s.* निर्वाहः-हणं, प्रणयनं, नयः, नीति *f.*; 'e. of the house' गृहकार्यनिर्वाहः, गार्हस्थ्यं. 2 परिमित-मित-व्ययः, स्वल्प-विवेक-व्ययः, अमुक्तहस्तत्वं. 3 विन्यासः, विरचनं, प्रकल्पनं, संविधानं. 4 (Political) अर्थशास्त्रं, राजनीतिः-शास्त्रं. -IC,-ICAL, *a.* मित-स्वल्प-व्यय, अमुक्तहस्त. 2 कार्यनिर्वाहसंबंधिन्. -ICALLY, *adv.* मित-स्वल्प-व्ययेन, अमुक्तहस्तं. -IST, *s.* मितव्ययिन् *m.*, अमुक्तहस्तः. 2 अर्थशास्त्रज्ञः, राजशास्त्रविद् *m.*, नीतिज्ञः. -IZE, *v. t.* मितं व्यय् 10 (व्ययति), स्वल्पशः विनि-प्र-युज् 7 A, 10. -*v. i.* मितव्ययेन गृहकार्याणि निर्वह् c. or प्रणी 1 P.

ECSTASY, *s.* हर्षोन्मादः, आनंदभरः, प्रहर्षः, प्रमदः, अत्यानंदः, संमोहः, उन्मादः. -ED, *a.* हर्षोन्मत्त,-पुलकित, हर्षमूढ-जड. -ECSTATIC,-AL, *a.* उन्मादिन्, संमोहिन्, परमानंदप्रद, मोहक.

ECUMENICAL, *a.* सर्वसाधारण (णी *f.*).

EDACIOUS, *See* GREEDY.

EDDY, *s.* आवर्तः, भ्रमः-मि *f.*, भ्रमरकः.

EDENTATED, *a.* निर्दशन, नीरद.

EDGE, *s.* धारा, अग्रं, कोटि-अश्रि *f.*, पालि-ली *f.*, अणिः-णी. 2 उपांतः, सीमा, प्रांतः, परिसरः, पर्यंतः, उत्संगः; समंतः. 3 अंचलः, दशाः pl. (of garments). 4 तेजस् *n.*, तीक्ष्णता, निशितता; 'e. of a brook' कच्छः, कूलं, तीरं, तटं; 'two or double e.-ed' द्विधार, उभयतस्तीक्ष्ण; कार्यद्वयसाधक; 'setting the teeth on e.' दंतहर्षः. -*v. t.* प्रांतयति (D.), पर्यंतेन सनाथीकृ 8 U. 2 शो 4 P, तिज् c., तीक्ष्णीकृ. -ED, *a.* कोटिमत्, धारासनाथ, तीक्ष्ण, सधार; 'sharp e.' तीक्ष्णाग्र, निशितधार. -LESS, *a.* अतीक्ष्ण, धाराहीन.

EDIBLE, *a.* खाद्य, भक्ष्य, भोज्य.

EDICT, *s.* शासनं, राजाज्ञा, राजशासनं; 'written e.' आज्ञा-शासन-पत्रं.

EDIFICE, *s.* भवनं, सदनं, हर्म्यं, मंदिरं, गृहं, प्रासादः, सौधं.

EDIFY, *v. t.* उत्कृष् 1 P, उन्नी 1 P, उन्नति-उत्कर्षं प्राप् c. 2 ज्ञानं वृध् c., शिक्ष् c., उपदिश् 6 P, मोहं-भ्रांतिं-नश् c. or निरस् 4 U. -ED, *a.* प्राप्तज्ञान, निरस्तमोह, उपदिष्ट. -ICATION, *s.* ज्ञानप्राप्ति-वृद्धि *f.*, उपदेशः, शिक्षणं. -ING, *a.* उपदेशक, ज्ञानवर्धक.

EDIT, *v. t.* शोधयित्वा प्रकाश् c., शुध् c. 2 लिख् 6 P. -ION, *s.* प्रकाशनं, शोधनं, प्रकटीकरणं. 2 आवृत्ति *f.* -OR, *s.* प्रकाशकः. 2 लेखकः.

EDUCATE, *v. t.* विनी 1 P, शास् 2 P, अनुशास्, प्रबुध् c., शिक्ष् c., अधि-इ c. (अध्यापयति), संस्कृ 8 U;

उपदिश् 6 P. 2 विद्यादानेन पा c. (पालयति) or संवृध् c. or पुष् c. —ED, *a.* कृत-गृहीत-उपात्त-लब्ध-विद्य, शिक्षित प्रबुद्ध; संस्कृतचित्त, विनीत, व्युत्पन्न, कृताभ्यास, लब्ध ज्ञान. —ION, *s.* विनयः, शिक्षा-क्षणं, अध्यापनं, अनुशासनं, संस्कारः, विद्यादानं-ग्रहणं-प्राप्ति *f.*, व्युत्पत्ति *f.*, उपदेशः. 2 पोषणं, संवर्धनं. —OR, *s.* विनेतृ *m.*, शिक्षकः, प्रबोधकः.

EEL *s.* जलव्यालः. अंधाहिः.

EFFABLE, *a.* कथनीय, निर्वचनीय; वाच्य; 'in-e.' अनिर्वचनीय; 'in-e. joy' कोपि आनंदः, किमपि सुखं.

EFFACE, *v. t.* अप-प्र-व्या-उद्-निर्-मृज् 2 P or c., विनश् c., उच्छिद् 7 P, विलुप् 6 P or c., उद्-हृ 1 P, उन्मूल् 10. —*v. i.* उच्छूस् 2 P. —MENT, *s.* अपामार्जनं, लोपः, व्यामर्षः; 'e. of colours' वर्णिकोच्छ्वासः (S. 6).

EFFECT, *s.* कार्यं, नैमित्तिकं; उत्पन्नं, निष्पन्नं, सिद्धि *f.* 2 फलं, परिणामः, फलोदयः, उत्तरफलं, अंतः. 3 अर्थः, प्रयोजनं, गुणः, फलं, प्रभावः. 4 अभिप्रायः, आशयः. 5 निष्पत्ति-सिद्धि-*f.*; 'of no e.' निष्फल, निष्प्रयोजन, निर्गुण; 'to take e.' फल् 1 P, मूर्च्छ् 1 P, (छाया न मूर्च्छति मलोपहतप्रसादे दर्पणतले S. 7); 'to take no e.' ex. by कुंठ, (वज्रं तपोवीर्यमहत्सु कुंठं K. III. 12); 'to this e.' इति, एतदभिप्राय *a.*; 'to what e.' किमर्थं, केन हेतुना; 'to destroy the e. of' निष्फली-मोघी-कृ 8 U; 'in e.' अर्थतः, वस्तुतः, तत्त्वतः. 6 (E. s.) विभवः, द्रव्याणि, धनसामग्री, रिक्थं. —*v. t.* कृ 8 U, विधा 3 U, सं-निः-पद् c., साध् 5 P or c., निर्वृत् c., निर्वह् c. 2 जन् c., उत्पद् c. —IVE, *a.* कार्यसाधक, फलवत्, निष्पादक, संपादक, फलोत्पादक; 'e. speech' हृदयग्राहि वचः. —UAL, —EFFICACIOUS, *a.* फलोत्पादक, गुणावह, अमोघ, अन्वर्थ, गुणवत्, सिद्धिकर (री *f.*), कार्यसाधक, सफल. 2 प्रबल, समर्थ, सप्रभाव, क्षम, अलंतम. —UALLY, *adv.* अमोघं, सफलं, निष्पत्तिपूर्वं, अन्वर्थं. 2 प्रभावेण, सामर्थ्येन. —UATE, *v. t.* कृ, संपद् c., &c.

EFFEMINATE, *a.* क्लीब, दुर्बल, सुकुमार. 2 स्त्रैण (णी *f.*), स्त्रीधर्मन्, स्त्रीवदाचारिन्, स्त्रीप्रकृति, स्त्रीगुणविशिष्ट; स्त्रीभाव; 'an e. man' क्लीबः, कापुरुषः, गेहेशूरः.—*v. t.* क्लीबीकृ 8 U, दुर्बली-निष्पुरुषी-कृ. —LY, *adv.* क्लीबवत्, नारी-स्त्री-वत्, स्त्रीधर्मानुसारेण. —EFFEMINACY, *s.* क्लीबता, दौर्बल्यं, स्त्रीत्वं, स्त्रैणं, स्त्रीधर्माचरणं, सौकुमार्यं, मृदुता.

EFFERVESCE, *v. i.* बुद्बुदायते (D.), फेनायते (D.), उत्सिच् pass., उच्छूनीभू, फेनिलीभू. —ENCE, *s.* फेनोद्गमः, उत्सेचनं, बुद्बुदायितं, फेनिलता, उच्छूनीभावः, मंडोद्गमः. 2 उत्तापः, संक्षोभः; आलोडनं. —ING, *a.* फेनिल, फेनायमान.

EFFICACY, *s.* प्रभावः, बलं, सामर्थ्यं, गुणः, शक्ति *f.*, तेजस् *n.*, क्षमता, अमोघता, सफलता, फलोत्पादकत्वं. —OUS, *a.* प्रबल, समर्थ; *See* EFFECTUAL.

EFFICIENT, *a.* कार्यसाधक, कार्यसिद्धिक्षम, कार्योपयुक्त, विचक्षण, कर्मक्षम, अलंकर्मीण, निपुण; *See* EFFECTUAL also. —LY, *adv.* अमोघं, सिद्धिपूर्वं, निपुणं, विचक्षणतया. —EFFICIENCY, *s.* कार्यक्षमता, कार्यसिद्धिक्षमता, नैपुण्यं, वैचक्षण्यं.

EFFETE, *a.* जीर्ण, दुर्बल, निःशक्ति, क्षीण, निःसत्व, क्षीणशक्ति. 2 वंध्य, निष्फल, मोघ.

EFFIGY, *s.* प्रतिमा, मूर्ति-प्रतिकृति *f.*, प्रतिरूपं.

EFFLORESCENCE, *s.* पुष्पोत्पादनं, प्रस्फोटनं. 2 दद्रुः.

EFFLUENCE, *s.* प्रवाहः, निर्गमः, प्रस्रवः, निःस्रवणं.

EFFLUVIUM, EFFLUVIA, *s.* उद्गारः, वासः. 2 दुर्गंधः, पूतिगंधः.

EFFLUX, EFFLUXION, *s.* प्रवाहः, निस्रावः, ओघः, निःसारः-सरणं, निर्गमः.

EFFORT, *s.* प्र,-यत्नः, उद्यमः, व्यवसायः, आयासः, चेष्टा, चेष्टितं; 'to make e. s' उद्यम् 1 P; *See* ATTEMPT.

EFFRONTERY, *s.* धाष्टर्य, वैयात्यं, निर्लज्जत्वं, प्रागल्भ्यं, प्रतिभानं.

EFFULGENT, *a.* दीप्तिमत्, तैजस (सी *f.*), उज्ज्वल, सुप्रभ, तेजस्विन्. —EFFULGENCE, *s.* तेजस् *n.*, दीप्ति-कांति *f.*, प्रभा; रुच् *f.*, शोभा; *See* BRIGHTNESS.

EFFUSE, *v. t.* प्र-निः-सृ c., प्रमुच् 6 P, उत्-वि-सृज् 6 P, पत् c., नि-अव-सिच् 6 P. —ION, *s.* उत्सर्गः, निषेकः, स्रावः, मोक्षणं, अवपातनं.

EGG, *s.* अंडं, पेशि-शी *f.*, कोषः-शः; 'lay e. s' अंडमोक्षणं कृ 8 U, अंडानि सू 2 A; 'e. on' प्रोत्सह् c.; *See* PROMPT.

EGLANTINE, *s.* अरण्यजपा-वा.

EGOTISM, *s.* अहंकारः, आत्मश्लाघा-स्तुति *f.*, आत्माभिमानः, ममता. —EGOTIST, *s.* आत्मश्लाघिन्-अहंकारिन्-आत्माभिमानिन् *m.*, विकत्थनशीलः. —IC, -ICAL, *a.* अहंकारिन्, दृप्त, गर्वित; *See* ARROGANT. —ICALLY, *adv.* सदर्पं, आत्मश्लाघापूर्वं.

EGREGIOUS, *a.* अत्यंत, असाधारण (णी *f.*), विशिष्ट, प्रख्यात, प्रसिद्ध, उत्तम, प्रमुख; oft. by अति pr.; 'an e. rogue' सुप्रसिद्धः शठः; अतिमूर्खता, &c. —LY, *adv.* अत्यंतं, अतीव, भृशं, अतिमात्रं, सातिशयं.

EGRESS, *s.* निर्गमः, निष्क्रमः, निर्याणं, निःसरणं, अपसारः, निर्गति *f.*

EIGHT, *a.* अष्टन्, अष्टकं; 'in e. ways' अष्टधा; 'e. times' अष्टकृत्वः; 'e.-fold' अष्टगुण.

EIGHTEEN, *a.* अष्टादशन्.

EIGHTY, *a.* अशीति *f.*

EITHER, *pron.*, *a.* अन्यतर; 'on e. side' उभयतः. —*conj.* (-or) वा-वा; or वा singly.

EJACULATE, *v. i.* सहसा उदीर् 10 or उच्चर् c.,

प्रार्थनां उदाहृ 1 P. 2 उद्‍ 6 P, उत्क्षिप् 6 P. -ION, *s.* उद्गारः, आक्रंदनं, सहसा उदीरणं, उच्चारणं.

EJECT, *v. t.* निरस् 4 U, निराकृ 8 U, निःसृ c. ; *See* DRIVE AWAY, DISCHARGE. 2 उत्क्षिप्-उद्गृ-6 P. -ION, *s.* निःसारणं, निराकरणं, निष्कासनं; अधिकाराद् भ्रंशनं.

EJULATION, *s.* विलपनं, परिदेवनं, आर्तनादः, आक्रंदनं.

EKE, *v. t.* वृध् c., विस्तृ c., प्रसृ c., तन् 8 U.

ELABORATE, *v. t.* महाश्रमेण साध् c., or निष्पद् c. or निर्मा 3 A or विधा 3 U or प्रक्लृप् c. -ED, *a.* बहुश्रमसिद्ध, महाप्रयत्नकृत-विरचित-प्रकल्पित. -LY, *adv.* महायत्नेन, बहुश्रमेण, महायासेन. -ION, *s.* बहुश्रमेण निर्माणं.

ELAPSE, *v. i.* व्यति-इ 2 P, अतिक्रम् 1 U, 4 P, व्यतिक्रम्, गम् 1 P; 'days having e.-ed' दिनेषु गच्छत्सु.

ELASTIC, *a.* स्थितिस्थापक, प्रकृतिप्रापक. -ITY, *s.* स्थितिस्थापकता-त्वं.

ELATE, *v. t.* उत्सिच् 6 P, दृप् c., आध्मा 1 P; दर्पेण उद्-श्वि c. or उद्-हन् 2 P; *See* PUFF. 2 प्रहृष् c., प्रमुद् c., उल्लस् c. -*a.*,-ED, *a.* दर्पाध्मात, उद्धत, गर्वित, उत्सिक्त, मदोद्धत, दृप्त, गर्वोच्छून. 2 प्रहृष्ट, प्रमुदित, सोल्लास, हृष्टचित्त. -ION, *s.* गर्वः, दर्पः, औद्धत्यं, प्रहर्षः, चित्तोल्लासः.

ELBOW, *s.* कूर्परः, कफ(फो)णि *m. f.* 2 वंकः, पुटभेदः. -*v. t.* कूर्परेण आहत्य बहिष्कृ 8 U.

ELDER, *a.* ज्यायस्, वरीयस्, अग्रज, पूर्वज, वर्षीयस्, वयोज्येष्ठ; 'e. brother' अग्रजः, अग्रजन्मा, ज्यायान् भ्राता. -*s.* गुरुः, वृद्धः; 'e. s, elderly persons' गुरुजनः, गुरवः, आर्यजनः, वृद्धाः.

ELDEST, *s.* ज्येष्ठ, वर्षिष्ठ, वरिष्ठ, श्रेष्ठ, सर्वज्येष्ठ.

ELECT, *v. t.* वृ 5 U or 10 (वरयति), वृ 9 U. 2 ग्रह् 9 P, आदा 3 A, स्वीकृ 8 U. 3 नियुज् 7 A, 10, निरूप् 10, निर्वच् c., 'self-election' स्वयंवरः 'self-e. ed bride' स्वयंवरवधूः; 'e. ed him as her husband' पतित्वे तं वरयामास. -*a.*,-ED, *a.* नियुक्त, निरूपित, वृत, निर्वाचित; व्यावृत्त; 'a person e.' नियोज्यः, नियोगिन् *m.*, निर्वाचितः. -ION, *s.* नियोजनं, वरणं, निर्वाचनं, वृति *f.* -IVE, *a.* जननियुक्त; 'e. right' वरणाधिकारः; 'e. municipality' जननियुक्तसभ्या ग्रामपालिका. -OR, *s.* नियोजकः, निर्वाचकः, वरणाधिकारविशिष्टः; 'body of e. s, electoral body' नियोजकगणः.

ELECTER, ELECTRUM, *s.* कांस्यं, मिश्रधातुः.

ELECTRIC, *a.* वैद्युत (ती *f.*), विद्युन्मय (यी *f.*), विद्युद्विषय. -ITY, *s.* तडित्-विद्युत्-वैद्युतशक्ति *f.*

ELECTUARY, लेह्यं, अवलेहः.

ELEEMOSYNARY, *a.* दरिद्रार्थ, दरिद्रोपकारिन्.

ELEGANT, *a.* चारु, ललित, सुंदर, सुरूप, लावण्यवत्, श्लील, अग्राम्य, सुभग. 2 (As composition) सुरस, ललित, चारु. -LY, *adv.* सविलासं, चारु, ललितं. -ELEGANCE,-CY, *s.* चारुता, सौंदर्य, विलासः, लावण्यं, शोभा, विभ्रमः, लालित्यं; 'e. of words' पदलालित्यं.

ELEGY, *s.* करुणरसं गीतं, शोकगानं-गीति *f.*

ELEGIAC, *a.* करुणामय (यी *f.*), शोकप्रधान.

ELEMENT, *s.* भूतं, बीजं, मूलं, मूलवस्तु *n.* 2 तत्त्वं. 3 अवयवः, भागः, अंशः. 4 आरंभः, उपक्रमः, मूलतत्त्वं, बीजभूतं ज्ञानं. 5 वस्तुमात्रं; 'out of his e.' अस्थाने. -ARY, *a.* भौत (ती *f.*), भौतिक (की *f*). -ARY, *a.* अव्याकृत, शुद्ध, निरवयव. 2 मूल in comp., प्रारंभक.

ELEPHANT, *s.* गजः, हस्तिन्-करिन् *m.*, मातंगः, मतंगजः, कुंजरः, नागः, वारणः, इभः, द्विरदः, द्वि-अनेक-पः, दंती, दंतावलः, स्तंबेरमः; 'she-e.' करिणी, करेणु *f.*-णुका, वशा, धेनुका; 'a young e.' कलभः, करिशावकः; 'e. driver' हस्तिपः-पकः, आधोरणः, महामात्रः, निषादिन् *m.*; 'wild e.' वनगजः,वन्यः करी; 'furious or rutting e.' मदोत्कटः, मदकलः. प्रभिन्नः, गर्जितः, मत्तः; 'e. out of rut' उद्वांतः; निर्मदः; 'head of a herd of e.s' यूथनाथः, यूथपः; 'herd of e.s' हास्तिकं, गजता, गजयूथं; 'war-e. s' गजघटा; 'e. s of the quarters' दिग्गजाः ; 'frontal globe of an e.' कुंभः; 'e.'s fore-head' ललाटं, अवग्रहः ; 'his eyeball' इ(ई)षि(षी)-का, अक्षिकूटकं; 'corner of his eye' निर्याणं; 'root of his ear' चूलिका; 'his withers' आसनं, स्कंधदेशः; 'his side' पार्श्वभागः, पक्षभागः; 'the temple-juice' मदः, दानं; 'water emitted from the trunk' वमथुः, करशीकरः; 'his roaring' बृंहितं, गर्जितं; 'the whip to strike him' तोत्रं, वेणुकं; 'binding-post' आलानं; 'binding chains' शृंखलं, अंदुकः, निगडः; 'caparisoning of an e.' कल्पना, सज्जना; 'coloured housings' प्रवेणी, आस्तरणं, वर्णः, परिस्तो(स्तो)मः, कुथः.

ELEPHANTIASIS, *s.* श्लीपदं, शिलीपदं.

ELEVATE, *v. t.* उन्नम् c. (उन्नमयति), उच्छ्रि c., उद्यम् 1 P, उत्कृष् 1 P; उत्था c. (उत्थापयति), उन्नी 1 P, अधिरुह् c. (रोपयति), उन्नति-उत्कर्ष-नी or कृ 8 U; 'e. to a high office' उत्तमपदे नियुज् 7 A, 10, उत्कृष्टपदं प्राप् c. -ED, *a.* अधिरोपित, उन्नीत; उत्तमपदनियुक्त. 2 उच्छ्रित, उत्तुंग, उन्नत, सोच्छ्राय; *See* HIGH.-ION, *s.* उन्नति *f.*, उत्कर्षः; उच्छ्रायः, उत्थापनं, अधिरोपणं, उच्चपदप्रापणं, उदयः. 2 उत्सेधः, उत्तुंगता, उच्छ्रयः, उन्नतस्थानं; *See* HEIGHT.

ELEVEN, *a.* एकादशन्. -ELEVENTH, *a.* एकादश (शी *f.*) ; 'what is the use of doing things at the e. hour' प्रोद्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः (Bh. II. 88).

ELF, *s.* वेतालः, भूतः, पिशाचः, अपदेवता. –ISH, *a.* पैशाच (ची *f.*).

ELF-LOCK, *s.* जटा, सटा.

ELICIT, *v. t.* निर्गम् c. (गमयति), निष्कृष् 1 P, उद्धृ c., निःसृ c., प्रकाश् c., अपवह् 1 P or c., आविष्कृ 8 U, निर्णी 1 P, ज्ञा 9 U or c. (ज्ञापयति). –ATION, *s.* निष्कर्षणं, निर्गमनं, &c.

ELIDE, *v. t.* लुप् 6 P or c. –ELISION, *s.* लोपः.

ELIGIBLE, *a.* वरणीय, नियोज्य, ग्राह्य, आदेय.

ELIMINATE, *v. t.* नश् c., निष्कस् c., विलुप् 6 P or c., निराकृ 8 U. –ION, *s.* लोपः, नाशः, आहरणं, अपनयनं.

ELIXIR, *s.* रसायनं, तेजोवर्धनं.

ELLIPSE, *s.* अंडवृत्तं, उपवृत्तं-मंडलं. –ELLIPTIC, *a.* अंडाकार, अंडाकृति.

ELLIPSIS, *s.* न्यूनपदं, अध्याहारः, समर्थपदलोपः. 2 पद-वाक्य-आकांक्षा; 'supplying an e.' आकांक्षापूरणं. –ELLIPTICAL, *a.* न्यूनपद; अध्याहार्य, अभ्यूहनीय.

ELOCUTION, *s.* वाक्शक्ति *f.*, वक्तृत्वं, वाक्पटुता, वाग्मिता. 2 व्याहारः, वार्ता.

ELONGATE, *v. t.* दीर्घीकृ 8 U, आयम् 1 P; वितन् 8 U. –ED, *a.* आयत, आयामवत्, लंबाकृति, वितत. –ION, *s.* दीर्घीकरणं, प्रतानं, वितति *f.*, आयति *f.*

ELOPE, *v. i.* अलक्षितं पलाय् 1 A or अपसृ 1 P. –MENT, *s.* गूढव्यपसर्पणं, पलायनं.

ELOQUENT, *a.* वाग्मिन्, वागीश, वाग्विदग्ध, वक्तृ, वाक्पटु, शब्दचतुर. –LY, *adv.* वाग्विभवेन, शब्दचातुर्येण, वाक्पटुतया. –ELOQUENCE, *s.* वाक्पाटवं-शक्ति *f.*, वाग्मिता, वाग्विभवः, वक्तृत्वं.

ELSE, *a.* अन्य-इतर-अपर-*pron. a.*, भिन्न, व्यतिरिक्त; 'what e.' किमन्यत्, अथ किं; 'who e.' कोऽपरः. –*conj.* न(नो)चेत्, अन्यथा, इतरथा; एतद्विना, एतद्व्यतिरेकेण; 'e. where' अन्य-इतर-पर-त्र, स्थानांतरे, भिन्न-अन्य स्थाने.

ELUCIDATE, *v. t.* व्याख्या 2 P, व्याकृ 8 U, वि-वृ 5 U, स्पष्टी-विशदी-कृ; *See* EXPLAIN. –ION, *s.* व्याख्यानं, स्पष्टीकरणं, विवरणं. –OR, *s.* व्याख्यातृ *m.*, प्रकाशकः, विवरणकृत् *m.*

ELUDE, *v. t.* कौशलेन परिहृ 1 P; वृज् 10, छलेन अपसृ-निर्गम् 1 P or पलाय् 1 A (with abl.); 'e. ing the senses' इंद्रियागोचर; 'it e. s grasp' ग्रहीतुं न शक्यते. –ELUSION, *s.* छलेन परिहरणं; अलक्षितं अपसरणं or निर्गमः. –ELUSIVE, *a.* निर्गमपर, परिहारिन्. –ELUSORY, *a.* छलिन्, मायिन्.

ELYSIUM, *s.* वैकुंठं, स्वर्गः, नंदनं, आनंदस्थानं. –ELYSIAN, *a.* परमानंदप्रद, स्वर्गीय.

EMACIATE, *v. t.* कृशीकृ 8 U, क्षै c. (क्षपयति), क्लिश् 9 P, ग्लै c. (ग्ल-ग्ला-पयति), शुष् c., क्षीण *a.* कृ. –*v. i.* क्षि-ग्लै 1 P, शुष् 4 P, विशॄ-क्षि-pass., कृशीभू. –ED, *a.* क्षीण, क्षीणशरीर-शक्ति, कृश, क्षाम, ग्लान, क्षीण-शुष्क-मांस; अपचित; 'e. by hunger' क्षुत्क्षामकंठ. –ION, *s.* कृशता, क्षामता, क्षीणता, कार्श्यं, शरीरशोषणं, मांसक्षयः, अपचयः.

EMANATE, *v. i.* उत्पद् 4 A, निर्गम् 1 P, निःसृ 1 P, उत्-प्र-भू 1 P, जन् 4 A, निःसृ 1 P, प्रवृत् 1 A. –ION, *s.* उत्पत्ति *f.*, उद्भवः, प्रभवः, उद्गमः, निर्गमः, प्रवृत्ति *f.* –IVE, –EMANANT, *a.* उद्भूत, उत्पन्न, जात, ज, जन्य, प्रभव in comp.

EMANCIPATE, *v. t.* मुच् 6 P or c., वि-निर्°; मोक्ष् 10, उद्धृ 1 P, निस्तृ c., विसृज् 6 P. –ION, *s.* विमोचनं, मोक्षः, मुक्ति *f.*, उद्धारः, निस्तारः. 2 मुक्ति *f.*, मोक्षः; *See* BEATITUDE. –OR, *s.* मोचकः, मोक्षकः.

EMASCULATE, *v. t.* वृषणौ छिद् 7 P or कृत् 6 P, पुंस्त्वं हृ 1 P, षंढी-क्लीबी-कृ 8 U. –ED, *a.* हतवीर्यः, हतपुंस्त्वः, छिन्नवृषणः, मुष्कशून्यः, षंडः-ढः, क्लीबः, नपुंसकः. –ION, *s.* वृषणच्छेदः, पुंस्त्वहरणं.

EMBALE, *v. t.* भांडं कृ 8 U, एकत्र कृ.

EMBALM, *v. t.* रक्ष् 1 P; तैले निक्षिप् 6 P, क्षयाद्रक्ष. 2 सुरभीकृ 8 U, आमोदेन पूर् 10, वास् 10.

EMBANK, *v. t.* सेतुना-वप्रेण-बंध् 9 P. –MENT, *s.* सेतु-वप्र-बंधः, मृत्तिकाचयः, वप्रः.

EMBAR, *v. t.* निरुध् 7 U, निषिध् 1 P.

EMBARGO, *s.* निषेधः, वाणिज्यकर्मनिषेधः, अवरोधः.

EMBARK, *v. t.* नौकायां नि-प्र-विश् c. or निधा 3 U. –*v. i.* नावं or पोतं आ-अधि-रुह् 1 P or प्रविश् 6 P. 2 व्या-पृ 6 A, अभियुज् pass. (with loc.); प्रारभ् 1 A (with acc.). –ATION, *s.* नौकारोहणं-रोपणं-प्रवेशनं. 2 व्यापारः, अभियोगः, प्रारंभः, उपक्रमः.

EMBARRASS, *v. t.* आकुलयति (D.), वि-व्या-मुह् c., व्यग्रीकृ 8 U, संभ्रम् c. (भ्रमयति), आकुलीकृ; 'I am really e. ed' सत्यमाकुलीभूतोस्मि (S. 2). 2 बाध् 1 A, क्लिश् 9 P, उपरुध् 7 U, अभिभू. –ED, *a.* आ-व्या-कुल, व्यग्र, मोहित, संभ्रांत, मूढ. 2 बाधित, उपरुद्ध; क्लिष्ट, अभिभूत; 'in e. circumstances' आपद्गत, दुःस्थ, कृच्छ्रगत, दुर्गत; 'e. smile' विलक्षस्मित. –MENT, *s.* व्याकुलता, व्यग्रता, संभ्रमः, व्यामोहः, आकुलत्वं, क्लेशः, बाधः-धा, दुःखं, उपरोधः.

EMBASSY, *s.* दौत्यं, दूतधर्मः-क्रिया; 'sent on an e.' दूतः, दौत्येन प्रस्थापितः.

EMBATTLE, *v. t.* व्यूह् 1 U or c., व्यूहेन रच् 10 or सज्जीकृ 8 U or व्यव-स्था c. (स्थापयति), व्यूहरचनां कृ. –ED, *a.* सन्नद्ध, सज्जीकृत, व्यूहेन रचित.

EMBEDDED, *a.* निहित, निविष्ट, न्यस्त.

EMBELLISH, *v. t.* भूष् 10, अलंकृ 8 U, मंड् 10, शुभ् c., भ्राज् c., परिष्कृ, प्रसाध् c. –MENT, *s.* प्रसा-

भनं, भूषणं; *See* ORNAMENT. 2 नेपथ्यं, आहार्यं, वेशः, आकल्पः.

EMBERS, *s.* भसितं, भस्मन् *n.*; अंगारशेषं; अंगारोच्छिष्टं.

EMBEZZLE, *v. t.* छलेन आत्मसात्कृ 8 U, स्वकार्ये कृत्वा उप-विनि-युज् 7 A, 10; ग्रस् 1 A. -MENT, *s.* छलेन अपहारः or उपयोगः or आत्मसात्करणं, ग्रसनं; अप-नि-ह्नवः.

EMBITTER, *v. t.* तिक्तीकृ 8 U. 2 प्रकुप् c., उद्-दीप् c., कलुषीकृ. 3 क्लिश् 9 P, दु 5 P.

EMBLAZON, *v. t.* विभूष् 10, मंड् 10.

EMBLEM, *s.* लक्षणं, लांछनं, केतनं, केतुः, व्यंजनं, संज्ञा, ध्वजः, चिह्नं, लिंगं, पताका. -ATIC,-ATICAL, *a.* लाक्षणिक (की *f.*), व्यंजक, बोधक, लिंगिन्, सूचक, द्योतक.

EMBODY, *v. t.* सशरीर *a.* कृ 8 U, शरीरेण युज् 10 or सनाथीकृ. 2 संग्रह् 9 P, समाहृ 1 P, एकी-एकत्र -कृ. -ED, *a.* मूर्त, शरीरबद्ध, देहवत्, मूर्तिमत्, शरीरिन्; 'the e. spirit' शरीराभिमानी आत्मा. -MENT, *s.* शरीरिता, देहवत्त्वं, मूर्तिमत्ता. 2 मूर्ति *f.*, करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथा (U. 3) 'the e. of pathetic sentiment &c.' 3 संग्रहः, सन्निपातः, समाहारः, एकीकरणं.

EMBOLDEN, *v. t.* प्रोत्सह् c., आश्वस् c., निर्भय- *a.* कृ.

EMBOSS, *v. t.* गंडाकारेण परिष्कृ 8 U or उपशुभ् c.

EMBOW, *v. t.* भुज् 6 P; *See* BEND.

EMBOWEL, *v. t.* अंत्राणि अपनी or निर्हृ 1 P.

EMBOWERED, *a.* कुंजसनाथ, निकुंजित.

EMBRACE, *v. t.* आलिंग् 1 P, आश्लिष् 4 P; परि-, स्वंज् 1 A, उपगुह् 1 U; *See* CLASP. 2 स्वी-अंगीकृ 8 U; ग्रह् 9 P, आदा 3 A, अभ्युपगम् 1 P. 3 परिग्रह्, व्याप् 5 P, प्रतिसंहृ 1 P, समाविश् c. 4 परिवृ 5 U, परिवेष्ट् 1 A or c. -*s.* सं-आ-श्लेषः, आलिंगनं, परिरंभः, उपगूहनं, परिष्वंगः.

EMBRASURE, *s.* प्राकाराच्छिद्रं, जालकं.

EMBROCATE, *v. t.* (औषधीयजलेन) लिप् 6 P, अञ्ज् 7 P; मृद् 9 P, घृष् 1 P, संवह् c. -ION, *s.* मर्दनं, लेपनं, संवाहनं. 2 विलेपः-पनं, उपदेहद्रव्यं.

EMBROIDER, *v. t.* सूच्या पुष्पादिकं सिव् 4 P or चित्र 10, कार्मिकवस्त्रं कृ 8 U; 'an e. ed cloth' चित्रितं-कार्मिकं-वस्त्रं. -ER, *s.* कार्मिकवस्त्रकृत् *m.*, सूचिकर्मोपजीविन् *m.* -Y, *s.* सूचिकर्मन् *n.*, शिल्पं.

EMBROIL, *v. t.* संक्षुभ् c., आकुलीकृ 8 U, संकॄ 6 P, संकुलीकृ; विरागं उत्पद् c. -MENT, *s.* संक्षोभः, सांकर्यं, संभ्रमः, आकुलत्वं.

EMBRYO, EMBRYONE, *s.* गर्भः, भ्रूणः; 'in e.' गर्भच्छन्न, गर्भावस्थायां वर्तमान ; (fig.) अपरिणत, अपरिपक्व. 2 आ-प्रा-रंभः, उपक्रमः.

EMEND, *See* AMEND. -ATOR, *s.* शोधकः, समाधातृ *m.*

EMERALD, *s.* मरकतं, गारुत्मतं, अश्मगर्भः, हरिन्मणिः; 'e.-like' मारकत (ती *f.*), मरकतसदृश (शी *f.*).

EMERGE, *v. i.* (सलिलाद्) उन्मस्ज् 6 P, उत्था 1 P, निर्गम्-निःसृ 1 P; त्यज् 1 P. 2 आविर्भू 1 P, उदि 2 P, निर्भा 2 P, दृष्टिगोचर *a.* भू, दृश् pass., प्रकाशतां गम्, &c. -ENCE,-CY, *s.* संकटं, विपत्समयः, आपद् *f.*, आकस्मिकसंभवः. 2 अवसरः, प्रस्तावः, प्रयोजनं, आवश्यकत्वं; 'according to e.' यथाप्रयोजनं, यथावसरं, प्रसंगवशात्. -ENT, *a.* उन्मज्जत्. 2 आकस्मिक (की *f.*), अकस्मादुद्भूत, अत्यावश्यक (की *f.*), अपरिहार्य. -EMERSION, *s.* उत्थानं, उन्मज्जनं; त्यागः. 2 आविर्भावः, उदयः, &c.

EMERY, *s.* उत्तमलोहं.

EMETIC, *s.* वमनं, वांतिकृद् औषधं. -*a.*, -AL, *a.* वांतिकर (री *f.*).

EMINENT, *a.* उत्कृष्ट, विशिष्ट, प्रमुख, उत्तम, परम, श्रेष्ठ, प्रवर, वरेण्य, प्रधान. 2 विश्रुत, लब्धप्रतिष्ठ-वर्ण, महायशस्क, सुविख्यात, प्रख्यात; 'of e. qualities' गुणाढ्य. 3 उच्च, उन्नत, उच्छ्रित. -LY, *adv.* अत्यंतं, भृशं, अतिशयेन, अत्यर्थं, अति pr. -EMINENCE, *s.* उन्नतभूमि *f.*, उच्छ्रायः, उच्चस्थानं, उत्सेधः, उच्चभूभागः. 2 उत्कर्षः, विशिष्टता, परमपदं, श्रेष्ठत्वं, ख्याति *f.*, प्रतिष्ठा, उन्नति *f.*, प्रकर्षः, गौरवं.

EMISSARY, *s.* दूतः, वार्ताहरः, संदेशहरः. 2 चरः, चारः, गूढदूतः, अपसर्पः, प्रणिधिः, स्पशः.

EMIT, *v. t.* वि-निर्-मुच् 6 P, निःक्षिप् 6 P, उदीर् c., निः-सृ c., उत्-वि-सृज् 6 P, उद्-गॄ 6 P, उद्वम् 1 P, निर्गम् c. (गमयति); निःसृ c., मोक्ष् 10. -EMISSION, *s.* उद्गारः, विमोचनं, उत्सर्गः, स्रावः, उदीरणं, उद्वमनं. 2 (Of semen) रेतः-क्षरणं-स्खलनं, वीर्यनिषेकः, रेतःस्रुति *f.*, निषेकः.

EMMET, *s.* पिपीलिका.

EMMEW, *v. t.* पंजरे निरुध् 7 U.

EMOLLIATE, *See* SOFTEN.

EMOLLIENT, *s.* अभ्यंजनं, विलेपनं, स्नेहनं. -*a.* स्निग्ध, स्नेहन (नी *f.*), चिक्कण. 2 शांतिद, सुखावह.

EMOLUMENT, *s.* लाभः, फलं, आगमः, प्राप्ति *f.*, आयः, उदयः.

EMOTION, *s.* विकारः, विकृति *f.*, भावः, रागः, चित्तविकारः, विक्रिया, मनोधर्मः-वृत्ति *f.* 2 उत्तापः, चित्तक्षोभः, मनस्तापः, अंतर्वेगः, आकुलता, आवेगः, संक्षोभः ; 'under e.' अन्यथावृत्ति *a.*; 'e. of sorrow' शोकावेगः. 3 रसः, भावः ; 'e. of love' शृंगाररसः. -AL, *a.* भाव-विकार-विशिष्ट, विकारप्रेरित.

EMPALE, *v. t.* Encircle, q. v. 2 शूले आरुह् c. (रोपयति) or निविश् c. -MENT, *s.* शूलारोपणं ; 'deserving e.' शूल्य.

EMPEROR, *s.* सम्राज् *m.*, अधिराजः, अधीश्वरः, चक्रवर्तिन् *m.*, सार्वभौमः, मंडलेश्वरः, राजाधिराजः. –EMPRESS, *s.* अधि-महा-राजाधि-राज्ञी.

EMPHASIS, *s.* अवधारणं, गुरूच्चारणं. –EMPHASIZE, *v. t.* गौरवेण उच्चर् c., दृढयति (D.). –EMPHATIC, *a.* दृढ, निश्चित; गौरवेण उच्चारित, अवधारणीय. –ALLY, *adv.* सुदृढं, सनिश्चयं, सावधारणं, सपरिच्छेदं.

EMPIRE, *s.* आधिराज्यं, साम्राज्यं, आधिपत्यं, ऐश्वर्यं, ईशत्वं, प्रभुत्वं. 2 राष्ट्रं, राज्यं, विषयः.

EMPIRIC, *s.* दुश्चिकित्सकः, छद्म-कु-वैद्यः. 2 परीक्षकः. –*a.*,–AL, *a.* अशास्त्रसिद्ध, आयुर्वेदविरुद्ध, छाद्मिक (की *f.*); प्रयोगिकविषय, प्रयोगसिद्ध. –ALLY, *adv.* आयुर्वेदविरुद्धं, अविद्यया, अशास्त्रानुसारेण, प्रयोगज्ञानमात्रेण. –ISM, *s.* दुश्चिकित्सा, &c.

EMPLASTIC, *a.* चिक्कण, सांद्र, लेप्य.

EMPLOY, *v. t.* नियुज् 7 A, 10 ; अधिकृ 8 U, विधा 3 U, व्यापृ c., प्रवृत् c.; 'e. as a messenger' प्रतिशास् 2 P. 2 प्र-उप-युज्, उपभुज् 7 U, सेव् 1 A, व्यवहृ c., अभ्यस् 4 P. –EE, *s.* नियोज्यः, अधिकृतः. –ER, *s.* प्र-नि-योजकः, प्रवर्तकः, व्यापारयितृ *m.*, अधिकारिन्-स्वामिन् *m.* –MENT, *s.* नियोगः, व्यापारः, व्यवसायः, उद्योगः, कार्यं, कार्ययोगः ; जीविका, व्यवहारः, वृत्ति *f.* ; 'his e. was to chop wood' काष्ठच्छेदनवृत्तिरसौ : 'out of e.' निर्वृत्ति, क्षीणवृत्ति, निर्व्यापार. 2 प्रयोगः, उपयोगः, व्यवहारः. 3 अधिकारपदं, पदं.

EMPOISON, *v. t.* तीक्ष्णरसं-विषं-दा 3 U, विषप्रयोगेण नश् c. 2 विषेण दिह् 2 U or अंज् 7 P.

EMPORIUM, *s.* वाणिज्यस्थानं, निषद्या.

EMPOWER, *v. t.* अधिकृ 8 U, नियुज् 7 A, 10, क्षमतां-अधिकारं-दा 3 U.

EMPTY, *a.* शून्य, परिशून्य, शून्यगर्भ, रिक्त. 2 विरस, निःसार, असार, फल्गु, निःसत्व; 'e.-headed' मंदधी, अल्पबुद्धि, दुर्मति ; 'an e. vessel makes most noise' अर्धो घटो घोषमुपैति नूनं. –*v. t.* रिच् 7 U, शून्यी-रिक्ती-कृ 8 U. 2 सारं हृ 1 P, निःसत्वीकृ. 3 तोयं पत् c.; अव-तॄ 1 P, स्रु 1 P, विश् 6 P ; (कुत्र वा सागरं वर्जयित्वा महानद्यवतरति S. 3) 'e. s itself' &c. –NESS, *s.* रिक्तता, शून्यता ; निःसारता, &c.

EMPURPLE, *v. t.* अरुणी-लोहिती-कृ 8 U.

EMPYREAL, *a.* आग्नेय-तेजोमय (यी *f.*).

EMPYREAN, *s.* उत्तमस्वर्गः, वैकुंठं, तेजोलोकः.

EMULATE, *v. t.* स्पर्ध् 1 A, प्रतिस्पर्ध्, संघृष् 1 P (with instr.) ; विजि desid. (विजिगीषते), अभिभवितुं यत् 1 A or उद्यम् 1 P, अहमहमिकया यत्; *See* COMPETE. –ION, *s.* स्पर्धा, विजिगीषा, संघर्षः, अहमहमिका. –IVE,-EMULOUS, *a.* प्रतिस्पर्धिन्, विजिगीषु, जयेच्छु. –*s.* विजिगीषुः, सपत्नः, प्रतिस्पर्धिन् *m.*

EMULSION, *s.* पायसं, पयस्यं.

EMUNCTORY, *s.* शरीरमलपथः, देहमलनिर्गमः.

ENABLE, *v. t.* Gen. ex. by शक्य ; 'this will e. you to go back' अनेन तव परावर्तनं शक्यं ; शक्ति-सामर्थ्यं-दा 3 P, समर्थ-क्षम-शक्त *a.* कृ 8 U.

ENACT, *v. t.* कृ 8 U, विधा 3 U, निष्पद् c. 2 व्यव-स्था c. (स्थापयति), विधिं-व्यवस्थां-कृ, प्रशास् 2 P, शासनं कृ ; 'it is e. ed as follows' अयं विधिः क्रियते, एवं व्यवस्थाप्यते. 3 नट् 10, अभिनी 1 P, निरूप् 10. –MENT, *s.* विधिः, शासनं, व्यवस्था, शासनपत्रं.

ENAMOURED, *a.* सानुराग, आसक्त, अनुरक्त, बद्धभाव, कामासक्त (with loc.) ; 'the king was e. of her' नृपस्तस्यां बद्धभावः, आसक्तानुरागः, प्रीतिं बबंध; 'to be e.' अनुरंज्-आसंज् pass., आसक्त &c. भू.

ENCAGE, *v. t.* पंजरे निरुध् 7 U or बंध् 9 P.

ENCAMP, *v. t.* (सै-यं) निविश् c., समावस् c. –*v. i.* निविश् 6 P, समावस् 1 P. –MENT, *s.* निवेशनं, समावासः. 2 शिबिरं, निवेशः.

ENCAVE, *v. t.* कंदरे प्रच्छद् 10 or गुह् 1 U.

ENCIENTE, *See* PREGNANT.

ENCHAFE, *v. t.* संतप्-प्रकुप्-रुष् c.

ENCHAIN, *v. t.* निगडैः बंध् 9 P, निगडयति (D.), खिलीकृ 8 U, अव-नि-रुध् 7 U. 2 आकृष् 1 P, हृ 1 P, निरुध्.

ENCHANT, *v. t.* मंत्रैर्वशीकृ 8 U or मुह् c., अभिचर् c., अभिमंत्र् 10. 2 (fig.) हृ 1 P, आकृष् 1 P, विलुभ् c. ; 'I was quite e.-ed with thy ravishing melody' तवास्मि गीतरागेण हारिणा प्रसभं हृतः (S. 1). –ER, *s.* वि-, मोहकः, ऐंद्रजालिकः, मायिन् *m.* ; 'e. of snakes' व्यालग्राही, अ(आ)हितुंडिकः. –ING, *a.* मनोहर, मोहिन्, हारिन्. –MENT, *s.* माया, योगः, इंद्रजालं, मोहः, कुहकः, अभिचारः. –ENCHANTRESS, *s.* मायिनी, मोहिनी, योगिनी.

ENCHASE, *v. t.* प्रणि-धा 3 U, प्रतिबंध् 9 P, अनुव्यध् 4 P, खच् 10 (खचयति).

ENCIRCLE, *v. t.* परि-वृ 5 U, परिवेष्ट् 1 A or c., परिगम् 1 P, परि-इ-या- 2 P, वलयति-मंडलयति (D.), वलय-रसना in comp. 2 EMBRACE, q. v.

ENCLOSE, *v. t.* आ-परि-वृ 5 U, परिवेष्ट् 1 A or c. 2 नि-सं-अव-रुध् 7 U. 3 प्राचीरेण परिवेष्ट् or आवृ or अवरुध्, परिक्षिप् 6 P. 4 आवेष्ट्, आ-सं-छद् 10, पि-धा 3 U, कोशे निविश् c., कोशस्थ *a.* कृ 8 U. –ED, *a.* परिवृत, परिवेष्टित, परिक्षिप्त. 2 अवरुद्ध, सावरण, प्राकारावृत. 3 कोशस्थ, पिहित, परिच्छन्न, आवेष्टित, कोशांतर्गत. –URE, *s.* वृति *f.*, आवरणं, प्राकारः, प्राचीरं, आवेष्टनं, अवरोधकं, वरणः. 2 वाटः-टी. 3 अंतर्गतपत्रं.

ENCOMIUM, *s.* प्रशंसा, श्लाघा, स्तुति *f.*, स्तवः, स्तुति-

वाक्यं, वर्णनं, गुणप्रशंसा. —ENCOMIAST, *s.* गुणप्रशंसकः, स्तुतिपाठकः. —IC,-ICAL, *a.* स्तुतिमय (यी *f.*); श्लाघामय, प्रशंसाकर (री *f.*).

ENCOMPASS, *v. t.* परि-इ 2 P, व्याप् 5 P, परिच्छद् 10, परिक्षिप् 6 P, संवल् 1 A, सं-वलयति (D.); *See* ENCIRCLE. —MENT, *s.* परिवेष्टनं, परिगमः, परिवृति *f.*

ENCORE, *v. t.* प्रशंसासूचनार्थं पुनः इति उत्क्रुश् 1 P, पुनरुक्ततां प्रार्थ् 10 A.

ENCOUNTER, *v. t.* अभि-इ 2 P,-गम् 1 P, समागम्, मिल् 6 P, समा-इ, समासद् c., संमुखं-अभिमुखं-गम्, संमुखीभू. 2 विग्रह् 9 P, प्रतियुध् 4 A, संघट्ट् 1 A, समाहन् 2 P. 3 प्राप् 5 P, अभिभू pass.; 'e. difficulties' आपदं प्राप्नुवंति, आपदाभिभूयंते; 'he e.-ed many dangers' तस्य बहूनि संकटान्यापतितानि. —*s.* समागमः, संगः-गमः, संमिलनं, दर्शनं, समासादनं. 2 विग्रहः, संग्रामः, समाघातः, संपरायः, संप्रहारः, संआ-घातः; *See* BATTLE; 'close e.' संघट्टः.

ENCOURAGE, *v. t.* प्रोत्सह् c., आ-समा-श्वस् c., प्रेर् c., प्रवृत् c., उत्तिज् c., आशां वृध् c. —ER, *s.* आश्वासकः, प्रवर्तकः. —ING, *a.* आश्वासिन्, प्रोत्साहक, उत्तेजन (नी *f.*), आश्वासक. —MENT, *s.* प्रोत्साहनं, आश्वासनं, उत्तेजनं, धैर्यवर्धनं. 2 साहाय्यं, अनुग्रहः, उपकारः, आनुकूल्यं, आश्रयः, अभ्युपपत्ति *f.*

ENCROACH, *v. i.* आक्रम् 1 U, 4 P, अन्यायतः ग्रह् 9 P, अन्यायेन प्रविश् 6 P, अधर्मतः ग्रह् or आत्मसात्कृ. —MENT, *s.* अन्यायेन ग्रहणं, अधर्मतः आक्रमणं-ग्रहणं.

ENCRUST, *v. t.* घनपटलेन आच्छद् 10 or परिवेष्ट् 1 A or c., बहिर्भागे घनीकृ 8 U. —ED, *a.* सपटल, घनीभूत. —ATION, *s.* बाह्यपटलं, बहिरावेष्टनं.

ENCUMBER, *v. t.* प्रतिबंध् 9 P, उप-नि-रुध् 7 U, भारेण आक्रम् 1 U, 4 P or क्लिश् 9 P, भाराक्रांत *a.* कृ 8 U; 'e. ed with debt' ऋणभारग्रस्त. —ED, *a.* भाराक्रांत, भारग्रस्त. 2 बाधित, उपरुद्ध, प्रतिबद्ध, &c. —ENCUMBRANCE, *s.* भारः, भारभूतः. 2 प्रतिबंधः, उपरोधः, प्रत्यूहः, विघ्नः, अंतरायः. 3 ऋणभारः.

ENCYCLICAL, *a.* वर्तुल, चाक्रेय (यी *f.*); 'e. letter' चक्रं, बहुसाधारणपत्रं.

ENCYCLOPŒDIA, *s.* विद्याचक्र-कोषः; 'e. of learning' विद्यासागरः, ज्ञानोदधिः.

END, *s.* अंतः, प्रांतः, पर्यंतः-तं, अवधिः, सीमा, अंतरं. 2 अत्ययः, शेषः-षं, क्षयः, अवसादः, ध्वंसः, अवसानं, पर्यवसानं, परिणामः; 'pleasing at the e.' परिणामरमणीय; 'of good e.' सुखोदर्क. 3 समाप्ति-निष्पत्ति-निर्वृत्ति-सिद्धि- *f.* 4 विरामः, विच्छेदः, निवृत्ति *f.*, उपशमः. 5 निधनं, मरणं, अत्ययः, विनाशः, देहक्षयः. 6 फलं, परिणामः, उत्तरफलं. 7 आशयः, हेतुः, अभिप्रायः, अर्थः, उद्देशः, कार्यं, तात्पर्यं; 'to no e.' निरर्थकं; 'e. of the world' कल्पांतः, प्रलयः, प्रत्याहारः, क्षयः, संवर्तः; 'put an e. to' समाप् c., त्यज् 1 P, उत्सृज् 6 P, नश् c.; 'e. of a garment' अंचलः, दशाः pl.; 'hear my speech to the e.' शृणु मे सावशेषं वचः (M. 4). —*v. t.* समाप् c., अवसो 4 P, सं-निः-पद् c., निर्वृत् c., संवृ 10; oft. by अंत in comp. —*v. i.* अवसो pass., समाप्-निष्पद् pass.; शम् 4 P, विरम् 1 P, विगम् 1 P, अपया 2 P, निष्क्रम् 1 U, 4 P; oft. by (*s.*) above; 'it will e. in good' कल्याणोदर्कं भविष्यति (U. 4); 'roots e. ing in vowels' अजंता धातवः; सागरांता मही, &c. —ING, *s.* अंतः, अंत्यं अक्षरं. —*a.* अंत्य. —LESS, *a.* अनंत, अपार, अशेष, निर्मर्याद, निरवधि. 2 निरंतर, अविरत, अविच्छिन्न, सतत, अतिदीर्घ, अनवरत. —LESSLY, *adv.* अत्यंतं, अविरतं, सततं, &c. —LESSNESS, *s.* आनंत्यं, अविरति *f.*, अविच्छेदः, &c.

ENDANGER, *v. t.* संशये पत् c. or क्षिप् 6 P, संशयस्थ-संदेहदोलास्थ *a.* कृ 8 U; *See* DANGER.

ENDEAR, *v. t.* प्रिय *a.* or प्रीतिपात्रं कृ 8 U; 'e. oneself' प्रीतिपात्रं-भाजनं-भू. —ING, *a.* प्रियकर (री *f.*), प्रीतिकर. —MENT, *s.* प्रीति *f.*, प्रणयः, प्रेमन् *m.*, *n.*, प्रेम-स्नेह-कारणं-हेतुः; 'a word of e.' प्रियवाक्यं. 2 विलासः, विभ्रमः, हावः, शृंगारचेष्टा.

ENDEAVOUR, *v. i.* प्र-यत् 1 A, घट् 1 A, उद्यम् 1 P; 'e ing for others' परार्थघटकाः, परार्थमुद्यमभृतः. —*s.* व्यापारः, व्यवसायः, प्रयत्नः, आयासः; *See* ATTEMPT.

ENDORSE, *v. t.* पृष्ठे (स्वनाम) लिख् 6 P; लेखस्य पृष्ठेभिलिखेदत्वा दत्वा धनं ऋणी (Y. II.). 2 दृढयति (D.), दृढीकृ, प्रमाणीकृ 8 U.

ENDOW, *v. t.* वृत्तिं दा 3 U, प्रतिष्ठा c. (प्रतिष्ठापयति). 2 युज् 10; संपन्न *a.* कृ 8 U; oft. by 'e. ed'. —ED, *a.* युक्त, संपन्न, विशिष्ट, अन्वित, उपेत, उपपन्न, शालिन्, gen. in comp. or with instr. —MENT, *s.* वृत्ति *f.*, वृत्ति-शुल्क-दानं; प्रतिष्ठा; अग्रहारदानं. 2 निबंधः. 3 गुणः, शक्ति *f.*; 'intellectual e. s' बुद्धिगुणाः, मतिविभवः-प्रकर्षः.

ENDUE, *See* ENDOW.

ENDURE, *v. t.* सह् 1 A, विषह्, क्षम् 1 A, तिज् desid. (तितिक्षते), मृष् 4 P, 10. 2 भुज् 7 A, धृ 10. 3 शक् 5 P, पॄ 10, उत्सह्; *See* ABLE.—*v. i.* स्था 1 P, चिरं स्था; 'as long as the sun and the moon e.' यावच्चंद्रदिवाकरौ. —ANCE, *s.* सहिष्णुता, सहनशीलता. 2 क्षमा, तितिक्षा, सहनं, मर्षणं, क्षांति *f.* 3 धैर्यं, उत्साहः; 'e. of austerities' दमः. 4 स्थिति *f.*, स्थायित्वं. —ER, *s.* सोढृ *m.*, क्षंतृ *m.*, सहः in comp. —ING, *a.* स्थायिन्, चिरस्थायिन्, अविसर्गिन्, आयत; 'miseries are of an e. charac-

ter' आयतस्वभावानि दुःखानि (Ka. 175). 2 सहिष्णु, सहनशील, तितिक्षु, सहन, क्षमिन्.

ENEMY, *s.* शत्रुः, अरिः, रिपुः, वैरिन् *m.*, अरातिः, द्विट्, प्रति-वि-पक्षः, परिपंथी, अमित्रः, द्वेष्टा *m.*, अपकर्ता, सपत्नः, दुर्हृद्, परः, प्रत्यर्थी, द्विषन्, द्वेषणः, अहितः, शात्रवः, अभिघाती; 'an e. in the rear' पार्ष्णिग्राहः. —INIMICAL, *a.* विरुद्ध, शात्रव (वी *f.*), द्वेषिन्, वैरिन्, अहित, विपक्ष, विरोधिन्, अननुकूल. —LY, *adv.* रिपुवत्, सवैरं, द्रोहबुद्ध्या. —ENMITY, *s.* वैरं, शत्रुता, शत्रुभावः, विद्वेषः, विपक्षता, सापत्न्यं, द्वंद्वभावः, विरोधः.

ENERGY, *s.* शक्ति *f.*, प्रभावः, वीर्यं, तेजस् *n.*, सत्वं, पौरुषं, उत्साहः, उद्योगः, अतंद्रिता, उद्यमः, व्यवसायः, कर्मोद्योगः. —ENERGETIC, *a.* उद्योगिन्, उद्यमिन्, व्यवसायिन्, सोत्साह, कर्मयुक्त, सोद्योग, अनलस, अतंद्रित, उत्साहवत्. 2 वीर्यवत्, तेजस्विन्. —ALLY, *adv.* सोत्साहं, सोद्योगं, सयत्नं, शक्त्या.

ENERVATE, ENFEEBLE, *v. t.* दुर्बलीकृ 8 U, क्षीणीकृ, तेजः-शक्ति-हृ 1 P. —ED, *a.* क्षीणशक्ति, हतवीर्य, क्षीणबल, दुर्बल, शिथिलबल. —ION, —ING, *s.* वीर्यक्षयः, शक्ति-तेजो-हानि *f.*, क्षीणता, अपचयः, क्षामता.

ENFORCE, *v. t.* बलात् कृ c.; *See* COMPEL; 'c.-ed to pay' दापित. 2 दृढीकृ 8 U, द्रढयति (D.), सबल *a.* कृ, स्थिरीकृ. 3 (Rules &c.) प्रवृत् c., बलेन प्रणी 1 P or निर्वह् c. —MENT, *s.* (बलेन) प्रवर्तनं, प्रणयनं. 2 दृढीकरणं; दृढप्रमाणं.

ENFRANCHISE, *v. t.* बंधनात् मुच् 6 P or c. or मोक्ष् 10. 2 स्वतंत्रीकृ 8 U, स्वतंत्राधिकारं दा 3 U. —MENT, *s.* दास्यविमोचनं, बंधनमोक्षः. 2 पौराधिकारदानं.

ENGAGE, *v. t.* आकृष् 1 P, अनुरंज् c., आराध् c., हृ 1 P. 2 व्या-पृ c., प्रयुज् 10, विनियुज्. 3 नियुज्, अधिकृ 8 U, वृ 10 (वरयति). 4 (A word) प्रतिश्रु 5 P, प्रतिज्ञा 9 U, नियमपत्रेण (आत्मानं) बंध् 9 P. 5 सं-प्रति-युध् 4 A आक्रम् 1 U, 4 P, समाह्वन् 2 P. 6 वाचा दा 3 U or प्रतिश्रु; विवाहसंबंधं-वाग्निश्चयं-कृ. —*v. i.* (To be e. ed in) व्यापृ 6 A, निरत-आसक्त *a.* भू 1 P, प्रवृत् 1 A, (with loc.); सेव् 1 A, आस्था 1 A (with acc.). 2 संयुध्, युद्धं कृ. 3 आरभ् 1 A, व्यव-सो 4 P, उपक्रम् 1 A. 4 प्रति-ज्ञा, प्रति-श्रु, परिपण 1 A, अभ्युपगम् 1 P. —ED, *a.* व्यापृत, सव्यापार, प्रवृत्त, कार्यनिष्ठ, कर्मयुक्त, उद्यमासक्त; gen. ex. by पर, निरत, मग्न, आसक्त, तत्पर, परायण, in comp; 'e. in contemplation' ध्यानपर-निरत, &c. 2 प्रति-ज्ञात-श्रुत, संविदित, कृतसंकेत; 'e. to be married' वाग्दत्त, प्रतिज्ञाविवाहित. —ING, *a.* मनोहर, हृदयग्राहिन्, हारिन्, आकर्षक, मोहिन्; चित्ताकर्षिन्. —INGLY, *adv.* मनोहारितया. —MENT, *s.* व्यवसायः, प्रवृत्ति *f.*, व्यवहारः, कर्मन् *n.*, व्यापारः, कार्यं. 2 युद्धं, संग्रामः, रणाभियोगः; *See* BATTLE. 3 प्रतिज्ञा, संकेतः, संविद् *f.*, नियमः, समयः, पणः, व्यवस्था, अभ्युपगमः, प्रतिश्रुतं वचः; 'keep an e.' समयं पा c. (पालयति) or अनुरुध् 4 A or अनुवृत् 1 A; 'let us keep our e.' सामयिका भवामः (M. 1); 'has kept his e.' विहितप्रतिज्ञः; 'marriage e.' वाग्निश्चयः, विवाहप्रतिज्ञा; 'I have many e s to-day' मया बहवः संकेताः-समयाः-अद्य पालनीयाः.

ENGENDER, *v. t.* उत्पद् c., प्रसू 2 A, उद्-भू c., जन् c.; *See* BEGET.

ENGINE, *s.* यंत्रं, उपकरणं, साधनं; 'military e.' युद्धोपकरणं.

ENGINEER, *s.* यंत्रकारः, यंत्रकलाभिज्ञः, वास्तुविद्याविशारदः. —ING, *s.* यंत्रकारस्य व्यापारः. 2 वास्तुविद्या, यंत्रशास्त्रं.

ENGIRD, ENGRIDLE, *See* ENCIRCLE.

ENGRAFT, *v. t.* (अन्यस्थानादानीय) निविश् c., संयुज् 10, संलग्नीकृ 8 U.

ENGRASP, *v. t.* ग्रह् 9 P, धृ 1 P, 10.

ENGRAVE, *v. t.* मुद्र् 10, उत्कृ 6 P, तक्ष् 1, 5 P, त्वक्ष् 1 P; 'with the name e. ed on the ring' मणिबंधनोत्कीर्णनामधेयं (S. 6). —ER, *s.* तष्टृ-त्वष्टृ *m.*, तक्षन् *m.* —ING, *s.* तक्षणं. 2 मुद्रा.

ENGROSS, *v. t.* अभिभू 1 P, एकाग्र-अनन्यविषय- *a.* कृ, आकुलीकृ 8 U; better by 'e. ed'. 2 सर्वं ग्रह् 9 P, पूर्वं ग्रह् or क्री 9 U, साकल्येन आत्मसात्कृ. —ED, *a.* निविष्ट, अभिनिविष्ट, आसक्त, अनन्यविषय, एकाग्र; ex. by परायण, निमग्न, पर, in comp.; 'e. in grief' शोकपरायण. —ER. *s.* पूर्वक्रेतृ *m.*

ENGULF, *v. t.* जलावर्ते निक्षिप् 6 P, आवर्तेन ग्रस् 1 A.

ENHANCE, *v. t.* वृध् c., उपचि 5 U, अधिक *a.* कृ 8 U. —MENT, *s.* वृद्धि *f.*, वर्धनं, उपचयः.

ENIGMA, *s.* प्रहेलिका, गूढप्रश्नः, प्रश्नदूती, प्रवह्लिका. —ENIGMATICAL, *a.* गूढार्थ, अस्पष्टार्थ, दुर्ज्ञेय, अभिप्रायार्थ, वक्र, गूढ. —LY, *adv.* गूढं, अस्पष्टं, वक्रोक्त्या, अभिप्रायार्थं.

ENJOIN, *v. t.* शास् 2 P, आदिश् 6 P, विधा 3 U; 'e. ed by Scriptures' शास्त्रविहित. 2 नियुज् 7 A, 10, उपदिश्; प्र-,चुद् 10.

ENJOY, *v. t.* उप-सं-भुज् 7 U, अनुभू 1 P, आस्वाद् 1 A, अश् 5 A; निर्विश् 6 P, (निर्विश्यतां सुंदरि यौवनश्रीः R. VI. 50). 2 (Be delighted by) मुद् 1 A, रम् 1 A, नंद् 1 P, (अन्येषामभ्युदयेन मोदस्व, &c.); 'let us e. this festive holiday in playing' अनध्यायमहोत्सवं खेलंतः संभावयामः (U. 4). 3 सुखेन उपभुज् or सेव् 1 A. —ABLE, *a.* भोग्य, उपभोग्य. 2 सुभग, रम्य, रमणीय, सुखद, मनोरम, कमनीय. —MENT, *s.* उप-सं-भोगः, अनुभवः, आस्वादः-

दनं, निर्वेशः, सुखास्वादः; 'objects of e.' विषयाः. 2 सुखं, आनंदः, हर्षः, संतोषः, प्रमोदः, सौख्यं.

ENKINDLE, *See* KINDLE.

ENLARGE, *v. t.* विस्तृ c., वि-प्र-तन् 8 U, प्र-सृ c., प्रथ् 10, विशालीकृ 8 U. 2 वृध् c., एध् c., आप्यै c., वृद्धिं नी 1 P, स्फाय् c. (स्फावयति). –*v. i.* वृध् 1 A, विस्तृ-उपचि-वितन् pass., स्फाय् 1 A, प्यै 1 A, प्ररुह् 1 P, वृद्धिं इ 2 P. 2 (Upon) प्रपंचयति (D.), विस्तरेण-सविस्तरं-वद् 1 P or अभिधा 3 U or वर्ण् 10. –MENT, *s.* वृद्धि *f.*, विस्तारः, वर्धनं, स्फीति *f.*, बृहणं. 2 विपुलता, प्रपंचः, वाग्विस्तरः.

ENLIGHTEN, *v. t.* (ज्ञानेन) वि-प्र-काश् c., उद्भास् c., दीप् c., प्रति-प्र-बुध् c., उपदिश् 6 P, विमलीकृ 8 U, संस्कृ, व्युत्पद् c. –ED, *a.* प्रतिबुद्ध, संस्कृतचित्त, व्युत्पन्न, प्राप्तज्ञान, ज्ञानोद्दीपितचित्त, प्रतिबोधवत्. –MENT, *s.* ज्ञानोद्दीपनं, प्रबोधः-धनं; संस्कारः, प्रवृत्ति *f.*, ज्ञानागमः, चित्तप्रबोधनं.

ENLIST, *v. t.* नामावलिपत्रे नाम लिख् 6 P or आरुह् c. (रोपयति). 2 (Soldiers) सैन्यमध्ये आरुह् c., युद्धकर्मणि व्या-पृ c. or प्रवृत् c., अस्त्राणि ग्रह् c. 3 आकृष् 1 P, आत्मसात्कृ 8 U, स्वपक्षे आनी 1 P or कृ; 'having got a certificate e. ing him among Gods' अमरगणनालेख्यमासाद्य (R. VIII. 95).

ENLIVEN, *v. t.* हृष् c., ह्लाद् c., उल्लस् c. 2 उत्साहं जन् c. (जनयति), आश्वस् c., प्रोत्सह् c., उत्तिज् c. –ING, *a.* उत्साह-हर्ष-जनक.

ENNOBLE, *v. t.* उन्नम् c. (उन्नमयति), उत्कर्ष-उन्नतिं नी 1 P, उत्-श्रि c., उत्कृष् 1 P or c., प्रतिष्ठां प्राप् c. 2 कुलीनपदे नियुज् 7 A, 10, उच्चपदं आरुह् c. (रोपयति) or प्राप् c., संमन् c. –MENT, *s.* उत्कर्षः, उन्नति *f.*, प्रतिष्ठा, उच्चपदावाप्ति *f.*

ENNUI, *s.* ग्लानि *f.*, क्लांति *f.*, अवसादः, श्रमः.

ENORMOUS, *a.* असाधारण, अतिमात्र, अलौकिक (की *f.*), अपरिमित, अनंत. 2 महाप्रमाण, अतिबृहत्, अतिमहत्; 'e. in body' बृहत्काय, भीम-महा-काय. 3 घोर, दारुण, अतिनिंद्य, सुदुष्ट, पापिष्ठ. –LY, *adv.* अतिमात्रं, सातिशयं, अत्यंतं, भृशं; सु-अति-pr. –ENORMITY, *s.* घोरता, दारुणता, &c. 2 घोर-महा-पातकं, महापराधः, अतिपापं.

ENOUGH, *a.* यथेष्ट, बहुल, प्रचुर, पर्याप्त. 2 समर्थ, क्षम, उचित, उपयुक्त; oft. by अलं with inf. or dat., (तस्यालमेषा क्षुधितस्य तृप्त्यै R. II. 39). –*adv.* अलं, कृतं, (with instr.); 'e. of prolixity' अलमतिविस्तरेण. 2 यथेष्टं, प्रचुरं, पर्याप्तं; 'to be e. for' क्लृप् 1 A (with dat.); 'rich e.' भूयसा वित्तवान्; with adverbs by एव or भूयसा; सम्यगेव, भूयसा युक्तं, &c.; 'be good e. to grant my request' मम प्रार्थनामनुमंतुं प्रसीदतु भवान्. –*s.* पर्याप्ति *f.*, प्राचुर्यं, बाहुल्यं, यथेष्टत्वं; having e. for maintenance' अलंजीविक.

ENQUIRE,-Y, *See* INQUIRE,-Y.

ENRAGE, *v. t.* प्रकुप् c. क्रुध् c., रुष् c., संरभ् c. (संरंभयति). कोपं-रोषं-नी 1 P; कोपं उद्दीप् c. or इंध् 7 A. –ED, *a.* कुपित, क्रुद्ध, इद्धमन्यु, प्रकोपित, कोपाकुल, संरब्ध, जातामर्ष; 'to be e.' क्रुध्-कुप्-रुष् 4 P (with dat).

ENRAPTURE, ENRAVISH, *v. t.* अतिहर्षेण मुह् c. or जडीकृ 8 U, अतिमात्रं हृष् c. or उल्लस् c. –ED, *a.* हर्षजड-मोहित, संप्रहृष्ट, अत्युल्लासित, हर्षोन्मत्त, परमानंदित; 'to be e.' अत्यंतं हृष् 4 P, हर्षेण मुह् 4 P or जडीभू. –MENT, *s.* हर्षोन्मादः, परमानंदः, हर्षमोहः.

ENRICH, *v. t.* धनिन्-सधन-आढ्य-द्रव्यसंपन्न-*a.* कृ 8 U; समृध् c., धनं वृध् c. or आप्यै c. or स्फाय् (स्फावयति). 2 Adorn, q. v.

ENROLL, *v. t.* Enlist, q. v. –ER, *s.* नामलेखकः. –MENT, *s.* नामलिखनं, नामारोपणं.

ENROOTED, *a.* रूढ-बद्ध-मूल.

ENSANGUINE, *v. t.* शोणितेन लिप् 6 P.

ENSCONCE, *See* CONCEAL.

ENSHRINE, *v. t.* सुप्रतिष्ठितस्थाने निविश् c. or रक्ष् 1 P.

ENSIFORM, *a.* खड्गाकार.

ENSIGN, *s.* पताका, ध्वजः, केतनं, केतुः, वैजयंती. 2 चिह्नं, लिंगं, लक्षणं. 3 (E.-bearer) ध्वजिन्-पताकिन् *m.*

ENSLAVE, *v. t.* दासीकृ 8 U, (fig. also), वशीकृ; दास्ये नियुज् 7 A, 10 or बंध् 9 P. –MENT, *s.* दास्यं, दासभावः, बंधनं.

ENSNARE, *v. t.* पाशेन-जालेन-बंध् 9 P, पाशे पत् c., जालबद्ध *a.* कृ 8 U, जाले धृ 1 P, 10.

ENSUE, *v. i.* समापद् 4 A, प्रवृत् 1 A, उत्पद् 4 A, जन् 4 A, सं-उत्-प्र-भू 1 P, प्रसंज् pass. 2 अनुसृ 1 P, अनु-इ 2 P, पश्चाद् आगम् 1 P. –ING, *a.* आगामिन्, भाविन्; अनागत, उत्तरकालीन, उत्तर-पर-in comp.; 'on the e. day' परेद्युः, आगामिनि दिवसे.

ENSURE, *v. t.* निश्चित *a.* कृ 8 U, स्थिरी-दृढी-कृ; 'diligence will e. you speedy success' उद्यमयोगाद्दूरवर्तिनीं सिद्धिमवगच्छ.

ENTAIL, *v. t.* आवह् 1 P, उत्पद् c., जन् c. (जनयति). 2 (रिक्थं) प्र-दा 3 U. –*s.* क्रमागतरिक्थं. 2 क्रमागमविधिः.

ENTANGLE, *v. t.* संश्लिष् c., संग्रंथ् 9 P, संलग्नीकृ 8 U, आकुली-संकीर्णी-कृ. 2 संबंध् 9 P, संमिश्र् 10; better by 'e. ed.' –ED, *a.* सक्त, आ-सं-सक्त, लग्न, सं-परिलग्न, आ सं-परि-श्लिष्ट; कुरबकशाखापरिलग्नं च वल्कलं (S.1); शाखास्वसक्तमपि (S. 2), &c. 2 संकीर्ण, संकुल,

ग्रंथिल. 3 आकुंचित, व्यावर्तित; 'e. hair' जटा, जटाजूटः; 'having e. hair' जटिल, जटावत्; 'e. in a net' जालबद्ध. -MENT, s. संश्लिष्टता, जटिलत्वं. ग्रंथिलत्वं. 2 संकरः, व्यतिकरः, संकुलता.

ENTER, v. विश् 6 P, नि-प्र-आ°; गाह् 1 A, आगम् 1 P, आया 2 P, पदं कृ 8 U or निधा 3 U; 'a thought e. ed into his head' कश्चित्कल्पस्तस्य चेतसि प्रादुर्बभूव; 'curiosity e. ed his heart' कुतूहलेन तस्य चेतसि पदं कृतं; 'e. into conversation' भाषणनिमग्न a. भू 1 P; 'e. into alliance' संधिं कृ; 'e. into another's views' परमतं ग्रह् 9 P, अन्यभावमनुप्रविश्, अन्यमतं स्वीकृ or अनुमन् 4 A; 'e. on a course' कार्यं प्रारभ् 1 A, कार्ये प्रवृत् 1 A. 2 (A name) लिख् 6 P, निविश् c., समारुह् c. (रोपयति). -ENTRANCE, s. प्रवेशः-शनं, &c. 2 द्वारं; See DOOR. -ENTRY, s. द्वारं, गमनागमनमार्गः. 2 लिखनं, पत्रारोपणं.

ENTERPRISE, s. साहसं, आश्चर्यकर्मन् n., अद्भुतकार्यं, दुष्कर्म. 2 उद्यमः, व्यवसायकार्यं, प्रवृत्ति f., उद्योगः, चेष्टितं, आरंभः, व्यवसायः. 3 उत्साहः, धैर्यं. -v. t., See BEGIN. -ING, a. उद्योगिन्, व्यवसायिन्, सोद्योग. 2 धीर, उत्साहिन्, सोत्साह. 3 साहसिक (की f.), दुष्करकार्ये प्रवर्तक.

ENTERTAIN, v. t. पूज् 10, संमन् c., अर्च् 1 P, 10, संभू c., सत्कृ, आतिथ्यं कृ 8 U; 'e. with food' भोजनदानेन तृप् c. or तुष् c. 2 विनुद् c., रम् c. (रमयति), अतिवह् c. 3 धृ 1 P, 10, ग्रह् 9 P; See BEAR; 'e. a hope' आशां आस्था 1 U or अवलंब् 1 A; 'do not e. doubts' मा ते संशयोभूत्. -ER, s. विनोदकः, सत्कारिन् m., आतिथेयः. -MENT, s. पूजा, सत्कारः, आतिथ्यं, अतिथिसेवा-पूजनं. 2 विनोदः-दनं. 3 उत्सवः; 'musical e.' गानोत्सवः; संभोजनं, &c.

ENTHRAL, v. t. दासी-वशी-कृ 8 U.

ENTHRONE, v. t. सिंहासने उपविश् c., राज्ये अभिषिच् 6 P.

ENTHUSIASM, s. उत्साहः, उत्कटता, औत्सुक्यं, तीक्ष्णता, व्यग्रता, चंडता, उन्मादः. 2 (Religious e.) धर्मोन्मादः, भक्ति-श्रद्धा-उन्मादः, अतिश्रद्धोन्मादः. —ENTHUSIAST. s. भक्तिव्यग्रः, श्रद्धोन्मत्तः. 2 उत्साहिन् m. -IC,-ICAL, a. उत्साहवत्, सोत्साह; अत्यंत, उत्कट, प्रचंड, उत्सुक, व्यग्र, तीक्ष्ण, उग्रक; उन्मत्त; 'e. devotion' निरतिशया भक्तिः, निष्ठातिरेकः. -ICALLY, adv. अत्यनुरागेन, अत्यंतं.

ENTHYMEME, s. लुप्तावयवः पक्षः or हेतुः.

ENTICE, v. t. वि-आ-कृष् 1 P, हृ 1 P, मुह् c., प्र-विलुभ् c., दुष्कृतौ प्रवृत् c. -MENT, s. आकर्षणं, प्र-विलोभनं, मोहः, वंचनं. -ER,-ING, See ALLURER,-ING.

ENTIRE, a. कृत्स्न, समग्र, अखंड, सकल, सर्व, अखिल, समस्त, संपूर्ण, निखिल, निःशेष, अशेष. अन्यून, अभिन्न, सायंत. 2 सरल, ऋजु, अभेद्य, अहार्य (धनादिना). -LY, adv. अखंडं, साकल्येन, अशेषं, कृत्स्नशः, सर्वतः, निखिलेन. 2 (Solely) एक in comp.; एव, सर्वथा; 'depending e. on water' जलैकायत्ता. -NESS, -TY, s. समग्रता, साकल्यं, संपूर्णता, अखंडत्वं, अन्यूनता. 2 अभेद्यता, अहार्यता, आर्जवं.

ENTITLE, v. t. नाम कृ 8 U, अभिधा 3 U; See CALL. 2 अधिकारं दा 3 P, अधिकृ 8 U; ex. by अर्ह् 1 P, or pot. pass. part.; 'he is e. ed to respect' मानमर्हति, मान्यः, पूज्यः; 'persons e.-ed to a share' अंशाधिकारिणः, अंशभाजः, अंशार्हाः; 'e. ed to praise' प्रशंसार्ह, प्रशंसापात्रं.

ENTITY, s. सत्वं, अस्तित्वं. भावः, सत्ता.

ENTOMB, v. t. श्मशाने निखन् 1 P or निधा 3 U or स्था c. (स्थापयति); 'e. ed in despair' नैराश्योपहत.

ENTRAILS, s. अंत्राणि (pl.), पुरीतत् n.

ENTRANCE, v. t. (Put in a trance) मुह् c, मूर्च्छां प्राप् c. -ED, a. मूढ, मूर्च्छोपहत, प्रलीन. 2 उन्मत्त, हर्षोन्मत्त.

ENTRAP, See ENSNARE.

ENTREAT, v. t. अभि-प्र-अर्थ् 10 A, अनुनी 1 P, विनयेन-सांजलि-याच् 1 A or अर्थ्, प्रसद् c., सविनयं निविद् c. -ING, a. सानुनय, सविनय, सांजलि. -Y, s. प्रार्थनं-ना, अभ्यर्थना. याचना, विनति f., अर्थिता, अनुनयः; सांजलिप्रार्थना.

ENTRUST, v. t. निक्षिप् 6 P, आ-समा-रुह् c. (रोपयति), निविश् c., न्यस् 4 U, न्यासीकृ 8 U (with loc.); प्रतिपद् c., दा 3 U, ऋ c. (अर्पयति) (with dat.).

ENTWINE, v. t. ग्रंथ् 9 P, उद्-ग्रंथ्, गु(गुं)फ् 6 P, विरच् 10; See ENCIRCLE also.

ENUCLEATE, v. t. वि-परि-शुध् c., स्पष्टीकृ 8 U.

ENUMERATE, v. t. परि-कृत् 10; परि-,संख्या 2 P, कथ् 10; परि-वि-गण् 10, यथाक्रमं ख्या or निर्दिश् 6 P. -ION, s. परि-,संख्यानं, गणनं-ना, परिकीर्तनं, आख्यानं, कथनं, एकैकशः निर्देशः.

ENUNCIATE, v. t. लक्षणं-स्वरूपं-कथ् or वर्ण् 10; उच्चर् c., उदीर् c., उदाहृ 1 P, कृत् 10, घुष् 10, निविद् c., विज्ञा c. (ज्ञापयति). -ION, s. उच्चारणं, उदीरणं, उदाहरणं, परिसंख्यानं, प्रकीर्तनं, विज्ञापनं; स्वरूपवर्णनं-ना. -IVE, a. ख्यापक, उच्चारक.

ENVELOP, v. t. अवगुंठ् 10, आ-परि-वेष्ट् 1 A or c., आ-परि-वृ 5 U or c., आ-परि-सं-छद् 10, पिधा 3 U, 2 कोशे निधा or निविश् c. -s. कोशः-षः, आवेष्टनं, पिधानं, पुटः, आच्छादनं, अवगुंठनं. 2 प्रावारः, प्रच्छदपटः.

ENVENOM, *v. t.* विषेण दिह् 2 U or अंज् 7 P or लिप् 6 P; सविष *a.* कृ 8 U. –ED, *a.* सविष, विषदिग्ध, विषाक्त.

ENVIRON, *v. t.* परिवेष्ट् 1 A or c., परिक्षिप् 6 P; *See* ENCIRCLE. –(E. s) *s.* परिसरः, उपांतः, अभ्यासः, उपपुरं, नगरोपांतः-तं.

ENVY, *v. t.* असूयति (D.), ईर्ष्य् 1 P (with dat.); परोत्कर्षं न सह् 1 A or मृष् 4 P, 10, परद्रव्यं अभिलष् 1, 4 P or लुभ् 4 P; स्पर्ध् 1 A; 'I e. you your prosperity' त्वदुत्कर्षमसहिष्णुरहं. 2 (In a good sense) स्पृह् 10 (with dat.) –*s.* असूया, अभ्यसूया, ईर्ष्या, मात्सर्यं, मत्सरः, अक्षांति *f.*, असहिष्णुता; अमर्षणं; परधनाभिलाषः. –ABLE, *a.* स्पृहणीय, आकांक्षणीय. 2 ईर्ष्यणीय, लोभ्य. –ER, *s.* असूयकः, मत्सरिन् *m.*, ईर्ष्यिन् *m.* –OUS, *a.* ईर्ष्यिन्, सेर्ष्य, समत्सर, परोत्कर्षासहन, असूयक, मत्सरिन्, साभ्यसूय (with loc.); असहिष्णु in comp.; 'e. of other's happiness' परसुखासहिष्णु; oft. ex. by पुरोभाग in comp.; 'e. of each other's fame' (प्रायः समानविद्याः) परस्परयशःपुरोभागाः (M. 1). –OUS-LY, *adv.* सेर्ष्यं, साभ्यसूयं, समत्सरं, सासूयं.

ENVOY, *s.* दूतः, संदेश-वार्ता-हरः, निसृष्टार्थः; राजप्रतिनिधिः.

EPAULET, *s.* स्कंधाभरणं, अंसालंकारः.

EPHEMERAL, *a.* क्षणभंगुर, क्षणविध्वंसिन्, क्षणिक (की *f.*). 2 ऐकाहिक (की *f.*).

EPIC, *s.* वीरचरितवर्णनं, महाकाव्यं, वीरपुरुषेतिहासः.

EPICENE, *a.* क्लीबलिंग, साधारणलिंग.

EPICURE, EPICUREAN, *a.* उदरपरायण; भोजनचंचु, उदरंभरि, लोलुप; विषयासक्त, इंद्रियसुखनिरत, विषयिन्. –EPICURISM, *s.* विषयसेवा, विषयासक्ति *f.*, इंद्रियसुखानुरागः.

EPICYCLE, *s.* प्राक्चक्रं, परिधिः.

EPIDEMIC,-AL, *a.* व्यापक, सर्वग, बहुजनसाधारण (णी *f.*); संचारिन्; 'e. disease' मारः-री, महामारी. –*s.* जनपदोद्ध्वंसः.

EPIDERMIS, *s.* बाह्यत्वच् *f.*, बाह्यचर्मन् *n.*

EPIGLOTTIS, *s.* उप-प्रति-अलि-जिह्वा, घंटिका.

EPIGRAM, *s.* क्षुद्रकविता, लघुकाव्यं.

EPILEPSY, *s.* अपस्मारः, भ्रामरं. –EPILEPTIC, *a.* अपस्मारिन्, भ्रामरिन्; 'an e. fit' अपस्माराक्रमः.

EPILOGUE, *s.* उपसंहारः.

EPISCOPACY, *s.* धर्माध्यक्षता, धर्माध्यक्षाधिकारः.

EPISODE, *s.* उपाख्यानं, उपकथा, प्रासंगिकवाक्यं, आख्यानं-कथा. –IC,-ICAL, *a.* प्रासंगिक (की *f.*), अप्रस्तुत, अप्रकृत.

EPISPASTIC, *a.* स्फोटजनक.

EPISTLE, *s.* पत्रं, लेखः, लेख्यं; 'epistolary correspondence' पत्रेण संवादः.

EPITAPH, *s.* मृत्युलेखः, चैत्योपलिपि *f.*, स्मरणमंडनं.

EPITHALAMIUM, *s.* विवाहगीतं.

EPITHEM, *s.* प्रलेपः, उप-नाहः देहः.

EPITHET, *s.* विशेषणं, उपाधिः.

EPITOME, *s.* संक्षेपः, सारः, संग्रहः, समाहारः, समसनं. –IZE, *v. t.* संक्षिप् 6 P, समस् 4 U, संग्रह् 9 P, संह् 1 P. –IZER,–IST, *s.* संक्षेप्तृ *m.*, संग्रहकर्तृ *m.*

EPOCH, *s.* कालः, युगं, अवधिः, निर्णीतकालः. 2 विशिष्टकालः. 3 शाकः, शकः.

EPODE, *s.* उपगीतं-गानं.

EPOPEE, *See* EPIC.

EQUABLE, *a.* समान, निर्विकार, समचित्त-वृत्ति-भाव.

EQUAL, *a.* सम, समान, तुल्य, सदृश (शी *f.*), प्रतिम-सकाश-in comp.;(with instr. or gen. of person); *See* LIKE; 'to whom gold and a clod of earth are e.' समलोष्टकांचनः; the point of equality being in the instr. or loc.; समुद्रेण समो गांभीर्ये,-र्येण; 'to consider e.' तुलया धृ 1 P. 2 अनवर. 3 समवृत्ति-चित्त, निर्विकार. 4 पर्याप्त, अलं with inf. or dat.; क्लृप् 1 A (with dat.); 'he is e. to the task' तत्कार्यं साधयितुमलं सः; रक्षणाय कल्पते, &c. –*s.* समानपदस्थः, तुल्यपदभाज् *m.* 2 सवयस्कः, सवयस्यः, तुल्यवयस्; oft. by (*a.*). –*v. t.* तुल् 10 (तुलयति), (प्रासादास्त्वां तुलयितुमलं Me. 65), समीतुल्यी-कृ 8 U; oft. ex. by (*a.*); 'none can e. me in bravery' न कोपि शौर्येण मम समानः. –ITY, *s.* साम्यं, समानता, तुल्यता, सादृश्यं, &c. –IZE, *v. t.* समीकृ 8 U, तुल् 10. –LY, *adv.* समं, सदृशं, समानं, तुल्यं.

EQUANIMOUS, *a.* समचित्त-भाव-वृत्ति, निर्विकार. –EQUANIMITY, *s.* समवृत्तिता-चित्तता, समभावः, समानवृत्ति *f.*

EQUATION, *s.* समीकरणं, साम्यं.

EQUATOR, *s.* भूकक्षा, परिधिः, निरक्षः; 'celestial e.' व्योमकक्षा. –IAL, *a.* निरक्ष in comp.; 'e. region' निरक्षदेशः.

EQUERY, *s.* मंदुरा, अश्व-वाजि-शाला. 2 अश्वपालः.

EQUIANGULAR, *a.* समकोण, समानास्र.

EQUESTRIAN, *a.* अश्वीय, आश्विक (की *f.*). –*s.* आश्विकः, अश्वारोहः.

EQUIDISTANT, *a.* समानांतर.

EQUILATERAL, *a.* समभुज.

EQUILIBRIUM, *s.* तुल्यता, समता, साम्यं. 2 तुल्यभारता, समतोलनं, समानभरत्वं; 'to be in e.' तुल्य *a.* भू, तुलया धृ pass., समानभार *a.* भू.

EQUINOX, *s.* विषुवं, विषुवत् *n.*; 'the vernal e.' महाविषुवं, हरिपदं; 'the autumnal e.' विषुपदं, जलविषुवं. –EQUINOCTIAL, *a.* विषुवीय; 'e. line' विषुवद्वृत्तं, विषुमंडलं; 'e. point' अयनं.

Equip, *v. t.* सज्जीकृ 8 U, सर्वोपकरणानि प्र-उप-कृप् c. or उपपद् c. or समाहृ 1 P, उपकरणैः समायुज् 7 U, 10 ; 'e. with arms' सन्नह् c. ; 'e. with cloths' वस्त्रैः संव्ये 1 P or भूष् 10. -age, *s.* उपकरणं, साधनं, संभारः, सामग्री, उपस्करः. 2 परिबर्हः, परिवारः. 3 सज्जा, परिच्छदः, सन्नाहः, सज्जना, कल्पना, आकल्पः. 4 वाहनं, विमानं, प्रवहणं. -ment, *s.* सज्जा, संभारः, सज्जीकरणं, साधनं.

Equipoise, *v. i.* समीकृ 8 U, तुलया धृ 1 P. -*s.* Equilibrium, q. v.

Equipollent, *a.* तुल्यबल-शक्ति-सामर्थ्य.

Equiponderant, *a.* समभार-तौल, तुल्यपरिमाण.

Equity, *s.* न्यायः, धर्मः, अपक्षपातः, न्याय्यता, सर्वसमता. -able, *a.* न्यायपरायण-वर्तिन्, अपक्षपातिन्, समदर्शिन्, सर्वसमन्यायिन्. 2 न्याय्य, यथान्याय, पक्षपातरहित, सर्वसाधारण. -ableness, *s.* न्याय्यता, अपक्षपातः. -ably, *adv.* न्यायतः, यथान्यायं, पक्षपातं विना.

Equivalent, *a.* सम, तुल्य ; *See* Equal. 2 तुल्यार्थक, समार्थ, तुल्यबल-शक्ति; तुल्य-सम-मूल्य, समार्घ. -*s.* तुल्यद्रव्यं-वस्तु *n.*, तुल्यमूल्यं वस्तु, प्रतिफलं. 2 तुल्यार्थः शब्दः, पर्यायः.

Equivocal, *a.* द्व्यर्थ, संदिग्धार्थ, वक्र, अस्पष्टार्थ, अव्यक्त. -ly, *adv.* वक्रोक्त्या, भंग्या, अस्पष्टं, संदिग्धार्थेन, अव्यक्तं. -ness, *s.* संदिग्धार्थः, द्व्यर्थता, अर्थसंदेहः, वक्रता, अस्पष्टता.

Equivocate, *v. i.* वक्रं-अस्पष्टार्थं-वद् 1 P, वाक्यभेदं कृ 8 U. -ion, *s.* वक्रवचनं, वक्रोक्ति *f.*, वाक्यभेदः, वाक्छलं, अप-व्यप-देशः.

Equivoque, *s.* कूटोक्ति-अर्थापत्ति *f.*, वक्रभाषितं.

Era, *s.* कालः, शाकः, ध्रुवः कालः. 2 विशिष्टकालः.

Eradiate, *v. i.* किरणान् क्षिप्-मुच् 6 P, परिस्फुर् 6 P.

Eradicate, *v. t.* उत्-निर्-मूल् 10 ; उच्छिद् 7 P, उत्सद् c., उत्पट् 10, वि-ध्वंस् c., आमूलं उद्धृ 1 P or उत्खन् 1 P, व्यप-रुह् c. (रोपयति). -ion, *s.* उन्मूलनं, उच्छेदः, उत्पाटनं, व्यपरोपणं. -or, *s.* उन्मूलयितृ *m.*, उच्छेदिन् *m.*

Erase, *v. t.* व्या-अप-मृज् 2 P, विलुप् c., व्यामृश् 6 P. 2 उच्छिद् 7 P, विनश् c., उन्मूल् 10. -ure, *s.* व्यामर्शः, लोपः, उच्छेदः, विनाशः.

Ere, *prep.*, *adv.* पूर्वं, प्राक्, (with abl.) ; 'e. this' अतः पूर्वं; 'e. long' अचिरात्-रेण; 'e. now' नातिचिरं, नातिचिरात्प्राक् ; 'e. while' किंचित्पूर्वं ; *See* Before.

FLAT, *a.* सम, समस्थ, समरेख, सपाट, अभुग्न. 2 निम्न, अनुच्च, नत, अनुन्नत. 3 असार, नीरस, फल्गु, विरस, रस-स्वाद-हीन, निस्तेजस्, निःसत्त्व. 4 स्पष्ट, स्फुट, व्यक्त, अवक्र, असंदिग्ध, सुव्यक्त, परिस्फुट. 5 अवनिं गत, दंडवत् क्षित; 'he laid himself f. on the ground' भूमौ दंडवत्पतितः; 'f. surface' समपृष्ठं; 'f. roof' पृष्ठं; 'f.-nosed' अवनाट, अवटीट, अवभ्रट, नत-चिपिट-नासिक. –*s.* समभूमि *f.*, समस्थलं-ली, समस्थानं, पाटः. 2 निम्नभूमिः. 3 सैकतं, पुलिनं. 4 पत्रं, फलकः-कं. 5 मंदः, अनुदात्तः, मंद्रः. –LY, *adv.* समं. 2 स्फुटं, सुव्यक्तं, अवक्रं, असंदेहं. –NESS, *s.* समता, निम्नता, असारत्वं, &c. –TEN, *v. t.* समीकृ 8 U. 2 आ-अव-नम् c. (नमयति), नम्रीकृ, निम्नीकृ. 3 रसं हृ 1 P, नीरसीकृ–*v. i.* समीभू, नम्रीभू.

FLATTER, *v. t.* सं-अभि-परि-स्तु 2 U, प्र-शंस् 1 P, चाटुवचनैः-स्तुत्या-सांत्व् 10 or संतुष् c. or उप-लल् 10 or प्र-लुभ् c. or आकृष् 1 P, उपच्छंद् 10. 2 चाटूनि वच्-ब्रू 2 P, प्रियं वद् 1 P. 3 अनु-नी 1 P, आ-राध् c., मिथ्या प्रशंस् or श्लाघ् 1 A. 4 मिथ्या आशां उत्पद् c. or वृध् c. –ER, *s.* चाटुकारः, संस्तावकः, सांत्ववादिन् *m.*, प्रशंसकः, प्रियंवदः, चाटुवादी, मिथ्याशंसकः. –ING, *a.* स्तुतिमय (यी *f.*), परितोषक, प्रीतिकर (री *f.*), प्रशंसामय.–INGLY, *adv.* चाटूक्त्या, अतिप्रशंसापूर्वं, सांत्वनपूर्वं. –Y, *s.* संस्तावः, स्तुति *f.*, स्तवः, चाटु *m. n.*, चाटूक्ति *f.*, अतिप्रशंसा, सांत्वनं-ना, उपलालनं, मधुर-प्रिय-वचनं, सांत्ववादः, मिथ्याप्रशंसा, व्याजस्तुतिः, चाटुवादः. 2 अनुनयः, आराधनं, संतोषणं.

FLATULENT, *a.* वात-वायु-ग्रस्त, बद्धवात, वातफुल्ल, वायुपूर्ण, वातुल. –FLATULENCE, –CY, *s.* वायुः, वातः, वायुफुल्लता, अंत्राध्मानं, वातिकत्वं.

FLATUS, *s.* वातः, वायुः, अंत्रवायुः.

FLAUNT, *v. i.* सावलेपं चल्-चर् 1 P, सदर्प-उद्धतं-विकटं-परिक्रम् 1 U, 4 P. –ING, *a.* उद्धतगति, विलासाद् मंदगामिन्, दर्शनीयमानिन्, सुभगंमन्य; 'a f. gait' विकटा-धीरोद्धता-गतिः.

FLAVOUR, *s.* आ-,स्वादः, रसः, रुचि *f.* –*v. t.* सरस-*a.* कृ 8 U. –ED, *a.* सरस; 'well-f.' सुरस, स्वादु, सुस्वाद. –LESS, *a.* अरस, नीरस, विरस, अस्वादु. –OUS, *a.* मिष्ट, स्वादु, सुरस.

FLAW, *s.* दोषः, छिद्रं, रंध्रं, वैकल्यं, न्यूनता; 'seeking or finding f. s' रंध्रान्वेषिन्, छिद्रान्वेषिन्, दोषैकदृक्. 2 चंडवातः, प्रभंजनः; *See* HURRICANE. 3 भंगः, संधिः. भेदः, रंध्रं, छिद्रं; 'f. in a jewel' पुलकः, खंडः.–*v. t.* छिद् 10, व्यध्, 4 P.–LESS, *a.* निर्दोष; *See* FAULTLESS. 2 निश्छिद्र, नीरंध्र. –Y, *a.* सरंध्र, सच्छिद्र, सदोष.

FLAX, *s.* क्षुमा, अतसी, उमा ; शणं ; 'f.-comb' उमामार्जनी. –EN, *a.* क्षौम-औम (मी *f.*).

FLAY, *v. t.* चर्म अपनी or निर्हृ 1 P or उल्लिख् 6 P or निष्कृष् 1 P, निस्त्वचयति (D.), निस्त्वचीकृ 8 U, त्वक्ष् 1 P. –ER, *s.* त्वग्विदारकः, चर्मनिष्कर्षकः. –ING, *s.* चर्मनिष्कर्षणं, निश्चर्मीकरणं.

FLEA, *s.* मक्षिका, मत्कुणः, देहिका, तल्पकीटः. –*v. t.* देहिकाः अपनी 1 P.

FLEDGED, *a.* संजातपक्ष, गरुत्मत्, सपक्ष, पक्षयुक्त.

FLEE, *v. i.* पलाय् 1 A, अपक्रम् 1 U, 4 P, वि-प्र-द्रु 1 P, परा-इ 2 P, अपधाव् 1 P, अप-निर्-गम् 1 P, अप-सृ-सृप् 1 P. 2 त्यज् 1 P, परिहृ 1 P, वृज् 10.

FLEECE, *s.* मेषलो(रो)मन् *n.* –*v. t.* (लोम) छिद् 7 P or लू 9 U. 2 अपहृ 1 P ; 'f. ed' हृतसर्वस्व. –CY, *a.* बहुलोमन्, लोमश, लोमावृत.

FLEER, *v. t.* अव-उप-हस् 1 P, तिरस्कृ 8 U, अवमन् 4 A, अव-ज्ञा 9 U ; *See* CONTEMN. –*s.* उप-अव-हासः, तिरस्कारः, अवहेलना, अवज्ञा.

FLEET, *s.* नौसमाजः-साधनं, पोतावलि *f.*, युद्धनौसमूहः.–*v. i.* द्रुतं-शीघ्रं-प्रसृप् 1 P or गम् 1 P, वेगेन चल् 1 P, त्वर् 1 A.–*a.* वेगवत्, शीघ्र-त्वरित-लघु-गति, प्रजविन्, अतिरंहस्, जवन (नी *f.*), शीघ्रगामिन्, महाजव ; 'f. as the wind' वायुगति, वायुवेग ; 'f. as thought' मनोजव. –ING, *a.* क्षणिक, क्षणभंगुर, अध्रुव, क्षणस्थायिन् ; *See* FICKLE. –LY, *adv.* द्रुतं, शीघ्रं, लघु, सत्वरं, जवेन, वेगेन, रंहसा. –NESS, *s.* वेगः, प्र-,जवः, रंहस् *n.*, त्वरितगति *f.*

FLESH, *s.* मांसं, आमिषं, पिशितं, क्रव्यं, तरसं, पललं; 'dried f.' वल्लूरं-रा, उत्तप्तं, शुष्कं मांसं. 2 शरीरं, विषयसेवा, विषयासक्ति *f.* ; 'f. diet or meat' मां-

साहार: ; 'f.-colour' मांसवर्ण:-राग:, लोहित: ; 'f.-monger' मांसविक्रयिन्. -LESS, *a.* अमांस, अपुष्ट, मांसहीन. -LY, *a.* शारीरिक-दैहिक (की *f.*), विषयिन्, सांसारिक-ऐहिक (की *f.*). -Y, *a.* मांसल, पुष्ट, पीन, पीवर, मेदस्विन् ; *See* FAT.

FLEXIBLE, *a.* आ-,नम्य, कुंचनीय, नमन-कुंचन-शील, कोमल, मृदु, आयम्य. 2 अनुनेय.

FLEXION, FLEXTURE, *s.* आ-,नति *f.*-नमनं ; भंग:, आ-अव-कुंचनं, वक्रता, वक्रिमन् *m.*

FLEXUOUS, *a.* वक्र, कुटिल, जिह्म, भंगुर.

FLICKER, *v. i.* चल् 1 P, चंचलतया ज्वल् 1 P, लोलशिखया ज्वल्, चंचलीभू 1 P. 2 पक्षौ आ-स्फल् c. -ING, *a.* चल, चंचल, अस्थिर, लोल. -*s.* चंचलशिखा, चलनं, चांचल्यं.

FLIMSY, *a.* असार, फल्गु, सारहीन, निर्बल, नि:सत्त्व, अल्पबल, क्षीणशक्ति. -NESS, *s.* असारता.

FLINCH, *v. i.* विमुखी-पराङ्मुखी-भू 1 P, विचल् 1 P, नि-परा-वृत् 1 A, (abl.) ; पलाय् 1 A, त्यज् 1 P, त्यक्त्वा निर्गम् 1 P or अप-सृ 1 P, मुखं परा-वृत् c. -ING, *s.* निवर्तनं, विमुखता, विचलनं, विमुखीभवनं.

FLING, *v. t.* (सहसा-बलेन) क्षिप् 6 P, अस् 4 P, मुच् 6 P, वि-सृज् 6 P, पत् c., ईर् c.; 'f. away or off' अपक्षिप्, निरा-कृ, अपास्, अप-हा 3P; 'f. open' सहसा or बलाद् अपावृ 5 U. -*s.* क्षेप:-पणं, पात:-तनं, प्रक्षेप:.

FLINT, *s.* अरणि:, अग्निग्रावन् *m.*, अग्निप्रस्तर:. -Y, *a.* अग्निप्रस्तरमय (यी *f.*). 2 कठिनहृदय, पाषाणहृदय.

FLIP, *s.* आघात:, प्रहार:, आस्फालनं.

FLIPPANT, *a.* वाचाल, वावदूक, नि:सार, वाक्चंचल. 2 चपल, अस्थिर, लोल, चंचल. -LY, *adv.* वाक्चापल्येन. -FLIPPANCY, *s.* वाक्चापल्यं, वावदूकता; नि:सारता. 2 प्रगल्भता, लौल्यं, चापल्यं.

FLIRT, *v. t.* सहसा क्षिप् 6 P. -*v. i.* अव-हस् 1 P, अधिक्षिप् 6P. 2 वि-भ्रम् 1, 4 P, विलस् 1 P, विलासंविभ्रमं-दृश् c. 3 चल *a.* भू 1 P, स्पंद् 1 A, कंप् 1 A, स्फुर् 6 P. -*s.* आकस्मिकक्षेप:. 2 विलासिनी, लीलावती, चपला, प्रगल्भा. -ATION, *s.* लीला, हेला, विभ्रम:, विलास:, हाव:, खेला, प्रेमलीला. 2 स्पंदनं, स्फुरणं; हृदयकंप:.

FLIT, *v. i.* लघु चल् 1 P, द्रुतं वि-प्र-सृप् 1 P, स्थानात्स्थानं गम् or चल् 1 P, इतस्ततो भ्रम् 1, 4 P. 2 प्र-उत्-डी 1, 4 A, व्योम्नि विसृप्, चपलीभू. -TING, *s.* भ्रमणं, चलनं, लघु सर्पणं.

FLITCH, *s.* वल्लूरं, शूकरोत्तंत.

FLITTER, *s.* चीरं, कर्पट:, वस्त्रखंड:-डं.

FLITTERMOUSE, *s.* जतुका, अजिनपत्रा.

FLOAT, *v. i.* प्लु 1 A; तॄ 1 P. 2 भास् 1 A. -*v. t.* प्लु c., वह् c. -*s.* प्लव:, उडुप:, कोल:, वहित्रं, तरणी, तरी:.

FLOCCULENT, *a.* सांद्र, घनीभूत, श्यान.

FLOCK, *s.* यूथं, संघ:, निवह:, समूह:, कुलं, गण:; *See* MULTITUDE; 'f. of cattle' पाशवं, पशुकुलं, गोवृंदं-कुलं; 'f. of sheep' अविकुलं, आविकं; 'f. of sheep and goats' अजाविकं; 'in f. s' गणश:, संघश:. -*v. i.* (Together) संघश:-गणश:-समागम् 1 P or मिल् 6 P or संनि-पत् 1 P, एकत्र मिल्, एकीभू.

FLOG, *v. t.* कशया-वेत्रेण-तड् 10 or आ-हन् 2 U or दंड् 10 or प्र-हृ 1 P. -GING, *s.* कशाघात:, कशाप्रहार:; 'deserving f.' कश्य.

FLOOD, *s.* पूर:, ओघ:; स्रोतस् *n.*, प्रवाह:, रय:. 2 आप्लाव:, संप्लव:, तोयविप्लव:, जलप्रलय:, जलोपप्लव:; 'universal f.' महाप्रलय:, भूतसंप्लव:, संवर्त:. 3 प्राचुर्यं, बाहुल्यं, पूर:, ओघ:; 'f. of tears' बाष्पपूर:-ओघ:-वर्ष:, अश्रुपात:-वर्ष: ; 'f.-gate' द्वारं, निर्गमार्ग:, परि(री)वाह:, जलद्वारं, जलनिर्गम:. -*v. t.* प्लु c., आ-सं-परि-°, परिवह् c. ; 'with her eyes f.-ed with tears' अश्रुपरिप्लुतेक्षणा; 'a f.ed river' आप्लुतोदका-परिवाहिणी-नदी.

FLOOK, *s.* हलदंत:.

FLOOR, *s.* भूमि *f.*, भूपृष्ठं, तलं, भूतलं, गृहभू-भूमि: *f.*, गृहपीठ:, वास्तु *m. n.*, गृहमूलं, वेश्मभू:. 2 (Story) भूमि:, कोष्ठ:; 'a palace having 7 f. s' सप्तभूमिक: प्रासाद:; 'the upper f.' उपरिभूमि:. 3 फलकास्तरणं, फलकसंस्तर:, फलक:-कं. -*v. t.* फलकै: आ-स्तॄ 9U or आच्छद् 10. 2 नि-पत् c., भूमौ क्षिप् 6P.

FLOP, *v. t.* आ-स्फल् c.

FLORAL, *a.* कौसुम (मी *f.*), पुष्प in comp.

FLORID, *a.* रक्त, रक्त-अरुण-वर्ण. 2 अलंकृत, उज्ज्वल, अलंकारशोभित, सालंकार. -ITY,-NESS, *s.* (कपोल)-राग:, अरुणिमन्-रक्तिमन् *m.* 2 वागलंकार:, सालंकारत्वं, अलंकारशोभा.

FLORIFEROUS, *a.* पुष्पोत्पादक, पुष्पप्रद.

FLORILEGE, *s.* पुष्पचय:-संग:.

FLORIST, *s.* मालाकार:, पुष्पविद्याज्ञ:.

FLOTA, *See* FLEET.

FLOTILLA, *s.* लघुनौसमूह:.

FLOUNCE, *v. i.* अंगानि विक्षिप् 6 P or इतस्तत: चल् c. -*s.* आकस्मिक: अंगविक्षेप:.

FLOUNDER, *v. i.* इतस्तत: क्षिप् pass., लुट् 1 A, 6 P, वि-प्लु 1 A. 2 वि-परि-भ्रम् 1, 4 P.

FLOUR, *s.* गोधूमचूर्णं, चूर्णं, क्षोद:, पिष्टं, गुंडिका, सक्तव: (pl.).

FLOURISH, *v. i.* सं-जन् 4 A सं-भू 1 P; 'when Pa*n*ini f. ed' यदा पाणिनि: समजायत. 2 वृद्धि-उन्नतिं-गम् 1 P, सं-ऋध् 4, 5 P, एध् 1 A, सं-वि-वृध् 1 A, प्र-उप-चि pass., स्फाय् 1 A. -*v. t.* वृध् c. 2 चित्र् 10, पुष्पादिना अलंकृ 8 U or शुभ् c. or

रंज् c. 3 भ्रम् c. (भ्रमयति), घूर्ण् c. —*s.* आडंबरः, शोभा, अलंकारः, मंडनं. 2 निः-,स्वनः (of trumpets). 3 दर्पवाक्यं. गर्वोक्ति *f.* 4 भ्रमणं, उद्गमः. —ING, *a.* समृद्ध, सुस्थित, सुस्थ, वर्धिष्णु, उदयिन्, उपचीयमान.

FLOUT, *See* CONTEMN.

FLOW, *v. i.* प्र-,स्रु 1 P; प्र-नि-अभि-स्यंद् 1 A, क्षर् 1 P, गल् 1 P, सृ 1 P, प्रवह् 1 P, री 4 A, द्रु 1 P; 'f. ing with tears' बाष्पजलनिस्यंदिन्; 'f. ing with nectar' सुधास्यंदिन्, अमृतस्रुत्; प्र-,स्नु 2 P; 'f. ing (of milk)' प्रस्रवः. 2 प्र-सृप् 1 P, प्र-सृ, प्रवृत् 1 A, प्र-गम्-चल् 1 P, प्र-या 2 P. 3 जन् 4 A, उत्पद् 4 A, उत्-प्र-सं-भू 1 P, प्रवृत्. 4 स्रंस् 1 A, शिथिलीभू, श्लथ-वितत-गलित *a.* भू. —*s.* स्रवः, स्रवणं, स्रुति *f.*, स्रावः, क्षरणं, गलनं, प्रवृत्ति *f.*, अभि-नि-स्यं-(ष्यं)दः-दनं. 2 प्रवाहः, स्रोतस् *n.*, ओघः, प्रस्रवः, वेगः, रयः, धारः-रा; वेला, पद्धति *f.* 3 समुद्रवेला, वेला; 'f. of tears' अश्रुपातः-प्रवाहः, बाष्पवर्षः, धाराश्रु *n.*; 'f. of words' वागोघः. अप्रतिहता वाक्सरणिः-पद्धतिः. —ING, *a.* प्रस्रुत, स्यंदिन्, विसारिन्, स्रवत्. 2 अप्रतिहत, अस्खलित; 'a f. delivery' अस्खलितभाषणपद्धतिः. —INGLY, *adv.* अस्खलितवाक्येन, अप्रतिहतं, द्रुतं, अविलंबितं.

FLOWER, *s.* पुष्पं, कुसुमं, प्रसूनं, सुमं, सूनं, सुमनस् *f.* (pl.). 2 अवतंसः, ललामभूतः, अलंकारः, तिलकभूतः; 'Râma is the f. of his class' स्ववर्गललामभूतो रामः. 2 सारः, उत्कृष्ट-श्रेष्ठ-भागः, उत्तमांशः, सारांशः; 'f. of age' यौवनं; 'f. of youth' नवयौवनं; 'being in the f. of youth' आरूढयौवनारंभ, प्रौढयौवन. —*v. i.* फुल्ल् 1 P, विकस् 1 P, स्फुट् 6 P, भिद् pass. 2 मंडायते-फेनायते (D.). —*v. t.* पुष्पादिना अलंकृ 8 U or शुभ् c. —ED, *a.* कुसुमित, पुष्पित, कुसुमसनाथ. 2 विकसित, फुल्ल, स्फुटित. —ING, *a.* पुष्पवत्, कुसुमवत्, कुसुमित, प्रफुल्ल, स्फुटितपुष्प. 2 पुष्पद. —LESS, *a.* अकुसुम, कुसुमहीन. —Y, *a.* पुष्प-कुसुम-मय (यी *f.*), सपुष्प, सकुसुम, पुष्पशालिन्; gen. ex. by (*s.*) in comp.; 'f. arrows' कुसुमशराः. 2 सालंकार, अलंकृत, अलंकारयुक्त, मंडित.

FLUCTUATE, *v. i.* इतस्ततः चल् 1 P or घूर्ण् 1 A, लुल् 1, 6 P, विलुट् 1 A, 6 P. 2 दोलायते (D.), विकृप् 1 A, संदिह् 2 U; विचल, अस्थिर-चंचल-*a.* भू 1 P. —ING, *a.* दोलायमान, अस्थिर, चंचल, अनवस्थित, लोल, तरल, चल. —ION, *s.* अस्थैर्य, चलता, अप्रतिष्ठा, चांचल्यं, विकल्पः, संदेहः, अनवस्थिति *f.*, आंदोलनं.

FLUE, *s.* धूममार्गः-पथः.

FLUENT, *a.* अस्खलितवाच्, अस्खलद्वाक्य, वाक्पटु, द्रुतत्वरित-वाच् (of persons); अनर्गल, अप्रतिहतौघ, अविश्रांत, अस्खलित, द्रुत, अप्रतिहत, अनवरत. —LY, *adv.* अस्खलितवाचा, द्रुतवाक्येन, अस्खलितं, द्रुतं, अप्रतिहतं, वाग्विभवेन. —FLUENCY, *s.* वाक्पटुत्वं, वाक्चापल्यं, वाग्विभवः; ओघः, अनर्गलता, अप्रतिहतत्वं.

FLUID, *s.* द्रवः, रसः, द्रववस्तु *n.* —*a.* द्रव, विलीन, द्रुत; *See* LIQUID. —ITY, *s.* द्रवता, विलयः

FLUMMERY, *s.* मिथ्याप्रशंसा-स्तुति *f.*

FLUNKY, *s.* दासः, चेटः, नीचकर्मकरः.

FLURRY, *See* AGITATE.

FLUSH, *v. t.* अरुणीकृ 8 U, अरुणयति (D.), रंज् c., रक्तीकृ; 'with her face f. ed with anger' कोपारुणितानना. 2 उत्सिच् c., दृप् c., दर्पेण आ-ध्मा 1 P, उद्धतीकृ. —*v. i.* अरुणीभू, रक्तीभू, लोहितायते (D.), रंज् pass.; अरुणवदन-लोहितानन-*a.* भू. —*s.* अरुणिमन् *m.*, रक्तिमन् *m.*, रक्तता, रागः, कपोल-वदन-रागः. 2 प्रफुल्लता, बाहुल्यं, समृद्धि *f.* —*a.* सतेजस्क, प्रौढ, तेजस्विन्. 2 समृद्ध, धनसंपन्न. 3 मुक्तहस्त, अतिव्ययपर. —ED, *a.* अरुणित; रक्त, लोहित. 2 उद्धत, दृप्त, दर्पाध्मात, उत्सिक्त, गर्वित, सावलेप.

FLUSTER, *v. t.* पानादिना मद् c. or मुह् c. —*s.* चित्तभ्रमः, उन्मादः, मोहः, व्याकुलता.

FLUTE, *s.* वेणुः, मुरली, वंशः. —*v. i.* 'Blow a f.' (वेणुं) मुखमारुतेन पूर् 10 or वद् c., ध्मा 1 P; 'f.-player' वैणविकः, वेणुध्माः, वांशिकः.

FLUTTER, *v. i.* पक्षौ वि-धू 5, 9 U, 6 P or आस्फल् c. or उत्क्षिप् 6 P or विचल् c. 2 इतस्ततः चल् 1 P or धाव् 1 P or प्र-सृ 1 P. 3 कंप् 1 A, स्फुर् 6 P, उच्छ्वस् 2 P, स्पंद् 1 A, क्षुभ् 4 P. —*v. t.* संक्षुभ् c., आकुलीकृ 8 U, स्पंद् c., कंप् c., स्फुर् c. —*s.* विधुननं, आस्फालनं, उत्क्षेपणं. 2 विकंपः, स्फुरणं, स्पंदनं, उच्छ्वसनं. 3 सं-,क्षोभः, संभ्रमः, सं-आ-वेगः, चित्तवेगः-भ्रमः. —ING, *s.* पक्षास्फालनं, पक्षचालनं. —*a.* विचल, कंपमान; 'f. in the breeze' अनिलोद्धत, पवनाक्षिप्त, पवनाधूत.

FLUVIAL, *a.* नदीसंबंधिन्.

FLUX, *s.* संगमः, संघातः, समागमः, संमर्दः, 2 (Fluxion) प्रवाहः, प्र-,स्रवः, क्षरणं, गलनं, स्पंदनं. —*v. t.* वि-द्रु c., वि-ली c. —IBLE, *a.* द्राव्य, गलनीय.

FLY, *s.* मक्षिका, वर्वणा, नीला; 'f.-flap' अवचूलकः, रोमगुच्छः; 'f.-leaf' मलपृष्ठं. —*v. i.* उद्-,डी 1, 4 A, उत्-पत् 1 P, खे विसृप् 1 P, आकाशेन या 2 P or गम् 1 P. 2 अप-या 2 P, वि-प्र-द्रु 1 P, पलाय् 1 A; *See* FLEE. 3 त्वरितं-शीघ्रं गम् or चल् 1 P or विसृप् or अतिक्रम् 1 U, 4 P. —*v. t.* त्यज् 1 P, परिहृ 1 P, वृज् 10. 2 आकाशे निक्षिप् 6 P or विसृप् c. or विसृ c.; 'f. at' आ-अभि-पत्, आ-अभि-द्रु, आ-अभि-प्र-धाव् 1 P; 'let f.' मुच् 6 P, उत्पत् c., विसृज् 6 P. —ING, *s.* डयनं, विसर्पणं, उत्पतनं; 'f. up and down' डीनावडीनं. —*a.* खविसर्पिन्, आकाशगति, आकाशगामिन्, डयमान, नभोगति; 'f.

bridge' चलसेतुः, जंगमसेतुः. —FLIGHT, *s.* पलायनं, विद्रावः, अपयानं, अपक्रमः-मणं, आगमः; 'to put to f.' विद्रु c.; 'put to f.' विद्रुत, विद्रावित, कांदिशीक. 2 (Of birds) उत्तनं, डीनं, उड्डयनं, उत्पतनं, उद्गमनं; 'downward f.' अवडीनं. 3 पक्षिमाला-श्रेणी. 4 मति-बुद्धि-विलासः; 'f. of steps' सोपानपंक्ति-श्रेणि-णी *f.*, सोपानपरंपरा; 'f. of an arrow' शरपातः. —Y, *a.* चलबुद्धि, भ्रांत-लोल-मति; अस्थिर, लोल; *See* FICKLE.

FOAL, *s.* किशोरः, अश्वशावः-वकः, बालघोटकः, अंबरीषः.

FOAM, *s.* फेनः-णः. 2 मंडः, उत्सेकः; 'snowy f.' हिमधवलं, फेनपटलं. —*v. i.* फेनायते-मंडायते (D.), फेनं उत्पद् c. or निर्गम् c. (गमयति), उत्सिच्-उत्वीड् pass. —Y, *a.* फेनिल, फेनल, फेनयुक्त, फेनिन्.

FOB, *s.* घटीपिधानं-कोशः. —*v. t.* Cheat, q. v.

FOCUS, *s.* केंद्रं. —*v. t.* एकत्रीकृ 8 U.

FODDER, *s.* घासः, यवसं, पशुभोजनं, तृणादि.

FOE, *s.* शत्रुः, अरिः, रिपुः; *See* ENEMY.

FŒTUS, *See* FETUS..

FOG, *s.* कुहेडिका, कुहा, धूमि(मि-लि)का, कुज्झटिका, कुज्झटि-टी *f.* —GY, *a.* कुहावृत, धूमल, सधूमिक, कुज्झटिकाच्छन्न, धूमिकावृत-मय (यी *f.*).

FOIBLE, *s.* छिद्रं, दोषः, अपराधः, न्यूनता, हीनता, वैकल्यं, अगुणः.

FOIL, *v. t.* परा-भू 1 P, परा-जि 1 A; भंज् 7 P, व्याप्रति-हन् 2 P, खंड् 10, परास् 4 U, मोघी-विफली-कृ 8 U. 2 Blunt, q. v. —*s.* भंगः, व्याघातः; पराभवः. 2 मिथ्याखड्गः, निर्धारखड्गः. 3 पत्रं; 'golden f.' स्वर्णपत्रं. 4 प्रभावर्धकं, कांति-शोभा-वर्धकं. —ED, *a.* (Of persons) भग्नोद्यम, खंडिताश, हताश, अकृतार्थ; *See* DISAPPOINTED. 2 (Of efforts &c.) भग्न, प्रतिहत, मोघीभूत, खंडित.

FOIN, *s.* यष्टि-खड्ग-आघातः. —*v. t.* यष्टिना प्रहृ 1 P or तड् 10.

FOIST, *v. t.* कपटेन लिख् 6 P or निविश् c., मिथ्या क्लृप् c., कृत्रिम *a.* कृ 8 U.

FOISTINESS, *s.* पूतिगंधिता.

FOLD, *v. t.* पुटी-गुणी-कृ 8 U, व्यावृत् c., संपीड् 10, पुटयति (D.); 'f.ed thrice' त्रिगुणीकृत; 'f.-ing his hands together' हस्तौ समानीय (R. II. 64), अंजलिं बद्ध्वा, कृतांजलिः, सां(प्रां)जलिः. 2 संवृ 5 U, पि-धा 3 U; आ-वेष्ट् c., आच्छद् 10. 3 Embrace, q. v.; 'f. ing her in his arms' भुजाभ्यां तामापीड्य. 4 व्रजे निरुध् 7 U or निविश् c. —*s.* पुटः-टं, भंगः, व्यावृत्ति *f.*, व्यावर्तनं; चूणः, वस्त्रभंगः-पुटः, ऊर्मि *f.* 2 व्रजः, अवरोधः, शाला, गोष्ठं; 'cattle-f.' गोव्रजः; 'sheep-f.' मेषगोष्ठः-गोस्थानं, व्रजाजिरं. 3 (In comp.) ex. by गुण; 'eight-f.' अष्टगुण; 'f. ing doors' द्विपक्षद्वारं.

FOLIAGE, *s.* पल्लवः-वं, किसलयः-यं, पर्णं, दलं, पत्रं (gen. used in pl.); पल्लवगुच्छः-चयः.

FOLIATE, *a.* पर्णावृत, सदल.

FOLIO, *s.* पुस्तकपत्रं, पृथु-विशाल-पत्रं.

FOLK, *s.* जनः, जनसमूहः, जनता, लोकः; 'old f.' वृद्धजनः, वृद्धाः.

FOLLOW, *v. t.* अनु-गम्-व्रज्-सृ 1 P, अनुबंध् 9 P, अनु-इ-या 2 P, अनुचर् 1 P, अनुक्रम् 1 U, 4 P. 3 सेव् 1 A, अनुष्ठा 1 P, आ-स्था 1 A; अनुवृत् 1 A, आश्रि 1 U, पुरस्कृ 8 U, अनुवि-धा 3 U, अनुरुध् 4 A, अनुसृ; 'f. (in) the footsteps of the great' महतां पदमनुविधेयं; 'f. ing the path' पदवीं प्रतिपद्य; 'f. ing a middle course' पुरस्कृतमध्यमक्रमः (R. VIII. 9); 'one misfortune f. s another' दुःखं दुःखानुबंधि (V. 4), विपद्विपदमनुबध्नाति (Ka. 73). 3 उपास् 2 A, भज् 1 U, आश्रि, परिचर्; श्रु desid. (शुश्रूषते). —*v. i.* उत्पद् 4 A, प्राद्-आपद्-सिध्-अनुवा-pass.; परिच्छिन्नस्तावज्जीव इति प्राप्नोति (S. B. 651) 'it f. s therefore &c.'; 'what f. ed is understood' परस्तादवगम्यते (S. 1); (in conversations) ततस्ततः 'what f. ed next'; 'as f. s' तद्यथा, तद्यथानुभूयते; or merely एवं, इति, उक्तप्रकारेण, इत्थं. —ER, *s.* अनुयायिन्-गामिन्-वर्तिन्-सारिन् *m.* 2 परिजनः, सेवकः, अनु-उप-जीविन् *m.*, अनुगः, अनुचरः, अनुयातृकः, अनुगतिकः, परिवारः, सहचरः, सहायः. 3 आश्रितः, भक्तः, अनुषंगिन् *m.* —ING, *a.* इदं-एतद् *pron. a.*; 'the f. story' एषा-इयं-कथा; पश्चात् कीर्त्यमान, अनुग, अनुयायिन्. —*s.* अनुसरणं-यानं-गमनं-वृत्ति *f.*-रोधः-वर्तनं.

FOLLY, *s.* *See* under FOOL.

FOMENT, *v. t.* (उष्णोदकादिना) सं-सिच् 6 P, लिप् 6 P, अंज् 7 P, दिह् 2 U; स्विद् c. 2 उद्दीप् c., प्र-सं-वृध् c., उत्तिज् c., प्रोत्सह् c., उत्तृ c., प्रकुप् c., प्रवृत c.; 'f. disputes' उप-जप् 1 P, भेदं वृध् c., भेदबीजं वप् 1 P. —ATION, *s.* प्र-,स्वेदनं, घर्मानुलेपनं, द्रवस्वेदः. 2 उद्दीपनं, संवर्धनं, उत्तेजनं, प्रवर्तनं. —ER, *s.* उपजापकः, भेदकरः.

FOND, *a.* वत्सल, अनुरागवत्, सानुराग, अनुरक्त, प्रणयिन्, अनुरागिन्. 2 कविन्, अभिलाषिन्, आसक्त, रक्त, रत, पर, तत्पर, gen. in comp. 3 मूढ, मुग्ध, अत्यनुरक्त; 'f. of' ex. by शील, लालस, काम, प्रिय, in comp.; oft. by ईह् 1 A, कांक्ष् 1 U, अभिलष् 1, 4 P, भज् 1 U, सेव्-रुच् 1 A; 'f. of sport' क्रीडाप्रिय; 'f. of chase' मृगयाशील; 'f. of change' अवस्थांतरमीहमान; 'f. of drinking' पानासक्त, पानव्यसनिन्. —LY, *adv.* सानुरागं, सप्रेम-मं; अतिस्नेहेन, अविवात्सल्येन. —NESS, *s.* अनुरागः, आसक्ति *f.*, रति *f.*, प्रीति *f.*, प्रणयः, स्नेहः; 'ingenious

f. for the mate' कांतानुवृत्तिचातुर्यं; प्रेमन् *m.*, *n.*, वात्सल्यं; अभिरुचि *f.*, कामः, इच्छा, ईहा.

FONDLE, *v.t.* उप-लल् 10, अंक-पा c. (पालयति), क्रीडीकृ 8 U, आलिंग् 1 P, परिष्वंज् 1 A, आ-सं-पीड् 10; 'f. ed too much' दुर्ललित. -ING, *s.* उप-लालनं, आलिंगनं. भुजापीडनं. परिष्वंगः. 2 प्रेम-स्नेह-पात्रं-भाजनं, स्नेहभूमि *f.*

FOOD, *s.* अन्नं, आहारः, भोजनं, भोज्यं, भक्ष्यं, खाद्यं, खादनं, भक्षणं, अभ्यवहार्यं, भक्तं, विघसः, ग्रासः, अशनं, अंधस् *n.*; 'cooked f.' ओदनः-नं; 'f. and raiment' ग्रासाच्छादनं, अन्नवस्त्रं ; 'forbidden f.' अभक्ष्य.

FOOL, *s.* मूर्खः, मूढः. निर्बुद्धिः, अज्ञः, जडः, मंदः, अबुधः, अप्राज्ञः, प्रज्ञाहीनः, स्थूल-जड-धीः, अल्प-धीः-मतिः, मंद-धीः-मतिः, अनात्मज्ञः, बर्बरः; 'make a f. of' उपहासास्पदं कृ 8 U, विडंब् 10, (एवं प्रार्थयिता विडंब्यते S. 2). -*v. t.* मुह् c., वि-प्र-लभ् c., वंच् 10; *See* CHEAT; 'f -hardy' अतिसाहसिक, व्यामूढ, अविमृश्यकारिन्, अविमृश्य प्रगल्भ, प्रमत्तवीर, प्रमत्त. -ERY, *s.* प्रहसनं, विडंबना. 2 बालिश्यं, मूर्खक्रिया, बालिशता. मूर्खता, व्यामोहः. -ISH, *a.* मूर्ख, मूढ, बालिश, अनात्मज्ञ, दुर्मति, दुर्मेधस्, वैधेय, बालिशमति, निर्बुद्धि, जड, स्थूलधी, प्रज्ञा-बुद्धि-हीन; *See* (*s.*). 2 निरर्थक, अविमृश्यकृत-दत्त. -ISHLY, *adv.* मूढतया, अज्ञानेन, मूर्खवत्, मूढवत्, मौर्ख्येण. -ISHNESS, -FOLLY, *s.* मौर्ख्यं, जाड्यं, मोहः, मंदमतिता, मूर्खता, मूढता, बालिश्यं, बालिशता, दुर्बुद्धिता, अज्ञानं, निर्बुद्धित्वं, ज्ञानाभावः, अनात्मज्ञत्वं.

FOOT, *s.* पादः, पदं, चरणः-णं, अंघ्रिः. 2 तलं, अधोभागः, मूलं; उपस्थः. 3 (In metre) चरणः, पदं. 4 पत्ति-पदाति-समूहः-गणः. -*v. t.* पादेन प्रह 1 P or तड् 10 or आहन् 2 U; 'f. of a mountain' उपत्यका, पादः; 'set one's f. in' पदं कृ 8 U (lit. and fig.); आश्रमे पदं करिष्यसि (S. 4), कुतूहलेन प्रश्नाशया हृदि पदं कृतं (Ka. 133); 'walk on f.' पद्भ्यां चर्-व्रज् 1 P, पादचारी भू; 'walking on f.' पादगः, पादचारः, पदातिः; 'water for the feet' पाद्यं; पादोदकं; 'set on f.' प्रवृत् c., उपक्रम् 1 A, प्रारभ् 1 A; 'f.-board' चरणफलकः; 'f.-boy' चेटः, भृत्यः, बालसेवकः, युवप्रेष्यः; 'f.-bridge' संक्रमः, संक्रमसेतुः; 'f.-fall' चरणपातः, पादन्यासः, स्खलनं; 'f.-fight' पदाति-पादग-युद्धं; 'f.-licker' पीठमर्दः, चरणसेवकः ; 'f.-man' चेटः, सेवकः, प्रेष्यः, परिचरः, किंकरः; 'f.-mark-print' पाद-पद-चिह्नं, पदपंक्ति *f.*, पदवी, पद्धति *f.*; पादमुद्रा; 'f.-pace' पादन्यासः, चरणक्रमः-पातः; 'f.-path' संसरणं, चरणवीथि *f.*, पथिकमार्गः, पद्या; 'f.-soldier' पदातिः, पत्तिः, पादातिः-तिकः, प(पा)दातः, पादचारः, प(पा)दगः, पदाजिः, पद्गः, पदिकः; 'f.-step' पादन्यासः, पद-चरण-निक्षेपः-पातः, पदं, पदपंक्ति *f.* (f.-print); पद्धतिः, मार्गः, वर्त्मन् *n.*, पदवि-वी *f.*, लक्ष्मं; 'f.-stool' पादपीठं, चरणपीठं, पादासनं. -ING, *s.* पदं, स्थानं, भूमि *f.*, स्थलं, आस्पदं, पदवि-वी, सरणि *f.* 2 वास्तु *m.*, *n.*, मूलं, उपष्टंभः. 3 आश्रयः, अवलंबनं, आधारः. 4 स्थिति *f.*, वृत्ति *f.*, अवस्था, भावः, दशा; 'f. of equality' समता, तुल्यभावः. -LESS, *a.* पादहीन, अचरण.

FOP, *s.* दर्शनीयमानिन् *m.*, वेषाभिमानी, दंभी, सुवेशमानी, छेकः, रूपगर्वितः. -PISH, *a.* दंभिन्.

FOR, *prep.* (On account of) Ex. by instr. or abl.; अर्थं-र्थं, हेतुना, हेतोः, कृते, कारणात्, निमित्तात्, निमित्तं, in comp.; 'for his deliverance' मोक्षनिमित्तं, मुक्तिहेतोः, &c. 2 (Purpose) by dat. or by अर्थं-अर्थे in comp. 3 (For the sake of) अर्थं, कृते (with gen.), or by dat. 4 (In exchange for) प्रति, स्थाने, विनिमयेन; तिलेभ्यः प्रतियच्छति माषान्, or तिलविनिमयेन &c. 5 (Considering) अपेक्ष्य, प्रतीक्ष्य, आलोच्य, इति कृत्वा, अपेक्षया in comp. 6 (Towards) प्रति, उद्दिश्य, (with acc.); संमुखं, अभिमुखं, in comp. 7 (Regarding) तावत्, उद्दिश्य; कृते; 'f. myself, rest secure' मद्विषये तावद्वीतचिंतो भव, मामुद्दिश्य न चिंता कार्या. 8 (Showing price) by instr.; त्रिरूपकेण क्रीतः 'bought f. 3 Rs.' 9 (Duration) by acc.; 'for 10 days' दशदिवसं; 'f. how many years' कियंति वर्षाणि; oft. by यावत् or पर्यंतं, आ with abl.; 'f. life' यावज्जीवं, आजीवितांतात्. 10 (On the side of) पक्षे; 'they are f. war' विग्रहमनुमोदंते, विग्रहमुपदिशंति. 11 (As if) वत् or इव. 12 (According to) यथा, अनुरूपं, अनुसारेण, in comp.; 'f. all' ex. by अनादृत्य (with acc) or loc. abs.; 'f. all his wealth' विद्यमानेपि महाकोशे, महाकोशमनादृत्य; 'f. a long time' चिरं, चिरकालं, चिराय; 'out of love f. me' मद्गतप्रीत्या; 'f. the most part' भूयिष्ठ in comp., प्रायः, प्रायेण; 'f. once' सकृदेव. -*conj.* हि (not at beginning of assertions); यतः, यस्मात्कारणात्, यत्, यस्मात्, इति, हेतोः, अनेन हेतुना.

FORAGE, *s.* यवसं, घासः, तृणादि. 2 पाथेयं, भोजनसंभारः, खाद्यसामग्री. 3 खाद्यान्वेषणं, खाद्यार्थं परिभ्रमणं; प्रसरणं. -*v. i.* बलात् खाद्यद्रव्यं आ-हृ 1 P, भोजनार्थं परिभ्रम् 1, 4 P. -ING, *s.* भोजनान्वेषणार्थं परिभ्रमणं-प्रसरणं.

FORBEAR, *v.* विरम् 1 P, निवृत् 1 A, (with abl.), परिहृ 1 P, वृज् 10, त्यज् 1 P. 2 विलंब् 1 A. 3 सह् 1 A, क्षम् 1 A, मृष् 4 P, 10, तिज् desid. (तितिक्षते). 4 सं-नि-यम् 1 P, निग्रह् 9 P, आ-वृ 5 U, निरुध् 7 U; 'he could not f. expressing his

joy, or laughter' संतोषं-हासं-निग्रहीतुं न पारयामास. -ANCE, *s.* क्षमा, तितिक्षा, क्षांति *f.*, सहनं, सहिष्णुता, मर्षणं, सहनशीलता. 2 निवृत्ति *f.*, विरामः, विरति *f.*, वर्जनं, त्यागः, परिहारः. 3 संयमः, दमः, यमः, निग्रहः. -ING, *a.* तितिक्षु, सहिष्णु, सहनशील, क्षमिन्, सहन, क्षंतृ, क्षमितृ.

FORBID, *v. t.* प्रति-नि-षिध् 1 P or c., प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P, निरा-अपा-कृ 8 U. 2 निरुध् 7 U, नि-वृ c. or वार् 10; 'God f.' शांतं पापं or (इति) शांतं, प्रतिहतं अमंगलं. -DING, -DANCE, *s.* नि-प्रति-षेधः, प्रत्याख्यानं, प्रत्यादेशः. 2 निवारणं, निरोधः. -DING, *a.* घृणावह, बीभत्सजनक, अनिष्ट.

FORCE, *s.* बलं, शक्ति *f.*, सामर्थ्यं (fig. also); 'the f. of this word' अस्य शब्दस्य शक्तिः &c. 2 प्रभावः; वीर्यं, शौर्यं, वि-परा-क्रमः, ऊर्जस् *n.*, प्रतापः, प्राबल्यं, गौरवं. 3 बलात्कारः, प्रसभः, साहसं, बलं, प्रमाथः, आवेशः; 'f. of passion' रागावेशः. 4 आवेगः, आपातः, अभिभवः. 5 सिद्धि *f.*, फलं, निष्पत्ति *f.*; 'put or bring into f.' प्रवृत् c. 6 सैन्यं, बलं, सेना, अनीकः-कं, पृतना, अनीकिनी, चमूः, वाहिनी, ध्वजिनी, चक्रं, वरूथिनी. -*v. t.* Ex. by causal of verbs, with बलात् or बलेन, or प्रवृत् c.; *See* COMPEL; 'he was f. ed to admit that &c.' इति अभ्युपगमनं अवश्यकं मेने. 2 प्रेर् c., प्रणुद् 6 P, समाकृष् 1 P, प्रचुद् 10, प्रोत्सह् c. 3 धृष् c., बलाद् अभिगम् 1 P, बलात्कारं कृ 8 U; 'f. an entrance' बलेन प्रविश् 6 P; 'f. a town' पुरं लंघ् 1 A, 10 or भंज् 7 P or बलात् प्रविश्. -ED, *a.* यत्नकृत, यत्नपूर्व, असहज, कृत्रिम, क्लिष्ट (as meaning). -FORCIBLE, *a.* प्रबल, समर्थ, क्षम, शक्तिमत्, बलवत्, सप्रभाव; अमोघ, अनिष्फल, प्रभविष्णु. 2 गौरवेण उक्त or प्रतिपादित, दृढ, तीक्ष्ण. 3 बलेन कृत, बलात्कृत, साहसिक (की *f.*), बल in comp.; 'f. consent' बलानुमोदनं. -FORCIBLY, *adv.* (by force) बलेन, बलात्, प्रसभं, प्रसह्य, बलात्कारेण, हठात्. 2 सगौरवं, दृढतया.

FORCE-MEAT, *s.* मिष्टान्नं, उपस्करः, व्यंजनं.

FORCEPS, *s.* सदंशकः-शिका.

FORD, *s.* तीर्थं, तरणस्थानं-स्थलं, घट्टः. -*v. t.* पद्भ्यां तॄ 1 P or पारं गम् 1 P. -ABLE, *a.* अल्पजल, सुतर, सुप्रतर; 'the rivers having become f.' सुखोत्तारतामापन्नास्वापगासु (Ka. 326).

FORE, *a.* अग्र, पूर्व, अग्रगामिन्; gen. ex. by अग्र, पूर्व in comp.; 'f.-fathers' पूर्वजाः, पितरः, पूर्वे-पूर्वाः, वृद्धाः; 'f.-finger' प्रदेशिनी, तर्जनी; 'f.-foot' अग्रपादः; 'f.-head' ललाटं, भालं, ललाट-भाल-पट्टं, अलि(लीं)कं; गोधिः; 'f.-land' अंतरीपः-पं, उदग्रभूः-भूमिः; 'f.-lock' ललाटकेशः-रुहः; 'f.-man' अध्यक्षः, अधिष्ठातृ *m.*, अधीशः; 'f.-mentioned-named-said-spoken' प्रागुक्त, पूर्वोक्त, पूर्वकथित; 'f.-mast' अग्रकूपकः; 'f.-most' प्रधान, उत्कृष्ट, परम; 'f.-noon' पूर्वाह्णः,-कालः; 'f.-part' अग्रभागः, पूर्व-आदि-प्रथम-भागः; 'f.-rank' अग्र-प्रधान-पदं; 'f.-tooth' अग्रदंतः, राजदंतः; 'f.-ward' सेनामुखं, रणाशिरस् *n.*

FOREARM, *s.* प्रकोष्ठः, अग्रभुजः-हस्तः-बाहुः. -*v. t.* पूर्वं सन्नह् 4 P or c. or सज्जीकृ 8 U.

FOREBODE, *v. t.* आ-,सूच् 10, प्राक् आ-विद् c., पूर्वं कथ् 10; (अनिष्टं) पूर्वं ज्ञा 9 U or अव-गम् 1 P, अनु-मा 3 A; *See* BODE; 'the tawny lightning f. s a hurricane' वाताय कपिला विद्युत् (S. K.). -ER, *s.* अनिष्टावेदकः, अनिष्टसूचकः. -ING, *s.* अनिष्टसूचनं-ज्ञानं-दर्शनं.

FORECAST, *v. t.* पूर्वं-अग्रे-चिंत् 10 or निरूप् 10 or निर्दिश् 6 P or अनुसं-धा 3 U. -*s.* पूर्वकल्पना-विवेकः, अग्रनिरूपणं, पूर्वचिंतनं, दीर्घदृष्टि *f.*

FORECLOSE, *v. t.* प्रतिबंध् 9 P, प्रति-नि-षिध् 1 P. -URE, *s.* प्रतिबंधः, प्रतिषेधः.

FORE-DETERMINE, *v. t.* अग्रे-पूर्वं-निर्णी 1 P or निश्चि 5 U.

FOREDOOM, *v. t.* पूर्वं निर्दिश् 6 P or वि-चर् c.

FORE-FEND, *See* FORBID.

FOREGO, *v. t.* त्यज् 1 P, हा 3 P, उत्-वि-सृज् 6 P; 'I shall f. my name' स्वनामत्यागं करोमि (P. 1); 'a foregone conclusion' पूर्वनिर्णीतः-प्रागेवसिद्धः-सिद्धांतः.

FOREIGN, *a.* विदेशीय, वैदेशिक-पारदेशिक (की *f.*), विदेशज, विदेशिन्, अन्य-भिन्न देशज-देशीय-देशोद्भव, पारदेश्य, विदेशादागत, बहिर्देशोद्भव; 'a f. country' विदेशः, परदेशः, देशांतरं. 2 बाह्य, बहिर्भव, अप्रस्तुत, अप्रकृत; 'this is f. to our present inquiry' अप्रकृतमेतदस्मिन् विषये. -ER, *s.* वैदेशिकः, पारदेशिकः, अन्यदेशीयः-देशजः; *See* (*a.*). -NESS, *s.* बाह्यता, भिन्नता; अप्रकृतता, असंबंधः.

FORE-IMAGINE, *v. t.* पूर्वं-अग्रे-चिंत् 10 or मन् 4 A.

FORE-JUDGE, *v. t.* पूर्वं अवेक्ष् 1 A विचर् c. or निर्णी 1 P.

FORE-KNOW, *v. t.* पूर्वं ज्ञा 9 U or बुध् 1 P, or विद् 2 P, (know, q. v.); प्रदृश् 1 P, अग्रे निरूप् 10. -LEDGE, *s.* अग्र-पूर्व-ज्ञानं, भविष्यज्ज्ञानं, अग्रनिरूपणं, अग्र-पूर्व-दृष्टि *f.*

FORENSIC, *a.* व्यावहारिक (की *f.*), व्यवहारानुबद्ध.

FORE-ORDAIN, *v. t.* अग्रे-पूर्वं-निर्दिश् 6 P or नियुज् 7 A, 10 or वि-धा 3 U.

FORERUN, *v. i.* पूर्वं-पुरः-अग्रे-सृ or गम् or धाव् 1 P or वृत् 1 A or या-इ 2 P. -NER, *s.* अग्रेसरः, पुरो-गः-गामिन् *m.*, अग्र-गः-गामी, अग्रवर्ती, अग्रगतः, पूर्वपुरुषः.

Fore-say,-speak, प्राक्-पूर्व-वद् 1 P or कथ् 10.

Foresee, *v. t.* पूर्वं दृश् 1 P or ज्ञा 9 U, भावि-अनागतं-दृश् or अवेक्ष् 1 A, अग्रे निरूप् 10; gen. ex. by भाविन्; ' I f. my ruin ' जानामि भाविनं नाशं. -Foresight, *s.* दूरदर्शित्वं-ता, दूर-दीर्घ-दृष्टि *f.*, अग्रनिरूपणं, दूरदर्शनं.

Foreshow, *See* Forebode.

Forest, *s.* वनं, अरण्यं, काननं, विपिनं, अटवि-वी *f.*, गहनं, कांतारः-रं; ' a large f. ' अरण्यानी; ' growing in f. ' वन्य, आरण्य,-क, वनोद्भव, अरण्यज-जात, वन or अरण्य in comp. -er, *s.* वनेचरः, वनवासिन् *m.*, आरण्यकः, आटविकः, वनस्थः, वनचारी, वनचरः-वर्ती, वनौकस् *m.*, अरण्यसद् *m.* 2 अरण्यरक्षकः, वनपालकः.

Forestall, *v. t.* पूर्वं ग्रह् 9 P or आदा 3 A, पूर्वग्रहणेन मार्घीकृ 8 U; *See* Anticipate. 2 पूर्वं क्री 9 U.

Foretaste, *v. t.* पूर्वं अनुभू 1 P or आस्वाद् 1 A or भुज् 7 A. -*s.* पूर्वानुभवः, पूर्व-अग्र-ज्ञानं, पूर्वास्वादः, पूर्व-अग्र-भुक्ति *f.*

Foretell, *v. t.* पूर्वं कथ् 10, भावि-भविष्यद्-वद् 1 P or वच् 2 P; प्रदृश् c., अनागतं निविद् c.; *See* Predict. -er, *s.* भविष्यद्वादिन् *m.*, भाविदर्शकः, अनागतनिवेदकः, दैवज्ञः.

Forethink, *v. t.* पूर्वं चिंत् 10 or विमृश् 6 P. -Forethought, *s.* अग्र-पूर्व-चिंता, पूर्वविमर्शः-विवेकः, प्रसमीक्षा-क्षणं, दूर-दीर्घ-दृष्टि *f.*, पूर्वविचारणं-णा.

Foretoken, *v. t.* पूर्वं सूच् 10. -*s.* पूर्वलक्षणं-चिह्नं-लिंगं, भाविलक्षणं.

Forewarn, *v. t.* पूर्वं सूच् 10 or प्रबुध् c., अग्रे उपदिश् 6 P or ज्ञा c. (ज्ञापयति); ' to be f. ed is to be forearmed ' पूर्वप्रबोधनं पूर्वसन्नाहतुल्यं. -ing, *s.* पूर्वप्रबोधः-धनं, पूर्वोपदेशः.

Forfeit, *v. t.* दंड् pass., भ्रंश् 1 A, 4 P, च्यु 1 A, परि-हा pass., (with abl.); ' f. s his kingdom ' राज्यात्परिभ्रंशते; 'f. s. his right ' स्वत्वं तस्मान्निवर्तते; oft. ex. by हीन-हृत in comp.; ' you will f. all your wealth ' हृतसर्वस्वो भवेः, सर्वस्वं दंडयेथाः. -*s.* दंडः, धन-अर्थ-दंडः. -ed, *a.* दंडित, भ्रष्ट, च्युत, हीन; ' who has f. ed his right ' स्वत्वभ्रष्टः, च्युताधिकारः; हृतसर्वस्वः, &c. -ure, *s.* हानि *f.*, च्युति *f.*, भ्रंशः, अपहारः, अपवर्तनं, नाशः, दंडदानं.

Forge, *v. t.* घट् c. (घटयति), रच् 10, निर्मा 3 A, वि-धा 3 U, क्लृप् c. 2 मिथ्या-कूटेन-कृ 8 U, कपट-कूट in comp.; ' f. s a letter ' कूट-कपट-लेखं प्रयुंक्ते; *See* Counterfeit. -*s.* निर्माणस्थानं; अग्निकुंडं, उष्मानं. -er, *s.* कूट-कारः-कृत् *m.*, कपटलेखकारिन् *m.* -ery, *s.* कूट-कपट-लेखकरणं, कूट-कपट-करणं, कूटरचना. -ing, *s.* घटना, घटनं, रचना-नं; कूटनिर्माणं, &c.

Forget, *v. t.* विस्मृ 1 P, न स्मृ; स्मृतेः-स्मरणाद्-भ्रंश् 1 A, 4 P or अप-इ 2 P (of what is forgotten). -ful, *a.* विस्मरणशील, लुप्त-नष्ट-स्मृति; अनवहित, प्रमत्त. -fulness, *s.* विस्मृति *f.*, विस्मरणं, स्मृतिलोपः, स्मृतिनाशः-भ्रंशः-हानि *f.*, विस्मरणशीलता, अनवधानं.

Forgive, *v. t.* क्षम् 1 A (with acc. of person also), मृष् 4 P, 10, सह् 1 A, तिज् desid. (तितिक्षते) (with acc. of fault). 2 मुच् 6 P, अव-सृज् 6 P, त्यज् 1 P, (as a debt). -ness, *s.* क्षमा, तितिक्षा, क्षांति *f.*, सहिष्णुता, मर्षणं; ' f. of sin ' पाप-दोष-मुक्ति *f.*-मार्जनं. -ing, *a.* क्षमिन्, सहिष्णु, क्षमावत्, क्षमाशील, तितिक्षु, क्षमायुक्त, क्षंतृ, क्षमितृ.

Fork, *s.* कंटकः, शूलं. -*v. i.* विभिद् pass., द्विशिखीभू 1 P, द्विधा भिद् pass. -ed,-y, *a.* द्विशिख, द्व्यग्र; ' having a f. tongue ' द्विजिह्व; ' f. lightning ' विद्युल्लता.

Forlorn, *a.* त्यक्त, दीन, विधुर, अनाथ, अनाश्रय, गति-शरण-हीन, अ-निः-शरण, अ-निः-सहाय, निरवलंब, निराधार, निराश्रय, अगतिक.

Form, *s.* रूपं, आकारः, आकृति *f.*; संस्थानं; वपुस् *n.*, मूर्ति *f.*, (Body, q. v.). 2 तंत्रं, मार्गः, पद्धति *f.*, प्रकारः, रीति *f.*, विधा-धः, विधिः, भेदः; ' f. of government ' राज्यतंत्रं-पद्धतिः. 3 विधिः, नियमः, स्थिति *f.*, व्यवस्था, आचारः, क्रमः, मर्यादा, व्यवहारः, संस्कारः; ' in due f. ' यथाविधि, विध्यनुसारेण, विधिवत्. 4 रचना-नं, विन्यासः. 5 सहाध्यायिवर्गः, छात्रपंक्ति *f*, गणः. 6 दीर्घपीठं-आसनं. -*v. t.* निर्मा 2 P, 3 A, रच् 10, कृ 8 U, वि-धा 3 U, उत्पद् c., घट् c. (घटयति), क्लृप् c.; ' f. plans ' उपायान् चिंत् 10 or मनसा क्लृप् c.; ' the cords that f. ed the net ' यामिः रज्जुभिर्जालं निर्मितं. -al, *a.* अत्याचारसेविन्, नियमनिष्ठ, अत्यादरयुक्त, सभ्याचारविशिष्ट. 2 नैयमिक-वैधिक (की *f.*), नियमानुसारिन्, व्यवहारानुरूप, आचारानुगत, आचारानुसारिन्, विध्यनुरूप; आचार in comp.; ' just perform the f. salutation ' आचारं तावत्प्रतिपद्यस्व. 3 यथार्थ, विशिष्ट. -alist, *s.* नियममात्रसेविन् *m.* -ality, *s.* आचारः, उपचारः, यथाविधि वर्तनं; अत्यादरः; ' a title of f. ' उपचारपदं; ' enough of f. ' अलमत्यादरेण. -ally, *adv.* सोपचारं, अत्यादरेण, सभ्याचारपूर्वं, अत्यादरपूर्वं. 2 यथाविधि, विधिवत्, नियमानुसारेण. -ation, *s.* घटना-नं, निर्माणं, विधानं, रचना, कल्पना-नं, उत्पादनं, उद्भवः, सृष्टि *f.* -ed, *a.* घटित, निर्मित, कृत, रचित, क्लृप्त, मय in comp.; ' f. of gold ' हेमघटित, सुवर्णमय, &c.; *See* Composed,

2 रूप-आकार-आकृति-in comp.; 'f. like a conch' शंखाकृति; 'well-f.' सुरूप. -LESS, *a.* निराकार, अरूप.

FORMER, *a.* पूर्व, प्रथम, अग्रिम, आद्य, आदिम, पूर्वकालीन, प्राक्कालीन, प्राचीन, गतकालीन, पुराण, पुरातन. -LY, *adv.* प्राक्, प्राक्काले, भूत-गत-काले, पुरा, पूर्वं, पुराकल्पे, पूर्वकाले; 'as f.' यथापूर्वं, पूर्ववत्; 'f. stated' प्रागुक्त, पूर्वोक्त; 'f. heard' श्रुतपूर्व.

FORMIDABLE, *a.* दारुण, भयावह, भीषण, भयानक, भयजनक, भयप्रद, भैरव (वी *f.*), घोर, उग्र, प्रतिभय, रौद्र (द्री *f.*). 2 (Great) प्रबल, महत्, अतिघोर. -NESS, *s.* भयानकत्वं, भीषणता, भैरवं.

FORMULA, *s.* सूत्रं, विधिः, नियमः, व्यवस्था, स्थिति *f.* -FORMULATE, *v. t.* विधि-सूत्र-रूपेण रच् 10 or व्यव-स्था c. (स्थापयति).

FORNICATE, *v. i.* व्यभि-चर् 1 P, वेश्यां सेव् 1 A or अभिगम् 1 P. -ION, *s.* व्यभिचारः, जारकर्मन् *n.*, वेश्यागमनं-सेवा, वेश्यासंभोगः. -OR, *s.* व्यभिचारिन् *m.*, जारः. -FORNICATRESS, *s.* Harlot, q. v.

FORSAKE, *v. t.* त्यज् 1 P, हा 3 P, उत्-वि-अप-सृज् 6 P, उज्झ् 6 P, रह् 10 (रहयति). -ER, *s.* त्यागिन् *m.*, त्यक्तृ *m.* -ING, *s.* त्यागः, उत्सर्गः.

FORSOOTH, *adv.* नूनं, नाम, किल, खलु, यत्सत्यं, सत्यमेव.

FORSWEAR, *v. t.* सशपथं त्यज् 1 P or प्रत्या-ख्या 2 P or अप-नि-ह्नु 2 A. -*v. i.* मिथ्या शप् 1 U, कूटं-मिथ्या-शप्. -ER, *s.* असत्यशपथः, मिथ्याशपथकारिन् *m.*

FORT, FORTRESS, *s.* दुर्गं, कोटः, कोटि *f.*; 'governor of a f.' दुर्गाध्यक्षः, कोटिपालः.

FORTE, *s.* विशिष्ट-श्रेष्ठ-गुणः, प्रधानगुणः.

FORTH, *adv.* बहिः, अग्रे, पुरतः; with verbs, ex. by निर्, उत्, प्र pr. 2 प्रभृति, आरभ्य; 'from this time f.' अद्य-अतः-प्रभृति, अद्यारभ्य; 'f.-coming' आगामिन्, आसन्न, उपस्थित. -FORTHWITH, *adv.* सपदि, झटिति, द्रागेव, सद्यः, अचिरात्-रेण, आशु, अविलंबितं, तत्क्षणात्.

FORTIFY, *v. t.* दृढीकृ, स्थिरीकृ 8 U, द्रढयति (D.), सं-स्तंभ् 9 P or c. 2 सुगुप्त-सुरक्षित-*a.* कृ, परिखया आ-परि-वृ 5 U or परिवेष्ट् c. -ICATION, *s.* गुप्ति *f.*, परिखा, प्राचीरं, दुर्गं, कूटः, कोटः, प्राकारपरिखादि.

FORTITUDE, *s.* धैर्यं, सत्त्वं, धीरता, मनःस्थैर्यं. 2 वीर्यं, शौर्यं, विक्रमः, साहसं, पौरुषं.

FORTNIGHT, *s.* पक्षः, मासार्धं, अर्धमासः.

FORTUITY, *s.* दैवयोगः-घटना, दैवं, समापत्ति *f.* -OUS, *a.* दैवायत्त, दैवाधीन, अचिंतित, अतर्कितोपनत, आकस्मिक (की *f.*). -OUSLY, *adv.* Accidentally, q. v.

FORTUNE, *s.* दैवं, भाग्यं, भागधेयं, विधिः, अदृष्टं, भवितव्यता; *See* FATE. 2 ऋद्धि *f.*, श्रीः, लक्ष्मीः, ऐश्वर्यं, संपद् *f.*, संपत्ति *f.*, धनं. 3 शुभं, कल्याणं, भद्रं, शिवं, सौभाग्यं, मंगलं, पुण्योदयः; 'bad f.' दुर्दैवं, दुर्-मंद-भाग्यं, दैवदुर्विपाकः; 'tell f.' शुभाशुभं कथ् 10 or चिंत् 10 or निरूप् 10 or आलोच् 10; 'f.-teller' दैवज्ञः, गणकः, कार्तांतिकः, दैवचिंतकः; 'a female f.-teller' विप्रश्निका, ईक्षणिका, दैवज्ञा; 'f.-telling' शुभाशुभदर्शनं. -ATE, *a.* भाग्यवत्, महाभाग, सुभाग्य, सुभग, धन्य, सौभाग्यवत्, दैवशालिन्, पुण्यवत्, कृतिन्, श्रीमत्, पुण्यभाज्. 2 शुभ, कल्याण, शिव, मंगल, भद्र. -ATELY, *adv.* दैवात्, दैवयोगात्, दिष्ट्या, सौभाग्येन, भाग्य-दैव-वशात्.

FORTY, *a.* चत्वारिंशत् *f.* -FORTIETH, *a.* चत्वारिंश (शी *f.*)-शत्तम (मी *f.*).

FORWARD, *a.* अग्रिम, आदिम, अग्रस्थ, पुरोगामिन्. 2 अपूर्णकाल, आकालिक (की *f.*). 3 धृष्ट, प्रगल्भ, निर्लज्ज, प्रतिभानवत्, सप्रतिभ, अविनीत. 4 उद्यत, व्यग्र, उद्युक्त, प्रत्युत्पन्न, अविलंबित. -*v. t.* सं-प्र-वृध् c., उपकृ 8 U, पुरस्कृ, प्र-वृत् c., समुद्युज् 10, साहाय्यं कृ, उन्नतिं नी 1 P, अनुग्रह् 9 P. 2 प्रेर् c., प्र-चुद् 10, प्र-हि 5 P. 3 Accelerate, q. v. -*adv.* (f. s) अग्रतः, पुरतः, पुरः, अग्रे, पुरस्तात्, सं-अभि-मुखं; 'this day f.' अद्य प्रभृति; 'to go backward and f.' गतागतं कृ; *See* FORTH. -NESS, *s.* उत्साहः, अविलंबः, उद्योगः. 2 प्रागल्भ्यं, निर्लज्जता, धार्ष्ट्यं, अतिप्रसंगः, अविनयः, प्रतिभानं.

FOSSE, *s.* खातं, परिखा.

FOSSIL, *a.* शिलाजात. -*s.* धातुः; शिलाभवं, धातुद्रव्यं; उत्खातद्रव्यं. -IST, *s.* धातुविद्याज्ञः.

FOSTER, *v. t.* पुष् 1, 9 P; पा c. (पालयति), प्र-सं-वृध् c., भृ 3 U, लल् 10. 2 (Love, hatred, &c.) धृ 10, वह् 1 P, बंध् 9 P; 'f.-brother' धात्रेयः, धात्रीपुत्रः; 'f.-child' पोष्यपुत्रः (त्री *f.*), परार्चितः, परिस्कंद(स्कंद)-दः, परिस्क(स्क)न्नः; परजातः, परैधितः; 'f.-father' पालकपिता, प्रतिपालकः, धर्मतातः, 'f.-mother' धात्री, उपमाता, प्रतिपालिका, अंकपालिका, मातृका, धात्रेयी.

FOUL, *a.* मलिन, समल, अशुचि, कलुष, मलदूषित, मलीमस, आविल, अशुद्ध, अपवित्र, अमेध्य, पंकिल. 2 कुत्सित, कश्मल, गर्ह्य, निंद्य, दुष्ट. 3 अवाच्य, अशिष्ट, अश्लील (language). 4 कूट, कपट, पाप, in comp.; 'f. means' कपटप्रबंधः; 'even by f. means' दुरितैरपि (R. VIII. 2); 'f. play' दुरितं, पापं; 'f. weather' दुर्दिनं; 'f. quality' रजोगुणः; 'f. smell' पूतिगंधः, दुर्गंधः; 'fall f. of' उपरि पत् 1 P, परस्परं आ-हन् 2 U or संघट्ट् 1 A; 'f.-mouthed' दुर्मुख, वाग्दुष्ट, कटुवाच, मुखर, परिवादिन्. -*v. t.* मलिनयति-कलुषयति-आविलयति (D.), दुष् c. (दूषयति). -LY, *adv.* अतिदुष्टं, घोरं, मलिनं. -NESS, *s.* मालिन्यं, गर्ह्यता, &c.

FOUND, *v. t.* स्था c. (स्थापयति), प्रति-सं-अव-

रुह् c. (रोपयति), निर्मा 3 A or c. (मापयति), बंध् 9 P, प्रवृत् c., आरभ् 1 A; मूल, निबंधन, निष्ठा, in comp.; 'attachment f. ed on love' प्रेममूला-भावनिबंधना-रतिः; 'f. ed on ignorance' अज्ञानज, अज्ञानमूल-लक, अविद्याकल्पित. -ATION, *s.* प्रतिष्ठापनं, संस्थापनं; निर्माणं. 2 वास्तु *m.*, *n.*, पोटः, गृहप्रतिष्ठा, गृहमूलं, भित्तिमूलं, वेश्मभूः. 3 (Fig.) मूलं, आधारः, उपष्टंभः. -ER, *s.* संस्थापकः, प्रवर्तकः, आरंभकः, आदिकर्तृ *m.*, प्रतिष्ठापकः, कर्ता, प्रयोजकः. -*v. i.* जलमज्जनेन नश् 4 P, जले मस्ज् 6 P. -LING, *s.* अपविद्धबालकः, उत्सृष्टापत्यं.

FOUNDERY, *s.* संधानी, कुप्यशाला.

FOUNT, FOUNTAIN, *s.* निर्झरः, उत्सः, प्रस्रवणं, वारिप्रवाहः. 2 मूलं, योनि *f.*, प्रभवः, हेतुः, आदिहेतुः. 3 धारायंत्रं (artificial f.).

FOUR, *a.* चतुर्, चतुष्टय; 'f. times' चतुः; 'in f. ways' चतुर्धा; 'f.-cornered' चतुरस्र-श्र; 'f.-fold' चतुर्गुण; 'f.-footed' चतुष्पाद्, चतुष्पाद; 'f. score' अशीति *f.* —FOURTH, *a.* चतुर्थ (र्थी *f.*), तुर्य, तुरीय. -*s.* चतुर्थभागः, पादः, चतुर्थांशः; तुरीयः, तुर्यः, तुर्यांशः; 'a rupee and one f.' सपादरूपकः. -LY, *adv.* चतुर्थस्थाने. —FOURTEEN, *a.* चतुर्दशन्. -TH, *a.* चतुर्दश (शी *f.*).

FOWL, *s.* खगः, पक्षिन् *m.*, शकुनः; *See* BIRD. 2 कुक्कुटः, ताम्रचूडः, चरणायुधः. -*v. i.* पक्षिणो ग्रह् or बंध् 9 P or धृ 1 P. -ER, *s.* शाकुनिकः, व्याधः, शकुनिलुब्धः, जालिकः, लुब्धकः, पक्षिग्राहकः, जीवांतकः. -ING, *s.* पक्षिग्रहणं-वधः-घातः.

FOX, *s.* शृगालः, कि(खि)खिः, खिंकिरः, भूरिमायः, गोमायुः; *See* JACKAL; 'f.-hunt' शृगालानुसरणं; 'f.-like' विदग्ध, धूर्त, बहुमाय.

FRACTION, *s.* भिन्नं, भागः, अपूर्णांकः, राशिभागः. -AL, *a.* अपूर्ण, भागिक (की *f.*), भागिन्.

FRACTIOUS, *a.* कलहकारिन्, शीघ्रकोप; वामशील.

FRACTURE, *s.* भंगः, भेदः, विदारणं, त्रोटनं, विभंगः, विभेदः. -*v. t.* भंज् 7 P, भिद् 7 P, विदॄ 10; *See* BREAK.

FRAGILE, *a.* भंगुर, भंगशील, भिदुर, भिदेलिम, सुखभेद्य, सुभंग; विनश्वर, क्षयिन्. -ITY, *s.* भंगुरता, क्षयिता, भिदुरता.

FRAGMENT, *s.* खंडः-डं, शकलः-लं, भागः, अंशः, दलं, भिन्नं; 'in a thousand f. s' सहस्रधा. -ARY, *a.* अपूर्ण, भागिन्, खंडयुक्त.

FRAGRANT, *a.* सुरभि, सुगंधि, सुवास, आमोद-परिमलवत्, सुवासिक, सामोद, परिमलोद्गारिन्, गंधयुक्त, गंधवत्; तिक्त, कषाय. -LY, *adv.* सवास, सामोदं, सगंधं. -FRAGRANCE, *s.* आमोदः, परिमलः, सौरभं, सौरभ्यं, गंधः, वासः, सुवासः, सुगंधः.

FRAIL, *a.* भंगुर, नश्वर, ध्वंसिन्, अनित्य, अस्थायिन्, क्षयिन्, सद्यःपातिन्, क्षणभंगुर-विध्वंसिन्. -NESS, -TY, *s.* भंगुरता, नश्वरत्वं, क्षयिता, &c. 2 दोषः, स्खलितं, प्रमादः.

FRAME, *v. t.* वि-,रच् 10, वि-धा 3 U, क्लृप् c., कृ 8 U, घट् c. (घटयति), संवि-धा, समा-धा, निर्मा 2 P, 3 A. 2 निबंध् 9 P. 3 सदृशीकृ; 'f. in the mind' मनसा चिंत् 10 or क्लृप् c., चित्ते कृ. -*s.* निर्माणं, रचनं-ना, घटनं-ना. 2 आधारः, उपष्टंभः; आवरणं, कोशः, आवेष्टनं. 3 शरीरं, देहः, गात्रं, वपुस् *n.*, कायः, अंगं; 'f. of body' देहबंधः; 'of a hardy f.' वज्रदेहिन्, सिंहसंहनन. 4 भावः, वृत्ति *f.*, स्थिति *f.*, दशा, अवस्था; 'joyous f. of mind' आनंदवृत्तिः. 5 आकारः, रूपं, आकृति *f.*, रीति *f.*, संस्थानं.

FRANCHISE, *s.* पौरजनाधिकारः. 2 मुक्ति *f.*, मोचनं, स्वाधीनता. -*v. t.* मुच् 6 P.

FRANGIBLE, *See* FRAGILE.

FRANK, *a.* निष्कपट, सरल, ऋजुमति-बुद्धि, उदार, निर्व्याज, स्पष्ट-स्फुट-वादिन्, असंवृत, अवक्र, अमाय, निर्व्यलीक, दक्षिण, अगूढभाव ; अकपट, अव्याज, अमायिन् ; 'f.-hearted' विमलात्मन्, उदारधी; शुद्धांतःकरण. -LY, *adv.* निर्व्याजं, निष्कपटं, अमायया, सरलं. -NESS, *s.* अमाया, ऋजुता, निष्कापट्यं, औदार्यं, दाक्षिण्यं, सारल्यं, अकापट्यं, &c.

FRANK-INCENSE, *s.* कुंदुरः-रुः, कुंदुः-दः, मुकुंदः, पालंकी.

FRANTIC, *a.* उन्मत्त, मदविक्षिप्त, व्यस्तचित्त, संरब्ध; 'f. with rage' क्रोधोन्मत्त, कोपोन्मादिन्. -ALLY, *adv.* उन्मत्तवत्, सोन्मादं, ससंरंभं. -NESS, *s.* उन्मादः, व्यामोहः, चित्तविप्लवः, उन्मत्तता, वातुलता, चित्तविभ्रमः.

FRATERNAL, *a.* भ्रात्रीय, भ्रातृसंनिभ, भ्रात्रनुरूप. -LY, *adv.* भ्रातृवत्, सोदरवत्.

FRATERNITY, *s.* भ्रातृत्वं, सौभ्रात्रं. 2 समाजः, संसर्गः, साहित्यं, बंधुता. -FRATERNIZE, *v. i.* भ्रातृवत् संमिल् 6 P or संयुज् pass. or एकीभू or सन्निपत् 1 P.

FRATRICIDE, *s.* भ्रातृघातकः, भ्रातृघातिन् *m.* 2 भ्रातृवधः-हत्या-घातः.

FRAUD, *s.* कपटः-टं, छलं, कैतवं, माया, व्याजः, कूटं, वंचनं-ना, उपधिः, प्रतारणं-णा, विप्रलंभः, छद्मन् *n.*, दंभः, कुसृति *f.*, निकृति *f.* —FRAUDULENT, *a.* कपटिन्, सव्याज, शठ, धूर्त, मायिन्, वंचक, प्रतारक, विप्रलंभक, कापटिक-छाद्मिक (की *f.*), कपट in comp.; 'a f. plan' कपटप्रबंधः. -LY, *adv.* छलेन, सकपटं, सव्याजं, मायया, धूर्तवत्, समायं, सकैतवं.

FRAUGHT, *a.* धुर्य, धुरीण, भाराक्रांत. 2 आ-सं-परिपूर्ण, आकीर्ण, आ-सं-कुल, गर्भ-आवह-in comp.; 'f. with danger' अनर्थावह.

FRAY, *s.* कलहः, कलिः, युद्धं, द्वंद्वं.

FREAK, *s.* कामचारः, चापल्यं-लं, मनोलौल्यं, छंदः-दस् *n.*, लहरी; तरंगः, विलासः, विभ्रमः, लीला, स्वैरिता.

—*v. t.* चित्रीकृ 8 U, चित्र् 10. —ISH, *a.* चपल, लोल, चलचित्त, लोलमति, स्वैरिन्, कामचारिन्.

FRECKLE, *s.* जड़ुल:, कालक:, पिप्लु:.

FREE, *a.* अमर्याद, मर्यादातिक्रांत, विनय-हीन-शून्य, प्रगल्भ, धृष्ट, अविनीत. 2 आत्म-स्व-तंत्र, स्वाधीन, अनधीन, अनायत्त, अपराधीन, स्वेच्छाचारिन्, स्वच्छंद, स्वैरिन्, निरवग्रह, अपावृत, अ-वि-वश. 3 मुक्त, विमुक्त, निर्मुक्त, विमोचित. 4 निर्यंत्रण, अबद्ध, अनिरुद्ध, वि-उत्-शृंखल, अनर्गल, निरर्गल, 5 निर्विघ्न, निष्प्रत्यूह, अप्रतिहत, निरवरोध, असंबाध. 6 निश्चिंत, वीतचिंत, विशद, स्वस्थ. 7 मुक्तहस्त, त्यागशील, व्ययपर. 8 अयतवाच्, असंवृत, अनियंत्रितकथ. 9 मूल्यं विना. 10 सर्वसाधारण-सामान्य; ‘ f. from ’ ex. by निर्-अ in comp. or by गत, वीत, हीन, रहित, वर्जित, शून्य, मुक्त, mostly in comp.; ‘ f. from pride ’ निरवलेप; अनृण, वीतस्पृह, चिंताहीन, &c.; ‘ f. choice ’ स्वेच्छा, स्वरुचि *f.* ; ‘ f. course ’ प्रसर:. —*v. t.* मुच् 6 P or c., वि-निर्-°, वि-सृज् 6 P or c., मोक्ष् 10; gen. ex. by निर् or अ pr. to nouns; ‘ f. from obstacle ’ विघ्नान् अपनी or हृ 1 P, निर्विघ्नीकृ 8 U; ‘ f. from debt ’ अनृण *a.* कृ, ऋणं अपाकृ or निस्तॄ c.; ‘ I f. ed him from doubt ’ तं निर्मुक्तसंदेहमकरवं, तस्य संदेहमपानयम्. ‘ F.-agency ’ ‘ f.-will ’ स्वेच्छा, यदृच्छा, स्वातंत्र्यं, स्वाच्छंद्यं, स्वैरता, स्वकाम:; ‘ f.-booter ’ दस्यु:, साहसिक:, प्रसह्यचौर: ; ‘ f.-booting ’ प्रसभं अपहार:, साहसं ; ‘ f.-born ’ जात-जन्म-स्वतंत्र, जात्या स्वायत्त, जन्मनैव अपरायत्त, कुलीनजाति, अदासज; ‘ f.-hearted,-minded ’ *See* FRANK; ‘ f.-hold ’ निष्करभूमि *f.*, स्वाधीना भू:; ‘ f.-holder ’ स्वाधीनक्षेत्रस्वामिन् *m.* ; ‘ f.-liver ’ कुक्षिंभरि:, औदरिक:; ‘ f.-man ’ स्वतंत्र:, अपरायत्त:, स्वाधीन:, अदास:; ‘ f.-spoken ’ स्फुटवादिन्, स्पष्टवाच्, अगूढभाव; ‘ f.-thinker ’ नास्तिक:, अनीश्वरवादिन् *m.*; ‘ f.-woman ’ स्वाधीना, स्वैरिणी, स्वैरचारिणी. —DOM, *s.* स्वतंत्रता, अवशता, स्वातंत्र्यं. 2 मोक्ष:-क्षणं, वि-,मुक्ति *f.*, मोचनं. 3 निर्यंत्रणं-णता, निर्विघ्नता. 4 अविनय:, मर्यादातिक्रम:, प्रागल्भ्यं. 5 विरह:, अभाव:, राहित्यं, हानि *f.*, मुक्ति:; ‘ f. of will or thought ’ स्वेच्छा, स्वरुच्यनुवर्तनं, कामचार:, स्वाच्छंद्यं. —LY, *adv.* स्वेच्छया, स्वैरं, स्वच्छंदत:; कामत:, अयाचितं. 2 बहुश:, बाहुल्येन, मुक्तहस्तं, भूयसा. 3 यथेच्छं, नि-प्र-कामं, पर्याप्तं, यथेप्सितं, आतृप्ति. 4 निर्विघ्नं, निर्यंत्रणं, अनिवारितं. 5 मूल्यं विना. —NESS, *s.* निर्विघ्नता, निष्कापट्यं, वाग्यतत्वं, त्यागशीलता, &c.

FREEZE, *v. i.* शिलीभू 1 P, घनीभू, संहन् pass., श्यै 1 A, संहतीभू, श्यानीभू, पिंडं बंध् 9 P. —*v. t.* शिली-घनी-कृ 8 U, संहन् 2 P, जडयति (D.), जडीकृ, श्यै c., शीलीकृ; ‘ a frozen mass of ice ’ शिलीभूतं हिमं, हिमपिंड:.

FREIGHT, *s.* नौभांडं, नौभार:, पोतद्रव्याणि, नाविकं. 2 तर:, आतर:, तरपण्यं, तारिकं, तार्यं. —*v. i.* (द्रव्याणि) नावि निविश् c. or नि-धा 3 U, द्रव्यै: पूर् 10.

FRENETIC, *See* FRANTIC.

FRENZY, *s.* उन्माद:, चित्तविभ्रम:-विप्लव:, उन्मत्तता, आवेश:. —ED, *a.* उन्मत्त, भ्रांतचित्त, आविष्ट.

FREQUENT, *a.* नित्य, अनवरत, सतत, अभीक्ष्ण, बहुश: घटमान or वर्तमान ; better ex. by ‘ f.-ly. ’ —*v. t.* सेव् 1 A, नित्यं आश्रि 1 U, सततं भज् 1 U or अभिगम् 1 P, जुष् 6 A; सततं गम् &c.; *See* below. —ATIVE, *s.* यङ्लुगंतं, यङंतं. —LY, *adv.* पुन: पुन:, मुहुर्मुहु:, भूयोभूय:, नित्यं, असकृत्, वारंवारं, अभीक्ष्णं, सततं, बहुश:, अनेकश:, बहुवारं, प्राय:, प्रायेण, प्रायश:, शश्वत्. —FREQUENCE, -CY, *s.* पौन:पुन्यं, सातत्यं अभीक्ष्णता, नित्यता, अविराम:, समभिहार:, अविच्छेद:.

FRESCO, *s.* शीतता. 2 मंडोदकचित्रं.

FRESH, *a.* नव, अभिनव, नूतन, नवीन; प्रत्यग्र, अविशीर्ण, अम्लान, अशुष्क (of flowers only); ‘ f. age ’ नवं-प्रथमं-वय:; ‘ f. wound’ आर्द्रक्षतं. 2 पेय, आस्वाद्य, अलवण. 3 शीतल, शिव, सुख (of breezes). 4 सरस, अश्रांत, अक्षतवीर्य, अक्लांत, अक्षीणतेजस्; ‘ a f. man ’ नवशिष्य:-छात्र:, प्राथमकल्पिक:, शैक्ष: (just initiated). —EN, *v. t.* नवीकृ 8 U, सरसीकृ, (पुनर्नवीकृता: स्म: S. 5). —LY, *adv.* सद्य:, नवं, प्रत्यग्रं. 2 शीतलं, सुखं. —NESS, *s.* नवता, नूतनता, अम्लानता, अक्षीणता. 2 तेजस् *n.*, वीर्यं, सरसत्वं, अक्लांति-अश्रांति *f.* 3 अलवणता. 4 नवरक्तवर्ण:.

FRET, *v. i.* क्षुभ् 4 P, पीड् pass., व्यथ् 1 A, दुर्मनायते (D.), अंत: सं-परि-आ-तप् 4 A, शुच् 1 P, क्लिश् pass., उद्विज् 6 A, आत्मानं तप् c. or क्षुभ् c. 2 घर्षणेन क्षि pass., संघृष् pass. —*v. t.* संतप् c., क्षुभ् c.; व्यथ् c. (व्यथयति), पीड् 10, बाध् 1 A, क्लिश् 9 P. 2 घृष् 1 P, घर्षणेन तप् c. —*s.* (Of sea) क्षोभ:, वीचिप्रक्षोटनं. 2 (F.-fulness) चित्तव्यथा, आत्मपीडा-क्लेश:, उद्वेग:, मनस्ताप:, मन:क्षोभ:, अशांति *f.*, दुर्मनायितं. 3 प्रतीपता, वक्रभाव:. —FUL, *a.* आत्मतापिन्, शीघ्रकोपिन्, दुर्मनस्, चंड, शीघ्रक्षुब्ध-संतप्त. 2 वक्रप्रकृति, प्रतीप, वक्रभाव, दुष्प्रकृति, वामशील, जिह्मस्वभाव. —FULLY, *adv.* सचित्तक्षोभं, मनस्तापेन.

FRETTY, *a.* व्यत्यस्तरेखारूपेण तष्ट.

FRIABLE, *See* FRAGILE.

FRIAR, *s.* योगिन् *m.*, मुनि:, यति:, सन्यासी, तपस्वी. —Y, *s.* मठ:, आश्रम:, विहार:.

FRICTION, *s.* घर्षणं, संघर्ष:, आ-अभि-घर्ष:-र्षणं, आश्वि-घट्टनं, परस्परघर्षणं-मर्दनं.

FRIDAY, *s.* शुक्र-भृगु-वार:-वासर:.

FRIEND, *s.* मित्रं, सखि *m.*, सुहृद् *m.*, स्निग्ध:, प्रणयिन् *m.*, हित:, सहाय:, सजुस् *m.*, संगिन् *m.*, वय-

स्यः, बंधुः; (term of address) भद्रः-द्रा; 'an old f.' चिरमित्रं; 'a true f.' सन्मित्रं. —*v. t.* उपकृ 8 U, अनुग्रह् 9 P. —LESS, *a.* मित्र-बंधु-हीन, असहाय, अनाथ, अशरण; *See* FORLORN. —SHIP, *s.* सख्यं, मित्रत्वं; मैत्री, मैत्र्यं, बंधुता, सौहार्दं, सौहृदं, स्नेहः, प्रणयः, प्रीति *f.*, प्रेमन् *m.*, *n.*, अनुरागः. 2 साहाय्यं. —FRIENDLY, *a.* स्निग्ध, सदय, हितकाम, हितैषिन्, स्नेहशील, सानुराग, सुहृदय, सप्रणय. 2 हित, अनुकूल, अनुग्राहिन्, उपकारक, हितकर; सुखावह, कल्याणकर (री *f.*); 'on f. terms' स्नेहवृत्त्या, मित्रभावेन; 'f. disposed' हितबुद्धि; 'f. dispute' प्रणयकलहः, प्रीतिकलहः. —*adv.* मित्रवत्, हितवत्, स्निग्धं, प्रियं. —NESS, *s.* हितेच्छा, हितकामना, हितबुद्धि *f.*, अनुकूलता, मित्रत्वं, प्रणयः, स्नेहशीलता.

FRIEZE, *s.* स्थूलपट्ट-शाटकः, वराशिः.

FRIGATE, *s.* महायुद्धनौका.

FRIGHT, *s.* भयं, त्रासः, संत्रासः, शंका, साध्वसं, भीति *f.*, उद्वेगः, दरं; 'take f.' सं-उत्-त्रस् 1, 4 P, उत्त्रस्त-चकित-*a.* भू. —*v. t.*,—EN, *v. t.* भी c. (भापयते-भीषयते), सं-उत्-त्रस् c., उद्विज् c. —ED, *a.* भीत, त्रस्त, भयार्त; भयाकुल, चकित,ससाध्वस, जातशंक, शंकित, भयाविष्ट. —FUL, *a.* भीम, विकट, कराल, दारुण, भीषण, घोर, भैरव (वी *f.*), रौद्र (द्री *f.*), भयानक, भयावह, उग्र, भयंकर; 'f. in appearance' करालवदन, भीम-रौद्र-दर्शन, उग्रदर्शन. —FULLY, *adv.* दारुणं, घोरं, उग्रं.

FRIGID, *a.* शीत, शिशिर, हिम, जड. 2 निरुत्साह, निःस्नेह; *See* COLD. —ITY, *s.* हिमं, शैत्यं, जडता. 2 विरागः, स्नेहाभावः. —LY, *adv.* शीतलं, शिशिरं, निःस्नेहं.

FRINGE, *s.* अंचलः-लं, दशाः (*f.* pl.), वस्तयः (*m.* *f.*); 'like a f. rent from the robe of heaven' छिन्ना इवांबरपटस्य दशाः (Mr. 5). —*v. t.* प्रांतयति (D.); 'f. ed with gold' सुवर्णमंडितप्रांतं (वस्त्रं).

FRIPPERY, *s.* चीराणि (pl.), जीर्ण-चीर-वस्त्रं, वस्त्रखंडाः, कर्पटाः. 2 निष्प्रयोजनद्रव्यं, उच्छिष्टं.

FRISK, *v. i.* क्रीड् 1 U, इतस्ततः रम् 1 A or नृत् 4 P or प्लु 1 A, खेल् 1 P, वि-हृ 1 P. —Y, *a.* हृष्ट, प्रहृष्ट, प्रफुल्ल, सानंद.

FRITH, *s.* संकटं, संभेदः.

FRITTER, *v. t.* खंडशः कृत् 6 P; खंड् 10, शकलीकृ 8 U; 'f. away' खंडशः-अल्पशः-न्यूनीकृ or क्षीणीकृ or क्षै c. (क्षपयति); 'f. away time' अल्पशः (मुधा) वेलां क्षै c. —*s.* खंडः-डं, शकलः-लं.

FRIVOLOUS, *a.* लघु, अगुरु, अनर्थक, तुच्छ, यत्किंचन, चपल, चपल-लघु-वृत्ति, लघुकर्मन्. —NESS,—FRIVOLITY, *s.* लाघवं, लघुवृत्तिता-त्वं, लघुता, यत्किंचनकारिता, चापल्यं, चपलं कर्म, निरर्थकव्यापारः.

FRIZ, FRIZZLE, *v. t.* कुंच् c., व्यावृत् c.

FRO, *adv.* (In 'to and f.') इतस्ततः; 'going to and f.' गमनागमनं.

FROCK, *s.* उत्तरीयं, कंचुकः.

FROG, *s.* भेकः, दर्दुरः, मंडूकः, वर्षाभूः, शा(सा)लूरः, प्लवः, प्लवगः, प्लवंगमः, वर्षाघोषः; 'she-f.' मंडूकी.

FROLIC, *v. i.* क्रीड् 1 U, विलस् 1 P, विहृ 1 P, खेल् 1 P, रम् 1 A, विभ्रम् 1, 4 P. —*s.* केलि *f.*, विलासः, क्रीडा, विहारः, वि-भ्रमः, लीला, खेला, क्रीडाकौतुकं. —SOME, *a.* केलि-विलास-प्रिय, विलासिन्, क्रीडा-खेलापर, उल्लासिन्, विहारिन्, केलिकर; परिहासशील.

FROM, *prep.* Gen. ex. by abl., when denoting source or place. 2 (Of cause) by abl. or instr., (only by instr., the noun being *f.*); 'f. curiosity' कुतूहलात्-लेन; 'f. its fragrance' सुरभितया. 3 (Of persons) by abl., or सकाशात् with gen.; रामस्य सकाशात् 'f. Râma.' 4 (Of time) by आ with abl. or in comp.; 'f. the beginning' आमूलात्; आजन्मनः, आजन्म; gen. by आरभ्य or प्रभृति, with abl.; तद्दर्शनादारभ्य or प्रभृति; 'f. this day' अद्यप्रभृति, अद्यारभ्य; 'f. above' उपरिष्टात्, ऊर्ध्वात्; 'f. day to day' दिनेदिने, दिनादिनं; 'f. below' अधस्तात्, अधोभागात्; अधःस्थानात्; 'f. behind' पश्चादेत्य, पृष्ठतः, पृष्ठत आगत्य; 'f. hence' अतः, इतः; 'f. afar' दूरतः, दूरात्; 'f. without' बहिर्देशात्; 'f. within' अभ्यंतरात्, अंतःप्रदेशात्.

FRONT, *s.* अग्रं, अग्रभागः-देशः, मुखं, मूर्धन् *m.*; 'f. door or gate' मुखं, निःसरणं. 2 वदनं, आस्यं, मुखं, आननं. 3 शिरस् *n.*, ललाटं; 'in f. of' पुरः, पुरतः, अग्रे, अग्रतः, पुरस्तात्, प्रत्यक्षं, समक्षं, साक्षात्, अभि-सं-मुखं-खे, (with gen.); 'f. of war' रणधुरा, रणशिरः-मूर्धा; 'f. of army' सेनामुखं, सेनाग्रं, अग्रानीकं (f. ranks); 'in the f.' अग्रे, मूर्ध्नि, धुरि, शिरसि; 'to place in the f.' पुरस्कृ, अग्रणीकृ, अग्रेसरीकृ. —*v.* संमुखं-खे स्था 1 P or वृत् 1 A, संमुखी-अभिमुखी-भू; oft. by मुख or अभिमुख in comp.; 'a house f. ing the east' प्राङ्मुखं-प्राच्यभिमुखं-गृहं. —AGE, *s.* अग्र-पूर्व-भागः, मुखं. —AL, *a.* लालाटिक (की *f.*), ललाट in comp. —*s.* ललाटपट्टं; 'f. of an elephant' कुंभः, गंडः. —LESS, *a.* धृष्ट, निर्लज्ज, निस्त्रप. —LET, *s.* ललाटपट्टं.

FRONTIER, *s.* सीमा-मन् *f.*, उपांतः, पर्यंतः, प्रांतः, समंतः, सामंतः-तं. —*a.* 'Dwelling on the f.' सामंत (ती *f.*), सीमावर्तिन्, पर्यंतस्थ, प्रांतनिवासिन्; *See* BORDER.

FRONTISPIECE, *s.* मुखप्रतिमा-चित्रं; 'f. of a house' गृहमुखं, गृहाग्रभागः.

FROST, *s.* तुषारः, तुहिनं, हिमं, अवश्यायः, नीहारः,

प्रालेयं, मिहिका ; 'f.-bitten' हिमसिक्त, तुषार-शीत-उपहत. -Y, *a.* हिम, तुषार, हिम-तुषार-वत्.

HEAD, *s.* शिरस् *n.*, शीर्षं, शीर्षकं, मूर्धन् *m.*, मस्तकः-कं, मौलि *m. f.*, वरांगं, उत्तमांगं, मुंडः-डं. 2 अग्रणीः, अध्यक्षः, धौरेयः, धुर्यः, धुर्वहः, धुरीणः, पुरोगः, पतिः, नायकः, अधिपः-पतिः, मुखरः, श्रेष्ठः, अधिष्ठातृ *m.*, मुख्य-प्रधान in comp. 3 विषयः, पदं, स्थानं, अधिकरणं. 4 अग्रं, शिरस्, चूडा, शिखरं. 5 मूलं, प्रभवः, उद्गमः, उद्भवः, आदिहेतुः. 6 मति *f.*, बुद्धि *f.*, धीः; 'to be placed at the h. of' धुरि कीर्तनीय-or प्रतिष्ठापयितव्य-*a.*; 'h. merchant' श्रेष्ठिन् *m.*, विट्पतिः; 'the h. of a family' कुलपतिः, कुटुंबभारवाहकः; 'at the h.' ex. by आदि-प्रमुख in comp. or धुरि-मूर्ध्नि-स्था. &c.; 'with Indra at their h.' इंद्रादयः-इंद्रप्रमुखाः (देवाः); 'he stands at the h. of all' स सर्वेषां धुरि-मूर्ध्नि-तिष्ठति; 'h. over ears in debt' ऋणराशौ निमग्न or ऋणग्रस्त; 'to get a-h. of' अतिक्रम् 1 U, 4 P, अतिरिच् pass., अभिभू; 'make h. against' प्रत्यवस्था 1 A, विरुध् 7 U, प्रतिकूलयति (D.). –*v. t.* नी 1 P, अधिष्ठा 1 P, अग्रे-मूर्ध्नि-पुरः-गम् or स्था 1 P; 'h. ed by Vasish*th*a' वशिष्ठाधिष्ठिताः; gen. ex. by प्रमुख-पुरोग-पुरस्सर- in comp.; 'h.-ache' शिरोवेदना, शीर्षव्यथा-पीडा, शिरः-शूलं-रोगः; *See* ACHE; 'h.-band' शिरोवेष्टनं-बंधनं, ललाटपट्टः; 'h.-dress' शिरोभूषणं, किरीटः-टं, मुकुटं; 'h.-land' अंतरीपः-पं, भूशिरः, भूनासिका; 'h.-long or h. foremost' अवाक्शिरस्, अधोमुख-अवाङ्मुख (खी *f.*), अवाञ्च्, साहसिक, सरभस, साहसिन्, क्षिप्र-अविमृश्य-कारिन्-कृत; प्रवण, पातुक, पतयालु; (*adv.*) अवाक्, अधोमुखेन, सोत्तापं, सवेगं; 'h.-most' अग्र्य, प्राग्र्य, प्रमुख, मुख्य, वर, वरेण्य, उत्तम, प्रधान, in comp.; 'h.-piece' शिरस्त्रं, शिरस्त्राणं, शिरस्कं; 'h. s-man' घातकः, वधाधिकृतः, वध्यपुरुषः, मृतपाः; 'h.-strong' दुर्दांत, अप्रतिविधेय, अवश्य, दुर्दम, उच्छृंखल, अविधेय, प्रमत्त, अस्थिर, चंचल. –LESS, *a.* मस्तकहीन, अशिरस्. –Y, *a.* साहसिन्, साहसिक, क्षिप्रकारिन्. 2 संरंभिन्, शीघ्र-सुलभ-कोप, अमर्षण.

HEAL, *v. t.* शम् c. (शमयति), साध् c., समुत्था c. (समुत्थापयति), व्याधेः मुच् c.; *See* CURE; 'to h. a wound' व्रणं वि-रुह् c. (रोपयति); 'sore-h.-ing oil' व्रणविरोपणं तैलं (S. 4). 2 समा-सं-प्रतिसमा-धा 3 U, शम् c. –*v. i.* रुह् 1 P. 2 प्र-, शम् 4 P. –ER, *s.* रोगहरः, चिकित्सकः. –ING, *s.* उप-शमः-शांति *f.*, रुक्प्रतिक्रिया, चिकित्सा, प्रतीकारः, समुत्थानं. 2 विरोपणं-रोहणं. –*a.* शांतिद, रोगहर, शांतिकर (री *f.*), विरोपण.

HEALTH, *s.* कुशलं, अरोगः, सुस्थता, वार्त्तं, रोगाभावः, निरामयत्वं, सुस्थिति *f.*, आरोग्यं, स्वास्थ्यं, अनामयं, कल्यत्वं-ता, शरीरसुखं, अरोगिता. 2 प्रकृति *f.*, शरीरावस्था, शरीरस्थितिः-प्रकृतिः; 'of a delicate h.' प्रकृतिकोमल-दुर्बल; 'he is in good h.' सुस्थोसौ, कुशलमस्य. –FUL, –Y, *a.* आरोग्यवत्, अरोगिन्, नीरोग, नीरुज-ज्, स्वस्थ, व्याधिरहित, निरामय, वार्त्त, सुस्थ, कल्य, कुशलिन्, निर्व्याधि; 'became as h. as before' पूर्ववत् प्रकृतिस्थः समजायत. 2 आरोग्य-सुख-कर (री *f.*), पथ्य, हित, स्वास्थ्यजनक, सुखावह. –FULNESS, *See* (*s.*).

HEAP, *s.* राशिः, नि-सं-चयः, चिति *f.*, निकरः, स्तोमः, पुंजः, गणः, ओघः, संभारः; *See* COLLECTION. –*v. t.* राशीकृ 8 U, सं-आ-प्र-चि 5 U, एकीकृ, समाक्षिप् 6 P, सं-भृ 3 U, पिंडीकृ, आ-समा-स्तृ 5 U; *See* COLLECT; 'why do you h. accusations (calumnies) upon us' किमस्मान् संभृतदोषैराधिक्षिपथ (S. 5).

HEAR, *v. t.* श्रु 5 P, समा-आ-कर्ण् 10, निशम् 4 P or c. (शामयति); 'h. cases' व्यवहारान् दृश् 1 P, कार्याणि अवेक्ष् 1 A or विचर् c. or अनुसं-धा 3 U. –*v. i.* वार्ता श्रु; 'I have not heard from him for a long time' चिरं तद्वार्ता मया न श्रुता. –ER, *s.* श्रोतृ *m.*, श्रावकः, आकर्णयिता. –ING, *s.* श्रवणं, श्रुति *f.*, आकर्णनं, निशामनं. 2 (In law) दर्शनं, अवेक्षणं, अनुसंधानं; 'the organ of h.' श्रवणेंद्रियं, श्रोत्रं; 'within h.' श्रवणगोचरे, श्रुतिपथवर्तिन्. –HEARSAY, *s.* जनश्रुति *f.*, कर्णपरंपरा, जनवादः-प्रवादः, किंवदंती; 'know it by h.' इति कर्णपरंपरया श्रुतं.

HEARKEN, *See* HEAR.

HEARSE, *s.* प्रेत-शव-यानं-वाहनं.

HEART, *s.* हृदयं, हृद् *n.* 2 (The substance) बुक्का, अग्रमांसं, बुक्काग्रमांसं. 3 (Mind) चित्तं, मनस् *n.*, चेतस् *n.*, मानसं, हृदयं, अंतःकरणं, आत्मन् *m.*, अंतरात्मा, स्वांतं. 4 उरस् *n.*, वक्षस् *n.*, वक्षःस्थलं. 5 मर्मन् *n.* 6 स्नेहः, प्रणयः, रागः, भावः. 7 उदरं, गर्भः, अभ्यंतरं, अंतर् in comp. 8 सत्त्वं, धैर्यं, पौरुषं, तेजस् *n.*; 'take h.' आ-समा-श्वस् 2 P; धैर्यं, अवलंब् 1 A or अवष्टंभ् 9 P; 'learn or get by h.' कंठस्थ *a.* कृ 8 U, अभ्यस् 4 P; 'keep in the h.' चित्ते कृ, अवधृ 10; 'out of h.' दीन-खिन्न-चित्त; 'at h.' अंतः; 'with all one's h.', 'h. and soul' प्रकामं, कामं, सोत्साहं, सर्वात्मना; 'he has applied himself to the work h. and soul' सर्वात्मना तस्मिन्कर्मणि स व्यापृतः; 'to one's h.'s content' यथेच्छं, पर्याप्तं, आचित्ततोषं, कामं, प्रकामं, निकामं, इष्टं, यथा सतं; 'from the h.' निर्व्याजं, सोत्साहं, निर्व्यलीकं; 'h.-ache' हृदयसंतापः, मनोव्याधिः, हृदयव्यथा-पीडा-वेदना, मनस्तापः, मानसी व्यथा; 'h.-broken' भग्नमानस, अंतर्भिन्न, भिन्नहृदय; 'h.-burn'

हृदयवेदना, मनस्तापः; हृत्त्रासः, अम्लपित्तं; 'h.-ease' हृदयस्वास्थ्यं-सुखं, चित्तशांति-निर्वृति *f.*; 'h.-felt' अव्याज, निर्व्याज, वास्तविक (की *f.*), अकृत्रिम; 'h.-breaking,-rending,-wounding' मर्मभिद्-स्पृश्-च्छिद्, हृदय-मर्म-भेदिन्-च्छेदिन्, हृदिस्पृश्, अरुंतुद, चित्तोद्वेगजनक; 'h.-robbing' मनोहर, चित्तहारिन्; 'h.-sick' दुर्मनस्, उद्विग्नचित्त, खिन्न-विषण्ण-हृदय; *See* DEJECTED; 'h.-struck,-wounded' विद्धमर्मन्, क्षत-विद्ध-हृदय; 'h.-whole' अक्षत-अभिन्न-हृदय. -LESS, *a.* निर्वीर्य, निस्तेजस्; भीरुहृदय, निःसत्त्व, निष्पौरुष, क्लीब. 2 निर्दय, क्रूर, कठोरहृदय, निर्घृण. -LESSLY, *adv.* निर्वीर्यं, क्लीबवत्. 2 निर्दयं, क्रूरतया. -LESSNESS, *s.* अपौरुषं, क्लीबता, निर्वीर्यत्वं. 2 निर्दयत्वं, कठोरता. —HEARTY, *a.* सरल, निर्व्यलीक, निष्कपट, निर्व्याज, शुद्धांतःकरण; *See* FRANK. 2 अकृत्रिम, अकृतक, सोत्साह, उत्सुक, सोल्लास, सस्नेह, हृद्य; हृदयंगम, स्नेहनिर्भर; 'a h. friend' हृदयंगमः सखा. 3 वीर्यवत्, सपौरुष; कल्य, सुस्थ. -LY, *adv.* निर्व्यलीकं, निष्कपटं, निर्व्याजं. 2 सोल्लासं, सोत्साहं, प्रकामं, सर्वात्मना, संतुष्टचेतसा, कामतः, सानंदं, साह्लादं, चित्तसंतोषेण. 3 सवीर्यं. -NESS, *s.* सारल्यं, अकृत्रिमता, अव्याजत्वं; उत्साहः, औत्सुक्यं, वीर्यं, तेजस् *n.*, पौरुषं.

HEARTH, *s.* अग्निकुंडं, चुल्लि-ल्ली *f.*, अंतिका, अंदिका, उद्धानं, उद्मानं, अधिश्रयणी, अश्मंतं. 2 (Portable fire-place) अंगारधानिका, अंगारशकटी, हसनी, हसंती.

HEAT, *v. t.* तप् c., परि-प्र-सं°; उद्-,दीप् c.; ज्वल् c., संधुक्ष् 10; दह् 1 P. -*s.* तापः, सं-उत्-परि-तापः, दाहः; उष्णता, उष्मः, तिग्मता, प्रखरत्वं, ऊ-उष्मन् *m.*, चंडता. 2 आतपः, घर्मः, निदाघः; 'affected by h.' उष्णालु; 'expose to the sun's h.' सूर्यातपं दा 3 U. 3 (Summer) ग्रीष्मः, निदाघः, घर्मकालः, उष्णकालः, निदाघसमयः. 4 उत्तापः, संक्षोभः, चंडता, तीक्ष्णता, तीव्रता, उग्रता, व्यग्रता. 5 संरंभः, मदः, क्रोधः, उद्दीपनं, संधुक्षणं; आवेशः, आक्रमः; 'in the h. of excitement' रोषावेशेन. 6 कपोलरागः; 'h. of youth' यौवनगर्वः-दर्पः, यौवनोन्मादः, तारुण्यमदः. -ING, *s.* तापनं, दीपनं. -*a.* तापक, दीपन.

HEATH, *s.* जंगलभूमि *f.*, वनभूमिः. 2 प्रचारः.

HEATHEN, *s.* मूर्ति-प्रतिमा-पूजकः-उपासकः-अर्चकः. -*a.*,-ISH, *a.* प्रतिमापूजकानुरूप. 2 Barbarous, q. v. -ISM, *s.* मूर्तिपूजा-अर्चनं-उपासना.

HEAVE, *v. t.* उन्नम् c. (नमयति), उन्नी 1 P, उच्छ्रि 1 U, उद्-हृ-धृ 1 P, उद्यम् 1 A, उत्था c. (उत्थापयति), उत्क्षिप् 6 P, उत्तुल् 10; 'h. a sigh' निश्वस् 2 P, दीर्घं निश्वस्; 'h. ing deeply' दीर्घ-स्थूलस्थूलं-निश्वस्य. -*v. i.* स्पंद् 1 A, स्फुर् 6 P, कंप् 1 A, वेप् 1 A. 2 निश्वस्, कृच्छ्रेण उच्छ्वस्. 3 उत्सृप् 1 P, प्र-लुठ् 6 P, 1 A, लुल् 1 P, तरंगायते (D.), उन्नम् 1 P. -*s.* उन्नमनं, उत्क्षेपः, उत्तोलनं, उद्धरणं. -ING, *s.* स्पंदनं, स्फुरणं, कंपनं, वेपथुः. 2 निश्वासः, कृच्छ्रेण उच्छ्वासः, दीर्घनिश्वासः. 3 उत्सर्पणं, प्रलोठनं, लोलनं, उन्नमनं. -*a.* स्पंदमान, उत्सर्पिन्, लोल.

HEAVEN, *s.* दिव् *f.*, द्यो *f.*, स्वर्गः, त्रिदिवः-वं, सुरलोकः, त्रिदशालयः, त्रिविष्टपं, नाकः, स्वर् *ind.*; 'h. of Vishnu' वैकुंठं; 'this is a h. on earth' भूस्वर्गायमानमेतत्स्थलं, स्थानांतरगतः स्वर्गः (V. 2). 2 आकाशः-शं, नभस् *n.*, गगनं-णं; *See* SKY. 3 God, q. v.; परमेश्वरः, विधिः, ईश्वरः; 'h. and earth' द्यावापृथिव्यौ, द्यावाभूमी, रोदसी-स्यौ, द्यावाक्षमे; 'h.-born' दिविज, स्वर्गीय, स्वर्गोत्पन्न. -LY, *a.* दिव्य, स्वर्गीय, अपार्थिव (वी *f.*), स्वर्ग्य, त्रिदिवस्थ, दिविष्ठ; 'h. body' नक्षत्रं; 'h. voice' आकाशवाणी, अशरीरिणी वाक्; 'h. nymph' सुरांगना, स्वर्योषित्, दिव्यांगना. 2 परम, उत्तम. -WARDS, *adv.* स्वर्गाभिमुखं, अभिगगनं.

HEAVY, *a.* गुरु, भारवत्. 2 गाढ, दीर्घ, गुरु, तीक्ष्ण, महत्, तीव्र, अत्यंत, उग्र, दारुण, उचंड, महा-सु-अति- in comp.; 'h. shower' महासारः, अतिवृष्टिः. 3 आकुल, क्षुब्ध; 'h. sea' सागरक्षोभः, क्षुब्धसागरः, ऊर्मिमालाकुलः सागरः. 4 अवसन्न, खिन्न, दीन, चिंताकुल, विषण्ण. 5 मंद, स्थूल, जड, मंथर, अलस, मंद-धी-मति, जड-स्थूल-बुद्धि-धी; 'h.-headed' मंद-स्थूल-धी; 'h.-laden' गुरुभाराक्रांत, सुभारवत्. -LY, *adv.* गुरुभारेण, गुरुतया. 2 भृशं, तीव्रं, बलवत्, अत्यंतं, सु-अति pr.; *See* EXCEEDINGLY. 3 सविषादं, मंदं, शनैःशनैः. -NESS, *s.* गुरुता, गुरुत्वं, भारः; गरिमन् *m.*, विषादः, दैन्यं, मांद्यं, स्थूलता, &c.

HEBETATE, *v. t.* *See* BLUNT, DULL.

HECATOMB, *s.* शतबलिदानं.

HECTIC, *a.* संतत, अविरत. 2 ज्वरसूचक, अंतर्दाहसूचक.

HECTOR, *s.* विकत्थिन् *m.*, आत्मश्लाघी, पिंडीशूरः, शूरंमन्यः. 2 कलहकारः, भर्त्सकः. -*v. i.* विकत्थ् 1 A, प्रगल्भ् 1 A; *See* BOAST. 2 तर्ज्-भर्त्स् 10 A.

HEDGE, *s.* वृति *f.*, प्राचीरं, प्राकारः, आवरणं, वेष्टनं, आवारः, क्षेत्रावरोधकं, क्षेत्रवेष्टनं; 'h.-born' अंत्यज, हीनजाति-वर्ण, अधम-नीच-जातीय; 'h.-hog' शल्यः, शल्यकंठः; 'h.-sparrow' कलविंकः, चटकः. -*v. t.* वृत्या परिवेष्ट् c. or आवृ 5 U or अवरुध् 7 U.

HEED, *v. t.* आदृ 6 A, अवेक्ष् 1 A, गण् 10, मन् c., अभिनंद् 1 P; सेव् 1 A. 2 अव-धा 3 U, मनो दा 3 U, सावधान *a.* भू, श्रु 5 P; *See* HEAR. -*s.* अवधानं, अवेक्षा, सावधानता, मनोयोगः; 'take h.' सावधानो भव. -FUL,-LESS, *a.* *See* CAREFUL,-LESS.

HEEL, *s.* पार्ष्णि *m. f.*, पादतलं-मूलं; 'to be at one's h. s' पार्ष्णिं ग्रह् 9 P, अनुसृ, पदं अनुगम् 1 P; 'I shall be close upon your h. s' अहमनुपदमागत एव (S. 3); 'to take to or show h. s'

पलाय् 1 A, अपक्रम् 1 U, 4 P; 'betake to h. s' जंघाबलमवलंब् 1 A; 'h. s over head' अवाक्शिरस् *a.*, ऊर्ध्वपाद *a.* –*v. i.* एकपार्श्वे पत् 1P or परिवृत् 1 A or प्र-लंब् 1 A.

HEFT, *s.* उद्योगः, यत्नः, उत्साहः. 2 मुष्टि *m.f.*, त्सरुः.

HEIFER, *s.* वत्सतरी, वत्सा ; 'h. one year old' एकहायनी ; so द्विहायनी, त्रिहायणी.

HEIGH-HO, *interj.* हंहो, अहो, भो भोः, रे रे.

HEIGHT, *See* under HIGH.

HEINOUS, *a.* घोर, दारुण, अतिनिंद्य, गर्ह्यतम, अतिदुष्ट, महत्, अतिपापिन्, अतिघोर, पापिष्ठ. –LY, *adv.* घोरं, दारुणं. –NESS, *s.* घोरता, दारुणत्वं.

HEIR, *s.* दायादः, रिक्थहरः, अंशहरः-हारिन् *m.*, रिक्थभागी, रिक्थिन् *m.*, धनाधिकारी, उत्तराधिकारी, अंशभाक्, अंशी; 'sole h.' समग्रधनभाक्; 'h.-apparent' युवराजः; 'h.-loom' क्रमायातं जंगमद्रव्यं. –ESS, *s.* धनाधिकारिणी, &c. –LESS, *a.* दायादशून्य-हीन. –SHIP, *s.* धनाधिकारित्वं.

HELIOTROPE, *s.* सूर्यकमलं, श्रीहस्तिनी.

HELL, *s.* नरकः, निरयः, नारकः, दुर्गति *f.* 2 पातालं, रसातलं, अधोलोकः, अधोभुवनं ; 'h.-tortures' कारणा, यातना, तीव्रवेदना ; 'river of h.' वैतरणी. –ISH, *a.* नारक (की *f.*), नरकीय, नारकीय (यी *f.*), नरकस्थ. 2 Cruel, q. v. 3 अतिनिंद्य, दुष्टतम.

HELM, *s.* कर्णः, केनिपातः-तकः, अरित्रं. 2 Helmet, q. v.; 'placed at the h. of (royal) affairs' राज्यधुरायां स्थापित. –HELMSMAN, *s.* कर्णधारः, नाविकः.

HELMET, *s.* शिरस्त्रं, शिरस्कं, शिरोभूषणं, शिरस्त्राणं, शीर्षकं-ण्यं.

HELP, *s.* साहाय्यं, उपकारः, उपकृतं-कृति *f.*, साहित्यं, अनुग्रहः, आनुकूल्यं. 2 गति *f.*, आश्रयः, शरणं; 'help ! help !' परित्रायध्वं, परित्रायध्वं. –*v. t.* साहाय्यं कृ 8 U, सहायः भू, अनुग्रह् 9 P, उपकृ (gen.); न हि दीपौ परस्परस्योपकुरुतः (S. B. 420); तान्यपि तत्त्वज्ञानायोपकुर्वंति (S. B. 447) 'h. a right understanding'. 2 संवृध् c., प्रवृत् c., पुरस्कृ, उद्युज् 10; 'h. ed him on his legs' उत्थातुं तस्य साहाय्यं चकार; 'God h. s those who h. themselves' दैवमुद्यमायत्तं, विना पुरुषकारेण दैवं न सिध्यति; दैवं पुरुषकारेण साध्यसिद्धिनिबंधनं; न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते (S. R. 104); 'can't h.' का गतिः, किमन्यच्छरणं: 'to h. himself to a mouthful' ग्रासग्रहणेन आत्मानं तर्पयितुं; 'a h. ing hand' हस्तावलंबः-बनं; दैवेनेत्थं दत्तहस्तावलंबे प्रारंभे (Rat. 1); 'he could not h. laughing' हासं निग्रहीतुं न शशाक; 'I cannot h. going' मयावश्यं गंतव्यं; 'to h. at table' परिविष् 10. –ER, *s.* उपकारकः, उपकर्तृ *m.*, सहायः. –FUL, *a.* उपयोगिन्, सहाय, उपकारक, साहाय्यकारिन्. –LESS, *a.* अनाथ, निराश्रय, अगतिक, अशरण, गतिहीन, निरवलंब, असहाय. 2 अप्रतिकार्य, अपरिहार्य, अप्रतिविधेय, निरुपाय; 'we are simply h. in that matter' तस्मिन्विषये अस्माकमन्या गतिरेव नास्ति. –HELPMATE, *s.* सहधर्मिणी. 2 सहायः, सहकारिन् *m.*

HELVE, *s.* दंडः, मुष्टि *m. f.*

HEM, *s.* अंचलः, वसनप्रांतः, वस्तयः-दशाः (pl.). 2 उत्कासनं. –*v. t.* अंचलं सिव् 4 P. 2 (in) परिवेष्ट् 1 A or c., परि-वृ 5 U or c., निरुध् 7 U.

HEMICRANIA, *s.* अर्धावभेदकः.

HEMICYCLE, *s.* गोलार्धं.

HEMIPLEGY, *s.* पक्षाघातः, पक्षवायुः.

HEMISPHERE, *s.* गोलार्धं, अर्धगोलः.

HEMISTICH, *s.* श्लोकार्धं, अर्धश्लोकः.

HEMORRHAGE, *s.* रक्त-रुधिर-स्रावः, रक्तक्षरणं.

HEMORRHOIDS, *s.* अर्शस् *n.*, गुदकीलः.

HEMP, *s.* शणं, भंगा, मातुलानी. –EN, *a.* शाण (णी *f.*), शण in comp.

HEN, *s.* कुक्कुटी; 'h.-hearted' भीरु, भीरुहृदय, कातर, कापुरुष; 'h.-house' कुक्कुटपालिका; 'h.-pecked' स्त्रीवश, स्त्रीविधेय, स्त्रीजित, स्त्रीवश्य, स्त्रीवशवर्तिन्, भार्याटिक; 'h.-roost' कुक्कुटालयः.

HENCE, *adv.* इतः, अस्मात् स्थानात्. 2 अतः, एतस्मात् कारणात्, तस्मात्; अत एव. 3 (From h.) अतः परं, अतः-इतः-परं-ऊर्ध्वं; अद्यप्रभृति: 'hence !' अपेहि, अपयाहि, अपसर; 'h.-forth,-forward' अतः-इतः-परं-ऊर्ध्वं, अद्यप्रभृति, अद्यारभ्य, अद्यावधि.

HEPTAGON, *s.* सप्तभुजा-सप्तकोणा-आकृतिः.

HERALD, *s.* घोषकः, वंदिन् *m.*, राजदूतः. 2 (fig.) अग्रदूतः, प्रथमवार्ताहरः, अग्रेसरः. –HERALDRY, *s.* वंशावलीज्ञानं.

HERB, *s.* ओषधि-धी *f.*, शाकः, शाकलता, हरितकं. –HERBAGE, *s.* तृणं, शस्यं, घासः, यवसं. –HERBAL, *s.* वृक्षायुर्वेदः.

HERCULEAN, *a.* भगीरथ in comp.; 'h. efforts' भगीरथप्रयत्नाः. 2 अतिप्रबल, अतिशक्तिमत्.

HERD, *s.* यूथं, गणः, संघः, वृंदं, कदंबः, कुलं, समूहः, व्रजः, निवहः; 'h. of cattle' गोकुलं, पाशवं, गोवृंदं, गोत्रा; 'h. of oxen' औक्षणं; 'h. of calves' वात्सकं; 'h. of elephants' हास्तिकं. –*v. i.* यूथेन चर् 1 P, यूथशः संमिल् 6 P or संगम् 1 A, एकीभू, एकत्र भू or मिल्. –HERDSMAN, *s.* गोरक्षकः, गोपालः, गोपः, गोधुक्, आभीरः, गोसंख्यः, बल्लवः.

HERE, *adv.* अत्र, इह (gen. in this world). 2 इह लोके; ex. by demon. pron.; 'h. comes

your mother' एषागच्छति ते माता; 'h. am I' अयमस्मि. -*Interj.* भो भोः; 'h. and there' इतस्ततः; अंतरांतरा, असमग्रं, असंपूर्णं; 'h. about' इतो नातिदूरे, इह समीपे; 'h.-after' इतः परं-ऊर्ध्वं, अतः, परतः, परस्तात्, अनंतरं, पश्चात्, उत्तरतः, उत्तरत्र, अग्रे, उपरिष्टात्, अतः परं; (in the next world) परत्र, अमुत्र, परलोके; (*s.*) उत्तरकालः, पर-भावि-आगामि-कालः; 'h.-at' अत्रांतरे, अथ; 'h.-by' अनेन, तस्मात्; 'h.-in' अत्र, अत्र-स्थाने-विषये; 'h.-before' इतः पूर्वं, पूर्वकाले, पुरा, प्राक्, अतीत-गत-काले; 'h.-upon' ततः, अनंतरं, तदुपरि, तच्छ्रुत्वा.

HEREDITARY, *a.* पितृपैतामह (ही *f.*), पित्र्य, पैतृक (की *f.*), पारंपरीण-य, परंपरागत, परंपराप्राप्त, क्रमायात, क्रमागत, कुलक्रमागत, अन्वयागत; 'h. disease' संचारी रोगः; 'h. servant' मूलभृत्यः, मौलः; 'h. succession' क्रमागतत्वं. -LY, *adv.* कुलक्रमेण, वंशक्रमेण, परंपरया, पारंपर्येण.

HEREDITAMENT, *s.* दायः, रिक्थाधिकारः.

HERESY, *s.* पाषंडमार्गः, नास्तिकता, मिथ्यादृष्टि *f.*; विधर्मः, विधर्मसेवा, परधर्माश्रयः, अपथं, विपथः. —HERETIC, *s.* पाषं(खं)डः, नास्तिकः, विधर्मसेविन् *m.*, परधर्मावलंबी, देवनिंदकः, उपधर्मसेवी, स्वधर्मभ्रष्टः-च्युतः, पतितः. -AL, *a.* धर्मविरुद्ध, विपथ-विधर्म-गामिन्. -ALLY, *adv.* पाषंडवत्, नास्तिकवत्.

HERITAGE, *s.* दायः, पैतृकं धनं, रिक्थं, पैतृकद्रव्याधिकारः.

HERMAPHRODITE, *s.* स्त्रीपुरुषलक्षणान्वितः.

HERMETICALLY, *adv.* सुदृढं, गाढं.

HERMIT, *s.* यतिः, तापसः, तपस्विन् *m.*, मुनिः, आरण्यकः, वन-अरण्य-वासी, वानप्रस्थः, वैखानसः. -AGE, *s.* आश्रमः, उटजः-जं, पर्णशाला.

HERNIA, *s.* अंत्रवृद्धि *f.*; अंत्रस्रंसः.

HERO, *s.* वीरः, शूरः, भटः, विक्रांतपुरुषः, प्र-महा-वीरः, जेतृ *m.*, रथिन् *m.*, अतिरथः, शौटीरः. 2 (In dramas &c.) नायकः, कथापुरुष; 'h. s of Râmâyana' रामायणकथापुरुषाः or -नायकाः. -IC,-ICAL, *a.* वीर, शूर, प्रवीर, विक्रांत, वीर्यवत्, अमितौजस्, महावीर्य; 'a h. deed' पराक्रमः, विक्रमः, अवदातं कर्म. 2 वीर-चरित्र-विषयक, वीररसप्रधान. -ICALLY, *adv.* सविक्रमं, सवीर्यं, शूरवत्. -ISM, *s.* वीर्यं, शूरत्वं, शौर्यं, परा-वि-क्रमः, धामन् *n.*, ओजस् *n.*, रणोत्साहः, पौरुषं, साहसं, वीर्यवत्त्वं, शौटीर्यं. -HEROINE, *s.* नायिका.

HERON, *s.* बकः, सारसः, लोहपृष्ठः, क्रौंचः.

HERPES, *s. See* ITCH.

HESITATE, *v. i.* वि-आ-शंक् 1 A, दोलायते (D.), विचर् c., विक्लृप् 1 A or c., विलंब् 1 A, चिर-(रा)यति-आंदोलयति (D.); *See* DOUBT also. 2 Falter, q. v. -INGLY, *adv.* संशय्य, सविकल्पं, ससंशयं, साशंकं. 2 स्खलनपूर्वकं. -ION, *s.* शंका, संशयः, विकल्पः, आ-वि-परि-शंका, विचारः, संदेहः, वितर्कः, द्वापरः, अनिर्णयः, विचिकित्सा. 2 (In speaking) स्खलनं, स्वरभेदः-भंगः, स्खलद्वचनं, गद्गदवाच् *f.*

HETEROCLITE, *a.* विधिविरुद्ध, निपातित.

HETERODOX, *a.* भिन्न-मत-धर्मन्, धर्मविरुद्ध, विपरीत, विधर्मिन्, वैधर्मिक (की *f.*), अपथवर्तिन्-गामिन्. -Y, *s.* विधर्मः, भिन्नमत-धर्मः.

HETEROGENEOUS, *a.* भिन्न, विजातीय, पृथग्विध, भिन्नजातीय, विरुद्ध; *See* DIFFERENT.

HEW, *v. t.* छिद् 7 P, कृत् 6 P, लू 9 U; *See* CUT. -ER, *s.* छेदकः, छेदिन् *m.*, छिद् in comp. -HEWN, *a.* छिन्न, दात, वृक्ण, लून, कृत्त, दित, छात.

HEXAGON, *s.* षट्कोणः, षडस्रः.

HEXAMETRE, *s.* षट्पदी चरणः.

HEY, *interj.* अहो, ननु, हाहा.

HEYDAY, *interj.* नमः, स्वस्ति (with dat.); अहो, भोः. -*s.* उल्लासः, प्रमोदः, हर्षः, मुदा, परिहासः; 'h. of youth' नवं-प्रथमं-यौवनं.

HIATUS, *s.* भंगः, भेदः, छेदः, विच्छेदः.

HIBERNAL, *a.* हैमंत (ती *f.*), हैमंतिक (की *f.*).

HICCOUGH, HICCUP, *s.* हिक्का, हिध्मा. -*v. i.* हिक्क् 1 U.

HIDE, *s.* चर्मन् *n.*, अजिनं, दृतिः, कृत्ति *f.*, पशुचर्म-त्वच् *f.*; 'h.-bound' दृढमुष्टि, कृपण; अवश्य, अविनय, कठोर, कठिन. -*v. t.* प्रच्छद् 10, गुह् 1 U, गुप् 1 P, अंतर्धा 3 U, तिरोधा, स्थग् 10, अपवृ c.; *See* CONCEAL. -*v. i.* गुह्-गुप् pass., गुप्त-निलीन-*a.* भू 1 P, नि-ली 4 A, तिरोभू, तिरोधा pass.; 'h. s behind the bushes' विटपांतरितस्तिष्ठति-भवति. -HID,-HIDDEN, *a.* गूढ, गुप्त, प्रच्छन्न, छादित, अंतर्हित, तिरोहित, अंतरित, अपवारित, निभृत, स्थगित, लीन, निलीन. -ING, *s.* गोपनं, गुप्ति *f.*, प्रच्छादनं, स्थगनं, तिरोधानं; 'h.-place' निभृत-गूढ-स्थानं, गुप्तिः, निभृतं.

HIDEOUS, *a.* बीभत्स, विकृत, घोर, भीषण, कराल, उग्रदर्शन, कराल-मुख-वदन, कदाकार, भीम-घोर-दर्शन-आकृति, उग्र-घोर-रूप, दुर्दर्शन; 'Oh! this is indeed a h. spectacle' हंत बीभत्समेवाग्रतो वर्तते (Mal. 5). -LY, *adv.* उग्रं, घोररूपेण, बीभत्सं. -NESS, *s.* घोरता, करालता, उग्रता.

HIE, *v. i.* त्वर् 1 A, सत्वरं गम् 1 P.

HIERARCH, *s.* पुरोहितेश्वरः, आचार्यवरः. -Y, *s.* आचार्याधिपत्यं, धर्माध्यापकप्रभुत्वं.

HIEROGLYPH,-IC, *s.* गूढाक्षरं, बीजाक्षरं.

HIGGLE, *v. i.* पण् 1 A, व्यव-हृ 1 P. 2 Haggle, q. v.

HIGH, *a.* उच्च, उन्नत, उच्छ्रित, समुच्छ्रित, सोच्छ्राय, तुंग, प्रांशु, उदग्र, उत्तुंग, उद्गत, उन्नम्र, ऊर्ध्व. 2 उत्तम,

विशिष्ट, मुख्य, श्रेष्ठ, परम, अग्र्य, महा-प्रधान- in comp.; *See* PRINCIPAL. 3 प्रचंड, तीक्ष्ण, तीव्र, बलवत्, तरस्विन्, प्रबल; *See* STRONG. 4 उदात्त, उत्ताल; 'a h. tone' उदात्तः, उच्च-तार-स्वरः, तारः. 5 (Of h. rank) विशिष्ट, उत्कृष्ट, उत्कृष्ट-विशिष्ट-पदस्थ, उत्तम-परम-पदभाज्, लब्धप्रतिष्ठ, प्रतिपत्तिमत्, सगौरव. 6 (Of h. family) कुलीन, महाकुल, अभिजात, अभिजनवत्, कुलज, महाकुलप्रसूत. 7 गर्वोद्धत, दर्पाध्मात, सावलेप, गर्वित, अवलिप्त, उत्सिक्त. 8 गहन; 'h. water' प्रवृद्धा वेला; 'it is h. noon' (नभसः) मध्यमलंकरोति भानुः; 'h. and low' उच्चावच, अधरोत्तर, उत्तमाधम, उन्नतानत, नतोन्नत, निम्नोन्नत; 'h.-er and h.-er' अधिकाधिकं, उत्तरोत्तरं; 'h. price' महामूल्यं; 'h. ground' उन्नतभूः; 'as h. as' मात्र (त्री *f.*), द्वयस (सी *f.*), दघ्न (घ्नी *f.*) in comp.; 'he has a h. opinion of you' स त्वां बहु मन्यते. -*adv.* उच्चैः, उच्चं, अति-सु pr.; ऊर्ध्वं, उपरि, उत्तमं, परमं; 'on h.' ऊर्ध्वं, उपरि; 'from on h.' उपरिष्टात्; 'the sea runs h.' बलवत्क्षुब्धः सागरः. 'H.-birth' कुलीनता, कुलोत्कर्षः, आभिजात्यं; 'h.-blest' अतिपुण्यवत्, महाभाग, अतिधन्य, परमसुखभाज्; 'h.-blown' अत्युच्छून, अतिस्फीत; 'h.-born' कुलीन, महाकुल-जात-प्रसूत, अभिजात, सुजात, अभिजनवत्, सद्वंश्य, श्रेष्ठ-उत्तम-कुलोद्भव; 'h.-bred' कुलीन, शिष्टाचार, सुजन, सुशील, सद्भावविशिष्ट, सौजन्योपेत, सदाचार, साधुवृत्त; 'h.-built' सोच्छ्राय, उच्च; 'h.-day' उत्सवदिनं, उद्धर्षदिवसः; 'h.-fed' अतिपुष्ट, हृष्टपुष्ट; 'h.-flying' अपरिमित; 'h.-hand' औद्धत्यं, गर्वः, उद्दामत्वं, निर्यंत्रणत्वं; 'h.-handed' उद्धत, सगर्व, उद्दाम, अनियंत्रण, उच्छृंखल, स्वैरिन्; 'h.-hung' ऊर्ध्वबद्ध; 'h.-land' अधित्यका, उन्नतभूमि *f.*; (*a.*) पर्वतीय, उन्नत; h.-lander' पर्वतीयः, पर्वतवासिन् *m.*; 'h.-mettled' महासत्त्व, उरुसत्त्व, ओजस्विन्, अदीनचित्त, तेजस्विन्; गर्वित, अतिमदान्वित; 'h.-minded' महात्मन्, महामनस्क, उदार-धी-चेतस्-चरित, महेच्छ, महाशय; 'h.-principled' साधुचरित्र, पुण्यात्मन्, पुण्यशील; 'h.-priest' पुरोहिताध्यक्षः; 'h.-prized' महामूल्य, महार्घ, बहुमत; 'h.-red' घनारुण, अतिरक्त; 'h.-road, -street,-way' राजमार्गः-पथः, महापथः-मार्गः, घंटापथः, संसरणं, रथ्या, विशिखा, प्रतोली; 'h.-seasoned' सुवासित; 'h.-spirited' महा-उरु-सत्त्व, अदीनवृत्ति, ओजस्विन्, ऊर्जित, महेच्छ; 'a h.-spirited speech' ऊर्जिताश्रयं वचनं (KI. II. 1); 'h. treason' राजद्रोहः, राजापथ्यकारित्वं; 'h.-wrought' यत्नसंस्कृत, प्रयत्नपरिष्कृत; 'h.-wayman' परिपंथिन् *m.*, दस्युः, वाटपाटच्चरः, पादाविकभ्रः. -EST, *a.* उच्चैस्तम, तुंगतम, उत्तम, परम. -LY, *adv.* उच्चैः. 2 भृशं, अत्यंतं, नितांतं, परमं, परं, अतीव, अति-सु pr.; *See* EXCEEDINGLY; 'h. pleased' परमानंदभाज्, हर्षकाष्ठां गत. -NESS, *s.* देवः (वी *f.*), अत्रतत्र-भवत् (ती *f.*). —HEIGHT, *s.* उच्छ्रायः, उच्छ्रयः, उत्सेधः, आरोहः, उन्नयः, तुंगता, उच्चता; उत्कर्षः, उन्नति *f.* 2 उच्चस्थानं, उत्सेधः, उन्नतभूभागः, गिरिः, पर्वतः. 3 शिखरं, अग्रं, शृंगं, शिखा, चूडा. 4 (परा) काष्ठा, कोटिः; अतिभूमिः, परमावधिः, उत्तमावधिः; 'being in the h. of joy' आनंदकोटिमधिगत. 5 कुलोत्कर्षः, परमपदं, श्रेष्ठत्वं, विशिष्टता; 'the h. of winter' शिशिरमध्यं, कठोरीभूतः शिशिरः. -EN, *v. t.* उन्नी 1 P, उत्कृष् 1 P. 2 वृध् c., उपचि 5 U, श्वि c., स्फाय् c. (स्फावयति); *See* ADD to.

HILARITY, *s.* आनंदः, उल्लासः, प्रमोदः, कौतुकं, आह्लादः, उत्सवः; *See* DELIGHT.

HILL, *s.* गिरिः, पर्वतः, अद्रिः, शैलपादः; 'h. near a mountain' पादः, प्रत्यंतपर्वतः. -OCK, *s.* वप्रः, उन्नतभूभागः; वामलूरः, वल्मीकः-कं, नाकुः, मृत्तिकाचयः. -Y, *a.* पर्वतमय (यी *f.*), सपर्वत, पर्वतीय, उन्नतानत, विषम.

HILT, *s.* त्सरुः, मुष्टि *m. f.*, खड्गमुष्टिः.

HIND, *s.* मृगी, हरिणी, कुरंगी, एणी, पृषती. 2 ग्राम्यजनः, ग्रामिकः, वृषलः.

HINDER, *a.* पश्चिम, जघन्य, पश्चात् in comp., चरम, अपर, अवर; 'h. part' पश्चाद्भागः, पृष्ठदेशः-भागः, पृष्ठं, नितंबः, पश्चिमभागः.

HINDER, *v. t.* नि-विनि-वार् 10 or वृ c., नि-प्रति-षिध् 1 P, रुध् 7 U, नि-उप-अव-सं-प्रति°, स्तंभ् 9 P, बाध् 1 A, वि-प्रति-हन् 2 P, प्रतिबंध् 9 P. -ANCE, *s.* प्रतिषेधः, निवारणं, प्रतिबंधः, विघ्नः, अंतरायः, प्रत्यूहः, प्रतिरोधः, व्याघातः, बाधा, विष्टंभः. -ER, *s.* निवारकः, प्रतिबंधकः, विघ्नकृत् *m.*

HINGE, *s.* केंद्रं, द्वारसंधिः-ग्रंथिः. -*v. i.* (upon) अवलंब् 1 A, अपेक्ष् 1 A; *See* DEPEND.

HINT, *s.* इंगितं, आकूतं, सूचना, संज्ञा, भावः, संकेतः, आशयः. 2 उपन्यासः, उपक्षेपः. -*v. t.* इंगितेन सूच् 10, उपन्यस् 4 U, सच्, उपक्षिप् 6 P, उद्दिश् 6 P, साकूतं निर्दिश् or उपन्यस्.

HIP, *s.* कटि-टी *f.*, नितंबः, श्रोणि-णी *f.*, कटः, प्रोथः, जघनं, श्रोणिफलकं.

HIPPOPOTAMUS, *s.* करियादस् *n.*

HIRE, *v. t.* वेतनेन-मूल्यदानेन नि-प्र-युज् 7 A, 10 or व्या-पृ c. or उप-भुज् 7 P or सेव् 1 A or ग्रह् 9 P, परिक्री 9 A, भट् 1 P or c., भृतिं दा 3 U; 'h. labourers' कर्मकरान् उपनी 1 A or कर्मणि व्यापृ c.; 'a h. ed labourer' भृतिभुक्, भरण्यभुक्, भृतकः; 'a person h. ed' कृत-कल्पित-वेतनः. -*s.* वेतनेन ग्रहणं or व्यापारणं, वेतनदानं. 2 भृति *f.*, भृत्या,

भरण्यं, वेतनं, भाटकं, मूल्यं, कर्मण्या, विधा, भर्मन् *n.*, निर्वेशः, पणः, निष्क्रयः; 'for h.' पण्य, वेतनेन ग्राह्य, साधारण; 'a woman for h.' पण्यांगना, पण्यस्त्री; 'a teacher for h.' भृतकाध्यापकः. -LING, *s.* 'worker for h.' भृतकः, भृतिभुक्, भरण्यभुक्, वैतनिकः; कर्मकरः, भृत्यः.

HIRSUTE, *a.* लोमश, प्रचुरलोमन्.

HISS, *v. i.* फूत्कारं कृ 8 U or उद्-गृ 6 P, सीत्कारं कृ, सर्पवत् श्वस् 2 P; 'h. off' सीत्कारेण असंतोषं सूच् 10 or दृश् c. -*s.*,-ING, *s.* फूत्कारः, सीत्कारः, सर्पश्वासः-नादः.

HIST, *adv.* तूष्णीं भव, वाचंयम. *a.* भव.

HISTORY, *s.* इतिहासः, पुरावृत्तं, पुराभूतं, पुराणोपाख्यानं, उपाख्यानं, चरित्रवर्णनं. 2 वृत्तांतः, उदंतः, समाचारः, वार्ता. -IC,-ICAL, *a.* ऐतिहासिक (की *f.*), पुरावृत्तविषयक, पौराणिक (की *f.*). -ICALLY, *adv.* इतिहासानुसारेण. -HISTORIAN,-HISTORIOGRAPHER, *s.* इतिहास-पुरावृत्त-लेखकः-रचकः, पुराणरचकः, चरित्रलेखकः, ऐतिहासिकः.

HISTRIONIC,-AL, *a.* नाटकीय, रंग-नाट्य-योग्य, रंगानुरूप.

HIT, *v. t.* प्र-हृ 1 P, तड् 10; अभि-नि-आ-हन् 2 P, तुद् 6 P, व्यध् 4 P. 2 (Upon) (दैवात्) आ-सद् c., प्राप् 5 P, अधिगम् 1 P, लभ् 1 A; 'arrows h. a moving mark' इषवः सिध्यंति लक्ष्ये चले (S. 2). -*v. i.* संघट्ट् 1 A, समा-प्रति-हन्, अभि-सं-पत् 1 P. -*s.* प्रहारः, आघातः, ताडनं, घातः. 2 दैवघटना, संगति *f.*, दैवं.

HITCH, *v. t.* ग्रह् 9 P, धृ 1 P, 10, आकृष् 1 P. -*v. i.* ग्रह्-धृ -pass. 2 HOP, q. v. -*s.* अंतरायः, प्रत्यूहः; *See* OBSTACLE.

HITHE, *s.* घट्टः, तरस्थानं.

HITHER, *adv.* अत्र, इह, इतः. -MOST, *a.* आसन्नतम, नेदिष्ठ, अत्यंतिक. -WARD, *adv.* इतः, अत्र. -HITHERTO, *adv.* अद्ययावत्, आवर्तमानकालात्, अद्यावधि, एतत्कालपर्यंतं.

HIVE, *s.* मधुकोषः, करंडः, छत्रकः, चषालः. -*v. t.* मधुकोषे निधा 3 U or निविश् c.

HOAR, *a.* धवल, शुभ्र, सित, श्वेत, शुक्ल; *See* WHITE; 'h.-frost' तुषारः, अवश्यायः; *See* FROST.

HOARD, *s.* संचयः, निचयः, निवहः, पुंजः, राशिः, गणः, संघः, संग्रहः, निधिः; *See* MULTITUDE. -*v. t.* संचि 5 U, संग्रह् 9 P, समा-हृ 1 P, राशीकृ 8 U, पुंजीकृ.

HOARSE, *a.* रूक्ष, परुष, कर्कश; भग्न, सगद्गद. -LY, *adv.* रूक्षस्वरेण, स्वरभंगेन, सगद्गदं. -NESS, *s.* भंगः, भेदः, रूक्षता; स्वरभंगः-रूक्षता.

HOARY, *a.* सित, धवल, श्वेत, शुक्ल, गौर (री *f.*), शुभ्र. **2** पलित, पक्व-पलित-केश.

HOAX, *s.* वंचनं-ना, प्रतारणं-णा, छलं, कपटं, विप्रलंभः. -*v. t.* वंच् 10, प्र-तॄ c., विप्र-लभ् 1 A.

HOB, *s.* वृषलः, ग्राम्यः, जानपदः.

HOBBLE, *v. i.* *See* LIMP.

HOBBY, *s.* प्रियवस्तु-द्रव्यं, चिरकाम्यं; निर्बंधः, अभीष्टमनोरथः, लहरी, छंदः, अभिरुचि *f.*; 'h.-horse' क्रीडाश्वः, क्रीडाद्रव्यं, क्रीडनकं.

HOBGOBLIN, *s.* भूतः, पिशाचः, वेतालः, राक्षसः; *See* DEMON, DEVIL.

HOCUS-POCUS, *s.* मंत्रतंत्रं, कुहकः, इंद्रजालं.

HOD, *s.* लेपाधारः, सुधाभाजनं.

HODGE-PODGE, *s.* संकरः, सन्निपातः, नानाद्रव्यसमूहः, प्रकीर्णकं.

HOE, *s.* खनित्रं, अवदारणः, स्तंबघ्नः. -*v. t.* खनित्रेण खन् 1 P, भूमिं भिद् 7 P, अव-दॄ 10.

HOG, *s.* वराहः, किरिः, शू(सू)करः; *See* BOAR; 'village h.' विट्चरः, ग्राम्यः; 'h.-herd' शूकरपालः-पोषकः; 'h.-sty' शूकरस्थानं-वासः. -GISH, *a.* शूकरोपम, शूकरीय, वाराह (ही *f.*), सूकरगुणविशिष्ट.

HOGO, *s.* अति-तीक्ष्ण-स्वादः.

HOG-WEED, *s.* शोथघ्नी, पुनर्नवा, शोथजित् *f.*

HOIDEN, *s.* पुंश्चली, बंधकी, स्वैरिणी, प्रगल्भा.

HOIST, *v. t.* उन्नम् c. (नमयति), उद्गम् c., उच्छ्रि c., उद्यम् 1 A, उन्नी 1 P, उद्-धृ-हृ 1 P, उत्तुल् 10, उत्था c. (उत्थापयति).

HOLD, *v. t.* धृ 1 P, 10, अव-लंब् 1 A, आ-दा 3 A, ग्रह् 9 P, परामृश् 6 P, हस्तेन धृ or अवलंब्. **2** स्तंभ् 9 P, नि-अव-रुध् 7 U, बलाद् धृ. **3** (Possess) भृ 3 U, आ-धा 3 U; *See* HAVE. **4** (Contain) धृ, परिग्रह्, आ-धा, समाविश् c., भृ, आ-दा. **5** पा c. (पालयति), रक्ष् 1 P, न त्यज् 1 P. **6** (As a festival) अनुष्ठा 1 P, सेव् 1 A, पा c. (पालयति), कृ 8 U, सं-पद् c., निर्वह् c., वि-धा, यथाविधि कृ, अभिनंद् c. **7** मन् 4 A, गण् 10; *See* CONSIDER; 'I h. them of no account' का-कियती-मात्रा तेषां मत्पुरतः, तानहं तृणाय मन्ये or तृणीकरोमि; 'h. an opinion' मतं अवलंब् or आश्रि 1 U, मन्; 'h. one's tongue' जिह्वां धृ or रक्ष्; 'h. your tongue' वाचंयमो भव, वाचं नियच्छ, तूष्णीं-जोषं-आस्स्व; 'h. a meeting' सभां मिल् c. or समा-ह्वे 1 P; 'a meeting was held' परिषद् मिलिता; 'h. in esteem' बहु मन्; 'h. in contempt' अवगण्, अवमन्, तृणीकृ, तृणाय मन्; 'h. a council' सभां निमंत्र् 10 A or आह्वे; 'h. a consultation' संमंत्र्, मंत्रणां कृ; 'I h. you responsible for this act' अस्य त्वयोत्तरं दातव्यं. -*v. i.* स्था 1 P, स्थिरीभू, सं-स्था 1 A; चिरस्थायीभू, स्थायीभू. **2** अनुबंध् 9 P or pass.; सं-संज् pass., संलग्नीभू, आलंब् **1 A. 3** विरम् **1 P,** निवृत् **1 A (with abl.);**

आत्मानं संयम् 1 A or निग्रह्, परिहृ 1 P, त्यज्; 'hold, hold!' विरम विरम, मा मा एवं, मा तावत्. 4 अधीन a. भू, आश्रि, अव-आ-लंब्. 5 (As a rule) गम्, न व्यभिचर् 1 P; 'this rule h. s everywhere' सर्वगामी-अव्यभिचारी-अयं नियमः. -s. धरणं, धृति f., ग्रहः-हणं, अवलंबः-बनं; हस्तेन ग्रहणं-धरणं; 'letting go the h.' मुक्त-स्नस्त-हस्त, मुक्तग्रह. 2 कारा, कारागृहं, कारागारं, बंधनस्थानं, गुप्ति f. 3 आधारः, आ-अव-लंबः-बनं, उपस्तंभः, आश्रयः. 4 दुर्गं, कोटः. 5 मुष्टि m. f., वारंगः. 6 आस्पदं, पदं, अधिकारः, वशः-शं; 'red colour takes a firm h. on a white cloth' रागः शुक्लपटे स्थायीभवति (P. I. 1); 'had a h. on the mind of the people' स लोकस्य मन आददे (R. IV. 8); 'the advice took no h. on (her) mind' लेभेंतरं चेतसि नोपदेशः (R. VI. 66). -back, नि-वृ c., वार् 10, संहृ 1 P, निग्रह्, विक्लृप् 1 A, विचर् c.; *See* HESITATE. -forth, दृश् c., पुरो निधा. -in, निग्रह्, प्रतिसंहृ, नि-सं-यम्. -off, विलंब् 1 A, विक्लृप्. -on, प्रवृत् c., न विरम्, न मुच् 6 P, न त्यज्, उद्वह् 1 P, निर्वह् c. -out, प्रस्र c., वितन् 8 U, दीर्घीकृ. 2 दृश् c., उपन्यस् 4 U, उपक्षिप् 6 P, उप-स्था c. (स्थापयति); (*v. i.*) चिरं यावत्सह् 1 A or युध् 4 A or प्रतिकृ. -together, संबंध् pass., संश्लिष् 4 P, संलग् 1 P. -up, उन्नम् c. (नमयति), उद्यम्, उच्छ्रि 1 U or c., ऊर्ध्वीकृ. 2 उत्तंभ्, अवष्टंभ्, आ-अव-लंब्, भृ, धृ. -ER, *s.* धारकः, धारयितृ m., ग्राहकः, धरः-आधारः-in comp. -ING, *s.* धरणं, ग्रहणं, &c. -*a.* धारिन्, धर in comp.; oft. by हस्त in comp.; 'h. a sword' कृपाणपाणिः. -HOLDFAST, *s.* ग्राहकः, ग्रहणी, बंधनी, कुड्यः. 2 दृढ-बद्ध-मुष्टिः, अमुक्तहस्तः.

HOLE, *s.* विवरं, बिलं, छिद्रं, रंध्रं, सुशि(षि)रं, कुहरं, निर्व्यथनं, रोकं, वपा, सुषि f.; श्वभ्रं, गर्तः-र्ता, अवटः (in the ground). 2 कंदरः-रं-रा, गुहा, गह्वरं, दरी, खातं (of mountains). 3 (Of garments &c. or fig.) रंध्रं, छिद्रं; 'a rat digs a h. and a snake uses it' एकः परिश्रमं करोति, अन्यस्तत्फलमुपभुंक्ते; 'picking h. s (in the character &c.) of others' छिद्रान्वेषिन्, दोषैकदृश्, पुरोभागिन्, रंध्रानुसारिन्; 'full of h. s' अनेकरंध्र, बहुविवर.

HOLLOW, *a.* रिक्त-शून्य-गर्भ, अंतःशून्य, शून्यमध्य-उदर; उदराकृति, सुषिर, पुटाकार. 2 असार, निःसत्त्व, निःसार, फल्गु, शून्य. 3 मोघ, निरर्थक, निष्फल. 4 असत्य, वितथ, मिथ्या, in comp. 5 ग(गं)भीर, मंद्र, मंद. -*s.* (Of trees) कोटरः-रं, क्रोडः, निष्कुहः. 2 विवरं, गुहा, बिलं, कुहरं, अवटः; *See* HOLE. 3 गर्भः, उदरं, अभ्यंतरं, क्रोडं. 4 खातं, खातभूः, गर्तः-र्ता. 5 दरी, कंदरः, अद्रिद्रोणी, कंदरभूः. 6 कुल्या, प्रणाली; 'h. of the hand' पुटः, करपुटः-कोषः; 'h. of the navel' नाभिगर्ता, नाभ्यावर्तः; 'ground full of h. s' उत्खातिनी भूमिः (S. 1); 'natural h.' देवखातं; 'h. of the ear' ऋषभः; 'h. s in the buttocks' जघनकूपकौ, गर्तौ. -*v. t.* उत्खन् 1 P, पुटीकृ 8 U. -NESS, *s.* शून्यता, असारता, असत्यता, &c.

HOLY, *a.* पुण्य, पवित्र, परिपूत, साधु, शुचि, विमल; पुण्यात्मन्, शुचिव्रत, धार्मिक (की f.), धर्म-पुण्यशील, धर्मात्मन्, शुद्धमति; 'h. study' वेदाध्ययनं; 'h. wisdom' ब्रह्मज्ञानं; 'h. writing' श्रुतिः, वेदाः, निगमः; 'h. land' पुण्यभूमिः; 'h. place of pilgrimage' तीर्थं, क्षेत्रं, पुण्यस्थानं-तीर्थं. -LY, *adv.* पुण्यं, पवित्रतया, शुचिवत्. -NESS, *s.* पवित्रता, पुण्यता, शुचिता, वैमल्यं, पुण्यशीलता, धार्मिकत्वं; 'his or her h.' भगवान्, भगवती. -HOLIDAY, *s.* पुण्याहं, पुण्यदिनं. 2 अनध्यायः, अनध्यायदिवसः-महोत्सवः. 3 उत्सवः, पर्वन् n., उद्धर्षः, उत्सव-उद्धर्ष-दिनं; 'h. people' यात्राजनः.

HOMAGE, *s.* नमस्कारः, अभिवंदनं, प्रणामः, प्रणति f., पूजा, अर्चनं, उपासना, प्रणिपातः, सेवांजलिः; सेवा, आदरः, प्रभुभक्ति f.; 'pay or do h.' प्रणम् 1 P, वंद् 1 A, प्रणिपत् 1 P; *See* BOW.

HOME, *s.* गृहं, वासः, वासस्थानं-भूमि f., स्वगृहं, स्व-निज-गेहं-देशः-वासः-स्थानं-भवनं; *See* HOUSE; 'devoted to h.' गृहासक्तचित्त. -*adv.* गृहं, गृहं प्रति; 'the words went h. to his heart' तद्वचः तस्य हृदयमर्मास्पृशत्; 'touching h.' मर्मस्पृश्-भिद्; 'goes h. to me' मामेव लक्षीकरोति (S. 7); 'h.-born' गृहजात; 'h.-bound' गृहगामिन्; 'h.-bred' गृहज-जात, गृह्य; 'h.-made' गृहनिर्मित, गृहोत्पन्न; 'h.-sick' गृहविरहार्त; 'h.-stall,-stead' गृहं, वासः; वेश्मभूः, वास्तु m. n. -LESS, *a.* निरालय, निराश्रय, निर्गृह. -LY, *a.* गृह्य, गृहज. 2 ग्राम्य, ग्रामीण-य, अशिष्ट, प्राकृत, असभ्य, अश्लील, असंस्कृत. -*adv.* ग्राम्यवत्, असभ्यतया, अशिष्टप्रकारेण. -WARD, *adv.* गृहाभिमुखं, अभिगृहं.

HOMICIDE, *s.* नृहत्या, मनुष्यवधः. 2 (Person) मनुष्यघातिन् m., नृहंतृ m., मनुष्यघातकः. -AL, *a.* नृघातिन्.

HOMILY, *s.* धर्मवाक्यं.

HOMOGENEAL, HOMOGENEOUS, *a.* समानजातिजातीय, स-एक-जाति, सवर्ण, एक-स-धर्मन्, समानभाव, एक-स-जातीय; 'h. vowels' सवर्णाः.

HOMOLOGOUS, *a.* तुल्य-सम-परिमाण.

HOMONYM, *s.* भिन्नार्थः शब्दः; 'a collection of h. s' भिन्नार्थवर्गः. -OUS, *a.* भिन्नार्थ, अनेकार्थ.

HONE, *s.* शाणः, शाणाश्मन् m.

HONEST, *a.* शुचि, ऋजु, सरल, अमायिन्, दाक्षिण, अ-

कुटिल, अजिह्म, शुद्धमति-भाव, शुद्धात्मन्, अकपट, निष्कपट, निर्व्याज, निर्व्यलीक, अव्याज, विमलात्मन्, दंभहीन, न्याय्य, न्याय्याचार, सच्चरित, न्यायवर्तिन्, साधु-वृत्त-शील, साधु, प्रांजल, सत्यवृत्त, सत्यशील, सत्यवादिन्. 2 अवितथ, सत्य, अकृत्रिम, अकृतक; *See* FRANK also; 'h. gains' न्यायार्जितं; 'h. statement' निर्व्याजं वचनं. -LY, *adv.* सरलं, न्यायेन, न्यायतः, शुचितया, निष्कपटं, निर्व्याजं, अमायया, निर्व्यलीकं. -Y, *s.* शुचिता, आर्जवं, निष्कापट्यं, सारल्यं, अकौटिल्यं, दाक्षिण्यं, अमाया, अकपटं, अव्याजः, शुद्धभावः, वैमल्यं, निर्व्यलीकता, अजिह्मता, सत्यता, अकृतकता; 'h. is the best policy' भावशुद्धिः एव साधिष्ठा आचारसरणिः, सारल्यं सत्तमो मार्गः.

HONEY, *s.* मधु *n.*, क्षौद्रं, माक्षिकं, सारघं; 'h. of flowers' पुष्पासवं, पुष्परसः-सारः, कुसुममधु; 'h.-bee' मधुमक्षिका, सरघा; 'h.-comb' मधुकोशः, करंडः; 'h.-moon' आनंदमासः; 'h.-tongued' मधुरभाषिन्, मधुरवाच्. -*v. t.* मधुरीकृ 8 U. -*v. i.* उपलल् 10; *See* FAWN. -ED, *a.* मधुमधुर, सुधास्यंदिन्, मधुर.

HONOR, *v. t.* पूज् 10, अर्च् 1 P, 10, मन् c., संभू c., सत्कृ 8 U, पुरस्कृ, मह् 1 P, 10, आदृ 6 A. 2 सेव् 1 A, श्रु desid. (शुश्रूषते), आराध् c.; 'h. ed the invitation' निमंत्रणमाद्रियत, सगौरवं स्वीचकार. 3 अनुग्रह् 9 P, प्रसद् 1 P (with loc.). -*s.* मानः, संमानः, पूजा, अर्चनं, अर्हणा, संभावना, आदरः, सत्कारः. 2 सेवा, शुश्रूषा, आराधनं. 3 ख्याति *f.*, कीर्ति *f.*, यशस् *n.*, प्रतिष्ठा, गौरवं, प्रतिपत्ति *f.*, उत्कर्षः, उत्कृष्ट-प्रधान-पदं, उन्नति *f.*; कुलीनता, आभिजात्यं, प्राधान्यं, श्रेष्ठत्वं; 'your or his h.' अत्र-तत्र-भवान्; भवत्. -ABLE, *a.* पूज्य, मान्य, माननीय, पूजार्ह, आदरणीय. 2 सु-प्र-विख्यात, विश्रुत, सुप्रसिद्ध, प्रतिपत्तिमत्, महायशस्. 3 यशस्कर-कीर्तिकर (री *f.*), प्रतिष्ठावह, श्लाघ्य, प्रशस्य, मानद, गौरवान्वित. 4 कुलीन, अभिजात, महाकुल, उदारचित्त-चरित; *See* NOBLE. 5 शुचि, न्याय्याचार, सच्चरित, साधुवृत्त, पुण्यात्मन्, शुचिव्रत; *See* HONEST. -ARY, *a.* मानद, कीर्तिकर, यशस्कर, प्रशस्य. 2 अलाभकर, मानमात्रदायिन्. -HONORABLY, *adv.* समानं, सगौरवं, श्लाघ्यप्रकारेण, प्रशंसापूर्वं, सुयशसा, प्रतिष्ठापूर्वं. 2 शुचिवत्, धार्मिकतया, ऋजुतया, सरलतया, न्यायतः.

HOOD, *s.* फणा-णः, फटा, स्फोटा; 'expands the h.' फणां कुरुते (S. 6); 'expanded h.' भोगः. 2 फणाकृति शिरस्कं. -*v. t.* शिरस्त्राणेन पिधा 3 U or प्रावृ 5 U.

HOODWINK, *v. t.* (नयने) वस्त्रेण पिधा 3 U or आच्छद् 10 or आवृ 5 U.

HOOF, *s.* खुरः, शफः-फं, क्षुरः, विखः, निघृष्वः. -ED, *a.* खुरिन्, खुरयुक्त, शफयुक्त.

HOOK, *s.* आकर्षणी, ग्रहणी, धरणी; 'fish-h.' बडिशं-शा-शी, मत्स्यवेधनी; 'h. for elephants' अंकुशः, शृ(सृ)णि *f.* -*v. t.* बडिशेन धृ 1 P or ग्रह् 9 P. -ED, *a.* वक्र, कुटिल, कुंचित, अंकुशाकार, जिह्म; *See* CROOKED.

HOOP, *s.* चक्रं, वलयः-यं. 2 क्रीडाचक्रं. -*v. t.* लोहवलयैः युज् 10. 2 उच्चैः घुष् 10.

HOOT, *s.* घु(घू)त्कारः. 2 धिक्कारः, उच्चैः अप्रशंसासूचनं, दीर्घघोषः. -*v. i.* घूत्काररवं कृ 8 U, उच्चैः आरट् 1 P or घुष् 10, दीर्घं रु 2 P; 'h. at' उच्चैः अवज्ञां-धिक्कारं-सूच् 10.

HOP, *v. i.* प्लु 1 A, वल्ग् 1 U, एकपादेन नृत् 4 P. -*s.* प्लुतं, वल्गितं, प्लवः, एकपादेन नृत्यं.

HOPE, *v. t.* आशंस् 1 A, उत्-प्रति-अप-ईक्ष् 1 A, स्पृह् 10, प्रत्याकांक्ष् 1 P, वांछ् 1 P, आशां धृ or वह् 1 P; in implied questions, gen. ex. by अपि, कच्चित् or अपि नाम; 'I h. this lotus-leaf breeze pleases you' अपि सुखायते ते नलिनीपत्रवातः (S. 3); अपि नाम रामभद्रः पुनरपीदं वनमलंकुर्यात् (U. 2), कच्चिन्मृगीणामनघा प्रसूतिः (R. v. 7); 'I h. not' न खलु; न खलु तामभिक्रुद्धो गुरुः (V. 3) 'I h. the preceptor did not get angry with her'; 'I scarcely h. ed to see you here' न खलु मे आसीदाशंसा यदत्र भवंतं प्रेक्षिष्ये. -*s.* आशा, प्रत्याशा, आशंसा, आकांक्षा, अपेक्षा, प्रतीक्षा, उदीक्षणं; स्पृहा, मनोरथः, वांछा, इच्छा, आशाबंधः. 2 (Giving h.) आश्वासनं, आश्वासः; 'having h. s fulfilled' पूर्णाशः; 'a vain h.' वृथाभिलाषः, मोघाशा; 'h.-ing against h.' अतीव दूरापेतं. -FUL, *a.* आशान्वित, आशावत्, आशायुक्त, आशाबद्ध, स्पृहयालु, अपेक्षिन्, सप्रत्याश, आशाविष्ट. 2 (Giving hopes) आशाजनन (नी *f.*), आशाकारिन्. -FULLY, *adv.* साशंसं, सप्रत्याशं. -LESS, *a.* निराश, आशातीत, आशाहीन, हताश, त्यक्ताश, निरपेक्ष. -LESSLY, *adv.* नैराश्यात्, सनैराश्यं.

HORAL, HORARY, *a.* मौहूर्तिक (की *f.*).

HORDE, *s.* महान् गणः, बृहत्संघः, महौघः, स्तोमः ; *See* MULTITUDE.

HORIZON, *s.* क्षितिजं, दिङ्मंडलं, दिक्चक्रं, अंबरांतः; चक्रं, मंडलं; 'the eastern h.' प्राची-ऐंद्री-दिक्, प्राचीमूलं. —HORIZONTAL, *a.* सम, दिगंतसम, अनुप्रस्थ; 'h. plane' समभूभागः, समा भूमिः. -LY, *adv.* समं, अनुप्रस्थं.

HORN, *s.* शृंगं, विषाणः-णं, कूणिका; 'h. of a buffalo' गवलं. 2 काहलः-ला, शंखः. 3 चंद्राग्रं, चंद्रशिखा. -ED, *a.* शृंगिन्, विषाणिन्, शृंगयुक्त-विशिष्ट. 2 शृंगाकार, शृंगाकृति. -Y, *a.* शार्ङ्ग (र्ङ्गी *f.*). 2 कठिन; *See* HARD.

HORNET, *s.* वरटा, बृहद्दंशः.

HOROLOGUE, *s.* घटी, कालमापनयंत्रं.

HOROSCOPE, *s.* जन्मपत्रिका, जन्मपत्रं, जन्मयोगपत्रं.

HORROR, *s.* त्रासः, संत्रासः, साध्वसं, भयकंपः, भयसंहर्षः. 2 बीभत्सता, रौद्रता, घोरता, भैरवं, भयानकं, भीष्मं, भीषणं. —HORRIFIC, *a.* भीषण, उग्र, भयानक, भयावह. —HORRID, HORRIBLE, *a.* घोर, दारुण, भीम, भयानक, उग्र, भीषण, कराल, विकट; *See* FEARFUL. —LY, *adv.* घोरं, दारुणं, रौद्रं, उग्रतया; बीभत्सतया. —HORRIFY, *v. t.* Frighten, q. v. —ED, *a.* साध्वसोपहत, भीत, संत्रस्त, भयसंहृष्ट.

HORRIPILATE, *v. t.* पुलकयति-कंटकयति-रोमांचयति (D.), रोमाणि उद्गम् c. or उद्-हृष् c. —ED, *a.* पुलकित, कंटकित, सपुलक, रोमांचित. —ION, *s.* पुलकः, रोमांचः, रोमहर्षः-र्षणं, रोमोद्गमः-ग्रतत्वं, पुलकोद्भेदः, उद्धर्षणं.

HORSE, *s.* अश्वः, तुरगः, तुरंगः-गमः, हयः, सप्तिः, वाजिन् *m.*, वाहः, अर्वन् *m.*, घोटकः, वीतिः, गंधर्वः, सैंधवः; 'a well-bred h.' आजानेयः, कुलीनः, भूमिरक्षकः, सिंधुवारः; 'a well-trained h.' साधुवाही, विनीतः; 'a white h.' कर्कः; 'a bay h.' उकनाहः, कियाहः; 'a fleet h.' जवनः, जवाधिकः; 'a pack-h.' पृष्ठ्यः, स्थौरी, स्थोरी; 'a h. for a sacrifice' ययुः, अश्वमेधीयः; 'a chariot-h.' रथ्यः; 'h.'s pace' गतिः, धारा; (namely) आस्कंदितं 'full gallop'; धो(धौ)रितकं, धोरितं 'trot or ambling'; रेचितं 'cantering'; वल्गितं 'vaulting'; प्लुतं 'bounding or capering'; 'his nose' घोणा, प्रोथः-थं; 'tail hair' बालधिः, बालहस्तः; 'his tail' पुच्छः-च्छं, लूमं, लांगूलं; 'a number of h.'s आश्वं, अश्वीयं; 'relating to a h.' अश्वीय, आश्विक (की *f.*); 'h.-soldiers' आश्वं, आश्विकं, अश्वारोहगणः; 'h.-back' अश्वपृष्ठं; 'go on h.-back' अश्वेन गम् or चर् 1 P; 'going on h.-back' तुरंगयायिन्, सादिन्; 'h.-bean' मुद्गः, माषः, शिंबा; 'h.-breaking' अश्वशिक्षा-दमनं-विनयः; 'h.-breaker' अश्वविनेता-शिक्षकः; 'h.-dealer' अश्वव्यापारी, हयज्ञः; 'h.-driving' अश्वसारथ्यं, रथवाहनकौशलं; 'h.-laugh' अट्टहासः, अतिहासः, अतिहसितं, आच्छुरितं; 'h.-man' अश्वारोहः, तुरंगस्थः, सादिन् *m.*, तुरगी, हयारूढः, अश्वारूढः; 'h.-manship' अश्वारोहणकौशलं-विद्या, अश्वविद्या, अश्वहृदयं; 'h.-shoe' अश्वपादत्रं; 'h.-trappings' आदानं, अश्वपरिष्टोमः, अश्वास्तरणं; 'h.-whip' कशा, अश्वताडनी, प्रतिष्कषः-शः, चर्मदंडः; (*v. t.*) कशया तड् 10 or प्र-हृ 1 P.

HORTICULTURE, *s.* उद्यानविद्या, उद्यानपालनं. —IST, *s.* उद्यानविद्याज्ञः.

HOSE, *s.* और्णं पादत्राणं. —HOSIER, *s.* और्णपादत्रविक्रयिन् *m.*

HOSPITABLE, *a.* आतिथेय (यी *f.*), सत्कारशील, अतिथिपूजक, आतिथ्यकारिन्. —HOSPITABLY, *adv.* सादरं, सप्रश्रयं, सबहुमानं, आतिथेयसत्कारेण, सत्कार-आतिथ्य-पूर्वं; 'to receive h.' सत्कृ 8 U, पूज् 10, सं-भू c.

HOSPITAL, *s.* आतुरशाला, रुग्णागारं, आरोग्यचिकित्सा-शाला, रुजोपायशाला.

HOSPITALITY, *s.* आतिथ्यं, आतिथ्यकर्मन् *n.*, अतिथिसत्कारः-पूजा-सेवा-क्रिया; सत्कारः, सत्क्रिया, सत्कृति *f.*, उपचारः, पूजा, सेवनं.

HOST, *s.* गणः, संघः, समूहः, ओघः, निवहः; *See* MULTITUDE. 2 चमूः, सेना, अनीकं, वरूथिनी. 3 गृहिन् *m.*, भोजनदायिन् *m.*, निमंत्रणकृत्, निमंत्रकः, आतिथ्यकृत्. —AGE, *s.* विश्वासस्थानं, शरीरबंधकः; 'retaining 4 hares as h. s' चतुरः शशकान् विश्वासस्थाने धृत्वा (P. I. 8). —ESS, *s.* गृहिणी, भोजनदात्री, आतिथ्यकारिणी.

HOSTEL, HOSTELRY, *s.* पथिकाश्रमः, उत्तरण-गृहं-शाला.

HOSTILE, *a.* विपक्ष, विरुद्ध, वैरिन् प्रत्यर्थिन्, प्रतिकूल, विपरीत, विद्वेषिन्, अहित, प्रतिरोधिन्; 'a h. invasion' शत्रुविग्रहः, शत्रुयानं; 'to be h.' विरुध् 7 U, द्विष् 2 U; पर्यव-स्था 1 A, प्रतिकूलयति-वैरायते (D.), विपक्षी-प्रत्यर्थी-भू. —LY, *adv.* शत्रुवत्, विपक्षवत्. —ITY, *s.* विपक्षता, वैरं, शत्रुता, वैरभावः, विरोधः, प्रतिद्वंद्वं, विद्वेषः; 'in a state of constant h.' सदाबद्धवैर *a.*; 'natural h.' स्वभाव-जाति-वैरं, शाश्वतिकः विरोधः. 2 विग्रहः, युद्धं, संग्रामः, युद्धभावः.

HOSTLER, *s.* अश्वपालकः.

HOT, *a.* उष्ण, आतपाक्रांत, आतपवत्, तप्त, सं-उत्-तप्त, सोष्ण; प्रखर, उग्र, तिग्म, चंड, खर, तीव्र, तीक्ष्ण. 2 ग्रीष्म, नैदाघ (घी *f.*), घर्म in comp. 3 शीघ्रसुलभ-कोपिन्, क्रोधिन्, संरंभिन्. 4 साहसिन्, तीक्ष्णकर्मन्; 'h. weather or season' ग्रीष्मः, निदाघः, घर्म-ग्रीष्म-उष्ण-कालः; 'to make h.' तप् c.; 'to be h.' तप् 1 P, 4 A, उष्णीभू; 'h.-bed' उष्णस्थलं, (fig.) क्षेत्रं ; 'h.-blooded or -headed' चंडप्रकृति-शील, संरंभिन्, शीघ्रकोपिन्, उत्तप्त, उचंड, तीक्ष्णकर्मन्, साहसिक, साहसिन्. —LY, *adv.* तीक्ष्णं, तीव्रं, उच्चंडं, उग्रं, उष्णं; सोत्तापं; व्यग्रं, सोत्साहं, सोत्कटं. —NESS, *s.* उष्णता, तापः, प्रखरता, उग्रता, चंडता, तिग्मता, औष्म्यं, निदाघः, घर्मता. 2 उत्तापः, तीक्ष्णता, संरंभः, व्यग्रता; 'h. of temper' शीघ्रकोपित्वं, चंडता.

HOTEL, *s.* पथिकाश्रमः, भोजनगृहं.

HOTSPUR, *s.* संरंभिन् *m.*, साहसिकः.

HOUGH, *s.* जंघास्थिशिरा.

HOUND, *s.* विश्वकद्रुः, मृगदंशकः, आखेटिकः, मृगयाकुक्कुरः.

HOUR, *s.* घटी, घटिका, नाडिका; 'h.-drum'

नाडिकाविच्छेदघटहः. 2 (H.s) कालः; 'at all h. s' सदा, सर्वदा; 'in an evil h.' अशुभे लग्ने-मुहूर्ते; 'an h. and a half' अर्धयामः. -LY, *a.* प्रतिघटिकं *adv.*

HOURI, *s.* दिव्यांगना, स्वर्गकन्या, दिव्ययोषित्.

HOUSE, *s.* गृहं, गेहं, अ(आ)गारं, सदनं, वेश्मन्-सद्मन् *n.*, निकेतनं, मंदिरं, वासः, आ-नि-वासः, भवनं, आयतनं, नि-आ-लयः, ओकस्-धामन् *n.*, वसति *f.*, निवासस्थानं, आवसथः, उदवसितं, निकाय्यः, निशांतं, व(प)स्त्यं; 'body of a h.' गर्भागारं, वासगृहं. 2 कुलं, अन्वयः, वंशः. 3 गृहजनः, कुटुंबं, परिवारः; 'h.-breaker' कुड्यच्छेदिन् *m.*, भित्ति-संधि-चौरः, कपाटघ्नः, गृहभेदकः; 'h.-dog' गृहकुक्कुरः; 'h.-door' गृहद्वारं; 'h.-hold' परिवारः, कुटुंब-बकं, परिजनः, गृहपरिजनः-परिवारः; (*a.*) गृह्य, ex. by गृह in comp.; 'h.-hold duties' गृहकार्याणि, गृहाचाराः; 'h.-hold gods' कुलदेवताः; 'h.-holder' गृहिन् *m.*, गृहस्थः, गृहपतिः, गृहमेधी, कुटुंबी, गेही; 'h.-hold stuff' गृहोपस्कारः, गृहसामग्री; 'h.-keeper' गृहस्वामिन् *m.*, गृही, गृहाधिकारी, कुटुंबी; 'a female h.-keeper' गृहिणी, कुटुंबिनी; 'h.-keeping' गृहव्यापारः-कार्य-कर्म; 'h.-maid' दासी, गृहदासी-मार्जनी; 'h.-room' वासस्थानं, वेश्म; 'h.-warming' गृहप्रवेशः; 'h.-wife' गृहिणी, गेहिनी, गृहकार्यकुशला-दक्षा, गृहमेधिनी; 'h.-wifery' गृहकार्यकुशलता-नैपुण्यं, गृहकर्मानुष्ठानं, परिमितव्ययः. -LESS, *a.* गृहहीन-शून्य, निरालय, अशरण, निराश्रय, निर्गृह.

HOUSING, *s.* परिस्तो(स्तो)मः, सज्जा, कल्पना, कुथः, आस्तरः, प्रसाधनं.

HOVEL, *s.* उटजः-जं, कुटीरः, कुटी, पर्णशाला, तृणकुटी.

HOVER, *v. i.* परितः विसृप् 1 P or डी 1 A, आकाशे व्यावृत् 1 A or विसृप् or विचल् 1 P, परिभ्रम् 1, 4 P; 'h. about' मंडले चर् 1 P, (दीपस्योपरि मंडले चरति Mr. 3); मंडलाकारेण भ्रम्. 2 (fig.) विशंक् 1 A, विकृप् 1 A, विचर् c. -ING, *s.* परिभ्रमणं, मंडलावृत्ति *f.*

HOW, *adv.* कथं, केन प्रकारेण-रूपेण. 2 कियत् (in 'how long,' 'how far'); 'h. much' कियत्; 'h. many' कति (pl.); 'h. long' कियच्चिरं, कियंतं कालं; 'h. many kinds' कतिविधाः; 'h. many times' कतिकृत्वः; 'h. now' ननु, ननु भोः; 'h. far' कियद्दूरं, कियदवधि; 'h. much more–less' किमुत, किं पुनः, किमु; 'h. else' अथ किं; with *adj.* ex. by अहो; 'h. pleasing' अहो मधुरं; अहो पापं, &c.

HOWDAH, *s.* वरंडकः.

HOWEVER, HOWSOEVER, *adv.* यथातथा, येनकेन प्रकारेण; (with *adj.*) by अपि, or by नाम with imp. of verb; 'h. industrious a man may be' दीर्घव्यवसायोपि नरः, करोतु नाम व्यवसायं नरः (H. 2). -*conj.* (Howbeit) किंतु, अपि तु, तु, परंतु, तथापि, पुनः.

HOWL, *v. i.* आक्रंद् 1 P, उत्क्रुश् 1 P, उच्चैः रस्-रट् 1 P, गर्ज् 1 P, दीर्घं वि-रु 2 P, रै 1 P. -*s.*, -ING, *s.* उत्क्रोशः-शनं, आक्रंदनं, दीर्घरुतं, आरटनं, र(रा)वः, दीर्घरवः, गर्जनं, रसितं; 'h. of dogs' भषणं, बुक्कनं, रायणं.

HUB, *s.* नाभि *f.* 2 त्सरुः. 3 लक्ष्यं, शरव्यं.

HUBBUB, *s.* कोलाहलः, कलकलः, तुमुलं, तुमुलरवः-नादः, संकीर्णनादः.

HUCKLEBONE, *s.* श्रोण्यस्थि *n.*

HUCKSTER, *s.* क्षुद्रपण्यविक्रयिन्-विक्रेतृ *m.* -*v. i.* क्षुद्रपण्यानि वि-क्री 9 A.

HUDDLE, *v. t.* पिंडीकृ 8 U, सं-कॄ 6 P, संमिश्र् 10, संकुलीकृ, संपिंडयति (D.). 2 संक्षुभ् c.; ससंभ्रमं वि-धा 3 U or कृ. -*v. i.* संकुलीभू 1 P, संमिश्री-संकरी-भू, संकॄ pass., पिंडीभू. -*s.* संकुलं, संकरः, संक्षोभः, संकीर्णता.

HUE, *s.* रागः, रंगः, वर्णः, छाया, छवि *f.* 2 आक्रोशः; 'h. and cry' कलकलः, कोलाहलः, जनरवः, संहूति *f.*

HUFF, *v. t.* विस्तृ c., श्वि c., वृध् c. 2 सदर्पं निर्भर्त्स् or तर्ज् 10 A. -*v. i.* श्वि 1 P, स्फाय् 1 A, वृध् 1 A. 2 दृप् 4 P, विकत्थ् 1 A, प्रगल्भ् 1 A. -*s.* कोपः, रोषः, संरंभः; *See* ANGER. 2 दर्पः, औद्धत्यं, निर्भर्त्सनं. 3 उद्धतः, दर्पाध्मातः, दांभिकः, विकत्थनः. -ER, *s.* दांभिकः, शूरंमन्यः, विकत्थनः. -ISH, *a.* Angry, Arrogant, q. v.

HUG, *v. t.* आलिंग् 1 P, आ-सं-श्लिष् 4 P, परिष्वंज् 1 A, बाहुभ्यां पीड् 10; *See* CLASP. -*s.* आश्लेषः, परिष्वंगः, आलिंगनं, उपगूहनं.

HUGE, *a.* महत्, बृहत्, स्थूल, विशाल, विपुल, गुरु, बृहत्परिमाण, अतिमहत्-बृहत्. 2 (In body) स्थूलकाय-देह, बृहच्छरीर, महाकाय, विपुलांग (गी *f.*). -LY, *adv.* अतिमहत्, अत्यंतं, अतिमात्रं. -NESS, *s.* अतिबृहत्त्वं, स्थूलता, विशालता.

HULK, *s.* जीर्णनौका.

HULL, *s.* (पोतस्य) स्थूलभागः. 2 पुटः-टं, कोशः-षः, त्वच् *f.*, आवेष्टनं, तुषः (of grain).

HUM, *v. i.* गुंज् 1 P, वि,-रु 2 P, हुंकृ 8 U, अस्पष्टं निस्वन् 1 P or ध्वन् 1 P. -*s.*, -MING, *s.* गुंजनं, गुंजितं, कलरवः-स्वरः, वि,-रुतं-रावः, झंकारः, हुंकारः, हुंकृतं, अस्पष्टध्वनिः-निस्वनः-नादः, कलकलः.

HUMAN, *a.* मानुष (षी *f.*), पौरुषेय (यी *f.*), मनुष्यजातीय, मानवीय-न; gen. ex. by मनुष्य or नर in comp.; 'in h. accents' मनुष्यवाचा; 'uttered h. accents' मानुषीं गिरमुदीरयामास; 'h.

nature' मानुष्यकं, पुरुषत्वं, नरस्वभावः; 'h. form' मानुषी तनुः, नररूपं; 'a h. brute' नरपशुः; 'h. kind' मनुष्य-नृ-जाति *f.*, मनुष्यवर्गः. –IZE, *v. t.* वि-नी 1 P, शिष्टाचारं-सभ्यरीतिं शिक्ष् c. or शास् 2 P. –LY, *adv.* नरवत्, मानुषप्रकारेण. —HUMANE, *a.* दयालु, कृपालु, सदय, परहितकाम, परोपकारशील, अनुकंपिन्, करुणा-दया-शील, दयावत्, करुणार्द्र, दयार्द्र, परहितैषिन्, आपन्न-दीन-अनुकंपिन्; *See* KIND. –ITY, *s.* दया, करुणा, कृपा, दयालुता, आपन्नानुकंपा, दीनवात्सल्यं, दयाशीलता, परहितेच्छा. 2 मानुष्य-ष्यकं, मनुष्यता, मानुषता, मानवत्वं. 3 मनुष्याः, मनुष्यवर्गः-जातिः. –LY, *adv.* सदयं, सकरुणं, परहितेच्छया, सानुकंपं.

HUMBLE, *a.* नीच, अपकृष्ट, अधम. 2 क्षुद्र, अल्पमति. 3 (In good sense) नम्र, विनीत, निरभिमान, विनत, सविनय, निरहंकार, अनुद्धत, दर्प-गर्व-अभिमान-हीन-रहित, नम्रचेतस्, विनयिन्, विनयशील-वृत्ति. 4 निःस्व, दरिद्र, दीन, दुर्गत, निर्धन, आपन्न; 'in h. days' आपत्समये, दरिद्रावस्थायां, आपदि; 'the friends of h. days' आपत्कालीनमित्राणि; 'to eat h. pie' मानं पृष्ठे कृ 8 U. –*v. t.* अव-नम् c. (नमयति), प्रह्वयति (D.), (सपदि विनयः प्रह्वयति मां U. 6) ; अभि-परा-भू 1 P, दर्प-गर्व-भंज् 7 P or हृ 1 P, नि-अव-पत् c., अप-कृष् 1 P, नम्रीकृ; 'thus completely h. ing the kings' इति राज्ञां शिरसि वामपादमाधाय (R. VII. 70); 'h.-bee' भ्रमरः; *See* BEE. –ED, *a.* अभिभूत, भग्नदर्प, आत्तगर्व-गंध, हतगर्व ; आनत, नम्रीकृत, पातित, अपकृष्ट. –ING, *s.* दर्प-मान-भंगः, अभिभवः. –NESS, *s.* नीचता, अपकृष्टता, क्षुद्रता. 2 विनयः, नम्रता, अनहंकारः, अनभिमानः, अगर्वः, निरभिमानता, नम्रशीलता. –HUMBLY, *adv.* नीचैः, क्षुद्रतया, कृपणं. 2 सविनयं, नम्रतया, नम्रं, निरभिमानं, गर्वं विना, अनुद्धतं, नम्रचेतसा.

HUMBUG, *v. t.* प्रतॄ c., वंच् 10; *See* CHEAT. –*s.* प्रतारणं-णा, वंचना, कपटः-टं, छलं.

HUMDRUM, *a.* विरस, जड, मंद, फल्गु. –*s.* मूढः, स्थूलधीः.

HUMERUS, *s.* प्रगंडः.

HUMID, *a.* आर्द्र, क्लिन्न, उन्न, सरस, तिमित. –ITY, *s.* आर्द्रता, क्लेदः, तेमः, सरसता.

HUMILIATE, *v. t.* गर्वं हृ 1 P or भंज् 7 P, अभिभू 1 P, अपकृष् 1 P; *See* HUMBLE. –ING, *a.* दर्प-मान-हर. –ION, *s.* गर्व-दर्प-भंगः, अवमानना, मान-भंगः-हानि *f.*, अभिभवः, अपकर्षः; दमनं; नियमनं.

HUMILITY, *s.* विनयः, शालीनता, अगर्वः, अदर्पः, नम्रता, अनभिमानः, अनहंकारः, अनौद्धत्यं.

HUMOUR, *s.* भावः, वृत्ति *f.*, मनोवृत्तिः, स्वभावः, शीलः-लं, प्रकृति *f.* ; 'good h.' सद्भावः, सुशीलता, सौजन्यं; 'bad h.' वक्रभावः, दुःशीलं; 'joyous h.' आनंदवृत्तिः. 2 छंदः, छंदस् *n.*, मनोलौल्यं, बुद्धिचापल्यं, लहरी, चित्ततरंगः, चापलं. 3 क्लेदः, तेमः, आर्द्रता; स्नेहः, जलावसेकः. 4 रसः, जलं, धातुः (of the body); 'disorder of the three h. s' दोषत्रयं, त्रिदोषं. 5 वैदग्ध्यं, रसिकता, रसः, सारस्यं, वैचित्र्यं. –*v. t.* (a person) चित्तवृत्तिं अनुवृत् 1 A, (अहं तावत्स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये S. 2), छंदेन or छंदः(दं)अनुवृत्, भावं अनुरुध् 4 A or अनुप्र-विश् 6 P; (inclinations) अनुवृत्, अनुरुध्, अनुप्र-विश्. 2 अनुरंज् c., संतुष् c., आराध् c., प्र-सद् c., भज् 1 U, उपलल् 10, उपच्छंद् 10. –ING, *s.* अनुवर्तनं, अनुरोधः, छंदोनुवृत्तिः, भावानुप्रवेशः. –IST, *s.* वैहासिकः, हासकरः, विदूषकः, भंडः, परिहासशीलः, नर्मसचिवः. 2 रसज्ञः. –OUS, *a.* हासकर (री *f.*), परिहासवत्, विनोदिन्, सरस, रसवत्, रसिक, हास्य, परिहासशील; विनोदनशील; oft. by परिहास or नर्म in comp.; 'a h. speech' परिहासः, परिहासजल्पितं, नर्मालापः, नर्मभाषितं. –OUSLY, *adv.* सरसं, विनोदार्थं, परिहासपूर्वं. –SOME, *a.* वक्रभाव-शील, दुःशील, दुष्प्रकृति. 2 चलचित्त, लोलमति, चलप्रकृति-भाव; *See* FICKLE.

HUMP, *s.* ककुद् *f.*, ककुदः-दं (fig. also), अंसकटः (of bulls); गडुः, स्थगुः; 'having a h.' ककुद्मत्, ककुद्मिन्; 'h.-backed' कुब्ज, गडुल-र, कुब्जक, वक्रपृष्ठ, न्युब्ज.

HUNCH, *s.* गडुः. 2 पिंडः. –*v. t.* अरत्निना तड् 10 or प्रहृ 1 P; 'h.-backed' Hump-backed, q. v.

HUNDRED, *a.* शतं; शतसंख्यक; 'by h. s' शतशः; 'in h. ways' शतधा; 'h.-fold' शतगुण *a.*; 'the life of man extends to h. years' शतायुर्वै पुरुषः. –*s.* शतं. –TH, *s.* शततम (मी *f.*).

HUNGER, *s.* क्षुधा, क्षुध् *f.*, बुभुक्षा, जिघत्सा, अशनाया, अशनायितं; 'h.-starved' क्षुत्क्षाम, क्षुधावसन्न. –*v. i.* क्षुध् 4 P (with dat.), भुज् desid. (बुभुक्षति-ते). 2 Long, q. v. –HUNGRY, *a.* क्षुधित, क्षुधार्त, क्षुधार्दित, क्षुत्पीडित, क्षुधातुर, जिघत्सु, बुभुक्षु, क्षुधाव्याकुल, बुभुक्षित, अन्नार्थिन्, अशनायित; 'h. and thirsty' क्षुत्पिपासित. 2 अवसन्न, क्षीण, क्षाम, कृश.

HUNKS, *s.* *See* MISER.

HUNT, *v.* मृग् 10 A, मृगयां कृ 8 U, (मृगयायां) अनुधाव् 1 P, अनुसृ 1 P, अनुवृत् 1 A, अनुबंध् 9 P. 2 अन्विष् 4 P, निरूप् 10. –*s.*,–ING, *s.* मृगया, आखेटः, मृगव्यं, आच्छोदनं, पापर्द्धि *f.* 2 अनुसरणं, अन्वेषणं, मार्गणं, अनुधावनं; लाभेच्छा, लिप्सा; 'h.-dress' मृगयावेषः; 'h.-dog' विश्वकद्रुः, मृगयाकुक्कुरः. –ER, HUNTSMAN, *s.* व्याधः, लुब्धकः, मृगयुः, आखेटकः, मृगवधाजीवः; जीवांतकः, शाकुनिकः (of birds); वागुरिकः, जालिकः (with nets).

HURDLE, *s.* काष्ठावरणं.

HURL, *v. t.* (तरसा-सवेगं) क्षिप् 6 P, वि-सृज्-मुच् 6 P,

NEGATIVE, *a.* अस्वीकारार्थक, निषेधार्थक, नास्तिगर्भ, निषेधद्योतिन्. 2 अभावरूप, अकरणरूप, अभावात्मक ; ' n. quantity ' क्षयराशिः. -*s.* नञ्, निषेधार्थक-अस्वीकारार्थक-शब्दः. 2 नास्ति-अभाव-पक्षः, निषेधवाक्यं; ' two n. s make one affirmative ' द्वौ नञौ प्रकृतार्थं गमयतः ; ' to reply in the n. ' नेति वद् 1 P. -*v. t.* नि-प्रति-षिध् 1 P, प्रत्यादिश् 6 P, प्रत्या-ख्या 2 P, निरस् 4 U, अपलप् 1 P ; *See* CONFUTE, REJECT. -LY, *adv.* नेति, नास्तीति, सनिषेधं, अस्वीकारेण. -NEGATION, *s.* प्रत्याख्यानं, प्रत्यादेशः,निषेधः, अस्वीकारः, अपलापः. 2 अभावः.

NEGLECT, *v. t.* उपेक्ष् 1 A, न अनुष्ठा 1 P or आचर् 1 P, वि-स्मृ 1 P, प्र-मद् 4 P (with abl.), न अव-धा 3 U or श्रु 5 P (words); प्रमादतः त्यज् 1 P; ' n. ed his duty ' स्वाधिकारात्प्रमत्तः (Mc. 1). 2 अतिचर्, अतिवृत् 1 A, अति-व्यति-क्रम् 1 U, 4 P, उत्-,लंघ् 1 A, 10 ; त्यज्, हा 3 P, अपास् 4 U. 3 अव-ज्ञा 9 U, अव-मन् 4 A, अवगण् 10, अव-धीर् 10, तिरस्कृ 8 U, न गण् or आदृ 6 A; *See* CONTEMN. -*s.*,-NEGLIGENCE, *s.* उपेक्षा, अनपे(वे)-क्षा, प्रमादः, अनवधानं, विस्मरणं, असावधानत्वं. 2 त्यागः, अननुष्ठानं, लोपः, अति-व्यति-क्रमः, अतिपातः, लंघनं, उपात्ययः, उत्सर्जनं. 3 अवज्ञा, अवमानः, अनादरः, अवधीरणं-णा. -FUL,-NEGLIGENT, *a.* उपेक्षक, मंदादर, निरपेक्ष, अनवधान, प्रमत्त, अनवहित, असावधान, प्रमादिन्. -FULLY, *adv.* सोपेक्षं, निरपेक्षं, उपेक्षया, मंदादरं, अनवहितं, असावधानं, प्रमादतः, प्रमादेन, सप्रमादं, प्रमत्तवत्, असमीक्ष्य.

NEGOTIATE, *v. i.* व्यवहृ 1 P, पण् 1 A. 2 संधये संवद् 1 P. -*v. t.* संविं-धा 3 U, व्यवहारेण सं-धा. 2 वि-क्री 9 A. -ION, *s.* पणनं, व्यवहारः. 2 संधिक्रमः, सामन् *n.*, शमनं, मध्यस्थाश्रयः. -OR, *s.* व्यवहारिन् *m.*, पणिकः, व्यवहर्तृ *m.* 2 मध्यस्थः, संधि-साम-विद्, सामकुशलः.

NEGRO, *s.* श्यामदेहः, कृष्णांगः.

NEIGH, *v. i.* हेष्-ह्रेष्-रेष् 1 A. -*s.*,-ING, *s.* हे-(ह्रे)षा, हेषारवः, हेषितं, अश्वनादः-स्वनः.

NEIGHBOUR, *s.* प्रतिवेशिन् *m.*, प्रतिवेशः-श्यः, प्रतिवासी, प्रातिवेशिकः, निकट-समीप-स्थः-वर्ती-वासी, सामंतः; ' next-door n. ' प्रातिवेश्यः, अनंतरवासी. -*a.* प्रतिवासिन्, समीपस्थ, &c. -*v. t.* निकटे स्था 1 P or वृत् 1 A or वस् 1 P; *See* BORDER. -HOOD, *s.* संनिधिः, उपकंठः, सांनिध्यं, सामीप्यं, संनिकर्षः, उपांतः-तं, नैकट्यं, अभ्यासः. 2 समीप-संनिहित-देशः, सामंतं, प्रतिवेशः, अधिवासः. 3 समीप-निकट-वासिनः, प्रातिवेश्याः, प्रतिवासिनः, (pl.). -ING, *a.* समीप-निकट-वर्तिन्, समीप-निकट-स्थ, सामंत, संनिहित, उपांत, आसन्न; *See* NEAR. -LY, *a.* प्रतिवासयोग्य; उपकारशील, हित.

NEITHER, (-NOR) *a.*, *conj.* न-नवा, नच-नच, (न च न परिचितो न चाप्यगम्यः M. 1), or simply न-न, (मा-मा, with Imperative). 2 एक, एकतर, अन्यतर with न, or by उभौ.

NEOGAMIST, *s.* नवोढः-ढा, नवभार्या, नवपतिः.

NEOLOGY, *s.* नूतनन्यायः-मतं. 2 नूतनशब्दाश्रयः. -IST. *s.* नूतनमताश्रयिन्, नूतनन्यायसेवी.

NEOPHYTE, *s.* नवशिष्यः-छात्रः, अनभ्यस्तः, प्राथमकल्पिकः, अपरिचितः.

NEPENTHE, *s.* दुःखशमनं.

NEPHEW, *s.* भ्रात्रीयः, भ्रातृव्यः-जः, भ्रातृपुत्रः-सुतः. 2 (Sister's son) भागिनेयः, स्वस्रीयः, भगिनी-स्वसृ-पुत्रः-सुतः.

NEPHRITIC,-AL, *a.* वृक्कसंबंधिन्. 2 वृक्करोगहर(री *f.*).

NEPOTISM, *s.* ज्ञात्यतिस्नेहः, कुलपक्षपातः.

NEREID, *s.* जल-समुद्र-देवता.

NERVE, *s.* शिरा, वस्नसा, स्नसा; धमनि-नी *f.*, मज्जा-ज्ञान-तंतुः. 2 बलं, वीर्यं, तेजस्-ओजस् *n.*, शरीरदृढता. 3 धैर्यं, धृति *f.*, मनःस्थैर्यं. –*v. t.* बलं-धैर्यं दा 3 U or वृध् c. –LESS, *a.* निर्बल, दुर्बल, शक्तिहीन. –OUS, *a.* शिराल; मज्जातंतुगत. 2 ओजस्विन्, सबल, वीर्यवत्, ऊर्जस्वल, सुदृढ, धीर. 3 क्षिप्रक्षोभ, कंप-वेपन-शील, धैर्यहीन. –OUSLY, *adv.* सवीर्यं, सबलं. 2 सकंपं, धैर्यं विना. –OUSNESS, *s.* वीर्यं, ओजः, ऊर्जः, बलं. 2 स्नायुविकारः, कंपशीलता, अधृतिः.

NESCIENCE, *s.* *See* IGNORANCE.

NEST, *s.* नीडः-डं, कुलायः, निलयः, पक्षिस्थानं-गृहं. 2 गृहं, स्थानं, आधारः, आशयः; 'find a mare's n.' शशविषाणं आसद् c. or लभ् 1 A. –NESTLE, *v. i.* (पक्षिवत्) नीडं आश्रि 1 U or अधि-शी 2 A, सुखेन शी or संविश् 6 P or नि-ली 4 A. –*v. t.* पुष् 1, 4, 9 P or c., पा c. (पालयति). –ING, *s.* नीडस्थः पक्षिशावः.

NET, *s.* जालं, पाशः, बंधनं-नी, पाशबंधः, वि(वी)तंसः; 'n. for deer' वागुरा, मृगबंधनी, मृगजालं; 'n. for fish' आनायः, जालं; 'n.-work' जाल-सूत्र-कर्मन् *n.* 2 कूटयंत्रं, उन्माथः. –*a.* शुद्ध, अशेष, निरुद्धार, अभग्न, अखंड, अन्यून. –*v. t.* जाले बंध् or ग्रह् 9 P. 2 जालीकृ 8 U.

NETHER, *a.* अधस् in comp.; अधर, अवर, अधःस्थ, अधोभव, अधस्तन (नी *f.*); 'n. world' अधोलोकः; 'n. garment' अधोवासः. –MOST, *a.* अवरतम.

NETTLE, *s.* पीतपर्णी. –*v. t.* सं-परि-तप् c., प्रकुप् c., रुष् c.; *See* ENRAGE, EXCITE.

NEURALGIA, *s.* वातशूलं.

NEUROLOGY, *s.* शिरावर्णनं.

NEUROTOMY, *s.* शिराच्छेदविद्या.

NEUTER, *a.* नपुंसक, क्लीब, तृतीय(या)प्रकृति, षंढ; 'n. gender' क्लीबं, नपुंसकं; *See* below. —NEUTRAL, *a.* मध्यस्थ, तटस्थ, उदासीन, अपक्षपातिन्, समदृष्टि, समभाव, उभयसामान्य, अपक्षपात; *See* INDIFFERENT. –*s.* तटस्थः, उभयसामान्यः. –ITY, *s.* माध्यस्थ्यं, ताटस्थ्यं, अपक्षपातः, औदासीन्यं, उभयसाम्यं, समभावः, समदृष्टि *f.* –LY, *adv.* औदासीन्येन, उभयसामान्यं, समभावेन. —NEUTRALIZE, *v. t.* विशिष्टगुणान् नश् c., दुर्बलीकृ 8 U, बल-शक्ति-नश् c. 2 उदासीनीकृ. –ATION, *s.* विशिष्टगुणनाशः-शनं, विशेषधर्मलोपः, दुर्बलीकरणं. 2 उदासीनीकरणं. –ED, *a.* नष्टगुण-शक्ति-बल.

NEVER, *adv.* न कदाचित्, न कदापि, न कदाचन, न जातु, न कर्हिचित्; 'n.-fading' अजर; 'n.-failing' अमोघ, अक्षय्य; 'n. more' न भूयः, नेतः परं न पुनः.

NEVERTHELESS, *conj.* तथापि, किंतु, पुनः, परंतु, परं.

NEW, *a.* नव, नवीन, अभिनव, नूतन, प्रत्यग्र (of flowers &c.). 2 आधुनिक(की *f.*), इदानींतन-अधुनातन (नी *f.*), अर्वाचीन. 3 अपूर्व, अभूत-अदृष्ट-पूर्व, अश्रुतपूर्व. 4 अनभ्यस्त, अपरिचित, अविज्ञानिन्; 'n. comer' आगंतुकः, नवागतः; 'n.-born' नवोत्पन्न, सद्योजात; 'n.-fangled', 'n.-fashioned' नवघटित, नवकल्पित-सृष्ट; 'n. year's day' वर्षप्रतिपद् *f.* –LY, *adv.* नवं, प्रत्यग्रं, सद्यः, नूतनं, नव in comp.; 'n. married wife' नवोढा, नवपाणिग्रहणा वधूः; 'n. ripe (blown)' प्रत्यग्रविकसित. –NESS, *s.* नवीनता, अपूर्वता. 2 नूतना रीतिः, नवाचारः.

NEWS, *s.* वार्ता, वृत्तांतः, प्रवृत्ति *f.*, उदंतः, समाचारः, वृत्तं. 2 संवादः, जनवादः-श्रुति *f.*, लोकप्रवादः, किंवदंती; 'good n.' भद्रं, शुभं, शुभवार्ता; 'ill n.' अशुभं, अशुभवार्ता; 'ill n. travels fast' अशुभवार्ता सत्वरं बहुलीभवति; 'n.-monger' वार्तावृत्तिः, वार्तायनः, वार्तावहनवृत्तिः; 'n.-paper' वार्ता-समाचार-पत्रं, वृत्तपत्रं.

NEWT, *s.* क्षुद्रगोधा.

NEXT, *a.* (Of time) आगामिन्; 'on Monday n.' आगामिनि सोमवासरे. 2 अनंतर, अव्यवहित, अव्यवधान, संसक्त, निरंतराल; 'n. to the skin' शरीरसंसक्त. 3 सन्निहित, पार्श्वस्थ, अंतिक, समीप-निकट-स्थ-वर्तिन्; *See* NEAR; oft. ex. by पर, अन्य, अंतरं in comp.; 'n. born' अनंतरज; 'in the absence of the first, the n. and so on' पूर्वाभावे परः परः; 'on the n. day' पराहे, परेद्युः; 'the n. world' परलोकः, लोकांतरं; 'n. door to' अदूर, ईषदून (with abl.), कल्प in comp.; 'in the n. world' अमुत्र, परत्र; 'n. moment' क्षणांतरं; 'n. but one' एकांतरं. –*adv.* अनंतरं, परं, परतः (with abl.); ततः, तदनंतरं, अथ, परस्तात्, ततः-परं-ऊर्ध्वं; 'what n.' ततः किं, ततस्ततः.

NIB, *s.* चंचु *f.*, तुंडं. 2 अग्रं, अणि *f.*, अग्रभागः. –BED, *a.* साग्र, अणिमत्.

NIBBLE, *v. t.* (अल्पाल्पं) दंश् 1 P, अवकृत् 6 P, चर्व् 1 P, 10; क्रमशः-अल्पाल्पशः खाद् 1 P or कृत् or भक्ष् 10. 2 छिद्रं अन्विष् 4 P, दोषं ग्रह् 9 P, असूयति (D.) (with dat.).

NICE, *a.* ललित, शोभन, सु in comp., सुभग, रम्य, रमणीय, रुचिर, मनोहर, साधु. 2 स्वादु, सुरस, मिष्ट, आस्वादवत्, रुचिर, रुचिकर, 3 सूक्ष्मदृष्टि-दर्शिन्, कुशाग्रबुद्धि. 4 सूक्ष्म, अतिसूक्ष्म, सुपरिशुद्ध, सम्यच्. 5 अस्थूल, सूक्ष्म, विरल (cloth). 6 कोमल, मृदु, पेलव, सुकुमार. 7 अतिसूक्ष्म, अतिनिपुण. –LY, *adv.* सुष्ठु, सु pr., ललितं, शोभनं, सम्यक्. 2 सूक्ष्मं, सूक्ष्मत्वेन. –NESS,-TY, *s.* लालित्यं, रम्यता;

स्वादुता, सौरस्यं ; सूक्ष्मदृष्टि *f.*, सूक्ष्मदर्शिता, कुशाग्रमतित्वं, सूक्ष्मता ; युक्ति *f.*, नीति *f.*

NICHE, *s.* (प्रतिमा-)आधारः, निकेतनं, स्थानं.

NICK, *s.* ग्रंथिः; अवच्छेदः. 2 शुभ-अनुकूल-समयः, युक्त-उचित-कालः, शुभयोगः-कालः-लग्नं. –*v. t.* अवच्छिद् 7 P. 2 शुभलग्ने आसद् c.

NICKNAME, *s.* संज्ञा, उपाधिः, उपाधिनामन् *n.* –*v. t.* उपाधिं दा 3 U.

NICTATE, *v. i.* मिमिष् 6 P; नि-मील् 1 P. –ION, *s.* निमेषः ; निमीलनं.

NIDIFICATION, *s.* नीडकरणं, कुलायरचनं.

NIECE, *s.* भ्रातृकन्या-सुता, भ्रात्रीया. 2 (Sister's daughter) भागिनेयी, स्वस्रीया.

NIGGARD, *s.* कृपणः, क्षुद्रः, कदर्यः. –*a.*, –LY, *a.* कृपण, क्षुद्र, कदर्य, त्यागविमुख (खी *f.*), बद्धमुष्टि. –LY, *adv.* कृपणवत्, अल्पव्ययेन. –NESS, *s.* कार्पण्यं, कदर्यता; *See* MISER, &c..

NIGH, *a.*, *adv.* *See* NEAR.

NIGHT, *s.* रात्रि-त्री, रजनिः-नी, क्षपा, निशा, विभावरी, श(शा)र्वरी, यामिनी, त्रियामा, निशीथिनी, क्षणदा, तमस्विनी, तमिः-मी-मा. (all *f.*); 'a dark n.' तमिस्रा, तामसी; 'moonlight n. ज्योत्स्नी, ज्योतिष्मती; 'by n.', 'at n.' रात्रौ, निशि, नक्तं, दोषा; 'number of n. s' गणरात्रं; 'beginning of n.' प्रदोषः, रजनीमुखं, निशामुखं; 'n. and day' रात्रिंदिवं, नक्तंदिवं; 'a n. and 2 days' पक्षिणी; 'sitting up at n.' रात्रिजागरः; 'n.-attack' सौप्तिकं, सौप्तिकाक्रमः; 'n.-blindness' रात्र्यंधता; 'n.-dress' रात्रिवेशः; 'n.-fall' प्रदोषः, निशा-रजनी-मुखं, संध्याकालः, रात्रियोगः; 'n.-hag' रात्रिचरा, रात्र्यटा; 'n.-man' खल-मल-पूः; 'n.-mare' दुःस्वप्नः, कुस्वप्नः; 'n.-shade' निदिग्धिका, स्पृशी, व्याघ्री, बृहती, कंटकारिका, प्रचोदनी, कुली, क्षुद्रा, दुःस्पर्शा, राष्ट्रिका; 'n.-wandering' निशाचर, रात्रि(त्रिं)चर ; 'n.-watch' नगररक्षिणः (pl.); यामः, प्रहरः. –LY, *a.* नैश (शी *f.*), दौषातन (नी *f.*), (*s.*) in comp.; 'n. watch' रात्रिजागरणं. –*adv.* रात्रौ, निशि, नक्तं. 2 प्रतिरात्रं, निशि-निशि, रात्रौ रात्रौ.

NIGHTINGALE, *s.* प्रियगीतः, बुल्बुलः.

NIHIL, *s.* शून्यं, अभावः. –ISM, *s.* शून्यवादः. –ITY, *s.* अभावः, शून्यता.

NIMBLE, *a.* चपल, लघु, लघुगति, लघुशरीर, चपलदेह, क्षिप्र-चपल-गति; 'n.-footed' लघुपाद्; 'n.-handed' लघुहस्त; 'n.-witted' चपल-शीघ्र-बुद्धि. –NESS, *s.* लघुता, देहचापल्यं, चापल्यं, क्षिप्रता. –NIMBLY, *adv.* लघु, लघु-द्रुत-गत्या, चपलतया, द्रुतं.

NINE, *a.*, *s.* नवन्; 'n.-fold' नवगुण. –NINTH, *a.* नवम (मी *f.*); 'n. ly', 'in the n. place' नवमस्थानं. –NINETEEN, *a.*, *s.* नवदशन्, ऊनविंशति *f.*; 'n.-th' नवदश (शी *f.*). –NINETY, *a.*, *s.* नवति *f.*

NINNY, *s.* अल्पधीः, मूर्खः, जडः.

NIP, *v. t.* नि-,कृत् 6 P, अवच्छिद् 7 P. 2 संदंश् 1 P, चर्व् 1 P, 10. 3 पीड् 10, अर्द् 1 P or c. 4 नश् c., उच्छिद्, विश् 9 P or c.; म्लानीकृ 8 U; 'n. in the bud' कलिकावस्थायां एव नश् c., जातमात्रं हन् 2 P or प्रशमं नी 1 P, (जातमात्रं न यः शत्रुं व्याधिं च प्रशमं नयेत् P. III. 1). –*s.*, –PING, *s.* निकृंतनं, अवच्छेदः. 2 हिमार्तीकरणं. –PED, *a.* छिन्न, पीडित, &c. 3 हिमार्त, हिमपीडित. –NIPPERS, *s.* संदंशः-शकः, कंकमुखं.

NIPPLE, *s.* चूचुकः-कं, स्तन-कुच-अग्रं, स्तनमुखं.

NIT, *s.* लिक्षा, यूकांडं. –TY, *a.* लिक्षापूर्ण.

NITRE, *s.* यवक्षारः, यवाग्रजः, पाक्यः. –OUS, -Y, *a.* यवक्षारमय (यी *f.*).

NO, *adv.* न, नो, नहि; 'n., n.' मा मैवं. –*a.* (Before nouns) ex. by न; अ, अन्, निर् pr. ; हीन, शून्य, रहित in comp.; 'n. one' न कोपि, न कश्चन; 'n.-body' न कश्चित्, न काचन; 'having n. issue' अनपत्य, वंशहीन, &c.

NOBLE, *a.* कुलीन, अभिजात, आर्य, अभिजनवत्, महाकुल, सत्कुलजात, सद्वंशज, कुलज-जात, कुलप्रसूत, वंशविशुद्ध. 2 (N.-minded) उदार, महात्मन्, महामनस्, उदात्त, उदार-धी-मति, महानुभाव, महाशय, महेच्छ. 3 महत्, धीर, श्रेष्ठ, उत्कृष्ट, विशिष्ट, उत्तम, महाभाग, उन्नत, प्रमुख, प्रशस्त, वि-प्र-ख्यात, प्रतिपत्तिमत्, सुप्रतिष्ठ, कीर्तिमत्, यशस्विन्; श्रीमत्, महाप्रताप, महातेजस्; तेजस्विन्, ओजस्विन्; *See* MAJESTIC also; oft. ex. by ऋषभः, सिंहः, व्याघ्रः, पुंगवः, शार्दूलः in comp.; *See* EXCELLENT; 'n.-looking' धीरदर्शन, महानुभावाकृति; 'n. in reason' उदात्तधी; 'n. animal' उदात्तसत्त्वं; 'n. nature' सत्त्वं. –*s.*, 'N.-man' शिष्टजनः, कुलीनः, कुलीन-उत्कृष्ट-पदस्थः, आर्यजनः, अभिजनवत् *m.* –NESS, *s.* महत्त्वं, महिमन् *m.*, उत्कर्षः, उन्नति *f.*, श्रेष्ठता &c.; प्रतापः, वैभवः ; *See* below. –NOBLY, *adv.* कुलीनवत्, आभिजात्येन; 'n. born' कुलोत्पन्न; *See* (*a.*). 2 औदार्येण, उदारतया, माहात्म्येन, उदारचेतसा, उदात्तं, धीरं. 3 सप्रतापं, अतितेजसा, महाविभूत्या, ऐश्वर्येण. –NOBILITY, *s.* कुलीनता, आर्यता, आभिजात्यं, कुलोत्कर्षः, सद्वंशता. 2 औदार्यं, माहात्म्यं, महानुभावः, उदारधीः, महाशयः, महिमन् *m.* 3 महत्त्वं, महिमा, उत्कर्षः, विशिष्टता, श्रेष्ठत्वं, प्रकर्षः, उन्नतिः, प्रतिपत्ति *f.*, प्रतिष्ठा, प्र-वि-ख्याति *f.* 4 प्रतापः, ऐश्वर्यं, विभूति *f.*, ओजस्-तेजस्- *n.*, धीरता, श्रीः. 5 शिष्ट-कुलीन-जनः, कुलीनलोकाः-जनाः. –NOBLESSE, *s.* कुलीनजनाः, कुलीनजनसमाजः.

NOCENT, *a.* *See* MISCHIEVOUS.

NOCTAVAGANT, *a.* रात्रिचर.

NOCTURNAL, *a. See* NIGHTLY.

NOD, *s.* शिरःकंप:-चालनं, शिरःसंज्ञा-संकेत:. 2 शिरः-मस्तक-प्रणाम:. —*v.* (मस्तकं, शिरः) चल् c.; 'Mâlatî n. s her head ' मालती मूर्धानं चालयति (Mal. 8); शिरसा संकेतं-संज्ञां कृ 8 U or दा 3 U; 'n. consent ' शिरःकंपेन अनुमन् 4 A or अनुमतिं सूच् 10. 2 (शिरः) प्र-आ-वि-अव-नम् c. (नमयति).

NODATED, *a.* ग्रंथिल, ग्रंथिमत्.

NODDLE, *s. See* HEAD.

NODDY, *s. See* IDIOT.

NODE, *s.* पात:. 2 अस्थिगुल्म:, गंड:, पिंड:.

NODOSE, *a.* ग्रंथिल, ग्रंथिमत्.

NODULE, *s.* घन:, पिंड: ; शर्करा, लोष्ट:.

NOISE, *s.* नि-,नाद:, ध्वनि:, शब्द:, नि-,स्वन:, घोष:, महा-उच्च-स्वर:, उत्क्रोश:, वि-,राव:, रव:, निऱ्हाद: ; 'rattling n.' रणितं,रणत्कार:; 'jingling n.' क्वण:, क्वणनं, क्वणितं; 'loud n. ' कलकल:, कोलाहल:, तुमुलं, महाशब्द:-स्वन:-घोष:. 2 जनरव:-प्रवाद:-श्रुति *f*.; 'make n.' नद् 1 P, ध्वन् 1 P, वि-,रु 2 P, रण् 1 P, शब्दायते (D.), कोलाहलं-कलकलं-कृ 8 U; 'shallow water makes great n. ' अर्धो घटो घोषमुपैति नूनं. —*v. t.* घुष् 10, उत्-वि-°, प्रकाश् c., प्र-, ख्या c. (ख्यापयति), प्रकटीकृ. —FUL, *a.* सशब्द; *See* NOISY. —LESS, *a.* निःशब्द, नीरव, निर्घोष. —LESSLY, *adv.* निःशब्दं, नीरवं. —NOISY, *a.* महाशब्द-स्वन-नाद, तुमुल-महाशब्द-कोलाहल-कारिन्, मुखर, घोषण, घोषकारिन्, घोषकर (री *f*.), बहु-महा-घोष; बद्ध-कृत-कलकल. 2 निनादपूरित, कलकलव्याप्त, मुखर, सशब्द, नादिन्, सं-नि-ऱ्हादिन्. —ILY, *adv.* उच्चैः-स्वरेण, महाशब्देन. —INESS, *s.* महाशब्द:-ध्वनि:.

NOISOME, *a.* दुर्गंध, पूतिगंधि, कुत्सित, दुष्ट, समल. 2 मारक, मारात्मक, क्षयकर (री *f*.), नाशावह, घातुक, बाधक. —NESS, *s.* दुर्गंध:, पूति *f*., उग्रगंधता.

NOMAD,-IC, *a.* पशुचारणोपजीविन् ; अस्थिरवास.

NOME, *s.* प्र-,देश:, देशभाग:.

NOMENCLATURE, *s.* परिभाषा, पारिभाषिकशब्दसंग्रह:.

NOMINAL, *a.* नामसंबंधिन्, नामविषयक. 2 शाब्द (ब्दी *f*.), शाब्दिक-वाचनिक-(की *f*.). 3 नाममात्र, नामधारिन्-भृत्, नाममात्रधारिन्, शब्द-नाम-in comp.; 'I am but a n. lord of the earth ' ननु शब्दपति: क्षितेरहं (R. VIII. 52); 'n. verb ' नामधातु:. —LY, *adv.* शब्द-नाम-मात्रेण, नामत एव, शब्दत:.

NOMINATE, *v. t.* नाम-संज्ञां-कृ 8 U, नाम निर्दिश् 6 P; *See* CALL, NAME. 2 (To an office) नियुज् 7 A, 10 or प्रति-ष्ठा c. (-ष्ठापयति). —ION, *s.* नियोग:, नियोजनं, प्रतिष्ठापनं. —IVE, *s.* कर्ता, कर्तृवाचक:, प्रथमा विभक्ति:. —OR, *s.* नियोजक:. —NOMINEE, *s.* नियुक्त:, अधिकृत:.

NON, (a prefix) Ex. by अ, अन्; 'n.-acceptance ' अपरिग्रह:, अस्वीकार: ; 'n.-appearance, -attendance ' अनुपस्थिति *f*., असंनिधानं, अदर्शनं, अविद्यमानता ; 'n.-attainment ' अप्राप्ति *f*., अलाभ: ; 'n.-attention ' अनवधानं, प्रमाद: ; 'n.-chalant ' निरुत्सुक, अनपे(वे)क्ष, उदासीन, निःस्पृह; 'n.-compliance ' अननुरोध:, अननुवर्तनं, विरोध: ; 'n.-conductor ' अवाहक:, अनायक: ; 'n.-conformist ' अननुरोधिन् *m*., अननुवर्तिन् ; सामान्यधर्मविरोधी, मतांतरग्राही ; 'n.-conformity ' अननुरोध:, मतांतरग्रहणं ; 'n.-descript' अवर्णित, अकृतलक्षण; 'n.-resistance ' अप्रतीकार: ; &c. &c.

NONAGE, *s.* बाल्यं, बाल्यदशा; *See* MINORITY.

NONAGENARIAN, *s.* नवतिवर्षीय:.

NONCE, *s.* अवसर:, काल: ; 'for the n. ' अस्मिन्समये.

NONE, *a.* न कश्चित्, न कोपि, न कश्चन, न काचित्, &c.; oft. ex. by न with other words ; 'n. other ' नान्य, नेतर ; 'n. but ' एव; (with compar. adj.) न किमपि, न ईषदपि, न मनागपि, न स्तोकमपि.

NONENTITY, *s.* अभाव:, असंभव:, असत्ता, असद्भाव:, शून्यता. 2 शून्यं, अवस्तु *n*.; 'he is a n. in the kingdom ' राज्ये अकिंचित्कर: स:.

NONPAREIL, *a.* अप्रतिम, अनुपम, अद्वितीय.

NONPLUS, *v. t.* कुंठ् 10, वि-,मुह् c., आकुलीकृ 8 U, निरुत्तरीकृ. —*s.* कुंठता, वि-,मोह:, निरुत्तरता, अगति *f*., निरूपायता. —ED, *a.* कुंठित, निरुपाय, गतिहीन, अगतिक, मूढ, निरुत्तर.

NONSENSE, *s.* असंबद्ध-अनर्थक-वाक्यं-वचनं-भाषणं, मृषाकथा-आलाप:, प्रलाप:, जल्पितं, असत्यं, अयाथार्थ्यं, अनर्थकं; 'to talk n. ' प्रलप् 1 P, प्रजल्प् 1 P, असंबद्धं भाष् 1 A; 'talking n. ' असंबद्धप्रलापिन्, वाचाल, जल्पक. —NONSENSICAL, *a.* असंबद्ध, असंगत, अनर्थक, निरर्थक, मृषार्थक, अयथार्थ. —LY, *adv.* अनर्थकं, असंबद्धं, असंगतं, मृषा, वृथा. —NESS, *s.* असंबद्धता, &c.

NONSUITED, *a.* नष्ट-हीन-वाद, अवसन्न, अर्थाद् हीन; 'to be n. ' अवसद् 1 P, अर्थात्-वादाद् हा pass.

NOODLE, *s.* मूढ:, मूर्ख:, अल्पधी:, जडमति:.

NOOK, *s.* कोण:, अस्र:; विविक्तस्थानं.

NOON, *s.* (N.-time) मध्याह्न:, मध्यदिनं, मध्याह्नकाल:. —*a.* माध्याह्निक (की *f*.), माध्यंदिन (नी *f*.).

NOOSE, *s.* पाश:, वागुरा, बंधनं; *See* SNARE; 'n. for the neck ' कंठपाश:. —*v. t.* पाशेन बंध् 9 P, पाशे ग्रह् 9 P or पत् c.

NOR, *conj.* न च, न वा; *See* NEITHER.

NORMAL, *a.* यथाक्रमं, वैधिक (की *f.*). 2 विद्यारंभ-शिक्षक.

NORTH, *s.* उत्तरा, उदीची, उत्तरदिश्-दिशा, उत्तराशा, कौबेरी; 'to the n.' उत्तरं (with abl.), उत्तरत: (with gen.); 'facing the n.' उदङ्मुख-*a.*(खी *f.*). -*a.*,-ERLY,-ERN, *a.* उत्तर, उदीचीन, उत्तरस्थ, उदीच्य, उदञ्च्; 'in a n. direction' उत्तरेण (with acc. or gen.); 'n.-east' उत्तरपूर्वा, पूर्वोत्तरा, ऐशानी, प्रागुत्तरा, प्रागुदीची; (*a.*,-erly,-ern), प्रागुत्तर, पूर्वोत्तर, प्रागुदीचीन; पूर्वोत्तरस्थ; 'n.-pole', 'n.-star' ध्रुव:; 'n.-west' उत्तरपश्चिमा, वायवी; (*a.*,-erly, -ern) वायव, वायुदिक्स्थ. -WARD, *a.* उत्तर, उत्तरदिक्स्थ. -WARDS, *adv.* उत्तराभिमुखं, उत्तरत:, उत्तरेण, उत्तरदिशि.

NOSE, *s.* नासा, नासिका, घ्राणं, घोणा, नसा, नस्या, गंधवहा, गंधज्ञा; 'led by the n.' नस्योत, नासित; (fig.) यथेच्छं कृष्ट, स्वेच्छया नीत ; 'aquiline n.' शुकनासा; 'having a sharp n.' खरणस्, खरणस ; 'having a hoof-like n.' खुरणस्, खुरणस; 'having a flat n.' नतनासिक; *See* under FLAT ; 'having a prominent n.' प्रलंबघोण, घोणोन्नत ; 'breathing through the n.' नासिकंधम; 'n.-string' नास्यं ; 'n.-cut' छिन्ननास ; 'n.-gay' कुसुमस्तबक:, पुष्पगुच्छ:, गुच्छ:, गुत्स:; 'n.-ring' नासाभरणं. -LESS, *a.* अ-वि-नासिक, विग्र, विख्र, विख्य, गतनासिक. -NOSTRILL, *s.* नासारंध्र-विवर-छिद्रं-पुटं-बिलं.

NOSOLOGY, *s.* रोगनिदानशास्त्रं.

NOSTRUM, *s.* गुप्तौषधं.

NOT, *adv.* न, नो, न हि. 2 (Prohibitive) मा; oft. by अलं with instr. or gerund; 'do n. fear' अलं भयेन, मा भैषी: ; 'do n. boast much' अलमलं बहु विकथ्य (M. 1); 'do n. do so', 'do n. say so' मा मा एवं ; (rather angrily) मा तावत्. 3 (Privative) अ, निर्, अन्, वि pr.

NOTCH, *s.* छेद:, दंत:, भंग:; 'n. of a bow' अटनि-नी *f.* -*v. t.* अव-,छिद् 7 P, दंतुरी-भंगुरी-कृ 8 U. -ED, *a.* दंतुर, भंगुर, दंतुरित.

NOTE, *s.* लिंगं, लक्षणं, चिह्नं, अंक:; अभिज्ञानं. 2 स्मरणचिह्नं, स्मरणं. 3 टीका, व्याख्या, भाष्यं, टिप्पनी, वृत्ति *f.* ; 'edited with n. s' टिप्पनीसमवेतं प्रकाशितं (पुस्तकं). 4 स्वर:, क्वण: ; 'a wrong n.' अप-वि-स्वर:; 'high n.' तार:, तारस्वर:; 'cracked n.' काकस्वर: ; 'key-n.' वादिन् *m.* ; (the seven n. s being निषाद:, ऋषभ:, गांधार:, षड्ज:, मध्यम:, धैवत:, पंचम:) ; 'sweet n.' काकली ; 'sweet indistinct n.' कल: ; 'deep n.' मंद्र: ; 'continued n.' एकताल:. 5 ख्याति *f.*, कीर्ति *f.*, यशस् *n.*, प्रतिष्ठा ; 'of n.' विश्रुत, लब्धकीर्ति-प्रतिष्ठ. 6 वि-,रुतं, राव:, नाद:, स्वन:, शब्द:, ध्वनि:. 7 अवेक्षा, अवधानं, मनोयोग:, अभिनिवेश:; 'take n. of' अवेक्ष् 1 A, अव-धा 3 U, मनसि-चित्ते-कृ 8 U, अवधृ 10. 8 पत्रं, पत्रकं, लेख:, लेख्यं; 'n.-book' स्मरण-अंकन-पुस्तकं; 'n.-worthy' स्मरणीय, स्मरणार्ह, अवेक्षणीय. -*v. t.* निर्वर्ण् 10 आलक्ष् 10, निरूप् 10, अवेक्ष्, आलोच् 10, आलोक् 1 A, 10. 2 लिख् 6 P, (लेख्ये) आरुह् c. (रोपयति), (पत्रे) निविश् c. 3 अंक् 10, चिह्नयति (D.). -ABLE, *a.* स्मरणीय, स्मरणार्ह, स्मर्तव्य. 2 विशिष्ट, उत्कृष्ट, परम; ख्यात, प्रसिद्ध, विशेष in comp.; 'a n. guest' अतिथिविशेष:. -*s.* कुलीन-विशिष्ट-जन:, आर्य:; *See* NOBLE. -ABLY, *adv.* प्रसिद्धं, विशेषेण, विशेषत:. -ARY, *s.* लेखक:, लिपिकार:, लिपिजीविन् *m.* -ATION, अंकनं, अंकविद्या. -ED, *a.* लक्षित, निरूपित, लिखित, पत्रारूढ. 2 प्र-वि-ख्यात, सुविश्रुत, प्रसिद्ध, लब्धप्रतिष्ठ, प्रथित.

NOTHING, *s.* अभाव:, शून्यं, असत् *n.*, अवस्तु *n.*, असत्त्वं. 2 न किंचित्, न किमपि, न स्तोकमपि. 3 अल्प-लघु-विषय:, अल्पार्थ:, अगुर्वर्थ:; 'for n.' अकारणं, अनिमित्तं, वृथा, मुधा, निरर्थकं ; 'good for n.' व्यर्थ, निरर्थक, अकिंचित्कर (री *f.*) ; 'n. but' नान्यत् किमपि (with abl.). -*adv.* न मनागपि, न किंचिदपि, न स्तोकमपि, न मनाक्, न किमपि. -NESS, *s.* अभाव:, शून्यता.

NOTICE, *v. t.* लक्ष् 10, सं-आ-°, निरूप् 10, आलोक् 1 A, 10, प्र-अव-निर्-परि-ईक्ष् 1 A, दृश् 1 P, निर्वर्ण् 10. 2 मनो दा 3 U, अव-धा 3U, सावधान-*a.* भू 1 P. 3 अभि-धा, निर्दिश् 6 P, उद्दिश्, कथ् 10, वर्ण्. 4 सं-भू c., आदृ 6 A, संमन् c., सत्कृ 8 U. -*s.* आलोकनं, निरूपणं, अवेक्षा-क्षणं, परीक्षा-क्षणं. 2 निर्देश:, उल्लेख:, अभिधानं, उद्देश:, कथनं, वर्णनं. 3 अवेक्षा, मनोयोग:, अवधानं, चित्ताभिनिवेश:, विचार:, गणना; 'take n. of' आदृ, अवेक्ष्, विचर् c., आलोच् 10 ; *See* CONSIDER. 4 सूचना, निवेदनं, बोधनं, बोध:. 5 विज्ञापना, विज्ञप्ति *f.*, घोषणं-णा, ख्यापना; 'written n.' घोषण-विज्ञप्ति-प्रसिद्धि-पत्रं. 6 आदर:, सत्कार:, संभावना, संमान:.

NOTIFY, *v. t.* वि-,ज्ञा c. (ज्ञापयति), बुध् c., प्रकाश् c., सूच 10, घुष् 10, प्र-ख्या c. (ख्यापयति), नि-अ-विद् c., कृत् 10. -ICATION, *s.* विज्ञापनं-ना, विज्ञप्ति *f.*, घोषणा, सूचनं-ना, ख्यापनं.

NOTION, *s.* मति: *f.*, बुद्धि *f.*, बोध:, मनोगतं, मतं, कल्पना, भाव:, अभिप्राय:, भावना, आशय:, वासना; 'under the n. that' इति बुद्ध्या. -AL, *a.* मन:-सृष्ट, मनोगत, मन:कल्पित, संकल्पज; *See* IDEAL.

NOTORIOUS, *a.* प्रसिद्ध, प्र-वि-ख्यात, प्रथित, विश्रुत, विज्ञात, लोकप्रसिद्ध-विश्रुत, लौकिक (की *f.*); 'a n. report' सार्वलौकिक: प्रवाद:. 2 दुर्नामन्, कुख्यातिमत्,

ख्यातगर्हेण, कुप्रसिद्ध; 'a n. thief' सर्वविज्ञातः चौरः; 'to become n.' बहुलीभू 1 P, प्रकटीभू, सर्वप्रकाशतां गम् 1 P. -LY, *adv.* सुप्रसिद्धं, प्रकटं, ख्यातगर्हेणं. -NESS,-NOTORIETY, *s.* प्र-वि-ख्याति *f.*, प्रकाशता, प्रसिद्धि *f.*, विश्रुति *f.*, प्रथा. 2 दुर्नामन् *n.*, कुकीर्ति *f.* वाच्यता, अपकीर्तिः.

NOTWITHSTANDING, *part.* तथापि, तदपि, एवं सत्यपि; gen. ex. by gen. or loc. abs.; or by अनादृत्य (with acc.); 'n. his teacher's presence' विद्यमानेपि गुरौ; *See* 'In spite of' under SPITE.

NOUGHT, *s. See* NAUGHT.

NOUN, *s.* नामन् *n.*, विशेष्यं, सुप्, वाचकः.

NOURISH, *v. t.* परि-,पुष् 1, 4, 9 P or c., संवृध् c., परि-,पा c. (पालयति), सं-,भृ 1, 3 U; (अन्नादिना) आप्यै c., बृंह् c., वृध् c., संतृप् c. -ER, *s.* पालयितृ *m.*, संवर्धकः. -ING, *a.* पुष्टिकर (री *f.*), पुष्टिद, पौष्टिक (की *f.*). -MENT, *s.* पोषणं, पुष्टि *f.*, पालनं, संवर्धनं, भरणं, अन्नदानं. 2 आहारः, भोजनं, भक्ष्यं, अन्नं, पौष्टिकं, जीवनसाधनं.

NOVEL, *a.* नव, नूतन, नवीन, अपूर्व, अदृष्ट-अश्रुत-पूर्व' अद्भुत; *See* NEW. -*s.* कल्पितकथा, आख्यायिका' प्रबंधकल्पना, कूटार्थकथा. -IST, *s.* आख्यायिकाकारः. -TY, *s.* पूर्वता, नवता, नूतनता. 2 अदृष्टपूर्वं वस्तु, कौतुकं, अद्भुतं.

NOVEMBER, *s.* कार्तिकमार्गशीर्षं.

NOVENNIAL, *a.* नववर्षीय.

NOVERCAL, *a.* वैमात्रीय, वैमातृक (की *f.*), विमातृयोग्य.

NOVICE, *s.* शैक्षः, प्राथमकल्पिकः, नवशिष्यः-छात्रः, अनभ्यस्तः, अलब्धकौशलः. -NOVITIATE, *s.* नवशिष्यता, अनभ्यासः, नवच्छात्रदशा. 2 नवाभ्यासकालः, विद्यारंभावधिः.

NOW, *adv.* अधुना, इदानीं, संप्रति, सांप्रतं, प्रस्तुत-वर्तमान-काले, इहसमये. 2 अथ, अथातः, अतःपरं, अतः; 'n.-n.' क्वचित्-क्वचित्, कदाचित्-कदाचित्, अंतराअंतरा, (अंतरा पितृसकर्मंतरा मातृसंबंधमालापं कुर्वन् Ka. 118) ; 'n. and then' काले काले, कदाचित्, कदापि; 'till n.' अद्य यावत्; 'from n.' अद्यारभ्य, अद्य प्रभृति, अतः परं; 'just n.' अधुनैव, अचिरात्, इदानीमेव; 'n.-a-days' एषु दिवसेषु, संप्रति, अधुनातनकाले; 'n.-a-days people' इदानींतनाआधुनिका-जनाः.

NOXIOUS, *a.* हिंस्र, उपद्रविन्, हिंसक, दुष्ट, हिंसालु, घातुक, अपकारिन्, हिंसात्मक, अहित-अनिष्ट-कारिन्; *See* HARMFUL.

NOZZLE, *s.* नासाग्रं, प्रोथः, नस्तः; अग्रं, अग्रभागः.

NUBILOUS, *a.* मेघावृत, अभ्राच्छन्न; *See* CLOUDY.

NUCLEUS, *s.* बीजं, गर्भः; संचयास्पदं.

NUDE, *a.* नग्न, विवस्त्र; *See* NAKED. -ATION, *s.* विवस्त्रीकरणं. -ITY, *s.* नग्नता.

NUDGE, *v. t.* कूर्परेण चल् c.

NUGATORY, *a.* व्यर्थ, मोघ, निरर्थक, निष्फल, विफल, निष्प्रभाव, अप्रमाण, अनिष्पन्न.

NUISANCE, *s.* उत्पातः, कंटकः, (of persons); बाधा, पीडा, पीडा-क्लेश-हेतुः; 'public n.' लोककंटकः ; 'family n.' कुलाधिः, गृहोत्पातः.

NULL, *a.* मोघ, व्यर्थ, निष्फल, विफल, निर्बल, निष्प्रभाव, अनिष्पन्न, लुप्त, वृथा-मुधा in comp. -IFY, *v. t.* मोघी-विफली-कृ 8 U, लुप् 6 P or c., खंड् 10. -ITY, *s.* मोघता, व्यर्थता, वैफल्यं. 2 अभावः, शून्यता.

NUMB, *a.* जड, सुप्त, स्तब्ध, अस्पंद, अचेतन, चैतन्यरहित, स्तब्धगति; 'n. with cold' शीताकुल. -*v. t.* जडीकृ 8 U, जडयति (D.), चैतन्यं हृ 1 P or स्तंभ् 9 P or c. -NESS, *s.* जाड्यं, स्तंभः, जडिमन् *m.*, स्वापः, त्वक्सुप्ति *f.*, चैतन्यनाशः-स्तंभः.

NUMBER, *s.* संख्या, राशिः. 2 संख्या, गणना, परिमाणं. 3 गणः, समूहः, निवहः, संघः; *See* MULTITUDE; oft. ex. by बहु, बहुल, प्रचुर, अनेक, or जनः in comp.; 'a n. of young women' युवतिजनः, तरुणीगणः; 'in n.s' संघशः, गणशः, बहुशः, अनेकशः; 'a whole n.' अभिन्नं. 4 अंकः. 5 छंदस् *n.*, पद्यं, कविता. 6 वचनं; 'science of n.' गणितं, व्यक्तगणितं, अंकविद्या; '100 in n.' शतं, शतसंख्यक. -*v. t.* सं-परिसं-ख्या 2 P, गण् 10, संकल् 10 (कलयति). 2 अंक् 10, अंकं लिख् 6 P or स्था c. (स्थापयति); oft. ex. by संख्या in comp.; 'the enemy's force n.ed 500' पंचशतसंख्यं शत्रुसैन्यं. -ER, *s.* गणकः, संख्याकृत् *m.* -ING, *s.* गणनं-ना, संख्यानं. -LESS, *a.* असंख्य, संख्यातीत, गणनातीत, अगण्य, असंख्यात.

NUMBLES, *s.* मृगांत्राणि.

NUMERAL, *s.* संख्या, अंकः. -*a.* संख्यात्मक, संख्यावाचक-विषय, संख्या in comp. -LY, *adv.* यथासंख्यं.

NUMERARY, *a.* नियतसंख्यक.

NUMERATION, *s.* संख्यानं, गणना.

NUMERATOR, *s.* अंशः, लवः.

NUMERICAL, *a.* संख्या in comp. ; 'n. superiority' संख्याधिक्यं-उत्कर्षः. -LY, *adv.* संख्यामपेक्ष्य-उद्दिश्य, यथासंख्यं.

NUMEROUS, *a.* बहु, बहुसंख्य, बहुल, भूरि, अनेक, प्रचुर, नैक; *See* MANY. -LY, *adv.* बहुशः, बाहुल्येन, अनेकशः.

NUMISMATICS, *s.* मुद्राविद्या.

NUMSKULL, *s. See* IDIOT, FOOL.

NUN, *s.* परिव्राजिका, तपस्विनी, मठवासिनी, ब्रह्मचारिणी, तपोनिष्ठा. -NERY, *s.* विहारः, मठः.

NUNCIO, *s.* धर्माध्यक्षदूतः.

NUPTIAL, *a.* वैवाहिक-औद्वाहिक (की *f.*), वैवाह (ही *f.*), विवाह-परिणय- in comp.; 'n. ceremony' परिणयविधिः, विवाहक्रिया; 'n. gift' यौतकं, औद्वाहिकं, पारिणाय्यं; 'n. s' विवाहः, उद्वाहः. परिणयः, पाणिग्रहणं.

NURSE, *s.* धात्री, उपमातृ *f.*, मातृका, अंकपाली. 2 परिचारिका, उपचारिका, रुग्णपालिका. 3 पालकः, पोषकः. –*v. t.* (रोगिणं) उपचर् 1 P, सेव् 1 A, परि-पा c. (पालयति); यत्नादुपचर्यतामसौ (S. 3) 'let her be carefully n. ed.' 2 पा c. (पालयति), पुष् 1, 4, 9 P, वृध् c., लल् 10; *See* NOURISH. 3 दुग्धं पा c. (पाययति), स्तन्यं दा 3 U or धे c. (धापयति). –ERY, *s.* पालन-पोषणस्थानं; बालगृहं-स्थानं; 'n. song' शिशुगीतं; 'n. man' पुष्पाजीविन् *m.* –ING, *s.* उपचारः, सेवा. 2 पालनं, पोषणं, लालनं. –LING, *s.* स्तनंधयः, स्तनपः, बालः, शिशुः.

NURTURE, *v. t.* विनी 1 P, शिक्ष् c., उपदिश् 6 P. 2 पा c. (पालयति), पुष् 1, 4, 9 P or c., वृध् c.; *See* NOURISH. –*s.* आहारः, भक्ष्यं. 2 शिक्षणं, विनयः, उपदेशः. 3 पोषणं, पालनं. वर्धनं.

NUT, *s.* फलं; बीजं, गर्भः (internal contents); 'cocoa-n.' नारिकेलफलं; 'n.-crackers' संदंशः-शकः; 'n.-meg' जाति(ती)कोशं-षं, जातिफलं; *See* MACE; 'n.-shell' बीजकवचः-पुटं.

NUTANT, *a.* प्रणतशिरस्.

NUTRITION, *s.* पोषणं, पालनं, पुष्टि *f.*, आप्यायनं.

NUTRIMENT, *s.* आहारः, पुष्टिदं अन्नं.

NUTRITIOUS,-NUTRITIVE, *a.* पुष्टिकर (री *f.*), पुष्टिद, पौष्टिक (की *f.*), पोषक, धातु-बल-वर्धन (नी *f.*).

NUZZLE, *v. i.* नासां अवनम् c. (नमयति).

NYMPH, *s.* अप्सरस् *f.*, अप्सरा, स्वर्गस्त्री; देवता in comp.; 'wood-n.' वनदेवता; 'sea-n.' जलदेवता.

NYMPHOMANIA, *s.* उत्कटा सुरतेच्छा.

O.

O, OH, *interj.* हे, भोः, अयि, अये, अरे; हा, अहह (sorrow). 2 अहो (joy and surprise), हंत, अहो, बत. 3 आः (anger &c.). 4 आ, आं; 'oh for' ex. by अपि नाम; 'oh for a lodge in a wilderness' अपि नाम विपिने निवासं लभेय; 'oh that' *See* WOULD.

OAF, *s. See* FOOL.

OAK, *s.* सिंदूरः.

OAKUM, *s.* खंडितरज्जु *f.*

OAR, *s.* क्षे(क्षि)पणि-णी *f.*, नौ-नौका-दंडः. –*v. t.* क्षेपण्या चल् c. or वह् c.; *See* ROW. –OARSMAN, *s.* नौदंडधरः.

OASIS, *s.* (मरुमध्ये) शाद्वलस्थलं, रम्यस्थानं.

OATH, *s.* शपथः, अभिशापः, वचनं, प्रतिज्ञा, समयः; 'bind by an o.' शप् c.; 'to take an o.' शप् 1, 4 U, शपथं शप्; 'with an o.' सशपथं, शपथपूर्वं.

OBDURATE, *a.* अनम्य, कठिन, कठिनहृदय-चित्त, अनुतापविमुख (खी *f.*), दुराग्रह; *See* HARD. –OBDURACY, *s.* चित्तकाठिन्यं, कठोरहृदयता, अनुतापविमुखता; काठिन्यं, कठोरता.

OBEISANCE, *s.* नमस्कारः; प्रणामः, प्रणति *f.*, वंदनं, प्रणिपातः, नमस्या; अभिवादनं; 'prostrate o.' साष्टांगप्रणामः-नमस्कारः, अष्टांगपातः; 'to make an o.' प्रणम् 1 P, प्रणिपत् 1 P, नमस्कृ 8 U, अभिवद् c.

OBELISK, *s.* सूच्याकारः स्तंभः.

OBESE, *a.* पीन, पीवर, स्थूल; *See* FAT.

OBEY, *v. t.* (Orders) कृ 8 U, अनु-ष्ठा 1 P, अनुवृत् 1 A, अनुवि-धा 3 U, पा c. (पालयति), अनुरुध् 4 A, मन् c., प्रतिग्रह् 9 P, अभ्युप-इ 2 P or -गम् 1 P; (persons) वचनं श्रु 5 P, शासने स्था, आज्ञां-वचनं-अनुवृत्, यथादिष्टं वि-धा; श्रु desid. (शुश्रूषते), उपचर् 1 P, सेव् 1 A, उपास् 2 A, आज्ञां कृ or अनुरुध् &c. —OBEDIENT, *a.* आज्ञानुवर्तिन्, आज्ञाकर (री *f.*), आज्ञाविधायिन्, अनुविधायिन्, अनुरोधिन्, आज्ञा-निदेश-कारिन्, आज्ञापर, विधेय, विनयग्राहिन्, वचने स्थित, आश्रव, वश्य, प्रणेय, वशानुग, शुश्रूषु, आज्ञा-वचन-ग्राहिन्-सेविन्, आज्ञाधीन; 'o. to one's parent' पितृवश्य, पितृवचनपर. –LY, *adv.* आज्ञानुसारेण, यथाज्ञं, यथादिष्टं, निदेशानुरोधेन. –OBEDIENCE, *s.* आज्ञानुवर्तनं-अनुरोधः-अनुसारः-अनुसरणं-करणं-पालनं-सेवनं-धारणं, वश्यता, अनुविधायित्वं, शुश्रूषा, आज्ञाकरत्वं, आज्ञापरता, अनुवर्तनं, अनुरोधः.

OBJECT, *s.* द्रव्यं, वस्तु *n.*, अर्थः, विषयः, इंद्रियार्थः; 'visible o.' चक्षुर्विषयः; (fig.) पात्रं, पदं, स्थानं, आस्पदं, भाजनं, भूमि *f.*, विषयः; 'o. of confidence' विश्वासास्पदं, विश्वासभूमिः; 'the sole o. of my affection' स्नेहस्यैकायनीभूता (M. 2): 'o. of dispute' विवादविषयः, व्यवहारास्पदं. 2 अर्थः, फलं, हेतुः; (desired o.) अभीष्टं, इष्टं, समीहितं, कांक्षितं, ईप्सितं, कामः, मनोरथः; *See* DESIRE. 3 निमित्तं, कारणं, प्रयोजनं, कार्यं. 4 अभिप्रायः, आशयः, तात्पर्यं, उद्देशः, लक्ष्यं; 'with what o. in view' किमपेक्ष्य फलं, केन हेतुना, किमुद्दिश्य, किंनिमित्तं, किमर्थं; 'accomplishment of one's o.' कृतार्थता, चरितार्थता, इष्टसिद्धि *f.*, फलप्राप्ति *f.*; 'highest o.' परमार्थः; 'o. of hearing' श्रुतिविषयः. 5 कर्मन् *n.*; 'a root governing 2 o. s' द्विकर्मकः धातुः. –*v.* वि-प्रति-रुध् 7 U, बाध् 1 A, खंड् 10, निरस् 4 U, अधरीकृ 8 U, अपवद् 1 A, न अनुमन् 4 A or अनुमुद् 1 A, दोषं ग्रह् 9 P; 'the sage will not o. to this'

नात्र दोषं ग्रहीष्यति कुलपतिः (S. 3); नि-प्राति-षिध् 1 P, (तदेष सर्गः न भवद्भिः प्रतिषेधनीयः R. xiv. 42); (in discussions) gen. ex. by ननु, इति चेत् or कथं तर्हि, followed by उच्यते or अत्रोच्यते (we reply); प्रत्यव-स्था 1 A, वितंड् 1 A. -ION, s. बाधः-धा, अपवादः, विरोधः, आक्षेपः, दोषः, आपत्ति f., कक्षा, उद्ग्राहः, विरुद्धहेतुः, विप्रतिषेधः, प्रत्यवायः, प्रतिबंधः, पर्युदासः; 'making an o.' दोषग्रहणं, विरोधोपन्यासः; 'settling an o.' समा-प्रतिसमा-धानं, आक्षेपपरिहारः. -IONABLE, a. बाध्य, सबाध, सदोष, निषेधार्ह, वर्ज्य, परिहार्य, आशंकनीय. -IVE, a. विषयाश्रित, पदार्थनिष्ठ, कर्मविषयक. -OR, s. बाधकः, अपवादकः.

OBJURGATE, v. t. निंद् 1 P, भर्त्स् 10 A, उपालभ् 1 A, आ-अधि-क्षिप् 6 P, तिरस्कृ 8 U. -ION, s. निंदा, भर्त्सनं-ना, उपालंभः, आक्षेपः, धिक्कारः; *See* CENSURE. -ORY, a. निंदक, निंदार्थक.

OBLATION, s. बलिः, उपहारः, उपायनं; हव्यं, हवनं, हुतं, आहुति f., इष्टि f., यागः, निर्वपणं; 'o. of eatables' नैवेद्यं; 'o. to all deities' वैश्वदेवः; 'to make o. s to fire' हु 3 P.

OBLIGATE, v. t. *See* below.

OBLIGE, v. t. Ex. by causal of verbs, gen. with बलेन or बलात्; प्रयुज् 10, प्रवृत् c.; *See* COMPEL. 2 नियमपूर्वं-सप्रतिज्ञं बंध् 9 P. 3 अनुग्रह् 9 P, उपकृ 8 U, उपकारेण बंध्, हितं-प्रसादं-उपकारं कृ; 'I am much o. ed to you for this reward' एतेन पारितोषिकदानेन भवता सुतरामुपकृतोस्मि-अनुगृहीतोस्मि; 'I am much o. ed' अनुगृहीतोस्मि, महानयं प्रसादः. -ATION, s. अवश्यकता, कर्तव्यता, भारः, ऋणं, बंधः, धर्मः; 'free from the o. s of debt' ऋणमुक्त, मुक्तर्ण, अनृण; 'religious o.' व्रतं, नियमः, चोदना, विधिः. 2 संविद् f., समयः, प्रतिज्ञा, नियमः, अभ्युपगमः, संधा, सं-आ-श्रवः. 3 अनुग्रहः, उपकारः, उपकृति f.-तं, हितं, प्रियं; 'under o.' उपकृत-अनुगृहीत-a.; 'my o. s to you are immense' तव मयि उपकाराः संख्यातीताः; 'to lay under o. s' उपकृ; *See* (v.). -ATORY, a. अवश्यक, आवश्यक (की f.), अपरिहार्य, अवश्यकर्तव्य; oft. ex. by अवश्यं; *See* under COMPEL. -ING, a. अनुग्रह-उपकार-शील, उपकारिन्, अनुग्राहिन्, हित-उपकार-बुद्धि, सुशील, दक्षिण, अनुकूल, सुजन. -INGLY, adv. दाक्षिण्येन, सुजनतया, सानुग्रहं, सुशीलवत्. -INGNESS, s. उपकार-अनुग्रह-शीलं, सौजन्यं.

OBLIQUE, a. वक्र, कुटिल, जिह्म, असरल, तिर्यंच्, अनृजु, विषम; 'o. speech' वक्रोक्ति f., भंगि-गी f., उपरोधवचनं; 'o. case' अप्रधानकारकं. -LY, adv. वक्रं, कुटिलं, तिर्यक्, तिरः, साचि, जिह्मं. -NESS, s. वक्रता, कौटिल्यं, अनृजुता, वैषम्यं; 'o. of sight' वक्रदृष्टि f., दृष्टिवक्रता; 'o. of conduct' विमार्ग-उत्पथ-गमनं, असदाचारः, सत्पथभ्रंशः-त्यागः.

OBLITERATE, v. t. वि-,लुप् 6 P or c., प्र-परि-अव-मृज् 2 P or c., व्यामृश् 6 P or c., वि-,नश् c., उच्छिद् 7 P, उन्मूल् 10. -ION, s. लोपः, मार्जनं, व्यामर्शः, उच्छेदः.

OBLIVION, s. अ-वि-स्मृति f., अ-वि-स्मरणं; 'to bury into o.' विस्मृ 1 P. 2 दोषविस्मरणं. -OBLIVIOUS, a. स्मृतिहर (री f.), विस्मारक, विस्मृतिकर (री f.). 2 विस्मरणशील.

OBLONG, a. दीर्घाकार, आयत, दीर्घचतुरस्र.-s. आयतः.

OBLOQUY, s. निंदा, परि(री)वादः, अपवादः, वाच्यता, भर्त्सना, गर्हा; *See* CENSURE, CALUMNY.

OBNOXIOUS, a. वश, अधीन, आयत्त, योग्य, अर्ह; पात्रं, आस्पदं, विषयः in comp.; ex. by pot. pass. part.; *See* LIABLE, APT. 2 गर्हित, द्वेष्य, द्वेषणीय, गर्ह्य; अनिष्ट, अप्रिय, निंद्य, अप्रीतिकर (री f.). -LY, adv. अप्रियं, गर्ह्यतया. -NESS, s. अधीनता, वशता, पात्रता. 2 द्वेष्यता, गर्ह्यता.

OBSCENE, a. अश्लील, ग्राम्य, अनक्षर, अवाच्य, गर्ह्य, कुत्सित, दुरुक्त, बीभत्स, अश्राव्य, वियात, व्रीडावह. 2 अशुभ, अभद्र, अमंगल, अलक्षण. -LY, adv. अश्लीलं, अवाच्यं. -ITY, -NESS, s. अश्लीलता, अवाच्यता; 'o. of language' दुरुक्ति f., दुर्वाक्यं.

OBSCURE, a. तमोवृत, सांधकार, निष्प्रभ, मलिन, सतिमिर, निस्तेजस्, तमस्विन्. 2 अप्रसिद्ध, नातिविश्रुत, अविज्ञात, अख्यात, अल्पकीर्ति, लघुप्रतिष्ठ. 3 नि-,गूढ, दुर्बोध, क्लिष्ट, दुर्ज्ञेय, गहन, दुर्गम, विषम, अप्रकाश, अस्पष्ट, अस्फुट, गूढार्थ, अव्यक्त. -v. t. (तमसा) प्र-आ-च्छद् 10, आ-वृ 5 U, उप-रुध् 7U, अंतरयति (D.), मलिनी-तिमिरी-कृ 8 U, मलिनयति-तिमिरयति (D.), प्रभां-तेजः-हृ 1 P or क्षि 1, 5 P; 'o. with clouds' मेघैः आच्छद् or आवृ. 2 गहनीकृ, गूढीकृ; ex. by (a.). 3 (Fig.) प्रत्या-दिश् 6 P, प्रत्या-ख्या 2 P, प्रच्छद्; *See* ECLIPSE; 'o. er of Srî' प्रत्यादेशः श्रियः (V. 1). -ATION, s. मलिनीकरणं, कांति-प्रभा-हरणं. 2 तेजः-प्रभा-क्षयः-हानि f., निष्प्रभता, सांधकारता. -ED, a. तमोवृत, नष्ट-क्षीण-मलिन-क्षत-प्रभ-कांति-प्रकाश, मलिन, निस्तेजस्, हतज्योतिस्. -ITY, -NESS, s. निष्प्रभता, तेजः-कांति-क्षयः-हानिः, तमस् n., तमिस्रं, अंधःकारः. 2 गूढता, गहनता, अस्फुटता, दुर्बोधता. 3 अप्रसिद्धि-अविख्याति f., अल्पप्रतिष्ठा-कीर्ति f. -LY, adv. निष्प्रभं, सतिमिरं, सांधकारं. 2 गूढं, दुर्बोधं, असुगमं, अस्पष्टं, अव्यक्तं.

OBSECRATE, v. t. *See* ENTREAT.

OBSEQUIES, s. उत्तरकार्य-क्रिया, अंत्यकृत्यं, प्रेत-कार्य-क्रिया; अंत्येष्टिक्रिया, और्ध्वदेहिकक्रिया, अंत्येष्टि f., प्रेतसंस्कारः, पारलौकिकं. -OBSEQUIAL, a. और्ध्वदेहिक-और्ध्वदैहिक (की f.), अंत्येष्टियोग्य; by (s.) in comp.

OBSEQUIOUS, *a.* छंदोनुवर्तिन्,अत्यनुवर्तिन्, अत्यनुरोधिन्, वशवर्तिन्, वशानुग, विनत, नम्र; *See* OBEDIENT. –LY, *adv.* अत्यनुरोधात्, छंदोनुवर्तनेन. –NESS, *s.* अत्यनुरोधः, अत्यनुवृत्ति *f.*, छंदोनुवर्तनं.

OBSERVE, *v. t.* दृश् 1 P, ईक्ष् 1 A, वि-आ-अव-लोक् 1 A, 10, निरूप् 10, आ-,लक्ष् 10, निर्वर्ण् 10, आलोच् 10 (o. carefully); *See* LOOK. 2 उपलभ् 1A, वि-भू c., वि-ज्ञा 9U, अवधृ 10. 3 अनु-,पा c. (पालयति), रक्ष् 1 P, आ-अव-लंब् 1 A, आ-श्रि 1 U, आ-चर् 1 P, अनु-ष्ठा 1 P, सेव् 1 A, निषेव्, वि-धा 3 U, कृ 8 U; 'o. silence' मौनमाचर्; 'o. a fast' उपवस् 1 P; (rules) अनुवृत् 1 A, अनुसृ 1 P, अनुरुध् 4 A. 4 अभि-धा 3 U, वच् 2 P, ब्रू 2 U, वाक्यं वद् 1 P or उच्चर् c. –ABLE, *a.* दृश्य, प्रेक्षणीय, दृष्टिगोचर. 2 अनुष्ठेय, निषेव्य. –ANCE, *s.* पालनं, रक्षणं, आचरणं, सेवनं, आलंबनं, अनुसरणं, अनुवर्तनं, विधानं, अनुष्ठानं. 2 आचारः, व्यवहारः, रीति *f.*, चरितं, आचारकर्मन् *n.*; religious o.' व्रतं, नियमः, विधिः. –ANT, *a.* निरीक्षक, दर्शिन्, अवलोकिन्, सापेक्ष, अवहित, सावधान. 2 पालक, निषेवक, अनुसारिन्, आश्रित; आस्थित; 'o. of benefits' कृतज्ञ, कृतवेदिन्. –ATION, *s.* अवलोकनं, निरीक्षणं, अवेक्षणं, अवेक्षा, निरूपणं, आलोचनं. 2 वचनं, उक्ति *f.*, उदाहारः, वाक्यं; लेखः, लिखितं (in writing). –ATORY, *s.* वेधगृहं-शाला. –ER, *s.* प्रेक्षकः, अवेक्षकः, निरूपकः.

OBSOLETE, *a.* लुप्तप्रयोग, लुप्त, अप्रचलित, अप्रचल, गतव्यवहार, व्यवहारातीत, अव्यवहार्य. –NESS, *s.* लोपः, अप्रचारः, अव्यवहारः.

OBSTACLE, *s.* अंतरायः, प्रत्यूहः, व्याघातः, प्रतिबंधः, वि-प्रति-ष्टंभः, वारणं, विघ्नः, रोधः, उप-प्रति-अव-नि°-, विघातः, बाधः-धा, व्यवधानं, प्रत्यर्थिन् *m.*; 'though an o. to his meditation' प्रत्यर्थिभूतामपि समाधेः (K. I. 59).

OBSTETRIC, *a.* प्रसवसंबंधिन्. –*s.* (O. s) गर्भमोचनशास्त्रं, प्रसवकर्मन् *n.*

OBSTINATE, *a.* प्रतिनिविष्ट, अविनेय, अवश्य, अननुनेतव्य, निर्बंधवत्, निर्बंधशील, स्वैरिन्, दुर्दम, आग्रहिन्, दुराग्रह, प्रतीप, कठिन, दृढ. 2 दुःसाध्य, दुरुपचार. –LY, *adv*, निर्बंधेन, अतिदृढं, स्वैरं, साग्रहं, सनिर्बंधं, दुराग्रहेण. –NESS,–OBSTINACY, *s.* निर्बंधः, आग्रहः, स्वैरिता, दुराग्रहः, निर्बंधशीलं, दृढता, अवश्यता, प्रतिनिविष्टता, प्रतीपता.

OBSTIPATION, *s.* स्तंभनं, अवरोधः.

OBSTREPEROUS, *a.* बहुघोषकारिन्, महास्वन, तारस्वर, तुमुल, अत्युच्च, अतिपरुष (of noise). –LY, *adv.* उच्चैःस्वरेण, सकोलाहलं, तुमुलरवेण.

OBSTRUCT, *v. t.* रुध् 7 U, नि-वि-सं-प्रति-उप°-, वि-प्रति-व्या-हन् 2 P, वृ c. or वार् 10 वि,-स्तंभ् 9 P, or c., प्र-सं-बाध् 1 A, विघ्नयति (D.), नि-प्रति-षिध् 1 P. –ER, *s.* विघ्नकरः, प्रतिबंधकः-रोधकः. –ION, *s.* रोधनं, वारणं, प्रतिबंधनं. 2 विघ्नः, अंतरायः, प्रत्यूहः, प्रतिबंधः, व्याघातः; *See* OBSTACLE. 3 आ-,नाहः, अवरोधः, प्रतिबंधः. –IONIST, *s.* विघ्नकारिन् *m.*, प्रतिबंधशीलः. –IVE,–OBSTRUENT, *a.* संप्रतिरोधिन्, बाधक, प्रतिबंधक, विघ्नकारिन्, विघ्नकर (री *f.*), विघातिन्, निवारक.

OBTAIN, *v. t.* आप् 5 P, लभ् 1 A, विद् 6 U, अश् 5 A, अधिगम् 1 P, अर्ज् 1 P or c., आ-समा-सद् c., आ-प्रति-पद् 4 A, सं-पद् c.; oft. by इ-या-2 P; *See* GET. –*v. i.* प्रचल्-र् 1 P, प्रवृत् 1 A, सं-स्था 1 A; *See* HOLD. –ABLE, *a.* प्राप्य, लभ्य, अधिगम्य; 'easily o.' सुलभ, सुसाध्य; 'hardly o.' दुष्प्राप, दुर्लभ, दुराप. –ER, *s.* अर्जकः, प्रापकः. –ING, *a.* प्रचलित, प्रवृत्त, स्थापित, प्रसिद्ध. –MENT, *s.* लाभः, प्राप्ति *f.*, अधिगमः, अर्जनं.

OBTEST, *v. t.* *See* ENTREAT.

OBTRUDE, *v. i.* हठात्-आगंतुकतया-बलेन-प्रविश् 6 P or गम् 1 P or आक्रम् 1 U, 4 P. –*v. t.* बलेन प्रविश् c. or प्र-सृ c. 2 अतिनिर्बंधेन ग्रह् c. or प्र-दा 3 U or उपन्यस् 4 U. –OBTRUSION, *s.* बलेन प्रवेशः, अनाहूतगमनं, सधर्ष आक्रमः, आगंतुकभावः. —OBTRUSIVE, *a.* धृष्ट, आगंतुक (की *f.*), सप्रगल्भ, बलात् प्रवेशक. –LY, *adv.* बलेन, हठात्, प्रसभं, प्रसह्य.

OBTUND, *v. t.* घनीकृ 8 U, जडीकृ, तेजः हृ 1 P. –OBTUSE, *a.* जड, मंद, स्थूल, मूढ, मंद-जड-मति-बुद्धि-धी. 2 अतीक्ष्ण, अतीव्र, अप्रखर, धाराहीन, निर्धार, घन, स्थूल, निस्तेजस्, अनिशित; 'o. angle' बहिर्लंबः-विषमः-कोणः. –LY, *adv.* जाड्येन, जडवत्, अतीव्रं, घनं, स्थूलं. –NESS, *s.* जाड्यं, मूढता, मंदता; स्थूलता, घनता, अतीक्ष्णता,

OBVERT, *v. t.* अधोमुखीकृ 8 U; अभिमुखीकृ. –OBVERSE, *s.* मुखं, अग्रभागः.

OBVIATE, *v. t.* परिहृ 1 P, नि,-वृ c., निरस् 4 U, प्रतिकृ 8 U, प्रतिवि-धा 3 U, विहन् 2 P, निवृत् c., वि-प्रति-रुध् 7 U; *See* OBSTRUCT.

OBVIOUS, *a.* स्पष्ट, व्यक्त, स्फुट, परिस्फुट, सुस्पष्ट-व्यक्त, सुगम, सुप्रकाश, भिन्नार्थ, स्पष्टार्थ; 'o. to the sight' दृष्टिगोचर, प्रत्यक्ष, सुलक्ष्य. –LY, *adv.* स्पष्टं, व्यक्तं, स्फुटं, सुप्रकाशं, भिन्नार्थं. –NESS, *s.* स्पष्टता, स्फुटता.

OCCASION, *v. t.* उत्पद् c., जन् c. (जनयति), आवह् 1 P, उद्भू c., भू 1 P (with dat.). –*s.* अवसरः, समयः, कालः, अवकाशः, प्रस्तावः, प्रसंगः, प्रसरः, वेला, स्थानं; 'according to the o.' यथावसरं, यथाकालं, प्रसंगानुरूपं, प्रस्तावसदृशं. 2 प्रयोजनं, अपेक्षा, आकांक्षा, उपयोगः, कार्यं, कारणं. 3 वृत्तं, संगति *f.*, घटनं-ना. 4 निमित्तं, हेतुः, प्रयोजनं, कारणं, उपाधिः. –AL, *a.* नैमित्तिक-प्रासंगिक- (की *f.*), प्रसंगागत,

कार्योपात्त, निमित्तोपनत. 2 आगंतुक-आपतिक-(की *f.*), अनियत, अनित्य, अनियतकारण, अनुकाल, विरल, कादाचित्क (की *f.*); better by 'o.-ly'. —ALLY, *adv.* कदाचित्, कदापि, क्वचित्, काले काले, अंतरा अंतरा, प्रसंगवशात्, यथासंभवं, कार्यवशात्, निमित्तेन, प्रसंगानुरूपं. —ED, *a.* उत्पादित, उत्पन्न, जनित, जात, उदित, उद्भूत; gen. ex. by ज, उद्भव, प्रभव, मूल, कारण, निमित्त, कर्तृ, हेतु in comp.; 'fever o. by fatigues' श्रमनिमित्तः ज्वरः &c.

OCCIDENT, *s.* पश्चिमा, प्रतीची, पश्चिमा दिक्. —AL, *a.* पश्चिम, प्रतीच्य, पाश्चात्य, प्रतीचीन.

OCCIPUT, *s.* मस्तक-शिरः-पृष्ठं.

OCCULT, *a.* नि-,गूढ, दुर्ज्ञेय, दुर्बोध, गहन, गुप्त, अज्ञात, गूढार्थ. —ISM,—NESS, *s.* गूढता, गहनता.

OCCULTATION, *s.* आच्छादनं, ग्रासः.

OCCUPY, *v. t.* अधि-ष्ठा 1 P, अधि-वस् 1 P, अध्यास् 2 A, आश्रि 1 U, आविश् 6 P, आ-अध्या-क्रम् 1 U, 4 P (all with acc.); व्याप् 5 P, पूर् 10, व्यश् 5 A; वृत् 1 A (with loc.), पदं कृ 8 U or वि-धा 3 U, स्था; 'o. a throne' राज्यमारुह्-राजपदमधिरुह् 1 P; 'o. ing the honorable position of a housewife' श्लाघ्ये गृहिणीपदे स्थिता (S. 4). 2 (Possess) भुज् 7 A, धृ 1 P, 10, धा. 3 प्र-नियुज् 7 A, 10, व्या-पृ c., प्रवृत् c., व्यापृत-*a.* कृ; 'o. oneself' व्यापृ 6 A, व्यापृत-निरत-आसक्त-*a.* भू 1 P, प्रवृत् (with loc.); आत्मानं व्यापृ c. —ANCY, *s.* भोगः, भुक्ति *f.*, आवेशः, आक्रमः, अधिकारः. —ANT, *s.* भोक्तृ *m.*, भोगिन्, अधिकारिन्. —ATION, *s.* वृत्ति *f.*, आ-उप-जीविका, आजीवः, जीवनसाधनं-उपायः. 2 क्रिया, कृत्यं, प्रवृत्तिः, चरितं, चेष्टा. 3 नियोगः, अधिकारः, स्वकर्म-धर्मः. 4 अधिवासः, आवेशनं, अधिष्ठानं, व्याप्ति *f.*, आक्रमणं, भोगः, भुक्तिः; 'daily o.' नित्यकृत्यं; 'to do the usual morning o. s' उचितेषु प्रभातकरणीयेषु (S. 4). —ED, *a.* आविष्ट, आक्रांत, अध्युषित, अध्यासित, अधिष्ठित, व्याप्त, भुक्त, आश्रित. 2 व्यापृत, व्यापारिन्, व्यवसायिन्, प्रवृत्त, कर्मनिष्ठ-रत-उद्युक्त, क्रियावत्; gen. ex. by रत, निष्ठ, मग्न, व्यापृत, पर in comp., or by व्यापृ, प्रवृत्. —ER, *s.* अधिष्ठाता, भोक्ता.

OCCUR, *v. i.* वृत् 1 A, विद् 4A; जन् 4A, उत्पद् 4A, सं-भू 1 P. 2 उप-स्था 1 U, आगम् 1 P, उप-नम् 1 P; *See* BEFALL. 3 सं-,वृत्, समा-पद्, घट् 1 A, आ-निपत् 1 P, सं-भू; 'o. to the mind' मनसि उद्-इ 2 P or भू or जन् or स्फुर् 6 P or आविः-प्रादुः-भू; 'this did not o. to his mind' इति तस्य बुद्धौ न संजातं, इति तस्य हृदये नापतितं (Ka. 288); 'the following (thoughts) o. ed to my mind' आसीत्-समभूत्-मे मनसि; 'these two verses o. to our memory (mind)' स्मृत्युपस्थितौ इमौ द्वौ श्लोकौ (U.6). —RENCE, *s.* घटना-नं, वृत्तं, वृत्तांतः, भूतं, व्यतिकरः; संभवः, संगति *f.*, उत्पत्ति *f.*, उपस्थिति *f.*, उपागमः; 'of usual o.' नित्यसंभूत; 'of rare o.' दुर्लभ, चिरोपनत. —RENT, *s.* शत्रुः; *See* ENEMY. 2 वृत्तं, वृत्तांतः.

OCEAN, *s.* समुद्रः, सागरः, सिंधुः, उदन्वान्, अर्णवः, रत्नाकरः, अकूपारः, पारावारः; and comp. of धिः, निधिः, पतिः, राशिः with 'Water' q. v.; वारिराशिः, जलनिधिः, अब्धिः, अंबुधिः, वार्धिः, अपांपतिः, सरित्पतिः, तोयराशिः, अंबुराशिः, &c.; 'o.-bound' सागरांत, समुद्रवलय-रसन-मेखल; 'o. of misery' दुःखसागरः, व्यसनार्णवः. —*a.*, —IC, *a.* सामुद्र (द्री *f.*), समुद्रीय, (*s.*) in comp.

OCHRE, *s.* सुवर्णगैरिकं.

OCHLOCRACY, *s.* प्राकृतजनप्रभुत्वं.

OCTAGON, *s.* अष्टास्रं, अष्टकोणाकृति *f.* —AL, —OCTANGULAR, *a.* अष्टकोण, अष्टास्र.

OCTAVE, *s.* अष्टकं. —OCTAVO, *a.* अष्टपत्रक.

OCTENNIAL *a.* अष्टवार्षिक (की *f.*), अष्टवर्षीय. 2 अष्टवर्षस्थायिन्.

OCTOBER, *s.* आश्विनकार्तिकं.

OCTOGENARIAN, *a.* अशीतिवयस्क.

OCTOPETALOUS, *a.* अष्टदल.

OCTOSYLLABLE, *s.* अष्टाक्षरं.

OCTUPLE, *a.* अष्टगुण, अष्टविध.

OCULAR, *a.* चाक्षुष (षी *f.*), प्रत्यक्ष; 'o. evidence' प्रत्यक्ष-चाक्षुष-प्रमाणं, चाक्षुषज्ञानं. —LY, *adv.* प्रत्यक्षप्रमाणेन. —OCULIST, *s.* चक्षुः-नेत्र-वैद्यः.

ODD, *a.* विषम, असम, अयुग्म. 2 विलक्षण, असाधारण (णी *f.*), अपरूप, असंगत, अपूर्व, वि-,चित्र, अद्भुत, असामान्य, लोकोत्तर; 'game of o. and even' मुष्टिद्यूतं. —ITY,—NESS, *s.* वैषम्यं. 2 वैलक्षण्यं, वैचित्र्यं, असंगति *f.*, अपूर्वता, आचारवैलक्षण्यं. 3 कौतुकं. —LY, *adv.* विषमं, चित्रं, विलक्षणं. —ODDS, *s.* वैषम्यं, न्यूनाधिकभावः, तारतम्यं. 2 आधिक्यं, उत्कर्षः, विशेषः, श्रेष्ठता, विशिष्टता; 'fight at o.' अधिकबलेन शत्रुणा युध् 4 A.

ODE, *s.* गीतं, गानं, गेयं.

ODIOUS, *a.* गर्हित, कुत्सित, निंद्य, गर्ह्य, द्वेष्य, अप्रिय, द्वेषपात्रं-भाजनं-आस्पदं; कश्मल (report). 2 द्वेषावह, द्वेषोत्पादिन्. —LY, *adv.* कुत्सितं, गर्हणीयतया. —NESS, *s.* गर्ह्यता, द्वेष्यता. —ODIUM, *s.* वि-,द्वेषः, गर्हा, कुत्सनं, घृणा.

ODONTALGY, *s.* दंतशूलं-पीडा-व्यथा.

ODOUR, *s.* गंधः, वासः; 'strong or fragrant o.' सुगंधः, सुवासः, सौरभं-भ्यं, आ-,मोदः, परिमलः; 'bad o.' दुर्गंधः, पूतिगंधः. —OUS,-ODORIFEROUS, *a.* सगंध, सुगंधि, परिमलवत्, सामोद, गंधवत्, सुरभि, सवास.

Of, *prep.* Gen. ex. by genitive or by comp.; 'o. great strength' महाबल. 2 (Showing reference) अधिकृत्य, उद्दिश्य (with acc.), or by गत in comp.; 'by thinking o. her husband' भर्तृगतया चिंतया. 3 (Made of) by Tat. comp.; or मय (यी *f.*), निर्मित in comp.; or by derivatives; 'pot o. gold' हेमपात्रं, हेममयं or हैमं पात्रं. 4 (Partitive sense) by gen. or loc., or मध्ये, मध्यात् with gen. 5 (Apposition) ex. by comp. or by नाम *ind.*; 'the island o. Ceylon' सिंहलद्वीपं, सिंहलं नाम द्वीपं. 6 (Showing cause) by instr. or abl.; 'died o. fever' ज्वरेण मृतः.

Off, *adv.* दूरे, दूरं, दूरतः; (with verbs) ex. by अप, वि, निः, अव, उत्; 'o. with his head' उच्छेद्यतामस्य शिरः; 'o. with him to the prison' अपनीयतामसौ कारागृहं. –*a.*, 'far o.' दूरवर्तिन्, दूरस्थित-स्थ. –*interj.*, 'get o.', 'be o.' दूरं अपेहि, अपसर; 'o.-hand' प्रत्युत्पन्न, अचिंतितपूर्व, आकस्मिक (की *f.*), असावधान, निरपेक्ष; 'badly o.' दुःस्थित, दुर्गत, आपन्न, कृच्छ्रगत; 'well o.' सुस्थ, सुस्थित, संपन्न.

Offal, *s.* उच्छिष्टं, भुक्तावशेषः-षं, शेषान्नं, मलं, उच्छिष्टान्नं; मांसोच्छिष्टं, अवशिष्टमांसं.

Offend, *v.* अपराध् 4, 5 P (with gen. or loc.), विप्रियं-अनार्यं कृ 8 U or आचर् 1 P, अप्रसादं उत्पद् c.; कस्मिन्नपि पूजार्हे अपराद्धा शकुंतला (S. 4) '*S*akuntalâ has o. ed (committed an offence against) some respectable person'. 2 पीड् 10, व्यथ् c. (व्यथयति), क्लिश् 9 P, दु 5 P, सं-परि-तप् c. 3 (Against) अतिचर्, अति-व्यति-क्रम् 1 U, 4 P, लंघ् 1 A, 10, अतिवृत् 1 A, भिद् 7 P, भंज् 7 P, लुप् c. 4 रुष् c., क्रुध् c., प्र-,कुप् c., क्षुभ् c., कुपित-क्षुब्ध-*a.* कृ, कोपं जन् c. (जनयति); अव-अप-मन् c. 5 रुध् 7 U, बाध् 1 A, स्खल् c. (स्खलयति). –ed, *a.* कुपित, क्षुब्ध, प्रकोपित, क्रुद्ध, रुष्ट, जातामर्ष, संतप्त, असंतुष्ट. 2 बाधित, व्याहत, प्रतिरुद्ध; 'to be o.' कुप्-क्रुध्-रुष् 4 P. –er, *s.* अपराधिन् *m.*, अपराद्धः, दोषी, पापी, पातकी, कृतागस् *m.*, कृतापराधः, सदोषः, अपराधकृत्, कुकर्मन्. —Offence, *s.* अपराधः, दोषः, पापं, पातकं, अघं, एनस्-आगस् *n.*, दुरितं, कुकर्म, दुष्कृति *f.* 2 कोपः, क्रोधः, रोषः, अमर्षः, मन्युः, असंतोषः; 'easily taking o.' शीघ्रकोपिन्, सुलभकोप. 3 विप्रियं, अवमानः, अवज्ञा. 4 रोधः, बाधा-धः, स्खलनं; *See* Obstacle. –less, *a.* निर्दोष, निरपराध. —Offensive, *a.* कोपजनन (नी *f.*), रोषावह, अप्रिय, अतुष्ट-अप्रीतिकर (री *f.*), असुखद, अरम्य, विरुद्ध, कटु, असभ्य; 'o. to the ear' श्रवणकटु, कुश्राव्य; 'o. to the taste' विरस. 2 बीभत्स, जुगुप्सावह, गर्ह्य, कुत्सित, गर्हित, दुर् pr.; 'o. smell' दुर्गंधः, पूतिगंधः. 3 पीडाकर (री *f.*), अनिष्टावह, अहित, अपकारक, उपघातिन्; 'act on the o.' अपराधे अग्रेसरः भू 1 P; 'o. weapon' घातोपयुक्तं शस्त्रं. 4 आक्रामक, आअभि-घातिन्. –ly, *adv.* सापकारं, अप्रियं, सापराधं, सदोषं. –ness, *s.* अप्रियता, कटुता, गर्ह्यता, सापकारता, घातुकता.

Offer, *v. t.* उप-नी 1 P, उप-हृ 1 P, प्र-उप-क्लृप् c., उप-स्था c. (स्थापयति); प्र-दा 3 U, 1 P, प्रति-पद् c., निविद् c., ऋ c. (अर्पयति), निक्षिप् 6 P, स्पृश् c., उपहारं दा, उपढौकृ c. 2 उपन्यस् 4 U, उप-क्षिप्, पुरो नि-धा 3 U, अभि-धा, निर्-उद्-दिश् 6 P. 3 प्र-,दृश् c., प्रकटीकृ; प्रसृ c., प्रक्षिप्. 4 दा desid. (दित्सति-ते). 5 (As an oblation) उपहृ, निवप् 1 U, निर्वप्, उत्सृज् 6 P. ऋ c., उपहारीकृ, उपायनीकृ; 'o. mango sprouts in memory of Smara' स्मरमुद्दिश्य निवपेः सहकारमंजरीः (K. iv. 38); 'water o. ed to the Manes' निवापसलिलं; 'o. a burnt oblation' हु 3 P; 'o. a price' मूल्यं निर्दिश् or अभि-धा; 'o. violence' बलात्कारं कृ. –*v. i.* उप-स्था 1 U, आविः-प्रादुः-भू 1 P, उपनम् 1 P, दृश्-लक्ष् pass., आ-नि-पत् 1 P. 2 (Show willingness) ex. by desid. form, or वद् 1 P with future; 'he o.-ed to aid me' तव साहाय्यं करिष्यामीति उवाद. 3 प्रयत् 1 A, उद्यम् 1 A, चेष्ट् 1 A, उत्-जृंभ् 1 A; *See* Attempt. –*s.* उपन्यासः, उपक्षेपः, प्रस्तावः, अभिधानं, निर्देशः, वचनं, निवेदनं;. sometimes प्रार्थना; 'o. for marriage' विवाहप्रार्थना; 'makes an o. of' दित्सति. 2 प्रयत्नः, उद्यमः, प्रवृत्ति *f.* –er, *s.* उपहर्तृ *m.*, उपनेता, अर्पकः, निवेदकः, होता. –ing, *s.* उपहरण, उपनयनं, अर्पणं. 2 बलिदानं, बलिकर्म, निर्वपणं, हवनं. 3 उपायनं, उपहारः, उत्सर्गः, बलिः, दानं; *See* Oblation, Mane. 4 (Sacrificial) हविस् *n.*, हव्यं, हुतं, आहुति *f.* 5 अर्घः, उपायनं, प्राभृतं.

Office, *s.* कर्मन् *n.*, कार्यं, नियोगः, क्रिया, कृत्यं, व्यापारः, धर्मः, प्र-,वृत्ति *f.* 2 अधिकारः, पदं, पदवी, स्थानं, आस्पदं, नियोगः, अधिकारपदं. 3 विधिसंग्रहः. 4 उद्योगस्थानं, कार्यानुष्ठानगृहं, कार्यस्थानं; 'good o.' उपकारः, उपकृतं-ति *f.*, सुकृतं, अनुग्रहः, हितं; 'ill o.' अपकार, अपक्रिया, अनिष्टं; 'holding o.', 'in o.' प्राप्ताधिकार, अधिकारापन्न, पदारूढ, अधिकृत; 'dismissed from o.' च्युत-भ्रष्ट-अधिकार, पदभ्रष्टच्युत; 'permanent o.' स्थिराधिकारः; 'temporary o.' चलपदं. –Officer, *s.* अधिकृतः, नियुक्तः, नियोगिन्, अधिकारी, आधिकारिकः, कार्यवेक्षकः; 'o. of the king' राजपुरुषः-भृत्यः, प्रकृतिपुरुषः;

'o. of justice' धर्माधिकारी, न्यायाध्यक्षः ; 'military o.' सेनापदभाक्, सैनिकाध्यक्षः; बलाधिपः. —OFFICIAL, *s.* राजपुरुषः-भृत्यः, अधिकारी, नियोगी, पुरुषः, भृत्यः. —*a.* आधिकारिक (की *f.*), अधिकार-पद-विषयक-संबंधिन्; अधिकारयुक्त. —DOM, *s.* अधिकृतवर्गः. —LY, *adv.* अधिकारपूर्वं, अधिकारवशात्. —OFFICIOUS, *a.* अनधिकारचर्चाशील, परकार्यचर्चक; *See* MEDDLESOME. 2 उपकारशील, अनुकूल, हित. 3 अत्युपचार, अत्युपकारिन्. —LY, *adv.* अधिकारचर्चया, सप्रतिभं, प्रगल्भतया. —NESS, *s.* अन्याधिकारचर्चा, परकार्यचर्चा-प्रवेशः.

OFF-SCOURING, *s.* *See* DIRT.

OFF-SET, *s.* प्ररोहः, अंकुरः. —*v. t.* समीकृ 8 U.

OFF-SHOOT, *s.* प्ररोहः, अंकुरः, शाखा (lit. and fig.).

OFFSPRING, *s.* संतानः, संतति *f.*, प्रसूति *f.*, प्रजा, अपत्यं, प्रसवः, तोकं; 'male o.' पुत्रः, सूनुः, पुमपत्यं, पुंसंतानः; 'female o.' कन्या, सुता, स्त्र्यपत्यं; 'having no o.' निर्वंश, निरपत्य, निःसंतान.

OFFUSCATE, *v. t.* *See* OBSCURE.

OFT, OFTEN, (O.-times), *adv.* असकृत्, बहुशः-धा, बहु-अनेक-वारं, मुहुर्मुहुः, भूयो भूयः, अनेकशः, अनेकदा, वारंवारं, अभीक्ष्णं; 'how o.' कतिशः, कतिवाराम्; 'as o. as -so o.' यतिवारं-ततिवारं.

OGLE, *s.* कटाक्षः, कटाक्ष-अपांग-दर्शनं, नयनोपांतविलोकितं, अर्धवीक्षणं, भ्रूविलासः. —*v. t.* कटाक्षेण ईक्ष् 1 A or अवलोक् 1 A, 10, तिर्यक्-साचि-दृश् 1 P.

OGRE, *s.* क्रव्याद् *m.*, दैत्यः, दानवः, राक्षसः.

OIL, *s.* तैलं, स्नेहः, अभ्यंजनं ; 'pour o. on burning fire' क्षते क्षारं प्रक्षिप् 6 P; 'o.-bottle' कुतू *f.*; 'o.-cake' तैलकिट्टं, पिण्याकः, तिलकल्कं; 'o.-man' तैलिकः, तैलिन्, तैल-स्नेह-कारः, चाक्रिकः; 'o.-mill' तैलपेषणी. —*v. t.* तैलेन लिप् 6 P or अंज् 7 P or दिह् 2 U. —ED, *a.* तैलाक्त, स्नेहाक्त, अभ्यक्त. —Y, *a.* तैलमय (यी *f.*), सस्नेह, सतैल, तैल-युक्त-वत्, तैलाक्त; चिक्कण, मसृण, स्निग्ध, (fig. also).

OINTMENT, *s.* अंजनं, वि-,लेपः-पनं, प्र-अनु-लेपः, अभ्यंजनं, उपदेहः; 'perfumed o.' गात्रानुलेपनी, वर्ति *f.*, वर्णकं.

OLD, *a.* (Person) वृद्ध, स्थविर, प्रवयस्, परिणत, परिणतवयस्, जीर्ण, वयोवृद्ध, जरठ, जरत्, जरातुर, गतवयस्क, जीन, जरण, जरंड; 'to grow o.' जॄ 4, 9 P, ज्या 9 P, परिणम् 1 P; 'o. age' जरा, परिणामः, परिणति *f.*, वार्धकं-क्यं; वृद्धावस्था, वृद्धभावः, ज्यानि *f.*, जीर्णि *f.* ; 'o. lady' जरती, स्थविरा, वृद्धा, पलिता, पलिक्नी; 'o. man' स्थविरः, जरठः, वृद्धः, जरन्, पलितः. 2 (Showing age) ex. by वर्ष, वत्सर, वर्षीण-य in comp.; '8 years o.' अष्टवर्षीय, अष्टवर्ष-वर्षात्मक; 'a year o.' वर्षजात; '2 days o.' द्व्यहजात ; 'how o. are you' किं ते वयःप्रमाणं, कतिवर्षीयोसि. 3 (Not new) बहु-चिर-कालिक (की *f.*), चिर-दीर्घ-कालीन, चिरकाल-चिर-स्थायिन्, चिरंतन (नी *f.*); oft. by चिर in comp.; 'o. servant' चिरसेवकः, मूलभृत्यः, मौलः; 'o. friend' चिरमित्रं, चिरंतनसुहृद्. 4 जीर्ण, जर्जर, जर्जरित; 'o. cloth' चीरं, जीर्णवस्त्रं, पटच्चरं. 5 (Ancient) पुराण, प्राचीन, पूर्व, पूर्वतन (नी *f.*), प्राक्तन, पुरातन, प्रतन, प्रत्न, पौराण (णी *f.*), प्राक्-पूर्व-कालीन, पुरावृत्त; 'of o.', 'in olden times' पुरा, पुराकल्पे, पूर्वं. —EN, *a.* पुरातन, पुराण, प्राचीन. —ISH, *a.* ईषद्वृद्ध.

OLEAGINOUS, *a.* स्निग्ध, चिक्कण, मेदुर, मसृण.

OLEANDER, *s.* प्रति(ती)हासः, करवीरः, शतप्रासः, चंडातः, हयमारकः.

OLERACEOUS, *a.* शाकविषयक.

OLFACTORY, *s.* नस्य, नासा in comp.

OLIBANUM, *s.* तुरुष्कः, पिंडकः, सिह्लः, यावनः ; *See* INCENSE also.

OLIGARCHY, *s.* अल्पजनाधिपत्यं-प्रभुत्वं. —IC, *a.* अल्प-कतिपय-स्वामिक.

OLIO, *s.* *See* MEDLEY.

OLIVE, *s.* जितवृक्षः.

OMEN, *s.* निमित्तं, शकुनः-नं, लक्षणं, चिह्नं, अजन्यं, पूर्वलक्षण-चिह्नं, शुभाशुभलक्षणं ; 'of good o.' शुभ, मंगल, सुलक्षण ; 'good o.' सुलक्षणं ; 'ill o.' दुश्चिह्नं, दुर्लक्षणं, अपशकुनः, अजन्यं, अवलक्षणं, अशुभलक्षणं. —OMINOUS, *a.* अनिष्ट-अशुभ-शंसिन्-आवेदिन्, दुर्लक्षण, अलक्षण. 2 शुभ-मंगल-शंसिन्. 3 शाकुनिक (की *f.*), शकुननिमित्त in comp. —LY, *adv.* अशुभलक्षणेन, दुर्लक्षणपूर्वं.

OMIT, *v.t.* वृज् 10, वि-परि-°, परि-त्यज् 1 P, उत्-,क्षिप् 6 P, मुच् 6 P, उत्सृज् 6 P, अपास् 4 U, हा 3 P. 2 अतिक्रम् 1 U, 4 P, उपेक्ष् 1 A, लंघ् 1 A, 10, अतिचर् 1 P, अतिवृत् 1 A, लुप् c., न कृ 8 U or वि-धा 3 U or अनु-ष्ठा 1 P. —OMISSION, *s.* वर्जनं, त्यागः, उत्सर्गः, लंघनं, अतिक्रमः, अतिचारः, लोपः, उपात्ययः ; 'o. to do something' अननुष्ठानं, अविधानं, उपेक्षा.

OMNIFARIOUS, *a.* सर्वविध-प्रकार.

OMNIGENOUS, *a.* सर्वप्रकार-जातीय.

OMNIPOTENT, *a.* सर्वशक्तिमत्, सर्वसमर्थ-शक्ति, अमित-अपार-शक्ति. —OMNIPOTENCE, —CY, *s.* सर्वशक्तित्वं, अपार-अमित-शक्ति *f.*, सर्वसामर्थ्यं, अनंतशक्तिः.

OMNIPRESENT, *a.* सर्वगत, सर्वात्मक, सर्व-विश्व-व्यापिन्, विश्वात्मन्, विश्वरूप. —OMNIPRESENCE, *s.* सर्व-विश्व-व्याप्ति *f.*, विश्वात्मता, विश्वरूपता, सर्व-विश्वव्यापिता.

OMNISCIENT, *a.* सर्वज्ञ, सर्वविद्-वेदिन्-बुध्, सर्वदर्शिन्-साक्षिन्, विश्वनेत्र, त्रिकालज्ञ. —OMNISCIENCE, *s.* सर्वज्ञत्वं, सर्वज्ञानं.

OMNIVAGANT, *a.* सर्वगत, सर्वगामिन्.
OMNIVOROUS, *a.* सर्वभक्ष, सर्वभोजिन्.
OMPHALIC, *a.* नाभ्य, नाभि in comp.
OMPHALOCELE, *s.* नाभिस्फोटः.

ON, *prep.* Gen. ex. by loc., अधि pr., उपरि (with gen.). 2 (Time, place) by loc. ; 'o. the shore' तीरे, तीरोपांते, उपतीरं. 3 (With verbs of motion) by loc. or instr., (स्कंधेन-स्कंधे-छागं गृहीत्वा); 'go o. foot' पद्भ्यां गम् 1 P. 4 (Direction) by loc. or by तस्, त्र affixed ; 'o. the left' वामतः ; 'o. all sides' सर्वतः, सर्वत्र, समंततः. 5 (After) ex. by abl., or loc. abs.; 'o. his arrival' तस्मिन् आगते, तदागमनात् ; or by gerund ; 'o. hearing his speech' तस्य वचः श्रुत्वा. 6 (Concerning) विषय-संबंधिन् in comp. or by comp. ; 'a work o. morals' नीतिग्रंथः; 'so o.' इत्यादि (*a.*) ; 'hence, o. thy life' स्वजीवितं यदि वांछसि तर्हि द्रागपसर, अपसरास्मात्स्थानान्नो चेत् त्वं जीवितेन वियोक्ष्यसे ; 'o. o., to the combat' ननु युद्धाय प्रयात. -*adv.* अग्रतः, अग्रे, प्र pr.; 'having clothes o.' परिहितवस्त्र. -WARD, *a.* अग्रेसर (री *f.*), अग्रगामिन्; वर्धिष्णु. -WARDS, *adv.* अग्रे, अग्रतः, पुरतः.

ON-DIT, *s.* किल *ind.*; *See* RUMOUR.

ONE, *a.* एक ; 'o. of two' एकतर ; 'o. of many' एकतम ; 'only o.' अनन्य ; 'fixed on o. object' अनन्यविषय, अनन्यवृत्ति. 2 (Any) कश्चन, कोपि. 3 (Same) एक, तद् with एव ; 'at o. time' युगपत्, समं, एककाले ; 'having o. meaning' एकार्थ. -*s.* जनः, नरः, मनुष्यः; gen. not ex.; 'o. should always protect oneself' आत्मानं सततं रक्षेत् ; 'o. by o.' एकैकशः, एकैकं प्रत्येकं, पृथक्पृथक् ; 'o. day' कदाचित्, कदापि काले ; 'young or little o.s' शिशुजनः, बालाः; 'in o. way' एकधा; 'o.-self' आत्मन् *m.*, स्वयं *ind.* ; 'o.'s own' स्व, निज, आत्मीय, स्वीय, आत्म in comp. ; 'to be at o.' संमन् 4 A ; 'o.-eyed' एकाक्ष, काण, एकाक्षिहीन ; 'o.-sided' असम, एकपक्षीय, एकदेशीय; 'o. another' अन्योन्यं, परस्परं, इतरेतरं ; 'to be o.-self again' प्रकृतिमापद् 4 A, संज्ञां लभ् 1 A; *See* 'come to senses' under SENSE ; 'to bring to o.-self' प्रकृतौ स्था c. (स्थापयति). -NESS, *s.* एकत्वं, एकभावः, अद्वैतं, अभेदः, अविशेषः -ONCE, *adv.* सकृत्, एकवारं. 2 (O. upon a time) एकदा, अथैकदा, अथ कदाचित्. 3 पुरा, पूर्वं, प्राक्काले; 'at o.' समं, युगपत्, एककाले, समकाल-लं; सद्यः, सपदि, तत्क्षणात्, तत्क्षणेन, तत्काले ; 'all at o.' अकस्मात्, एकपदे; 'o. more' पुनरपि, भूयः, पुनः.

ONEIROCRITIC,-AL, *a.* स्वप्नविचारिन्.
ONEIROMANCY, *s.* स्वप्नार्थविचारः, स्वप्नार्थज्ञापनं.
ONEROUS, *a.* दुर्भर, गुरु, गुरुभार, दुर्वह, दुःसह.
ONION, *s.* पलांडुः, सुकंदकः.

ONLY, *a.* एक, एव, एकाकिन्, केवल, मात्र-मात्रक in comp., अद्वितीय, अनन्य ; 'having that as the o. recourse' तदेकशरण, अनन्यगतिक. -*adv.* केवलं, एव, मात्र in comp.; 'not o. but' न केवलं followed by अपि or किंतु.

ONOMATOPŒIA, *s.* अनुकारः; अनुकरणं.

ONSET, *s.* आ-अभि-क्रमः-मणं, अवस्कंदः, अभिसंपातः, आपातः, अभिग्रहः, अभ्याघातः.

ONSLAUGHT, *s.* अभ्याघातः; *See* ONSET.

ONTOLOGY, *s.* सत्त्वविद्या, भूतविचारः. -IST, *s.* सत्त्वविद्याज्ञः.

OOZE, *v. i.* (शनैः) स्रु-क्षर्-गल् 1 P, स्यंद् 1 A, प्रस्नु 2 P, री 4 A. -*v. t.* स्रु c., स्यंद् c., &c. -*s.* क्षरत्पंकः, मृदुमृत्तिका. 2 स्रवः, द्रवः, धारा. -ING, *s.* स्यंदनं, क्षरणं, स्रवः. -Y, *a.* सद्रव.

OPAQUE, *a.* प्रकाशाभेद्य, किरणाभेद्य; अस्वच्छ, कलुष, निष्प्रभ, सांधकार. -NESS,-OPACITY, *s.* अस्वच्छता, निष्प्रभता, कालुष्यं. 2 शुक्रं.

OPAL, *s.* पुलकः, विमलकः.

OPEN, *v. t.* (Door &c.) अपा-वि-वृ 5 U, उद्-घट् c., निरर्गलीकृ 8 U ; (lotus) विकस् c., प्रबुध् c., भिद् 7 P or c., (सूर्यांशुभिर्भिन्नमिवारविंदं K. I. 32), स्फुट् c.; (eyes) उन्मिल् c., उत्फल् c., उन्मिष् c.; (mouth) व्या-दा 3 P, जृंभ् c., उत्-वि-°; (hand) प्रसृ c., वितन् 8 U, विस्तॄ c. 2 वि-अंज् 7 P or c., विवृ, प्रकटीकृ, आविस्कृ, व्यक्तीकृ, प्रकाश् c.; 'o. the heart', 'o. oneself' हृद्गतं निविद् c. 3 (As meaning) व्या-ख्या 2 P, व्याचक्ष् 2 A, व्याकृ, व्यक्तीकृ, विवृ. 4 छिद् 7 P, निर्भिद्. 5 शुध् c., वि-परि°. 6 प्रारभ् 1 A, प्रस्तु 2 U, प्र-उप-क्रम् 1 A. -*v. i.* उन्मील् 1 P, विकस् 1 P, स्फुट् 6 P, दल् 1 P, भिद् pass., फुल्ल् 1 P. 2 विस्तॄ-विवृ pass., वि-,जृंभ् 1 A, प्रसृ c.-वितन्-pass.; (in other senses) pass. of roots in (*v. t.*). 4 (Ground) स्फुट्, विदल्, द्विधाभू, विदॄ-भिद्-pass. 5 प्रवृत् 1 A, प्रारभ् pass. -*a.* वि-अपा-वृत, असंवृत, उद्घाटित; (eyes) उन्मीलित, उन्मिषित ; (hand) प्रसारित, वितत, विस्तृत, विस्तीर्ण ; (mouth) विजृंभित, सजृंभ, उज्जृंभ, व्यात्त; (letter) उन्मुद्र, निरावेष्टन, अकोशस्थ. 2 निर्यंत्रण, असंबाध, निरर्गल, अनर्गल, अरुद्ध, उत्-वि-शृंखल, निरवग्रह; वि-,शुद्ध, निर्विघ्न; *See* FREE. 3 निर्व्याज, उत्तान, निष्कपट, सरल, ऋजु, निर्माय, उदार, शुद्धमति, विमलात्मन्; *See* FRANK ; 'o.-minded person' उत्तानहृदयः जनः. 4 सु-,प्रकाश, वि-,स्पष्ट, व्यक्त, प्रकट, अगूढ, अगुप्त. 5 निर्वृक्ष, अपादप; अनाश्रय. 6 गम्य, उपसर्प-

णीय; *See* ACCESSIBLE; 'lays him o. to his enemy' शत्रुगोचरे (विषये) तं पातयति; 'o. to dispute' विवादास्पदं, विवादग्रस्त-*a.*; 'lay o.' प्रकाश् c.; *See* (*v. t.*); 'o. air' अनावृतप्रदेशः-भूभागः; 'o. at one end' एकमुख; 'having gone out into the o. air' प्रकाशं निर्गतः (S. 4); 'o.-eyed' विवृताक्ष, उत्फुल्लनयन, सचेतन (fig.); 'o.-handed' उदार, मुक्तहस्त; 'o.-hearted' उदार, उत्तानहृदय, निर्व्याज; 'o.-mouthed' व्यात्तमुख. —ER, *s.* उद्घाटकः, प्रकाशकः. —ING, *s.* विवरणं, विवृति *f.*, उद्घाटनं; उन्मीलनं, विकासः, भेदः, स्फुटनं. 2 छिद्रं, रंध्रं, द्वारं, विदरः, स्फु(स्फो)टनं, भिदा. 3 प्रारंभः, उपक्रमः, प्रस्तावः, उपोद्घातः.—*a.* विकसत्, स्फुटत्. 2 प्रथम, आद्य, आरंभक. —LY, *adv.* प्रकाशं, सुस्पष्टं, व्यक्तं, परि-,स्फुटं. —NESS, *s.* विवृतत्वं, विवृति *f.*, निर्व्याजता, सारल्यं, निष्कापट्यं, दाक्षिण्यं, शुद्धमतिता, व्यक्तता, स्पष्टता, प्रकाशता, प्राकट्यं.

OPERA, *s.* संगीतनाटकं.

OPERATE, *v. i.* गुणं आवह् 1 P, कार्यं उत्पद् c. or दृश् c., फलं सं-पद् c. or साध् c., प्र-भू 1 P, प्रबलीभू; *See* EFFECT. 2 कृ 8 U, वि-धा 3 U, चेष्ट् 1 A, प्रवृत् 1 A, प्र-,यत् 1 A, व्याप्ट 6 A. 3 शस्त्रेण उपचर् 1 P or साध् c. —ION, *s.* क्रिया, कर्मन् *n.*, कृति *f.*, कार्यं, कृत्यं. 2 चेष्टितं, प्रवृत्ति *f.*, उद्यमः, उद्योगः, प्रयत्नः, व्यापारः. 3 प्रवर्तकत्वं, हेतुता, कारणं, साधनं; 'mental o.' मनोव्यापारः; 'quick in o.' आशुकारिन्, सद्यःफल, आशुगुणावह. 4 (Surgical) शस्त्रक्रिया-कर्म, शस्त्रोपायः, शस्त्रोपचारः. —IVE, *a.* कर्मकारिन्, प्रवर्तक, प्रयोजक, कारणीभूत. 2 गुणावह, गुणकारिन्, सिद्धिकर (री *f.*), प्रबल, सप्रभाव, प्रभविष्णु, कार्यक्षम. —*s.* कर्म-शिल्प-कारः, कारुः. —OR, *s.* कारकः, कर्ता, प्रवर्तकः.

OPEROSE, *a.* श्रम-कष्ट-साध्य.

OPHIOLOGY, *s.* सर्पविद्या.

OPHTHALMIA, *s.* नेत्राभिष्यंदः.

OPIATE, *a.* निद्रावह, निद्रा-स्वाप-कारिन्, स्वापन. —*s.* निद्रावहं औषधं, स्वापनं.

OPINE, *v. i.* मन् 4 A, तर्क् 10; *See* THINK. —OPINION, *s.* मतं, मति *f.*, तर्कः, बुद्धि *f.*, बोधः, अभिप्रायः, आशयः; 'such is my o.' इति मे मतिः; 'difference of o.' मति(त)भेदः, विप्रतिपत्ति *f.*, वैमत्यं; 'regard for public o.' लोकजन-लज्जा-भयं; 'secure the good o. of your husband' भर्तुर्बहुमता भव (S. 4). —ATED, -ATIVE, *a.* स्वमताभिमानिन्, मताग्रहिन्, दुराग्रहिन्.

OPIUM, *s.* अहिफेनं, अफेनं.

OPPONENT, *a.* विरुद्ध, प्रतिकूल, वि-प्रति-पक्ष, वैरिन्. —*s.* शत्रुः, अरिः, वैरी, वि-प्रति-पक्षः; प्रतियोद्धा, प्रतियोगी, प्रतिरोधकः.

OPPORTUNE, *a.* समयोचित, प्राप्तकाल, कालयोग्य, प्रस्तावसदृश (शी *f.*), प्राप्तावसर, सामयिक-प्रास्ताविक (की *f.*). —LY, *adv.* प्राप्तकालं, काले, स्थाने, यथासमयं, यथावसरं, प्रस्तावसदृशं, कालोचितं. —NESS, *s.* कालौचित्यं, प्रस्तावयोग्यता. —OPPORTUNITY, *s.* प्रस्तावः, अवकाशः, अवसरः, कालः, समयः, प्रसंगः, वेला, कार्यकालः, योगः. 2 साधनं, उपायः, प्र-युक्ति *f.*; 'lose an o.' कालं क्षिप् 6 P or हृ 1 P; 'seizing an o.' अवसरं गृहीत्वा, गृहीतावसर, लब्धावकाश; 'to await an o.' अवसरं प्रति-पा c. (पालयति).

OPPOSE, *v. t.* वि-नि-प्रति-रुध् 7 U, प्रतिबंध् 9 P, प्रतिकृ 8 U, प्रतिकूलयति (D.), प्रत्यव-स्था 1 A, वि-प्रति-हन् 2 P, बाध् 1 A, निवृ c.; (in fighting) प्रतियुध् c.; संमुखी-अभिमुखी-कृ 8 U or भू. —ED, *a.* विरुद्ध, विपरीत, प्रतिकूल, विप्रतिपन्न, बाधित, वारित, असंमत, विद्विष्ट; 'o. to the practice of the world' लोकाचारविरुद्ध, लोकासंमत, लोकविद्विष्ट. 2 इतर in comp.; 'o. to false' मिथ्येतर. —ER, *s.* विरोधकः, प्रतिहंतृ *m.* —OPPOSITE, *a.* सं-प्रति-अभिमुख (खी *f.*), संमुखस्थ. 2 विरुद्ध, विरोधिन्, विपरीत, प्रतिकूल, वि-प्रति-पक्ष, प्रतिद्वंद्विन्, विपर्यस्त, व्यत्यस्त, इतर in comp.; 'o. of natural' सहजेतर; सव्येतर, &c. 3 पर, अपर, अंतर in comp.; 'the o. bank' पारं, तीरांतरं, अपरतीरं. —*s.* विपर्ययः, व्यत्यासः, विपरीतं; by (*a.*). —ION, *s.* वैपरीत्यं, प्रातिकूल्यं, विरोधः, विपक्षता, विपर्य(र्या)यः, व्यत्ययः, व्यत्यासः, विपर्यासः. 2 विरोधः, प्रतिक्रिया, प्रतिबंधः, प्रतियोगः-यत्नः, व्याघातः, बाधः-धा. 3 विरोधकजनाः, प्रतियोगिपक्षः, विरोधिजनवर्गः. 4 विरुद्ध-द्वेष-भावः, वैरं. —LY, *adv.* सं-अभि-मुखं, विपरीतं, प्रतिकूलं, विपर्ययेण.

OPPRESS, *v. t.* पीड् 10, अर्द् 1 P or c., उपद्रु 1 P, बाध् 1 A, नि-अप-कृ 8 U, विप्र-कृ, उपप्लु 1 A, उपमृद् 9 P or c., कृष् c., अभिद्रुह् 4 P, अभिभू 1 P. —ION, *s.* पीडा, पीडनं, बाधः-धा, अर्दनं, उपमर्दः, उपप्लवः, उपद्रवः, नि-विप्र-अप-कारः, नैष्ठुर्यं, क्रौर्यं. —IVE, *a.* बाधक, पीडाकर (री *f.*), उपप्लविन्, उपद्रविन्, पीडाप्रद, अपकारक; निष्ठुर, अतिक्रूर, क्लेशद. 2 अतिभारवत्. —OR, *s.* प्रजापीडकः, उपप्लावकः, उपद्रविन् *m.*, अत्याचारः, निष्ठुरः, क्रूरचरितः.

OPPROBRIUM, *s.* निंदा, गर्हा, कुत्सा, तिरस्कारः, अपवादः, अवज्ञा, परिभवः, वाच्यता, धिक्कारः. —OPPROBRIOUS, *a.* गर्ह्य, निंदात्मक, गर्हारूप, निंदा-गर्हा-अर्थक; परुष, मुखर, द्वेष्य. —LY, *adv.* सापवादं, सतिरस्कारं. —NESS, *s.* गर्ह्यता, निंदकत्वं.

OPPUGN,-ER, *See* OPPOSE &c.

OPTATIVE, *a.* इच्छार्थक.

OPTIC,-AL, *a.* चाक्षुष (षी *f.*), चक्षुः-नेत्र in comp.

2 दृक्शास्त्रसंबंधिन्. –*s.* चक्षुरिंद्रियं, दृगिंद्रियं. –OPTICS, *s.* दृग्विद्या-शास्त्रं.

OPTIMACY, *s.* कुलीनवर्गः-जनाः.

OPTIMISM, *s.* उत्तमता, उत्कृष्टता.

OPTION, *s.* आभि,-रुचि *f.*, इच्छा, कामः, अभिलाषः, ईप्सितं; विकल्पः, विभाषा (in grammar); 'it is left to your o.' अत्र स्वरुच्या वर्ततां भवान्, यथाभिलाषं क्रियतां. –AL, *a.* वैकल्पिक-ऐच्छिक (की *f.*), काम्य, सविकल्प, यथाकाम, रुच्यधीन, स्वेच्छातंत्र. –ALLY, *adv.* विकल्पेन, अन्यतरस्यां, (हक्रोरन्यतरस्यां), वा, विभाषया.

OPULENT, *a.* श्रीमत्, धनिन्, धनाढ्य, वित्तवत्, धनवित्त-संपन्न, धनिक, समृद्ध, संपन्न, धनेश्वर, बहुधन. –OPULENCE, *s.* विभवः, ऐश्वर्यं, समृद्धि *f.*

OR, *conj.* अथवा, यद्वा, वा (never at beginning) repeated after each word, or after the last; (in questions) नु, (स्वप्नो नु माया नु मतिभ्रमो नु); उत, आहो, आहोस्वित् (correl. of किं 'whether'). 2 अन्यथा, इतरथा, अथवा, नोचेत्.

ORACLE, *s.* दैवी वाक्, देव-आकाश-वाणी, आकाशभवा-अशरीरिणी-सरस्वती. 2 प्रश्नदेवता-देवः. 3 प्रश्न-शकुनस्थानं. 4 प्रमाणं, आप्तः, प्रमाणपुरुषः; आप्तवचनं. –ORACULAR, *a.* देववाणीतुल्य, प्रमाणभूत, आप्त, प्रामाणिक (की *f.*).

ORAL, *a.* वाचिक (की *f.*), उक्त, अलिखित; 'o. message' वाचिकं. –LY, *adv.* वाचा, मुखद्वारा, अलिखितं.

ORANGE, *s.* नारंगः, नागरंगः, ऐरावतः, नादेयी, भूमिजंबुका; (fruit) नारंगफलं; 'o.-coloured' पिच्छिल, कौसुंभ (भी *f.*). –ORANGERY, *s.* नागरंगवाटिका.

ORATION, *s.* वाक्प्रबंधः, सालंकारं वचनं, प्रवचनं, सरस्वतीनिष्यंदः (fluent o.). —ORATOR, *s.* प्र-,वक्तृ *m.*, वाक्शौंडः-चतुरः, प्रवचनपटुः, सद्वक्ता, वाक्पटुः, वाग्मिन् *m.*, वागीशः, वाक्पंडितः-विशारदः, सभापंडितः. –ICAL, *a.* वाक्चातुर्यमय (यी *f.*), सालंकार, वागलंकारमय. –Y, *s.* वाग्मिता, वाक्पाटवं-चातुर्यं, सुवक्तृत्वं, वाक्शक्ति *f.*, वक्तृत्वं, सभापांडित्यं. 2 प्रार्थनागारं, उपासनास्थानं, भजनालयः. –ORATORIO, *s.* तालबद्धं धर्मकीर्तनं. 2 Oratory, q. v.

ORB, *s.* मंडलः-लं, बिंबः-बं, वर्तुलं, चक्रं, वृत्तं, गोलः-लं; 'the moon with entire (undiminished) o.' पूर्ण-अविकल-मंडलः चंद्रः, अखंडकलः शशी (Mal. 2). –ED,-ORBICULAR, *a.* मंडलाकार, वर्तुल, गोलाकृति. –ORBICULATE, *s.* वर्तुलं. –*a.* वर्तुल; *See* (*s.*).

ORBIT, *s.* कक्षा-क्षः, ग्रहपथः-मार्गः.

ORCHARD, *s.* वाटिका, वाटः-टी, उपवनं, वृक्षोद्यानं, वृक्षवाटिका; 'fruit o.' पुष्पवाटिका.

ORCHESTRA, *s.* वादित्रस्थानं-स्थलं. 2 वादकसमूहः, वादित्रगणः.

ORDAIN, *v. t.* वि-धा 3 U, आदिश् 6 P, निर्दिश्, संव्यव-स्था c. (स्थापयति), प्र-परि-क्लृप् c.; प्रचुद् 10, वच् 2 P, स्मृ 1 P; 'o. ed by Sāstras' शास्त्रोक्त, शास्त्रविहित-स्मृत, शास्त्रनिर्दिष्ट, &c. 2 (अधिकारे) नियुज् 7 A, 10, अधिकृ 8 U, or c., अभिषिच् 6 P, व्या-दिश्; (religiously) दीक्ष् 1 A, धर्मकर्मणि नियुज्. –ER, *s.* प्रकल्पकः, संस्थापकः, प्रचोदकः.

ORDEAL, *s.* दिव्यं, सत्यं, परीक्षा, प्रमाणं; 'o. by fire' कोशः-षः, तप्तदिव्यं; 'subjecting oneself to o.' दिव्यग्रहणं; 'trying o.' (fig.) तत्त्वनिकषा आपद्.

ORDER, *v. t.* आदिश् 6 P, निर्-नि-समा-व्या-दिश्, शास् 2 P, आ-ज्ञा c. (ज्ञापयति), प्रचुद् 10. 2 वि-धा 3 U, प्रणी 1 P, निर्वह् c.; *See* MANAGE. 3 परिक्लृप् c., क्रमेण विन्यस् 4 U or c. or स्था c. (स्थापयति) or नि-धा, संवि-धा, व्यव-स्था c., वि-,रच् 10; व्यूह् 1 U. 4 Ordain, q. v. –*s.* आज्ञा, आ-नि-देशः, निर्देशः, शासनं, नियोगः; 'written o.' आज्ञापत्रं; 'what are your o. s' को नियोगोऽनुष्ठीयतां; 'your Majesty's o. s will be obeyed' यथाज्ञापयति देवः. 2 प्र-,चोदनं-ना, विधिः, नियमः, विधानं, प्रेरणा, वचनं. 3 क्रमः, अनुक्रमः, परिपाटि-टी *f.*, आनुपूर्व्यं-र्वी, पर्यायः, परंपरा, पारंपर्यं, आवृत् *f.*; व्यवस्था, विन्यासः, विरचनं-ना, संविधानं; 'natural o.' आनुलोम्यं; 'inverted o.', 'reverse o.' प्रातिलोम्यं, व्युत्क्रमः, व्यतिक्रमः, विपर्ययः, विपर्यासः, व्यत्यासः, व्यत्ययः; 'o. of battle' व्यूहः, सैन्यरचना, बलविन्यासः; 'natural o. of words' अन्वयः; 'in natural or direct o.' अनुलोम-मतः; 'in inverted o.' प्रतिलोम-मतः; 'in good o.' सुस्थित, सुरक्षित, सुविहित; 'in o.' सुविन्यस्त, सुविरचित, व्यवस्थित, क्रमेण स्थापित; (*adv.*) क्रमेण, क्रमशः, यथाक्रमं, क्रमानुरूपं, अनुपूर्वशः, आनुपूर्व्येण, परिपाट्या; 'in o. to' ex. by अर्थे-र्थं in comp.; by dat. or by inf.; 'out of o.' अव्यवस्थित, भग्नक्रम, असुस्थ. 4 मार्गः, स्थिति *f.*, रीति *f.*, पद्धति *f.*, आचारः, नियमः; 'not breaking the (established) o.' स्थितेरभेत्ता (R. III. 27); स्थित्यै दंडयतो दंड्यान् (R. I. 25) 'for maintaining o. &c.'; 'breaking the o.' स्थितिभेदः, अतिपातः, पर्ययः, उपात्ययः. 5 गणः, वर्गः, वर्णः, जाति *f.*; 'the lower o. s' अवर-अधम-वर्णाः, अंत्यवर्गः, अधमजातीयाः. 6 आश्रमः, वर्णाश्रमः; 'head of a religious o.' आश्रमगुरुः. –ER, *s.* आज्ञापकः, आदेष्टृ *m.*; शास्ता. –LESS, *a.* क्रमहीन-शून्य, अक्रम, अनवस्थित. –LY, *a.* व्यवस्थित, यथाक्रम, क्रमानुगत, सक्रम, अनुपूर्व. –*adv.* यथाक्रमं, पर्यायेण, क्रमशः.

ORDINAL, *a.* क्रमवाचक. –*s.* क्रमिकसंख्या. 2 विधिसंहिता.

ORDINANCE, *s.* विधिः, मर्यादा, कल्पः, प्र-,चोदनं-ना, स्थिति *f.*, धर्मशास्त्रविधिः-मर्यादा, नियमः, सूत्रं. 2 नि-आ-देशः, शासनं, नियोगः.

ORDINARY, *a.* प्रचलित, प्रसिद्ध, प्रायिक (की *f.*), लोकप्रसिद्ध. 2 साधारण (णी *f.*), सामान्य, व्य(व्या)-वहारिक-आचारिक-नैयमिक (की *f.*), नित्य, यथाव्यवहार, यथापद्धति; 'something more than o.' विशेषः. 3 सामान्य, मध्यम, प्राकृत, अवर, नीतिविशिष्ट; 'an o. woman' नातिरूपवती स्त्री, सामान्यलावण्योपेता. –*s.* धर्माध्यक्षः. 3 साधारणभोजनस्थानं. –ILY, *adv.* सामान्यतः, साधारणतः, प्रायः, प्रायेण, प्रायशः.

ORDINATE, *a.* यथानुक्रम, अनुपूर्व. –ION, *s.* विधानं, कल्पनं, नियोगः. 3 दीक्षा; *See* ORDAIN.

ORDNANCE, *s.* युद्धास्त्रसामग्री, युद्धयंत्रसमूहः.

ORDURE, *s.* पुरीषं, विष्ठा, उच्चारः; *See* DUNG; 'to void o.' पुरीषं उत्सृज् 6 P or उच्चर् 1 P.

ORE, *s.* धातुः, खनिज-असंस्कृत-धातुः.

ORGAN, *s.* इंद्रियं, करणं, हृषीकं, विषयिन् *n.*; (of action) साधनं, करणं, उपकरणं, कर्मसाधनं, कर्मेंद्रियं; 'intellectual or internal o.' धींद्रियं, अंतरिंद्रियं. 2 द्वारं, मुखं, साधनं. 3 वंशी. –IC, –ICAL, *a.* इंद्रियसंबंधिन्, इंद्रियमय (यी *f.*) -विशिष्ट, इंद्रियोत्पन्न, सकरण; इंद्रिय in comp. –ISM, *s.* रचना, घटना. –IST, *s.* वंशीवादकः. —ORGANIZE, *v. t.* निर्मा 3 A, 2 P, सृज् 6 P, क्लृप् c., वि-रच् 10, घट् c. (घटयति). 2 वि-धा 3 U, संवि-धा, विन्यस् 4 U, क्रमेण स्था c. (स्थापयति), व्यव-स्था c., व्यूह् 1 U. 3 इंद्रियैः संयुज् 7 U, 10. –ATION, *s.* निर्माणं, सृष्टि *f.*, घटनं-ना, विन्यासः, व्यूहः-हनं, संविधानं. 2 भागविरचनं-कल्पना-विन्यासः. 3 सेंद्रियता.

ORGASM, *s.* आ-सं-वेगः, क्षोभः, उत्तापः, अत्यंतावेगः.

ORGY, *s.* रात्र्युत्सवः, नैशोत्सवः, प्रहर्षः, प्रमोदः.

ORIENT, *a.* उज्ज्वल, भास्वत् ; *See* BRIGHT. 2 उद्यत्, उदयमान. –*s.* प्राची, पूर्वदेशः. –AL, *a.* पौरस्त्य, प्राच्य, पूर्वदेशीय, पूर्व, प्राचीन. –*s.* पूर्वदेशवासिन् *m.* –ALIST, *s.* पूर्वदेशीयभाषाज्ञः.

ORIFICE, *s.* मुखं, छिद्रं, रंध्रं, द्वारं, सुषिरं, विवरं; 'o. of the ear' ऋषभः.

ORIGIN, *s.* मूलं, प्रभवः, आ-प्रा-रंभः, उत्पत्ति *f.*, उद्भवः, उद्गमः, संभवः, जन्मन् *n.*, जाति *f.*, आदिः, योनि *f.*, बीजं, हेतुः, आदिकारणं, उत्पत्तिस्थानं. 2 प्रयोजकः, प्रवर्तकः ; 'of low o.' हीनजाति-जन्मन्, दुर्योनि ; 'of good o.' मौल (ली *f.*), उत्कृष्टजाति. –AL, *a.* मौल, प्रथम, आदिम, आद्य, पूर्व, आदि-मूल-in comp.; 'o. passage' मूलं, मूलवचनं. 2 अपूर्व, अपूर्वकल्पित, अचिंतितपूर्व, स्वतः-स्वयं-कल्पित. 3 अपूर्वरचक, स्वतः-कल्पक. –*s.* मूलं, आदर्शः, मूलपत्रं-ग्रंथः-लेखः; *See* (*s.*). –ALITY, *s.* अपूर्वरचनाशक्ति *f.*, कल्पकत्वं-ता, अपूर्वकल्पनासामर्थ्यं, कल्पनाशक्तिः. 2 अपूर्वता. –ALLY, *adv.* आदौ, प्रथमं, प्रथमतः, प्रारंभे, मूलतः. –ATE, *v. t.* (प्रथमं) उत्पद् c., जन् c. (जनयति), उद्भू c., सृज् 6 P, क्लृप् c., प्रवृत् c., निर्मा 3 A ; प्रारभ् 1 A, उपक्रम् 1 A. –*v. i.* (प्रथमं) उत्पद् 4 A, जन् 4 A, प्र-उद्-सं-भू 1 P, प्रसृ 1 P; उद्-इ 2 P, उद्-गम् 1 P, प्रवृत् 1 A, उत्था 1 P; ex. by (*s.*) or by 'Arise', q. v. – ATION, *s.* प्रारंभः, प्रथमोद्भवः. –ATOR, *s.* प्रवर्तकः, उत्पादकः, कल्पकः, योजकः, आरंभकः, निर्माता ; also ex. by (*s.*).

ORION, *s.* मृगशीर्षं.

ORISON, *s.* प्रार्थना, स्तवः, स्तुति *f.*, उपासना, स्तोत्रं.

ORNAMENT, *s.* अलंकारः वि-भूषणं, आभरणं, मंडनं ; (decoration) अलंकरणं, भूषा, अलंक्रिया, संस्कारः, परिष्कारः, परिकर्मन् *n.*, प्रतिकर्म, प्रसाधनं, कल्पना, लज्जा, नेपथ्यं, शोभा ; (fig.) ललामं, अवतंसः, अलंकारः, तिलकः; 'o. to the Kshatriya family' क्षत्रियकुलावतंसः; आश्रमललामभूता ; पंडितकुलतिलकः &c.–*v. t.* अलंकृ 8 U, परिष्कृ, मंड् 10; भूष् 10, प्रसाध् c., शुभ् c., रंज् c. –AL, *a.* शोभावह, वि-, भूषक, शोभाप्रद, शोभा-भूषा-कर (री *f.*), अलंकरिष्णु; or by (*s.*). –ALLY, *adv.* विभूषणार्थं. —ATION, *s.* अलंकरणं, मंडनं; रंजनं.

ORNATE, *a.* कांतिमत्, विचित्र, शोभित, वि-,भूषित; सालंकार, अलंकारमय (यी *f.*), अलंकृत, कृतालंकार. –LY, *adv.* सालंकारं, शोभापूर्वं.

ORNITHOLOGY, *s.* पक्षिविद्या. –IST, *s.* पक्षिविद्याज्ञः.

ORPHAN, *s.*, *a.* अनाथः, मातापितृरहितः-हीनः, गतमातृकः, गतपितृकः. –AGE, *s.* अनाथता. 2 अनाथाश्रयः, अनाथालयः.

ORPIMENT, *s.* (Yellow) पिंजरं, पीतनं, तालं, आ-(अ)लं, हरितालकं.

ORRIS, *s.* वचा, उग्रगंधा, षड्गंधा, गोलोमी, शतपर्णिका; (white) हैमवती, श्वेतवचा.

ORTHODOX, *a.* शास्त्रीय, शास्त्रसंमत, शास्त्रमतानुसारिन्, धर्मपरायण, सत्यधर्मानुरोधिन्. –Y, *s.* शास्त्रानुसारः, शास्त्रमार्गावलंबनं, धर्मपरायणता.

ORTHOEPY, *s.* शुद्धोचारः-रणं. –IST, *s.* शुद्धोचारणविद् *m.*

ORTHOGON, *s.* समचतुरस्रं. –AL, *a.* समकोणाकृति.

ORTHOGRAPHY, *s.* अक्षर-वर्ण-विन्यासः, वर्णविन्यासशास्त्रं-विचारः.

ORTS, *s.* *See* OFFAL.

OSCILLATE, *v. i.* दोलायते (D.), प्रेंख् 1 P, इतस्ततः चल् 1 P or कंप् 1 A or स्फुर् 6 P or स्पंद् 1 A; *See* WAVER. –ION, *s.* आंदोलनं, प्रेंखणं, इतस्ततः चलनं, गतागतं.–ING,-ORY, *a.* दोलायमान, स्पंदमान, स्फुरित.

Oscitant, *a.* वि-,जृंभमाण, जृंभित. 2 निद्रालु, तंद्रालु. –Oscitate, *v. i.* वि-,जृंभ् 1 A.

Osprey, *s.* कुररः-री, उत्क्रोशः.

Osseous, *a.* अस्थिमय (यी *f.*). –Ossicle, *s.* अस्थिकं. –Ossify, *v. t.* अस्थिसात्कृ 8 U. –*v. i.* अस्थिसात् भू 1 P. –Ossuary, *s.* अस्थिस्थानं.

Ostensible, *a.* व्यक्त, सुप्रकाश, प्रकट, प्रसिद्ध, अगूढ. –Ostensibly, *adv.* प्रकाशं-शतः, प्रकटं, अगूढं.

Ostentation, *s.* आडंबरः, दंभः, दर्पः, विकत्थनं, आत्मश्लाघा. —Ostentatious, *a.* आडंबरप्रिय-शील, दंभशील, दांभिक (की *f.*); आत्मश्लाघिन्. –ly, *adv.* साडंबरं, दंभपूर्वं, सदंभं.

Osteocope, *s.* अस्थिवेदना.

Osteology, *s.* अस्थिवर्णनं-विद्या.

Ostler, *s.* *See* Groom.

Ostracism, *s.* विवासनं, निर्वासनं.

Other, *a.* अन्य, अपर, इतर, पर, अन्यतर (*pron. a.*) अंतरं in comp. 2 भिन्न, व्यतिरिक्त. 3 अव-,शिष्ट ‘the o. s’ अपरे, अन्ये, इतरे, शिष्टजनाः; ‘at o. times’ अन्यदा; ‘the o. day’ अन्येद्युः, नातिचिरं. –wise, *adv.* अन्यथा, इतरथा. 2 वा, न-नो-चेत्, अन्यथा, अथवा.

Otter, *s.* उद्रः, जलमार्जारः.

Ought, *v.* Ex. by अर्ह् 1 P; gen. by pot. pass. part. or by pot.; *See* Must.

Ounce, *s.* टंकद्वयं, पणार्धं. 2 द्वीपिन् *m.*

Oust, *v. t.* निःसृ c., निष्कस् c., अपास् 4 U, निराकृ 8 U, बहिष्कृ; *See* Dispel, Drive out.

Out, *adv.* बहिः (with abl.); ‘gone o.’ बहिर्गत; (with verbs) ex. by निर्, वि, अप, प्र, बहिः; ‘to be o.’ प्रकाशतां गम् 1 P, प्रकाशीभू 1P; ‘the secret is o.’ रहस्यं भिन्नं. 2 निर्वापित-*a.*; ‘to be o.’ प्रशम् 4 P, निर्वा 2 P; ‘the lamp was o.’ दीपः प्रशशाम-निर्ववौ. 3 क्षीण-विगत-अवसित-*a.* 4 अंतं-शेषं-यावत्, आ-अवसानात्; ‘hear me o.’ शृणु मे सावशेषं वचः (M. 4); ‘let me speak o.’ वचः समापयानि तावत्. 5 उच्चैः, उच्च-तार-स्वरेण, मुक्तकंठं. 6 व्यक्तं, प्रकटं, स्पष्टं, स्फुटं; ‘o. upon (with) the thief’ दूरीक्रियतां-निःसार्यतां-असौ चौरः; ‘o. of’ बहिः with abl., or by abl. ; (among) मध्यात् with gen., or by gen. or loc.; (exclusion) ex. by अ, निर्, वि, अप, गत, नष्ट, त्यक्त in comp.; ‘o. of the road’ त्यक्त-भ्रष्ट-मार्ग; ‘o. of one's mind’ हत-नष्ट-बुद्धि, बुद्धिभ्रष्ट; ‘o. of place’ अस्थान, अनुचित; ‘o. of order’ उत्सूत्र, क्रमहीन, विधिविरुद्ध, अव्यवस्थित; ‘o. of tune’ अप-वि-स्वर; (showing motive) ex. by instr. or abl.; (beyond) अतीत, अगोचर in comp., अति pr.; ‘o. of sight’ नयनविषयातीत, दृग्गोचर, अंतर्हित; ‘o. of one's reach’ अविषय, अप्राप्य; ‘o. of one's power’ अतिशक्ति; ‘o. of use’ गत-लुप्त-व्यवहार, अव्यवहारित; ‘o. of fashion’ लोकाचारविरुद्ध; ‘o. of time’ गतकाल, कालातीत; ‘o. of hope’ गताश, निराश; ‘o. of man's strength’ अतिमानुष; ‘to pass o. of sight’ नयनविषयं अति-इ 2 P or अतिक्रम् 1 U, 4 P; ‘stand o. of hearing’ श्रवणागोचरस्तिष्ठ; ‘o. of employment’ क्षीणवृत्ति, निर्व्यापार, नियोगहीन; ‘o. of office’ भ्रष्ट-च्युत-अधिकार, अधिकारभ्रष्ट-च्युत; ‘o. of hand’ सद्यः, सपदि; ‘o.-door’ द्वारबहिःस्थ, बहिःप्रदेशकृत; ‘o.-house’ उपगृहं, बहिर्गृहं. –*interj.* अपेहि, अपसर, धिक् (with acc.). –er, –ermost, *a.* बाह्य, बहिःस्थ, बहिर्भव, बहिर्वर्तिन्, बहिः in comp. –most, *a.* अतिबाह्य. –ward, *a.* बाह्य, बहिः in comp. 2 दृश्य, आविर्भूत, प्रकट, प्रकाश. 3 अवास्तव (वी *f.*), मिथ्या-मृषा in comp. –*adv.* (O. s) बहिः, बहिर्भागे-देशे. –wardly, *adv.* बाह्यतः, बहिः, बहिर्भागे. 2 अवस्तुतः, मृषा, मिथ्या, कृतकं, कृत्रिमं.

Out-act, *v. t.* अत्याचर् 1 P, अतिकृ 8 U.

Out-balance, *v. t.* *See* Outweigh.

Out-bid, *v. t.* अधिकमूल्यदानेन अभि-भू 1 P.

Outbreak, Outburst, *s.* उद्भेदः, निर्गमः, प्रादुर्भावः, उदयः, आस्फोटः.

Outcast, *s.* निष्कासितः, बहिष्कृतः, जातिबाह्यः-भ्रष्टः, जाति-वर्ण-पतितः, अपांक्तः, अपांक्तेयः, पतितः. 2 चं-(चां)डालः, अपसदः, हीनजातिः-वर्णः, विहीनः, विवर्णः, नीच-अधम-वर्णः; *See* Mean.

Outcry, *s.* उत्क्रोशः, आक्रोशः, कोलाहलः, कलकलः, तुमुलं, संहूति *f.*, उद्घोषः; ‘popular o.’ जनरवः-संहूतिः. 2 आर्तनादः-रवः.

Outdo, *v. t.* अति-शी 2 A, अतिक्रम् 1 U, 4 P; *See* Excel.

Outfit, *s.* सज्जा, सामग्री, उपकरणसंभारः, परिच्छेदः.

Outgo, *v. t.* अति-इ 2 P, अतिचर् 1 P, अतिगम् 1 P. –ing, *s.* व्ययः, अपचयः, क्षयः, विनियोगः.

Outgrow, *v. t.* अतीत्य वृध् 1 A, अति-वृध्.

Outlandish, *a.* विजातीय, विदेशीय, विदेशज, पर-अन्य-देशीय. 2 असंगत, ग्राम्य, अशिष्ट, असभ्य.

Outlaw, *s.* निषिद्धाभ्युदकः, न्यायरक्षणबाह्यः. –*v. t.* न्यायाद् बहिष्कृ 8 U, अभ्युदकदानं निषिध् 1 P.

Outlay, *s.* (द्रव्यादेः) व्ययः, अपचयः, विनियोगः; धनोत्सर्गः, द्रव्यव्ययः.

Outlet, *s.* द्वारं, मुखं, निर्गमः, परि(री)वाहः, जलोच्छ्वासः, निर्गमद्वारं; स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते (K. iv. 26) ‘finds an o.’ &c.

Outline, *s.* बाह्यले(रे)खा, आकारमात्रं, वस्तुमात्रं. 2 पांडुलेख्यं, चित्रारंभः. 3 स्थूलवर्णनं, असूक्ष्मविचारः.

Outlive, *v. t.* अति-जीव् 1 P.

Outlook, *s.* अवेक्षणं, अवेक्षा.

OUTMARCH, *v. i.* अग्रे या 2 P, अति-या.

OUTNUMBER, *v. t.* संख्यया अति-शी 2 A, अधिकसंख्य-*a.* भू 1 P, अधिकीभू.

OUTPOUR, *v. t.* वृष् 1 P, निषिच् 6 P, उत्सृज् 6 P. –*s.*, –ING, *s.*, वर्षः,-र्षणं, उत्सर्गः.

OUTRAGE, *s.* साहसं, आधर्षः-र्षणं, बलात्कारः, अन्यायः, अत्याचारः, उपमर्दः, उपद्रवः, अभि-,द्रोहः, उपघातः, प्रमाथः, मर्यादातिक्रमः. 2 न्यक्कारः, धिक्कारः; अवलेपः, उत्सेकः. –*v. t.* कलंकयति (D.); (a woman) सतीत्वाद् भ्रंश् c. or च्यु c., दुष् c. (दूषयति), आधृष् c.; उपमृद् c., प्रमंथ् 9 P or c., उप-द्रु 1 P, अभिद्रुह् 4 P, न्यक्कृ 8 U, धिक्कृ; *See* INSULT also. –OUS, *a.* दारुण, घोर, उग्र, अतिदुष्ट, उद्दंड, प्रमाथिन्, अतिसाहसिक (की *f.*), राक्षस (सी *f.*), निर्लज्ज, वीतत्रप, अतिदुराचार. –OUSLY, *adv.* घोरं, दारुणं, अत्याचारपूर्वं, अतिसाहसेन. –OUSNESS, *s.* दारुणता, &c.

OUTREACH, *v. t.* अतिगम् 1 P, अति-इ 2 P.

OUTRIDER, *s.* अश्वारूढः परिचरः.

OUTRIGHT, *adv.* सद्यः, सपदि, तत्क्षणं-णे, अविलंबितं. 2 सर्वथा, सार्यंतं, सम्यक्, सु-अति pr. 3 स्पष्टं, व्यक्तं, अवक्रं.

OUTROOT, *v. t. See* ERADICATE.

OUTRUN, *v. t.* अतिधाव् 1 P, धावने अति-शी 2 A.

OUTSET, OUTSTART, *s.* प्रारंभः, उप-प्र-क्रमः, आदिः, उपोद्घातः; ' at the very o. ' प्रथममेव, आदावेव, उपोद्घातरूपेण.

OUTSHINE, *v. t.* आधिकं प्रकाश् 1 A or द्युत् 1 A, अतिशुभ् 1 A or रुच् 1 A.

OUTSIDE, *s.* बहिर्भागः, बहिःप्रदेशः, बाह्यभागः; oft. by बहिः; ' charming on the o. only ' बहिरेव मनोरम. 2 परमावधिः. –*adv.* बहिः (with abl.), बहिर्भागे. –*a.* बाह्य, बहिस्थ, बहिः in comp. –ER, *s.* बहिर्देशवासिन् *m.*, अन्यदेशीयः, पारदेशिकः; *See* FOREIGNER.

OUTSKIRT, *s.* उपांतः, पर्यंतः, सीमा, परिसरः, प्रांतः, उत्संगः; ' o. of a village ' ग्रामांतः, उपकंठं; ' o of a forest ' वनांतः.

OUTSPOKEN, *a.* स्पष्ट-स्फुट-वादिन्, स्फुटवक्तृ; *See* CANDID, FRANK.

OUTSPREAD, *v. t.* विस्तृ c., प्र-वि-सृ c., वितन् 8 U.

OUTSTANDING, *a.* अशोधित, अनिष्पन्न, अनिस्तीर्ण.

OUTSTRETCH, *v. t.* प्र-सृ c., उच्छ्रि 1 U or c.; oft. by उत् in comp.; ' with the neck o. ed ' उत्कंधर; ' with hands o. ed as far as the wrist ' आपूर्वभागोत्थितैः करतलैः (S. 4).

OUTSTRIP, *v. t.* अति-इ 2 P, अतिक्रम् 1 U, 4 P अतिवृत् 1 A, अतिचर् 1 P, लंघ् 1 A, 10; oft. by अति in comp.; ' o. s the senses ' इंद्रियगोचरो न वर्तते, अतींद्रियः.

OUTVIE, *v. t. See* EXCEL.

OUTWEIGH, *v. t.* भारेण-भारतः-अतिरिच् pass. (with abl.), अधिकभारीभू 1 P, (Excel, q. v.).

OUTWIT, *v. t.* प्र-तॄ c., वंच् 10, वि-प्र-लभ् 1 A; *See* CHEAT.

OVAL, OVATE, *a.* अंडाकार, अंडाकृति. –*s.* अंडाकारः, अंडाकृति *f.*, कक्षा-क्षः.

OVARIOUS, *a.* अंडयुक्त, अंडरूप. –OVARY, *s.* अंडाशयः.

OVEN, *s.* चुल्लि-ल्ली *f.*, कंदु *m. f.*, आपाकः, उखा.

OVER, *prep.* उपरि (with gen.) or in comp., अधि-ऊर्ध्व in comp.; अधिक in comp.; ' o. 20 ' विंशत्यधिक; gen. ex. by अति, अधि, अभि, उत्, सं, with verbs; ' cross o. a river ' नदीपारं गम् 1 P. 2 (Superiority), प्र, अधि, वि in comp.; ' wander o. ' परिभ्रम् 1, 4 P, पर्यट् 1 P; ' o. against ' अभि-सं-मुखं, अभि-प्रति pr. –*adv.* परपारे, अन्यतीरे, पारं-रे. 2 प्रति, सं, नि, with verbs; ' hand o. to another ' अन्यस्मिन् निक्षिप् 6 P or संक्रम् c. 3 अधिकं, भूयः, अतिरिक्तं. 4 (Beyond) अति pr. 5 अव-,शिष्ट, उद्वृत्त, अंतरित (*a.*); अधिक in comp. 6 सार्यंतं, शेषं यावत्, ex. by पार; ' to read o. ' अधि-इ 2 A, पारं गम्. 7 अत्यंतं, अति-सु-pr., अधिकं, अतिशय-एकांत in comp.; as a prefix of verbs, ex. by अति, अत्यंतं. 8 अतीत, गत, अतिक्रांत, वृत्त, भूत; ' o. again ' पुनरपि; ' o. and o. again ' पुनः पुनः, मुहुर्मुहुः, वारंवारं; ' o. and above ' अपरं च, अवशिष्ट- *a.*; ' to be o. ' ex. by अवसित-अतीत-समाप्त-*a.*; *See* FINISH; 'my work is o. ' समाप्तकार्योस्मि; ' in a moment all will be o. with him ' क्षणेन स समाप्तजीवितः-परासुः-भवेत्.

OVERACT, *v. t.* अतिशयेन कृ 8 U, अत्याचर् 1 P.

OVERAWE, *v. t.* आकुलीकृ 8 U, भयेन उपहन् 2 P or अभिभू 1 P. –ED, *a.* संभ्रमाकुल, भयोपहत.

OVERBALANCE, *v. t. See* OUTWEIGH. –*s.* अति-अधिक-भारः.

OVERBEAR, *v. t.* वशीकृ 8 U, दम् c. (दमयति); नि-पत् c., धृष् c. –ING, *a.* धृष्ट, उद्धत, दृप्त, अवलिप्त, गर्वित, उत्सिक्त; *See* HAUGHTY. –INGLY, *adv.* सावलेपं, सदर्पं, उद्धतं.

OVERBOARD, *adv.* नौस्थानात्, नौकाया बहिः, मध्येसमुद्रं, अर्णवमध्ये.

OVERBURDEN, *v. t.* अतिभारं न्यस् 4 U, अतिभारेण पीड् 10 or अर्द् 1 P or c. –ED, *a.* अतिभाराक्रांत.

OVERCAST, *v. t.* (मेघैः) आ-वृ 5 U, प्र-आ-च्छद् 10; कलुषीकृ 8 U, तिमिरीकृ, साभ्र-*a.* कृ. –*a.* मेघावृत, मेघाच्छन्न, तमोवृत, साभ्र, सतिमिर, घनावरुद्ध.

OVER-CAUTIOUS, *a.* अत्यवहित.

OVERCHARGE, *v. t.* अतिमूल्यं अर्थ् 10 A. 2 Overload, q. v. –*s.* अतिमूल्यप्रार्थनं.

OVERCLOUD, *v. t. See* OVERCAST.

OVERCOME, *v. t.* अतिक्रम् 1 U, 4 P, तॄ 1 P, पारं गम् 1 P, आ-अधि-रुह् 1 P, अति-इ 2 P; अतिशी 2 A, अतिरिच् pass. 2 जि 1 P, पराजि (A), परा-अभि-भू 1 P, वशीकृ 8 U, दम् c. (दमयति). 3 प्रधृष् c., पर्यामृश् 6 P; (with fatigue &c.) आकुलीकृ, आक्रम्, खिद् c., अव-सद् c., better by (*a.*); 'o. by the force of truth' सत्यबलेनाभिभूत, भूतार्थवचनेन कुंठितमति or किंवक्तव्यतामूढ; 'I am o. by sleep caused by fatigue' अपह्रिये परिश्रमजनितया निद्रया (U. 1). –*a.* परा-, जित, दांत, वशीकृत &c. 2 अभिभूत, व्याकुल, पर्याकुल, आकुल, आर्त, आतुर, ग्रस्त, आक्रांत, आविष्ट, परिगत, gen. in comp.

OVERDO, *v. t.* अतिशयेन कृ 8 U. 2 अति-पच् 1 P. –OVERDONE, *a.* अतिपक्क. 2 अतिश्रांत, परिक्लांत.

OVEREAT, *v. t.* अति-खाद् 1 P or अद् 2 P.

OVER-ESTIMATE, *v. t.* अति-गण् 10 or मन् 4 P. –*s.* अतिगणना.

OVERFATIGUE, *v. t.* अति-खिद् c. or श्रम् c. –*s.* अतिखेदः, अतिश्रमः.

OVERFLOOD, OVERFLOW, *v. t.* जलेन आ-सं-प्लु c., परिवह् c., उपरि स्रु c., उत्सिच् 6 P or c. –*v. i.* परिवह् 1 P; उत्सिच् pass., प्रवृध् 1 A, स्फाय् 1 A; gen. ex. by अति-,पूर्ण, उत्सिक्त, आ-सं-प्लुत, स्फीत-वृद्ध-जल, प्रचुर, उपचित, आढ्य, घन, अतिरिक्त, उद्रिक्त, वृद्ध, स्फीत; 'with an eye o. ing with joy' आनंदपरिवाहिणा चक्षुषा (S. 4); 'a heart o. ing with kindness' दयाघनं हृदयं; 'my curiosity first o. ed' प्रथमं कुतूहलं मपरिवाहमासीत् (S. 2); 'her eyes o. ed with tears' अश्रुपरिप्लुतेक्षणा सा, अश्रुजलेनाप्लुते नेत्रे. –*s.* पूरोत्पीडः, आप्लावः, उत्सेकः, जलवृद्धि *f.*, तोयाप्लावः, जलोत्सेकः. 2 उद्रेकः, अतिरेकः, वृद्धि *f.*, स्फीति *f.*, उपचयः, आधिक्यं, प्राचुर्यं. –ING, *a.* उत्सिक्त, अति-परि-पूर्ण, अति-, बहुल, प्रचुर, आ-सं-प्लुत, उपचित, उद्रिक्त, अतिरिक्त; 'o. with water' जलप्लावित, आप्लुतोदक; 'o. the boundary' अतिवेल. –*s.*, *See* (*s.*); 'to fill to o.' आ-परि-पॄ c.

OVERGROW, *v.* अतिरुह् 1 P, अतिवृध् 1A, अत्यंतं-वृध्.

OVERHANG, *v. t.* उपरि लंब् 1 A, अव-प्र-लंब्, बहिः लंब् or स्था 1 P.

OVERHASTY, *a.* अतिसाहसिन्, साहसपरायण.

OVERHAUL, *v. t.* पुनः पुनः परीक्ष् 1 A or निरूप् 10.

OVERHEAD, *adv.* ऊर्ध्वं, उपरि, उपरिस्थाने; मस्तकोपरि, अधिशीर्षं; 'the sun being o.' नभोमध्यारूढे सवितरि, मध्याह्नकाले.

OVERHEAR, *v. t.* अलक्षितं-निभृतं श्रु 5 P, प्रच्छन्नं आकर्ण् 10.

OVERJOY, *v. t.* प्रहृष् c., अत्यंतं आनंद् c. –*s.* प्रहर्षः, अत्यंतप्रमोदः. –ED, *a.* प्रहृष्ट, परममुदित, हर्षाकुल, आनंदपुलकित, उल्लसित, हृष्टचित्त.

OVERLAP *v. t.* अतिव्याप् 5 P.

OVERLARGE, *a.* अतिविपुल, अतिमहत्.

OVERLAND, *a.* स्थल in comp.; 'o. route' स्थलवर्त्मं, (प्रतस्थे स्थलवर्त्मना R. IV. 60).

OVERLAY, *v. t.* आ-,छद् 10, आ-वृ 5 U, पि-धा 3 U, पि-नह् 4 P. 2 अतिभारेण पीड् 10.

OVERLEAP, *v. t.* उत् लंघ् 1 A, 10, उत्प्लु 1 A.

OVER-LENIENT, *a.* एकांत-अति-मृदु.

OVERLOAD *v. t.* अतिपूर् 10, अतिभारं न्यस् 4 U or आरुह् c. (रोपयति) ; अतिभारेण आक्रम् 1 U, 4 P or पीड् 10. –ED, *a.* अतिपूरित-पूर्ण, अतिभाराक्रांत. –ING, *s.* अतिभारारोपणं, अतिभारन्यासः.

OVERLOOK, *v. t.* उपेक्ष् 1 A, न गण् 10 or दृश् 1 P, न आदृ 6 A, क्षम् 1 A, 4 P, अवसृज् 6 P, मुच् 6 P. 2 अवेक्ष्, अधि-ष्ठा 1 P, अध्यक्षः भू 1 P. 3 आ-अव-लोक् 1 A, 10; *See* COMMAND.

OVERMUCH, *a.* अतिमात्र, अत्यंत, अत्यधिक, एकांत, अतिरिक्त, अति pr. –*s.* आधिक्यं, अतिबाहुल्यं, अतिरेकः. –*adv.* अत्यंतं, अतिमात्रं, अति-सु pr.

OVERNIGHT, *adv.* अतीतरात्रौ, गतनिशायां.

OVERPASS, *v. t.* अतिचर् 1 P, अतिगम् 1 P.

OVERPAY, *v. t.* अधिकमूल्यं दा 3 U.

OVERPEOPLED, *a.* अतिजनाकीर्ण.

OVERPLUS, *s. See* SURPLUS.

OVERPOWER, *v. t.* परा-अभि-भू 1 P, पराजि 1 A, आक्रम् 1 U, 4 P; *See* OVERCOME.

OVERPRIZE, OVERRATE, *v. t.* अधिकं मन् 4 A or c., अतिमूल्यं स्था c. (स्थापयति).

OVERREACH, *v. t.* प्र-तॄ c., वंच् 10, विप्र-लभ् 1 A. –ING, *s.* प्रतारणं-णा, वंचनं; *See* CHEAT.

OVERRIDE, *v. t.* अति-धाव् 1 P. 2 Overrule, q. v.

OVERRULE, *v. t.* अधः क्षिप् 6 P, निराकृ 8 U, अधरीकृ, प्रत्यादिश् 6 P; *See* REJECT. 2 प्र-भू 1 P, ईश् 2 A (with gen.), अधि-ष्ठा 1 P, शास् 2 P, नियम् 1 P.

OVERRUN, *v. t.* उप-द्रु 1 A, आक्रम् 1 U, 4 P, उप-अभि-द्रु 1 P, व्याप् 5 P, आकॄ 6 P; *See* HARASS, OPPRESS.

OVERSEE, *v. t.* अवेक्ष् 1 A, अधि-ष्ठा 1 P. –ER, *s.* अवेक्षकः, अधिष्ठातृ *m.*, अध्यक्षः, अधिकृतः, अधिकारिन् *m.*

OVERSET, *v. t.* वि-,पर्यस् 4 U, परिवृत् c.; अधरीकृ 8 U, निपत् c., अधः क्षिप् 6 P. –*v. i.* परिवृत् 1 A, नि-पत् 1 P.

OVERSHADOW, *v. t.* आ-,छद् 10, छायया आवृ 5 U.
OVERSHOOT, *v. t.* लक्ष्यं अतिक्रम् 1 U, 4 P, लक्ष्याद् भ्रंश् 1 A, 4 P or च्यु 1 A.
OVERSIGHT, *s.* अनवेक्षा, प्रमादः, भ्रमः; भ्रांति *f.*, स्खलितं, दृष्टिदोषः.
OVERSLEEP, *v. i.* अति-दीर्घ-स्वप् 2 P.
OVERSPREAD, *v. t.* आच्छद् 10; आ-वृ 5 U, आस्तृ 5 U, आस्तॄ 9 U, पूर् 10, आक्रम् 1 U, 4 P, आ-सं-कॄ 6 P, वि-अव-तन् 8 U, व्याप् 5 P. —*a.* आच्छन्न, आच्छादित, आवृत, आस्तीर्ण, आक्रांत, आकीर्ण' व्याप्त, पूरित, पूर्ण.
OVERSTATE, *v. t.* अतिशयेन वच् 2 P; *See* EXAGGERATE.
OVERSTEP, *v. t.* अतिक्रम् 1 U, 4 P, लंघ् 1 A, 10.
OVERSTOCK, *v. t.* अति-पूर् 10 or संग्रह् 9 P or उपकॢप् c., प्र-सं-चि 5 U. —*s.* अतिसंचयः-संग्रहः-संभारः.
OVERSTRAIN, *v. i.* अत्यंतं यत् 1 A or उद्यम् 1 A.
OVERT, *a.* प्रकाश, स्फुट, व्यक्त, स्पष्ट, अगूढ, प्रकट, प्रत्यक्ष. —LY, *adv.* प्रकाशं, स्पष्टं, प्रत्यक्षं, प्रकटं —NESS, *s.* स्फुटता, व्यक्तता.
OVERTAKE, *v. t.* आ-सद् c., (पूर्वप्रस्थितं वैनतेयमप्यासादयेयं V. 1), लंघ् 1 A, 10; आत्मोद्धतैरपि रजोभिरलंघनीयाः (S. 1); ' not to be o.-n ' &c.; सं-,प्राप् 5 P, आक्रम् 1 U, 4 P, ग्रह् 9 P. 2 अभि-भू 1 P, धृ 1 P, 10, ग्रस् 1 A; सहसा-अकस्मात्-आपत् 1 P or आक्रम्; *See* ATTACK, OVERCOME ; ' o. business ' कार्यं समाप् c.
OVERTASK, OVERTAX, *v. t.* अतिभारं-अतिकरं-न्यस् 4 U or निक्षिप् 6 P.
OVERTHROW, *v. t.* नश् c., वि-प्र-°, क्षि 1, 5 P, ध्वंस् c., प्र-वि-उत्°, उच्छिद् 7 P, अव-उत्-सद् c. 2 परिवृत् c., परि-विपरि-अस् 4 U, पराक्षिप् 6 P or c , अधोमुखीकृ 8 U, निपत् c. 3 जि 1 P, पराजि (A.), अभि-परा-भू 1 P, दम् c. (दमयति), वशीकृ 8 U, परास् 4 U, भंज् 7 P, पराहन् 2 P. —*s.* नाशः, ध्वंसः, प्र-वि-°,उच्छेदः, उत्सादः, क्षयः. 2 घातः, भंगः, भेदः, परा-अभि-भवः, पराजयः, व्यसनं. 3 परिवर्तनं, पर्यासः, निपातनं.
OVERTOP, *v. t.* मूर्ध्नि-शिखरे-स्था 1 P, अति-शी 2 A, अभि-भू 1 P; *See* EXCEL.
OVERTURE, *s.* प्रस्तावः, उपन्यासः, उपक्षेपः, निवेदनं, प्रार्थना, वचनं ; ' secret o. ' उपजापः. 2 प्रस्तावना, उपोद्घातः.
OVERTURN, *v. t.* परि-विपरि-अस् 4 U, परिवृत् c., निपत् c., अधोमुखीकृ 8 U, अधरोत्तरीकृ. 2 Overthrow, q. v.
OVERVALUE, *v. t.* अधिकं मन् 4 A or c., बहु मन्, अधिकमूल्यं कृ 8 U or स्था c. (स्थापयति).
OVERWEENING, *a.* अत्यभिमानिन्, अतिदृप्त, अत्यवलिप्त, अतिश्लाघिन्.
OVERWHELM, *v. t.* अभि-भू 1 P, आकुलीकृ 8 U, ग्रस् 1 A, आक्रम् 1 U, 4 P; अव-सद् c., अव-सं-मृद् 9 P or c., अव-नि पत् c., निष्पिष् 7 P. 2 आ-वृ 5 U, आस्तृ-स्तॄ 5, 9 U, आच्छद् 10, आकॄ 6 P. 3 नि-,मस्ज् c. (मज्जयति), गाह् c., अव-वि-°, प्लु c., आ-सं-परि-°. —ED, *a.* अभिभूत, ग्रस्त, आक्रांत, मग्न, आकीर्ण, उपप्लुत, उपद्रुत, आकुल; *See* OVERCOME; ' o. with grief ' शोकसमाकुल; ' o. with a flood of tears ' बाष्पपूरपरिप्लुत.
OVERWORK, *v. t.* अधिकं कर्म कृ c., अत्यंतं आयस् c. or खिद् c.; (oneself) अत्यंतं परिश्रम् 4 P. —अत्यायासः, अतिक्लेशः-श्रमः.
OVERWROUGHT, *a.* अतिपरिष्कृत.
OVERZEAL, *s.* अत्यौत्सुक्यं, अत्युत्कंठा. —OUS, *a.* अत्युत्सुक, अत्यासक्त, अतिव्यग्र.
OVIFORM, *a.* अंडाकृति, कोशाकार.
OVIPAROUS, *a.* अंडज, द्विज, द्विजन्मन् , अंडोत्पन्न.
OWE, *v. t.* धृ 10 (with dat. of creditor). 2 ऋणबद्ध-*a.* भू 1 P, अनुगृहीत-*a.* भू ; oft. ex. by pot. pass. part.; ' you o. respect to your elders ' गुरुजनस्त्वया पूज्यः. —ING, *a.* देय, दातव्य, शोधनीय, निस्तार्य. 2 जनित, जात, उद्भूत, प्रयुक्त, कारण-प्रभव-हेतु- in comp.; ' o. to ' ex. by abl. or instr. ; ' to whom is your deliverance o. ' कस्त्वन्मुक्तिहेतुः-कारणं, केन त्वं मोचितः.
OWL, *s.* कौशिकः, उलूकः, पेचकः, दिवाभीतः, दिवांधः, घूकः, निशाटनः, वायसारातिः; ' o.-light ' मंदप्रभा, ईषत्प्रकाशः.
OWN, *a.* स्वीय, स्वकीय, आत्मीय, स्वक, निज, आत्मभूत; स्व, आत्मन् in gen. or in comp.; ' my o. ' मदीय; so त्वदीय, तदीय, युष्मदीय, अस्मदीय; ' of one's o. accord ' स्वयं, स्वेच्छया; ' to make one's o. ' आत्मसात् कृ 8 U. —*v. t.* स्वीकृ, अंगीकृ, प्रति-पद् 4 A, अभ्युप-गम् 1 P or इ 2 P, ग्रह् 9 P, *See* ACKNOWLEDGE. 2 (To be master of) ex. by स्वामी, ईश्वरः, पतिः, अधिकारी, with gen. or by (*a.*) ; or by gen. alone; ' I o. much land ' विपुलभूमेः स्वाम्यहं; ' who o. s this treasure ' कोऽस्य वित्तस्य स्वामी-पतिः, कस्येदं वित्तं. 3 स्वत्वं प्रति-पद् c. or बुध् c., स्वीय-*a.* इति वद् 1 P; *See* CLAIM. —ED, *a.* स्वीकृत; स्वत्वविशिष्ट; ' o. by me ' मत्स्वत्वविशिष्ट, मत्स्वामिक, मदधीन. —ER, *s.* स्वामी, ईश्वरः, पतिः, अधिकारी, ईशः, प्रभुः; *See* LORD. —ERSHIP, *s.* स्वत्वं, स्वामित्वं, स्वाम्यं, प्रभुत्वं, अधिकारः. —ING, *s.* स्वीकारः, अभ्युपगमः.
OX, *s.* वृषभः, वृषः, उक्षन् *m.*, बली(री)वर्दः, ऋषभः, अनडुह् *m.*, गौः, भद्रः, सौरभेयः; ' a herd

of oxen ' औक्षकं; 'a large o.' महोक्षः; 'an old o.' वृद्धोक्षः, जरद्गवः; 'head of a herd of oxen' आर्षभ्यः; 'an o. allowed to go at liberty' षंडः, गोपतिः, इट्चरः; 'his shoulder' वहः; 'the dewlap of an o.' सास्ना, गलकंबलः; 'who bears the yoke' युग्यः; धुर्योढा; 'who draws a cart' शाकटः; 'who draws a plough' हालिकः, सैरिकः; 'who bears a burden' धूर्वहः, धूर्यः, धुरीणः, धौरेयः, धुरंधरः.

OXIDIZE, *v. t.* जॄ c. –OXIDATION, *s.* जारणं, आतंचनं.

OYSTER, *s.* शुक्ति *f.*, शुक्तिका, मुक्तास्फोटः; 'o.-shell' शुक्तिपुटं.

P.

PABULUM, *s.* भोजनं, आहारः, पौष्टिकं. –PABULAR, *a.* पौष्टिक (की *f.*).

PACE, *s.* पदं, चरणन्यासः, पदविक्षेपः-पातः-क्रमः, पादविक्षेपः-न्यासः, विक्रमः. 2 गति *f.*, गमनं, अयनं, चलनं, चारः. 3 गतिवेगः-क्रमः; 'a quick p.' द्रुतपदं; 'at a rapid p.' द्रुतगत्या. 4 (Of horses) धारा, गतिः; *See* under HORSE; 'a horse with a good p.' सुखायनः, सुखचारः; 'keep p. with' सह गम् or चल् 1 P. –*v. i.* परि-अति-क्रम् 1 U, 4 P; क्रमेण क्रमेण गम्-व्रज्-चल् 1 P; 'p. up and down' इतस्ततः चल् or भ्रम् 1, 4 P; 'p. ing to and fro' इतस्ततः परिक्रम्य. –ED, *a.* गति in comp.; 'slow-p.' मंदगति, मंदगामिन्.

PACIFY, *v. t.* सां(शां)त्व् 10, शम् c. (शमयति), प्र-उप-°, प्र-सद् c., सं-परि-तुष् c, आराध् c. –IED, *a.* शांत, प्रसादित, शांतक्रोध; 'to be p.' शम् 4 P, प्रसद् 1 P, तुष् 4 P, शमं इ-या 2 P. –IER, *s.* शमकः, सांत्वकः. –IC, *a.* शांत, प्रशमित, निरुद्वेग. 2 सांत्व-प्रशम-शील; सांत्वनकारिन्, साम in comp.; 'p. words' सामवादः. –ICATION, *s.* शमः, शमनं, शांति *f.*, प्र-उप-°, सांत्वनं, सामन् *n.*, प्रसादनं. 2 संधानं, संधिकरणं. –ICATORY, *a.* शांतिद, शांतिकर (री *f.*), शमक, सामोपायक, साम in comp.

PACK, *s.* भारः, कूर्चः, भांडं, गुच्छः, पोटलिका, पटलं. 2 गणः, संघः, वर्गः, समूहः, वृंदं, संचयः; *See* MULTITUDE; 'p. of hounds' श्वगणः, कुक्कुरसंघः; 'a p. of persons' मंडलं, जनसमूहः; 'p.-horse' पृष्ठ्यः, स्थौरिन्; 'p.-saddle' पर्याणं, पल्ययनं; 'p.-thread' शणसूत्रं; 'p.-cloth' वेष्टनं, पटः. –*v. t.* पटलीकृ 8 U, पुटीकृ, पुटयति (D.), सपिंड् 10, कूर्चीकृ; 'p. in a box' समुद्गके नि-धा 3 U or निविश् c. 2 कुकर्मार्थं-उपदेशपूर्वं-संमिल् c. or समाह 1 P or एकीकृ or संयुज् 7 U, 10. 3 (Off) अप-निः-सृ c., सहसा अपगम् c. (गमयति) or प्र-स्था c. (स्थापयति). –*v. i.* पुटीभू 1 P, पिंडीभू, एकीभू. 2 सहसा अपगम् 1 P or प्र-स्था 1 A. –AGE, *s.* भांडं, कूर्चः, वस्त्रादिगुच्छः. –PACKET, *s.* पोटलिका, लघुकूर्चः, लघुवेष्टनं; पत्रवेष्टनं. 2 पत्रवाहिनी नौः.

PACT, *s.* *See* CONTRACT.

PAD, *s.* कूर्चः. 2 उपधानं, उपबर्हः. 3 सुखायनः, सुखचारः. 4 पादविक्रमः. 5 मृदुवस्तु *n.*, तुलादिद्रव्यं. –*v. t.* मृदुवस्तुना आ-स्तॄ 5 U or युज् 7 U, 10. –*v. i.* मंदं-शनैः-गम् or व्रज् 1 P.

PADDLE, *s.* क्षेपणि-णी *f.*, नौदंडः ; 'p.-box' क्षेपण्याधारः ; 'p.-wheel' नौचालनी. –*v. t.* नौदंडेन प्रेर् c. or चल् c. or प्रणुद् 6 P or c. –*v. i.* क्षेपण्या जलं चल् c. or आहन् 2 U or तड् 10. 2 जले क्रीड् 1 P.

PADDOCK, *s.* वाटः, वाटिका.

PADDY, *s.* धान्यं.

PADLOCK, *s.* तालकं.

PÆAN, *s.* जयशब्दः-ध्वनिः-घोषः.

PAGAN, *s.* देवता-प्रतिमा-पूजकः. –ISM, *s.* देवतार्चनं, प्रतिमापूजा-उपासना; *See* IDOLATER,-TRY.

PAGE, *s.* पृष्ठं, पत्रं. 2 चेटः, किंकरः, भृत्यः, पार्श्वानुचरः, परिचरः, बालानुचरः.

PAGEANT, *s.* आडंबरः, शोभा; चमत्कारः, कौतुकं. –*a.* Ex. by (*s.*). –RY, *s.* आडंबरः; *See* (*s.*).

PAGODA, *s.* *See* TEMPLE.

PAIL, *s.* भांडं, पात्रं, भाजनं.

PAIN, *s.* दुःखं, वेदना, पीडा, व्यथा, आतंकः, रुज् *f.*, रुजा, अ-आर्ति *f.*, सं-परि-तापः, बाधा, यातना, क्लेशः, कष्टं, कृच्छ्रं, उद्वेगः, खेदः; 'bodily p.' व्याधिः; 'mental p.' आधिः, मनस्तापः, मनोव्यथा, चित्तोद्वेगः ; 'causing p.' पीडा-दुःख-कर (री *f.*); 'suffering p.' दुःखभाक्, दुःखित ; 'sharp p.' शूलः-लं, तीव्रवेदना. 2 (Pains) परि-,श्रमः, प्र-,यत्नः, उद्योगः, व्यवसायः, उद्यमः, उत्साहः, आ-प्र-यासः, कष्टं; 'to take p. s' प्रयत् 1 A, उद्यम् 1 A, चेष्ट् 1 A, घट् 1 A, व्यव-सो 4 P. 3 दंडः, साहसं. –*v. t.* पीड् 10, दु 5 P, व्यथ् c. (व्यथयति), तप् c., सं-परि-उप-°, बाध् 1 A, क्लिश् 9 P, अर्द् 1 P or c., दुःखयति (D.). –ED, *a.* पीडित, दून, दुःखित, व्यथित, तापित, सं-परि-तप्त, आर्त, दुःखार्त, दुःखातुर, सवेदन, कृच्छ्रगत, सव्यथ ; 'to be p.' व्यथ् 1 A, पीड्-क्लिश्-तप्-pass. –FUL, *a.* सरुज, रुजावह, दुःखिन्, सव्यथ, दुःखार्त ; *See* PAINED. 2 दुःखद, कष्ट, पीडा-दुःख-कष्ट-व्यथा-कर (री *f.*); दुःखावह, कष्ट-क्लेश-द-प्रद, बाधक, संतापक. 3 श्रम-कष्ट-साध्य, दुष्कर, कठिन. –FULLY, *adv.* सव्यथं, कष्टं, सदुःखं, सोद्वेगं. 2 सश्रमं, सायासं, कृच्छ्रेण, कष्टेन. –LESS, *a.* दुःख-व्यथा-

हीन-रहित. —PAINSTAKING, *a.* व्यवसायिन्, उद्यमिन्, उद्योगिन्, उद्यम-उत्साह-शील; *See* INDUSTRIOUS.

PAINT, *v. t.* आ-लिख् 6 P, चित्र् 10. 2 रंज् c., वर्ण् 10, रंगेण लिप् 6 P, वर्णैः शुभ् c. 3 वर्ण्; *See* DESCRIBE. —*s.* वर्णकः-कं, वर्णिका, रंगः, लेपः; 'p.-brush' वर्तिका, तूलिका, तूलि *f.*, वर्णतूली, ईषिका. —ED, *a.* चित्रित, वर्णित; (in a picture) चित्र-आलेख्य-गत, चित्रार्पित, आलिखित. —ER, *s.* चित्रक-(का)रः, रंगाजीवः, चित्रकृत्-लिख् *m.*, रंजकः, चित्रकः, आलेखकः, तौलिकः. —ING, *s.* (Art) चित्रकर्मन् *n.*, चित्रक्रिया-विद्या. 2 आलेखनं, वर्णनं, रंजनं, चित्रलेखनं. 3 आलेख्यं, चित्रं; 'drawn in a p.' आलेख्यगत; 'p. on the body' पत्ररेखा, पत्ररचना, पत्रावलि-ली *f.*

PAIR, *s.* युगं, युगलं, युग्मं, द्वितयं, द्वयं, यमलं-कं, युतकं; द्वंद्वं, मिथुनं, दंपती in comp. (of animate beings only); 'a p. of swans' हंसदंपती; 'a married p.' भार्यापती, जायापती, दंपती, जंपती, स्त्रीपुरुषौ. —*v. t.* संयुज् 7 U, 10; oft. ex. by 'Match' q. v.; 'well-p. ed rivals' तुल्यप्रतिद्वंद्विनौ. —*v. i.* मैथुनं आचर् 1 P or कृ 8 U, स्त्रीपुरुषवत् संगम् 1 A.

PALACE, *s.* प्रासादः, हर्म्यं, सौधः-धं, राजकुलं, राज-नृप-गृहं-भवनं-मंदिरं (House, q. v). —PALATIAL, *a.* महत्, विशाल, राजयोग्य; 'p. building' महाभवनं.

PALÆSTRA, *s.* मल्लभूमि *f.*

PALANQUIN, *s.* नरयानं, शिबिका, चतुरस्रयानं, याप्ययानं.

PALATE, *s.* तालु *n.*, काकुदं; 'soft p.' शुंडिका, अलिजिह्वा. 2 रुचि *f.*, अभिरुचिः. —ABLE, *a.* आस्वाद्य, सुरस, स्वादु, रुच्य, रुचिकर (री *f.*), सरस, रसिक. —AL,-IAL, *a.* तालव्य.

PALAVER, *See* FLATTER,-Y.

PALE, *a.* पांडु, पांडुर, विवर्ण, गतवर्ण, नीरक्त, मंदच्छाय, गतश्रीक; 'he grew or turned p.' विवर्णभावं प्रपेदे, पांडुच्छायो बभूव. 2 मंदप्रभ, मंदद्युति-कांति, हततेजस्, निस्तेजस्, मलिन-म्लान-प्रभ-कांति. 3 (Of colours) श्वेत, ईषत्, आ, in comp.; 'p. blue' आनील, श्वेतनील. —*s.* शलाका, शल्यं, शूलः-लं, शंकुः, स्थाणुः. 2 वृति *f.*, आवरणं, वेष्टनं, वरणः. —*v. t.* (शंकुपंक्त्या) आ-परि-वृ 5 U or c., परिवेष्ट् 1 A or c., अवरुध् 7 U. —ING, *s.* शंकुपंक्ति *f.*, आवरणं. —ISH, *a.* आपांडु, आपांडुर. —NESS, *s.* पांडुता, वैवर्ण्यं, पांडुवर्णः-रागः. 2 तेजः-प्रभा-हानि *f.*, कांतिक्षयः; न्यूनप्रभा.

PALFREY, *s.* लघुवाजिन् *m.*, क्षुद्रघोटकः.

PALINDROME, *s.* मुरजबंधः.

PALISADE, *s.* स्तंभ-शंकु-पंक्ति *f.*-वलयः-यं, अवरोधकं.

PALL, *s.* वासस् *n.*, प्रावारः, प्रच्छदपटः. 2 प्रेतपटः, प्रेतवासस् *n.*, शवाच्छादनं. —*v. t.* विरसीकृ 8 U, अरुचि उत्पद् c. —*v. i.* विरसीभू 1 P.

PALLADIUM, *s.* पुर-नगर-देवता, रक्षादेवता. 2 रक्षालक्षणं.

PALLET, *s.* खट्वा, लघुतल्पः. 2 वर्ण-रंग-पत्रं.

PALLIATE, *v. t.* (दोषं) लघूकृ 8 U, प्र-उप-शम् c. (शमयति), लंघयति (D.), प्रमृज् 2 P, क्षल् 10, आच्छद् 10. —ION, *s.* प्र-उप-शमः-शांति *f.*, लघूकरणं, दोष-पाप-मार्जनं-क्षालनं-शमः. —IVE, *a.* उपशमन (नी *f.*), शांतिप्रद, शमक. —*s.* पाप-दोष-शमनं. 2 उपशमनं, शूलघ्नं, क्लेशापहं.

PALLID, PALLOR, *See* PALE,-NESS.

PALM, *s.* तलः-लं, प्रहस्तः, प्रपाणिः, प्रतलः, चपेटः, चर्पटः, करतलः; 'the p. s joined' संहततलः, संतलः; 'the hollowed p.' प्रसृतः-तिः, चुलुकः; 'joining the p. s together' बद्धांजलि, कृतांजलि, अंजलिपुटं कृत्वा. 2 (Tree) तालः, तृणद्रुमः, द्रुमेश्वरः; (the fruit) तालं; 'p. of victory' जयध्वजः-लक्षणं; 'p. of superiority' गुणाधिक्यपताका. —*v. t.* करतले गुप् 1 P or गुह् 1 U. 2 (Off) प्रतृ c., वंच् 10; *See* CHEAT; 'the trick was p. ed off upon him' तेन छद्मना असौ सम्यग् विप्रलब्धः. —ATE, —ATED, *a.* करतलाकृति. —Y, *a.* तालावृत, तालसंकीर्ण. 2 समृद्ध, श्रीमत्, विभव-भूतिं in comp.; 'p. days' विभवकालः, विभवः.

PALMA-CHRISTI, *s.* एरंडः, उरुबूकः, रूबु (बु) कः, रुचकः, चित्रकः, चंचुः, पंचांगुलः, मंडः, वर्धमानः, व्यडंबकः.

PALMISTER, *s.* सामुद्रज्ञः, सामुद्रिकः. —PALMISTRY, *s.* सामुद्रिकं, सामुद्रविद्या.

PALMIPED, *a.* जालपाद (पदी *f.*).

PALMYRA, *s.* *See* PALM (2).

PALPABLE, *a.* स्पर्शेंद्रिय-गोचर, स्पृश्य. 2 स्थूल, घन, गाढ, निबिड. 3 स्पष्ट, सुविज्ञेय, प्रत्यक्ष, व्यक्त. —PALPABLY, *adv.* स्फुटं, व्यक्तं, प्रत्यक्षं.

PALPITATE, *v. i.* वेप् 1 A, कंप् 1 A, स्पंद् 1 A, स्फुर् 6 P, उच्छ्वस् 2 P. —ION, *s.* स्पंदनं, कंपः, स्फुरणं, स्फुरितं, वेपनं, वेपथुः.

PALSY, *s.* स्तंभः, सं-वि-°, स्वापः, सुप्ति *f.* 2 पक्षाघातः, पक्षवायुः. —*v. t.* स्तंभ् 9 P or c., जडीकृ 8 U, स्वप् c., चैतन्यं नश् c. —IED,-ICAL, *a.* पक्षवायुग्रस्त.

PALTER, *v.* *See* PREVARICATE.

PALTRY, *a.* क्षुद्र, लघु, तुच्छ, असार, अपकृष्ट, अधम, कु pr., कुत्सित.

PAMPER, *v. t.* (अत्यंतं) स्फाय् c. (स्फावयति), संवृध् c., आप्यै c., परि-,पुष् c., संतृप् c., पूर् 10. —ED, *a.* स्फात, परिपुष्ट, हृष्टपुष्ट, आपीन, आप्यायित. —ER, *s.* अतिपोषकः, आप्यायकः. —ING, *s.* स्फीति *f.*, परिपोषणं, आप्यायनं.

PAMPHLET, *s.* पत्रिका, लघुपुस्तकं. -EER, *s.* पत्रिकाकारः, लघुपुस्तककृत् *m.*

PAN, *s.* भाजनं, पात्रं, भांडं, आधारः; 'frying p.' अंबरीषं, भ्राष्ट्रः; *See* under FRY; 'p.-cake' भ्रष्टापूपः.

PANACEA, *s.* सर्वरोगघ्नं औषधं, त्रैलोक्यचिंतामणिः.

PANCRATIUM, *s.* मल्लयुद्धं-क्रीडा. -PANCRATIC, *a.* मल्लक्रीडानिपुण.

PANDECT, *s.* विद्यासंग्रहः. 2 स्मृतिसंहिता.

PANDEMIC, *a.* सर्वजनीन, सार्वलौकिक (की *f.*), सर्वसामान्य; 'p. disease' जनपदोद्ध्वंसः.

PANDEMONIUM, *s.* रक्षःसभा, पिशाचसभा.

PANDER,-ER, *s.* नर्मसचिवः, विटः, सुरतदूतः, कुंडाशिन् *m.*, संचारकः. -*v. t.* सुरतकामान् सं-पद् c., लांपट्यं प्रयुज् 7 A, 10. -ING,-ISM, *s.* कौट्टिन्यं, विटकार्यं.

PANDICULATION, *s. See* STRETCHING.

PANE, *s.* काचफलकः-शिला.

PANEGYRIC, *s.* स्तुति *f.*, श्लाघा, प्रशंसा, स्तुतिवादः-पाठः, गुणवर्णनं-कीर्तनं. -AL, *a.* स्तुतिमय (यी *f.*), प्रशंसात्मक. -PANEGYRIZE, *v. t.* स्तु 2 U, श्लाघ् 1 A, प्रशंस् 1 P; *See* PRAISE. -PANEGYRIST, *s.* संस्तावकः, वैतालिकः, वंदिन् *m.*, मागधः, स्तुतिपाठकः.

PANEL, *s.* कपाटः-टं, अररः-री-रं; शाखा, भागः. 2 स्थेयगणः,-पत्रं.

PANG, *s.* वेदना, यातना, व्यथा, पीडा; (extreme) कारणा, अतिव्यथा; *See* PAIN.

PANIC, *s.* संत्रासः, समुद्वेगः, महासाध्वसं, विद्रवः, आकस्मिकभयं, त्रासः; 'p.-struck or -seized' संत्रस्त, भयविह्वल, विद्रावित; 'p. in an army' विंजलः, समुत्पिजः. 2 अणुः, प्रियंगुः.

PANNEL, *s.* पर्याणं.

PANNIER, *s.* कंडोलः, पिटः, पे(पि)टकः, करंडः.

PANOPLY, *s.* सर्वांगत्रं, सर्वांगकवचः. -IED, *a.* संवर्मित, कृतसन्नाह.

PANORAMA, *s.* विश्वदृश्यं.

PANT, *v. i.* वेप् 1 A, स्पंद् 1 A, कंप् 1 A, उद्-ध्मा 1 P, स्फुर् 6 P, उच्छ्वस् 2 P. 2 कृच्छ्रेण निश्वस्, दीर्घस्थूलस्थूलं-निश्वस्. 3 सोत्कंठं स्पृह् 10 or अभिलष् 1, 4 P; *See* LONG. -*s.*,-ING, *s.* कंपः, स्फुरणं; कृच्छ्रोच्छ्वासः, उच्छ्वासः, स्थूलस्थूलनिश्वासः.

PANTALOON, *s.* जंघावस्त्रं-परिधानं. 2 भंडः, विदूषकः, वैहासिकः.

PANTHEIST, *s.* विश्वदेवतावादिन् *m.* -PANTHEISM, *s.* विश्वदेवतावादः, वैश्वदेवमतं. -PANTHEON, *s.* विश्वदेवतागणः, विश्वदेवकुलं.

PANTHER, *s.* द्वीपिन् *m.*

PANTOMIME, *s.* मुग्धनर्तकः, केवलं अभिनेतृ *m.*, मूकाभिनेता. 2 मुग्धाभिनयः, लास्यं, निःशब्दलास्यं-हावः.

PANTRY, *s.* अन्नकोष्ठः, भक्ष्यागारं.

PAP, *s.* चूचुकं, स्तनाग्रं. 2 स्तनः, कुचः. 3 मृदु खाद्यं.

PAPA, *s.* तातः, पिता; *See* FATHER.

PAPER, *s.* पत्रं, पत्रकं; 'written p.' लेखः, लिखितं, पत्रिका, लेख्यं. -*v. t.* पत्रेण आच्छद् 10 or आस्तृ 5 U.

PAPPY, *a.* मज्जायुक्त, मृदु, कोमल.

PAPULÆ, *s.* वि-,स्फोटः, पिटि(ट)का.

PAR, *s.* समता, तुल्यता, साम्यं, सम-तुल्य-भावः; 'at p.' सम, तुल्य. -ITY, *s.* साम्यं; तुल्यत्वं.

POWER, s. शक्ति f., सामर्थ्यं, बलं, प्रभावः, वीर्यं ऊर्जः, सहस्-ओजस् n., विभवः (वाग्विभवः); (martial) तेजस् n., वि-परा-क्रमः, शौर्यं. 2 (Ability) शक्तिः, क्षमता, धीशक्तिः; 'p. of thinking' विचारणाशक्तिः; 'according to one's p.' यथाशक्ति-बलं, यावच्छक्यं. 3 (Influence) प्रभुत्वं, प्रभावः वशः-शं, बलं, गौरवं, अधिकारः; आधिपत्यं, ईशत्वं, सत्ता, ऐश्वर्यं, अधीनता. 4 अधिपः-पतिः, अधीशः प्रभुः. 5 (Legal) अधिकारः, or by अर्ह् 1 P. 6 अधिकारिजनः, अधिकृतः. 7 घातः. 8 सेना, बलं पृतना; 'have or exercise p. over' प्रभू 1 P, ईश् 2 A (with gen.), वशीकृ, आयत्तीकृ, आत्मवशं नी 1 P; 'in (under) the p. of' वश' अधीन, आयत्त, तंत्र in comp.; 'fallen into another's p.' परहस्तगत; 'to be in one's p.' ex. by शक् 5 P or by (s.). -FUL, a. बल-सामर्थ्य-वत्, शक्त, बलिन्, सबल, प्रबल, ऊर्जस्वल, ओजस्विन्, शक्तिमत्, ऊर्जितसत्त्व, बलाढ्य, सप्रभाव, प्रभविष्णु. 2 शूर, वीर, विक्रांत, तेजस्विन्, महाप्रताप, प्रतापवत्, धामवत्, उरुविक्रम. 3 (Medicine) वीर्यवत्, अमोघ, गुणावह, प्रबल, अलंतम. 4 दृढ, प्रतीतिकारिन्, प्रबल. -FULLY, adv. बलवत्, प्रबलं, सप्रभावं, अत्यंतं. -FULNESS, s. प्राबल्यं, शक्तत्वं. -LESS, a. निर्बल, शक्तिहीन, अशक्त, अबल, निष्प्रभाव, असमर्थ, अक्षम. -LESSNESS, s. अशक्ति f., असामर्थ्यं.

POX, s. Small-pox, q. v. 2 उपदंशः.

PRACTICE, s. प्र-आ-चारः, संप्रदायः, व्यवहारः, रीति f., मार्गः, पद्धति f., क्रमः, वृत्तिः f. 2 अभ्यासः, क्रियाप्रबंधः-सातत्यं, नित्यवृत्तिः-चर्या-अनुष्ठानं, अनुशीलनं,-निरंतरप्रवृत्तिः, आवृत्तिः; 'does not require p.' नाभ्यासक्रममीक्षते. 3 क्रिया, आचारः, आचरणं, कर्म, कृति f., व्यापारः, व्यवसायः; करणं, विधानं, अनुष्ठानं; (execution) प्रवृत्तिः, प्रचारः, व्यवहारः; 'bring or put into p.' प्रवृत् c., व्यवहृ c.; 'has long been in p.' चिरप्रवृत्त. 4 (Opp. of theory) प्रयोगः. 5 छलं, व्याजः, कैतवं; *See* FRAUD; 'ancient p.' वृद्धाचारः, वृद्धपरंपरा; 'family p.' कुलसंप्रदायः, कुलधर्मः, कुलाचारः; 'local p.' देशाचारः; 'good p.' सदाचारः; 'following good p.s' सदाचार, सद्वृत्ति, सद्वृत्त, साधुवृत्त; 'bad p.' दुराचारः, कुमार्गः, दुर्वृत्तिः; 'following bad p. s' दुर्वृत्त, दुराचार; 'p. of medicine' वैद्यक्रियाउपचारः, चिकित्सा, भेषजप्रयोगः, उपक्रमः; 'p. of arms' शस्त्राभ्यासः, शस्त्रचर्या; 'p. of law' व्यवहारः, व्यवहाराभ्यासः; 'p. in archery' शराभ्यासः, उपासनं. -PRACTISE, v. t. अभ्यस् 4 U, नित्यं कृ 8 U, &c. 2 आचर् 1 P, अनु-ष्ठा 1P, कृ, वि-धा 3U, आ-स्था 1 U. 3 प्र-उप-युज् 7 A, 10, प्रवृत् c., व्यवहृ c., सेव् 1 A, आश्रि 1 U, आ-अव-लंब् 1 A; 'what profession do you p.' कां वृत्तिमुपजीवत्यार्यः (Mr. 2). -v. i. शाठ्येन आचर् or व्यवहृ 1 P, छलं-कपटं-कृ. -ED, a. अभ्यस्त, आचरित, अनुष्ठित, कृत, सेवित, &c. 2 अभिज्ञ, परिचयवत्, बहुदृष्ट, व्यवहारज्ञ, दृष्टकर्मन्, पक्वबुद्धि, ज्ञानवृद्ध, जाताभ्यास; also ex. by (s.). -ING, a. अभ्यासिन्, सेविन्, शालिन्, in comp.; आस्थित, आश्रित. -PRACTICABLE, a. करणीय, कर्तुं शक्य, साध्य, संभाव्य, शक्य, सुकर, सुखसाध्य, उपपाद्य. -PRACTICAL, a. अभ्यासिकव्यावहारिक (की f.), अभ्याससिद्ध-प्राप्त, आचार-व्यवहार in comp.; 'p. knowledge' व्यवहारज्ञानं, लौकिकज्ञानं. 2 अभ्यासक्षम, व्यवहार्य, प्रयोज्य, प्रवर्तनीय, व्यवहारोचित; 'a p. scheme' व्यवहारोचित उपायः; 'he is a p. teacher' स शिक्षणप्रयोगनिपुणः. 3 व्यवहारज्ञ, दृष्टकर्मन्, अभिज्ञ; *See* PRACTISED. -LY, adv. कार्यतः, अर्थतः, वस्तुतः, परमार्थतः, व्यवहारतः, फलापेक्षया. 2 अभ्यासेन, व्यवहारेण. -PRACTITIONER, s. सेविन्, व्यवसायी, व्यापारी, वृत्ति, आजीव in comp. 2 वैद्यः, वैद्यवृत्तिः, चिकित्सकः. 3 व्यवहारज्ञः, व्यवहारदर्शिन्-निपुणः.

PRAGMATIC,-AL, a. परकार्यचर्चक, अनधिकारव्यापारिन्; *See* MEDDLE, &c.

PRAISE, v. t. प्रशंस् 1 P, श्लाघ् 1 A, ईड् 2 A, नु 2 P, स्तु 2 U, वर्ण् 10, गै 1 P, कॄत् 10, वि-प्र-°

ख्या 2 P or c. (ख्यापयति), पन् 1 P, नू 6 P. –*s.* प्र-,शंसा, श्लाघा, स्तुति *f.*, स्तवः, वर्णनं-ना, कीर्तनं, नुति *f.*, ईडा, स्तोत्रं. –ER, *s.* प्रशंसकः, स्तावकः, वर्णकः, वंदारुः. –PRAISEWORTHY, *a.* प्रशस्य, प्रशंसार्ह, श्लाघ्य, स्तुत्य.

PRANCE, *v. i.* प्लु 1 A, वल्ग् 1 P, नृत् 4 P. –ING, *s.* प्लुतं, वल्गितं, प्लवनं.

PRANK, *s.* क्रीडा, चेष्टा, चापलं, लीला, छंदः-दस् *n.*; 'idle p.' वानर-मर्कट-चेष्टा-क्रीडा ; 'mischievous p.' कु-दुः-चेष्टितं. –*v. t.* दंभार्थं भूष् 10 or अलंकृ 8 U. –ISH, *a.* कुचेष्ट, चपल, क्रीडाशील.

PRATE, PRATTLE, *v. i.* प्र-,लप् 1 P, प्र-,जल्प् 1 P, अनर्थकं वद् 1P or भाष् 1 A. –ER, *s.* वाचाटः, वाचालः, जल्प(ल्पा)कः, वावदूकः, बहुभाषिन्. –ING, *s.* प्रलापः, प्रलपितं, प्र-,जल्पः-ल्पितं-ल्पनं; बालालापः, बालभाषणं-प्रलापः.

PRAVITY, *s.* भ्रष्टता, विक्रिया, विकारः.

PRAY, *v.* (A deity) स्तु 2 U, प्र-आभि-सं-°, नमस्यति (D.), अभिवद् c., आराध् c., प्रणम् 1 P; (मनसा) पूज् 10, उपास् 2 A, ध्यै 1 P, चिंत् 10. 2 आशंस् 1 A. 3 याच् 1 A, प्र-अभि-अर्थ् 10 A; विज्ञा c. (ज्ञापयति); gen. ex. by अर्ह् 1 P with inf.; *See* PLEASE; 'I p. you tell me' मह्यं कथयितुमर्हति भवान्. 4 (Lowly) जप् 1 P. –ER, *s.* स्तवः, स्तोत्रं, प्रार्थना-नं, नमस्या, उपासना, पूजा; (mental) ध्यानं, आवाहनं; (low) जपः, स्वाध्यायः. 2 यांचा, प्रार्थना, अभ्यर्थना, विज्ञप्ति *f.*, विज्ञापना. –FUL, *a.* प्रार्थनाशील, भजनपरायण.

PREACH, *v. t.* उद्घुष् c., उद्-घुष् 10, उच्चर् c., प्र-ख्या c. (ख्यापयति), प्रकाश् c., प्रवद् 1 P, कृत् 10. –*v. i.* धर्मं प्रवच् 2 P or शास् 2 P or उपदिश् 6 P. –ER, *s.* उपदेशकः, प्रवक्तृ *m.*, प्रचारकः, धर्मशासकः, धर्मोपदेशी. 2 घोषकः, प्रख्यापकः. –ING, *s.* वि-,घोषणं-णा, प्रख्यापनं, धर्मोपदेशः, धर्मशासनं, प्रवचनं, उपदेशः.

PREAMBLE, *s.* उपोद्घातः; *See* INTRODUCTION.

PREBEND, *s. See* CANON.

PRECARIOUS, *a.* संदिग्ध, अनिश्चित, अनिर्णीत, अनियत, अस्थिर, अध्रुव. 2 पराधीन, परायत्त, अस्वतंत्र; *See* DOUBTFUL, DANGEROUS. –LY, *adv.* संदिग्धं, अनियतं. –NESS, *s.* अनियतत्वं, अन्याधीनता.

PRECATIVE, PRECATORY, *a.* याचक, प्रार्थनात्मक; 'p. mood' आशीर्लिङ्.

PRECAUTION, *s.* पूर्वोपायः, निवारणोपायः, पूर्व-समीक्षा-चिंता, पूर्वावधानं, पूर्वप्रबोधः; 'take p. s' पूर्वमेव उपायं समीक्ष् 1 A or चिंत् 10; 'hence I give you this p.' अतस्त्वामेवं प्रबोधयामि. –ARY, *a.* पूर्वोपायरूप; by (*s.*).

PRECEDE, *v. t.* पूर्व-अग्रे-पुरतः गम्-सृ-चर् 1 P or इ-या 2 P or वृत् 1 A or स्था 1 P; oft. ex. by पूर्वं, प्राक्, प्रथमं, ततः, अनंतरं ; 'the flower p. s the fruit' उदेति पूर्वं कुसुमं ततः फलं, so घनोदयः प्राक् तदनंतरं पयः (S. 7.); 'visarga p. ed by अ' अपूर्वः विसर्गः; 'many kings p. ed Râma' रामात् पूर्वं बहवो नृपाः समजायंत. 2 (In rank) अग्रपदे वृत्, अग्रमानं अर्ह् 1 P. –ENCE, *s.* अग्रगमनं, पुरःसरणं. 2 अग्र-श्रेष्ठ-पदं, पुरस्कारः, उत्कर्षः, प्राधान्यं, अग्रत्वं, अग्रणीत्वं, आग्रमानः-पूजा, मुख्यता, श्रेष्ठत्वं, प्राथम्यं. –ENT, *s.* (पूर्व) निदर्शनं, उदाहरणं, आदर्शः, प्रतिमा, प्रमाणं, दृष्टांतः; 'having no p.' अप्रतिम. –*a.*, –ING, *a.* पूर्व-अग्र-गामिन्, अग्रग, पूर्वग, पूर्व, अग्र, प्रथम, अग्रे-पुरः-सर. –ENTED, *a.* भूत-दृष्ट-पूर्व, दृष्टप्रतिम; 'un-p.' अप्रतिरूप, निरुपम, अतुल.

PRECENTOR, *s.* मुख्यगायकः, गायकाग्रणीः.

PRECEPT, *s.* नियोगः, आ-नि-देशः, अनु-,शासनं, अनुज्ञा, विधिः, नियमः, प्र-,चोदनं-ना, कल्पः, आज्ञा, स्थिति *f.*, मर्यादा. 2 वचनं, उपदेशः; 'moral p. s' नीतिवचनानि; 'religious p.' धर्मानुज्ञा, धर्मशासनं; 'example is better than p.' शासनात् करणं श्रेयः, वाचः कर्मातिरिच्यते. –IAL,-IVE, *a.* वैधिक-नैयमिक (की *f.*), विधिरूप, (*s.*) in comp. –OR, *s.* गुरुः, शिक्षकः, उपदेशकः, आचार्यः, अध्यापकः, उपाध्यायः.

PRECESSION, *s.* अग्रगति *f.*; 'p. of the equinoxes' अयनचलनं, क्रांतिपातगति *f.*

PRECINCT, *s.* सीमा, पर्यंतः, मर्यादा, अवधिः, परिसरः, उपांतं, उपकंठं, समंतदेशः.

PRECIOUS, *a.* महार्ह-र्घ, महा-बहु-मूल्य, अनर्घ्य, अमूल्य, उत्कृष्ट, बहुमत, गुरु, परम; 'p. stone' उपलरत्नं, अमूल्यरत्नं, रत्नं, मणिः. –NESS, *s.* महार्घता, बहुमूल्यं.

PRECIPICE, *s.* प्रपातः, भृगुः, अतटः. –PRECIPITOUS, *a.* पातुक, विषम, प्रवण, अवसर्पिन्. 2 Rash, q. v.

PRECIPITATE, (PRECIPITANT) *a.* अवाङ्मुख (खी *f.*), अधोमुख, अवाक्शिरस्. 2 असमीक्ष्य-क्षिप्र-अविमृश्य-कारिन्, साहसिन्, साहसिक (की *f.*); (act) सरभस, अविमृष्ट, अतिक्षिप्र, साहस in comp. –*v. t.* रभसा अधः क्षिप् 6 P or पत् c. 2 सरभसं प्रवृत् c. or प्रोत्सह् c., त्वर् c. (त्वरयति). –*v. i.* अव-अधः-पत् 1 P, नि-सद् 1 P. 2 (Fig.) अविचार्य-सरभसं-व्याप् 6 A or c. –LY, *adv.* अवाक्, अवाक्शिरसा, अधोमुखेन. 2 अविमृश्य, असमीक्ष्य, सहसा, साहसेन, अतिक्षिप्रं, सरभसं. –ION,–NESS, *s.* अधःपातनं-क्षेपणं, अवपातनं. 2 साहसं, साहसिकता, क्षिप्रकारिता, असमीक्ष्य-अविमृश्य-कारिता. –PRECIPITANCE, *s.* साहसं ; *See* above.

PRECIS, *s.* सारः, संक्षेपः, संग्रहः.

PRECISE, *a.* नियत, निर्दिष्ट, निश्चित, परिच्छिन्न, यथार्थ, विशेष in comp. ; *See* EXACT. 2 व्यक्त, स्फुट,

सूक्ष्म. 3 (Of persons) सामयिक (की *f.*), समयानुवर्तिन्, संकेतानुरोधिन्, सूक्ष्मनियमनिष्ठ. -LY, *adv.* नियतं, यथार्थं, सूक्ष्मतया ; oft. by एव ; 'at noon p.' मध्याह्नसमये एव ; 'p. so' एवमेव. -ION, -NESS, *s.* नियतत्वं, निर्देशः, सूक्ष्मता, सुनिश्चितता, याथार्थ्यं, व्यक्तता, &c.

PRECLUDE, *v. t.* निवृ c., नि-प्रति-षिध् 1 P, नि-प्रति-रुध् 7 U, बाध् 1 A, प्रतिबंध् 9 P; *See* OBSTRUCT. -PRECLUSION, *s.* प्रतिबंधः, निवारणं, नि-प्रति-षेधः, निरोधः. -PRECLUSIVE, *a.* निवारक, प्रतिबंधक, निरोधक.

PRECOCIOUS, *a.* अकालपक्व-परिणत-प्रौढ. 2 बालप्रौढ-पक्व. -NESS,-PRECOCITY, *s.* अकालपरिणति *f.* -प्रौढता, बालप्रौढि. *f.*

PRECOGITATE, *v. i.* पूर्वं-अग्रे चिंत् 10 or विचर् c. or विमृश् 6 P.

PRECOGNITION, *s.* पूर्वज्ञानं-बोधः.

PRECONCEIVE, PRECONCERT, *v. t.* पूर्वं चिंत् 10 or क्लृप् c. or वि-भू c. -ED, *a.* पूर्वकल्पित-निर्धारित, पूर्वघटित-निर्णीत. -ION, *s.* अग्र-पूर्व-कल्पना-बोधः-ज्ञानं ; पूर्वघटनं-संकेतः.

PRECURSOR, *s.* पूर्वगः, अग्रेसरः, अग्रयायी, पुरःसरः; *See* HARBINGER. 2 पूर्वलक्षणं-चिह्नं-लिंगं. -Y, *a.* पूर्वग, पुरःसर, अग्रवर्तिन्.

PREDATORY, *a.* दस्युवृत्ति, अपहारक, उपद्रविन्, लुंटक, चौर in comp.

PREDECESSOR, *s.* पूर्वगः, पूर्वाधिकारिन् *m.*

PREDESTINATE, PREDESTINE, *v. t.* पूर्वं-अग्रे-निरूप् 10 or प्रक्लृप् c. or निर्दिश् 6 P. -ED, *a.* अग्रपूर्व-निर्दिष्ट-निरूपित, भाविन्, दैवाधीन, दैवायत्त, दैष्टिक (की *f.*). -ION, *s.* अग्रनिरूपणं-निर्देशः. 2 दैववादः, दैवपरता, अदृष्टप्रारब्ध-वादः, दैष्टिकता. -PREDESTINARIAN, *s.* दैवपरः, दैव-अदृष्ट-वादी, यदृच्छिकः, दैवायत्तः, दैष्टिकः.

PREDETERMINE, *v. t.* पूर्वं-अग्रे-निश्चि 5 U or निर्णी 1 P. -ATE,-ED, *a.* पूर्वनिश्चित-निर्णीत. -ATION, *s.* पूर्व-अग्र-निश्चयः-संकल्पः-निर्णयः.

PREDIAL, *a.* क्षेत्र, भूमि in comp.

PREDICAMENT, *s.* पदार्थः ; वर्गः, जाति *f.* 2 अवस्था, दशा, वृत्ति *f.*, भावः, स्थिति *f.* ; कष्टावस्था, दुःस्थितिः, कृच्छ्रं.

PREDICATE, *v. t.* उद्दिश्य वद् 1 P or वच् 2 P or कथ् 10 or अभि-धा 3 U ; विशिष् 7 P or c., वि-धा, निर्दिश् 6 P. -*s.* विधेयं, वाच्यं, विशेषणं. -ION, *s.* विधानं, विशेषणं, निर्देशः, अभिधानं. -PREDICABLE, *a.* वाच्य, अभिधेय.

PREDICT, *v. t.* पूर्व-अग्रे-कथ् 10 or वच् 2 P or निरूप् 10, आ-समा-दिश् 6 P; कथ्, वद् 1 P, with words for 'Future,' q. v.; 'p. ed that she would be the sole wife of Hara' तां समादिदेशैकवधूं भवित्रीं...हरस्य (K. I. 51); कथयत्यागामिनमर्थं (Ka. 46) 'p. s (unforeseen) events'. -ION, *s.* अनागतकथनं, भाविकथनं, आ-समा-देशः, भविष्यद्वादः. -OR, *s.* पूर्वादिन् *m.*, अग्रनिरूपकः, सिद्धः, आदेष्टा.

PREDILECTION, *s.* पक्षपातः, पूर्वस्नेहः, अनुरागः; *See* PARTIALITY.

PREDISPOSE, *v. t.* पूर्वं प्रवृत् c. or प्र-उद्-युज् 7 A, 10, प्रवणीकृ 8 U; ex. by प्रवण, उद्यत, उन्मुख, शील in comp.; 'p. ed to anger' क्रोधप्रवणशील. -ITION, *s.* प्रावण्यं, प्रवृत्ति *f.*, शीलं.

PREDOMINATE, *v. i.* प्र-भू 1 P, प्रबल-अधिक-वरीयस्- *a.* भू 1P, अतिरिच्-विशिष्-pass.; *See* EXCEL. —PREDOMINANT, *a.* प्रबल, अतिरिक्त, प्रधान, विशिष्ट, अधिक, प्रभविष्णु. -LY, *adv.* प्राधान्येन, प्रबलं, विशिष्टतया. -PREDOMINANCE, *a.* प्राबल्यं, प्राधान्यं, आधिक्यं, अतिरेकः.

PRE-EMINENT, *a.* सर्वप्रधान, श्रेष्ठ, सर्वोत्कृष्ट, अग्रगण्य, परम, उत्तम, विशिष्ट, प्रमुख, अग्रणी, अग्रीय, वरेण्य; oft. by व्याघ्रः, शार्दूलः, पुंगवः, ऋषभः, प्रकांडः, &c. in comp.; *See* EXCELLENT. -LY, *adv.* परमं, प्रधानतः, विशिष्टं, सातिशयं, अत्यंतं, सविशेषं. -PRE-EMINENCE, *s.* उत्कर्षः, प्राधान्यं, प्रमुखता, श्रेष्ठता, उत्तमता, अग्रगण्यत्वं, वैशिष्ट्यं.

PRE-EMPTION, *s.* पूर्वक्रयः, पूर्वक्रयाधिकारः.

PRE-ENGAGE, *v. t.* पूर्वं प्रतिज्ञा 9 A, पूर्वं संक्लृप् c. -MENT, *s.* पूर्वसंकेतः-प्रतिज्ञा.

PRE-EXIST, *v. i.* पूर्वं भू 1 P ('Be.' q. v.). -ENCE, *s.* प्राग्भावः-जन्मन् *n.* -जीवनं. -ENT, *a.* पूर्वभव-भूत.

PREFACE, *s.* आमुखं, प्रस्तावना, मुखबंधः, उपोद्घातः, वाङ्मुखं, उपन्यासः, प्रारंभः. -*v. t.* प्रस्तु 2 U, प्रस्तावनां लिख् 6 P or कृ 8 U. -PREFATORY, *a.* प्रस्तावना-उपोद्घात-रूप.

PREFER, *v. t.* उन्नम् c. (नमयति), उत्कर्षं नी 1 P or प्राप् c., पुरस्कृ 8 U, उत्कृष्टपदे नियुज् 7 A, 10, प्रतिपत्तिं प्राप् c. 2 अधिकं रुच् 1 A or मन् 4 A or c. or प्रशंस् 1 P; वृ 5 U or 10 (वरयति); gen. ex. by वरं-न with पुनः, च, तथापि; 'I p. death to disgrace' वरं मृत्युः न पुनरपमानः; वरं वंध्या भार्या न चाविद्वान् तनयः &c. 3 सम्-ऋ c. (अर्पयति), निविद् c., उपह 1 P; *See* OFFER. -ABLE, *a.* वरीयस्, श्रेयस्, गरीयस्; better ex. by (*v.*). -ENCE, *s.* अभिरुचि *f.*, अधिकानुरागः. 2 आदराधिक्यं, अधिकमानः; 'in p. to' विहाय, अतीत्य, अपेक्षया in comp. -MENT, *s.* उन्नति *f.*, पदोत्कर्षः, प्रतिपत्ति *f.*, उत्कर्षः; स्थानोन्नतिः, प्रतिष्ठापदं, गौरवास्पदं.

PREFIGURE, *v. t.* प्रतिबिंबं दृश् c. -ATION, *s.*

पूर्वलक्षणं-दर्शनं.

PREFIX, *s.* उपसर्गः. –*v. t.* पूर्वं आ-प्र-युज् 7 A, 10, पूर्वं-अग्रे-विन्यस् 4 U or नि-आ-धा 3 U or लिख् 6 P.

PREGNANT, *a.* गर्भिणी, गर्भवती, सगर्भा, अंतर्वत्नी, आपन्नसत्त्वा, ससत्त्वा, धृत-रूढ-गृहीत-गर्भा, गर्भधारिणी; 'to be p.' गर्भ-आधा 3 U or धृ 1 P, 10, भू 1 P with (*a.*); 'a p. woman longing for things' श्रद्धालुः, दोहदवती. 2 अर्थयुक्त-गर्भ. 3 सं-परि-पूर्ण, आढ्य-गर्भ in comp. –PREGNANCY, *s.* गर्भः, दौर्हृदं, गर्भधारणं-ग्रहणं, गर्भिणीभावः; 'showed signs of p.' दौर्हृदलक्षणं दधौ (R. III. 1); 'advanced in p.' कठोरगर्भा.

PREJUDGE, *v.* पूर्वं निर्णी 1 P or विचर् c. or निश्चि 5 U. –MENT, *s.* पूर्वनिर्णयः-निश्चयः.

PREJUDICE, *s.* दुराग्रहः, आ-,ग्रहः, चेतोविकारः-विक्रिया, वक्रीभावः; अविचारमति *f.*, अविचारपूर्वः निर्णयः. 2 पक्षपातः, संगः. 3 नाशः, क्षति *f.*, हानि *f.*, अपायः, अपकारः; *See* HARM. –*v. t.* विकृ 8 U, साचीकृ, आवृज् 10, पूर्वं प्रवृत् c. 2 अपकृ, नश् c., क्षण् 8 P; *See* INJURE. –IAL, *a.* हानि-क्षय-कर (री *f.*), अहित, अननुकूल, अपकारक. –IALLY, *adv.* सापायं, सापकारं.

PRE-KNOWLEDGE, *s.* पूर्वज्ञानं-बोधः.

PRELATE, *s.* *See* BISHOP.

PRELECTION, *s.* *See* LECTURE.

PRELIBATION, *s.* पूर्वास्वादः, पूर्वभुक्ति *f.*

PRELIMINARY, *a.* पूर्व-आदि-प्रथम in comp.; प्राथमिक (की *f.*). 2 पारिभाषिक (की *f.*), प्रस्तावनारूप. –*s.* (pl.) पूर्वकार्याणि, पूर्वविषयः. 2 Preface, Introduction, q. v.

PRELUDE, *s.* प्रस्तावना, आमुखं, पूर्वरंगः. 2 आ-प्रारंभः, उपक्रमः. –*v. t.* प्रस्तु 2 U, प्रारभ् 1 A, उपक्रम् 1 A.

PREMATURE, *a.* अकालपरिणत-पक्क, अपूर्णकाल, अपूर्णकालज, असामयिक-अ(-आ)कालिक-(की *f.*), अकाल-असमय in comp.: 'p. death' अकालमृत्युः. 2 साहसिन्, अकालसह; *See* RASH. –LY, *adv.* अपूर्णकालं, अकाले, असमये; 'p. born' अपूर्णकाल; 'p. bald' युवखलतिः. –NESS, *s.* अकालिकत्वं.

PREMEDITATE, *v. i.* पूर्वं संकृप् c. or विचर् c. or चिंत् 10. –ED, *a.* पूर्वसंकल्पित-चिंतित, मति-बुद्धि-पूर्व, सांकल्पिक-सांकेतिक (की *f.*), बुद्धिकृत. –ION, *s.* पूर्वसंकल्पः-विचारः-घटना.

PREMIER, *s.* प्रधानामात्यः, मुख्यमंत्रिन् *m.*, प्रधानसचिवः. –*a.* प्रधान, मुख्य, प्रमुख. –SHIP, *s.* प्रधानमंत्रिपदं.

PREMISE, *v. t.* उपन्यस् 4 U, उपक्षिप् 6 P, पूर्वं कथ् 10 or ब्रू 2 U or वद् 1 P, प्रस्तु 2 U or c., प्रस्तावनारूपेण कथ् or ख्या 2 P, प्र-उप-क्रम् 1 A. –*s.*, –PREMISS, *s.* पक्षः, प्रतिज्ञा; 'major p.' उदाहरणं; 'minor p.' उपनयः. –PREMISES, *s.* गृहक्षेत्रादि, गृहपरिसरः.

PREMIUM, *s.* लाभः, फलं, अधिकमूल्यं, पारितोषिकं.

PREMONISH, *v. t.* पूर्वं सूच् 10 or उपदिश् 6 P, प्रबुध् c. –PREMONITION, *s.* पूर्वबोधः, प्रबोधनं. –PREMONITORY, *a.* पूर्वबोधक, प्रबोधक.

PREOCCUPY, *v. t.* पूर्वं ग्रह् 9 P or भुज् 7 A or आक्रम् 1 U, 4 P. –ATION, *s.* पूर्वभोगः-आक्रमः.

PREORDAIN, *v. t.* पूर्वं प्रक्लृप् c. or निर्दिश् 6 P.

PREPARE, *v. t.* प्र-उप-परि-क्लृप् c., सज्जीकृ 8 U, सं-,विधा 3 U, निर्मा 3 A, 2 P, घट् c. (घटयति), उप-प्र-युज् 7 A, 10 (medicines); संभृ 1, 3 U, उपकरणद्रव्यैः संयुज्; oft. by कृ; (food) प्रसाध् c., सिध् c. (साधयति), संस्कृ, पच् 1 P, निष्पद् c.; (army) सन्नह् 4 P or c., आयुधैः उपक्लृप् c.; (a book &c.) प्रणी 1 P, निर्मा, प्र-नि-बंध् 9 P, वि-,रच् 10; (lesson) शिक्ष् 1 A, पठ् 1 P, अधि-इ 2 A, पारं गम् 1 P; तॄ 1 P (p. well). –*v. i.* उपकरणानि-द्रव्याणि-संभृ or क्लृप् c. 2 सज्जीभू 1 P, उद्यत-उद्युक्त-सज्ज-सिद्ध-*a.* भू. –ATION, *s.* उपकल्पनं, योजनं, साधनं, विधानं, सज्जीकरणं, वि-,रचनं-ना, करणं. 2 संभारः, संविधा, संविधानं, सिद्धि *f.*, सिद्धता, सामग्री; 'marriage-p. s' विवाहसंभाराः; 'war-p. s' युद्धसामग्री; तदुत्तिष्ठ गच्छावो गमनसंविधानाय वत्सस्य (Ka. 294) 'come, let us go to make p. s' &c. 3 योगः. 4 संस्कारः, निष्पत्ति *f.*, सिद्धि *f.* –ATIVE,-ATORY, *a.* उपक्रमोपकारिन्, उपक्रमानुकूल; उपकल्पक, प्रथम, आद्य. –*s.* उपक्रमसाधनं, सिद्धिसाधनं; better ex. by (*v. t.*). –ED, *a.* कृत, निर्मित, घटित, रचित, उपक्लृप्त, कल्पित, निष्पन्न, &c. 2 सिद्ध, सन्नद्ध, सज्ज, उद्यत, उद्युक्त. –EDNESS, *s.* सिद्धता, सज्जता. –ER, *s.* उपकल्पकः, साधकः, रचकः, संस्कर्तृ *m.*

PRE-PAYMENT, *s.* पूर्वदानं-शोधनं.

PREPENSE, *a.* चिंतितपूर्व, मतिपूर्व; *See* PREMEDITATED; 'malice p.' द्रोहचिंता.

PREPONDERATE, *v. i.* अतिरिच्-विशिष्-pass., भारेण-गौरवेण-अतिरिच् or वृध् 1 A, प्र-भू 1 P, अधिक-गुरुतर- *a.* भू. –PREPONDERANCE, *s.* आधिक्यं, अतिरेकः, प्राबल्यं, प्राधान्यं, प्रभावः, गौरवं. 2 अधिकभारः, भाराधिक्यं.

PREPOSITION, *s.* उपसर्गः. –AL, *a.* औपसर्गिक (की *f.*).

PREPOSSESS, *v. t.* (चित्तं) आवृज् 10, प्रह्वीकृ 8 U, आकृष् 1 P, साचीकृ. 2 पूर्वं अधि-ष्ठा 1 P or भुज् 7 A. –ED, *a.* (सद्यः) आकृष्टचित्त, ससंग, जातानुराग. –ING, *a.* (सद्यः) हृदयग्राहिन्, चित्ताकर्षिन्. –ION,

s. पक्षपातः, संगः, ग्रहः, प्रावण्यं, चित्ताकर्षणं. 2 पूर्वभोगः.

PREPOSTEROUS, *a.* विपरीतक्रम, विपर्यस्त. 2 (अतीव) अयुक्त, असंगत, अनुपपन्न, असंबद्ध, अनर्थक. -LY, *adv.* अयुक्तं, असंगतं. -NESS, *s.* वैपरीत्यं, क्रमविपर्यासः, अयुक्तता, असंगति *f.*, असंबंधः.

PREPUCE, *s.* शिश्नाग्रत्वच् *f.*

PRE-REQUISITE, *a.* पूर्वाकांक्षित. -*s.* पूर्वाकांक्षा.

PREROGATIVE, *s.* असाधारणाधिकारः, विशेषाधिकारः, विशेषशक्ति *f.*, सत्ता.

PRESAGE, *v. t.* पूर्वं सूच् 10 or आदिश् 6 P ; *See* FOREBODE, PREDICT. -*s.* पूर्वसूचनं-ना, पूर्वलक्षणं-चिह्नं ; *See* OMEN.

PRESCIENCE, *s.* पूर्वज्ञानं, भविष्यद्विज्ञानं, भावि-अनागत-ज्ञानं, समवेक्षणं. -PRESCIENT, *a.* भाविज्ञानिन्, अनागतवेदिन् ; gen. ex. by पूर्वं ज्ञा 9 U or बुध् 1 P.

PRESCRIBE, *v. t.* निर्दिश् 6 P, वि-धा 3 U, प्रक्लृप् c., प्र-चुद् 10, शास् 2 P, आ-ज्ञा c. (ज्ञापयति), नियम् 1 P. -ED, *a.* निर्दिष्ट, विहित, प्र-,चोदित, विध्यनुरूप, वैधिक (की *f.*). -ER, *s.* निर्देशकः, शास्तृ *m.* —PRESCRIPT, *s.* आदेशः, विधिः, आज्ञा, चोदनं-ना. -*a.* निर्दिष्ट, प्रकल्पित. -ION, *s.* कल्पः, योगः, अगद-निर्देशः, उपचार-औषध-विधिः. 2 विधिः, निर्देशः, आज्ञा, प्र-,चोदनं-ना, शासनं, वचनं. 3 चिर-बहुकाल-भोगः-भुक्ति *f.*, अनादिपरंपरा, अस्मार्तभोगः -IVE, *a.* चिरकालभुक्त, अनादिपरंपराप्राप्त, चिरव्यवहारसिद्ध.

PRESENT, *v. t.* उपहृ 1 P, उपहारं दा 3 U, प्र-उप-दा 3 U, ऋ c. (अर्पयति), वितॄ 1 P, वि-श्रण् 10, उपढौक् c., प्रति-पद् c.; (oblation) निर्वप् 1 P, निविद् c., उत्सृज् 1 P; *See* OFFER. 2 उपन्यस् 4 P, उपक्षिप् 6 P, पुरो निधा 3 U. 3 (Oneself) आविर्भू 1 P, उप-स्था 1 P, प्रादुर्भू, दृश्-लक्ष्- pass., प्रविश् 6 P, आत्मानं दृश् c. 4 दर्शनं कृ c., प्रविश् c.; दृश् c., पुरस्कृ 8 U, समक्षं नी 1 P; सकाशं नी; 'p. me to the king' मां राजदर्शनं कारय. 5 प्र-दृश् c., आविष्कृ, व्यंज् 7 P or c., प्रकटयति (D.), प्रकटीकृ, सूच् 10; oft. ex. by 'Appear' q. v.; 'the court p. ed a gay scene' अधिकरणमंडपः सुतरां रमणीयो बभौ, रम्यालोक आसीत्; 'what a charming sight do these girls p.' अहो मधुरमासां (कन्यकानां) दर्शनं (S. 1), अहो मनोज्ञदर्शनः कन्यकाजनः; 'p. an appearance of' विडंब् 10, अनुकृ (with gen.). -*a.* प्रस्तुत, प्रकृत. 2 (Mind) सावधान, अभ्रांत, अव्यग्र, अशून्य, समाहित, अव्याकुल, निराकुल, असंभ्रम; प्रत्युत्पन्न. 3 विद्यमान, वर्तमान, आधुनिक-सांप्रतिक (की *f.*), अधुनातन-इदानींतन (नी *f.*). 4 सद्यस्क, तात्कालिक (की *f.*); अविलंबित ; 'in the p. state' अस्यामवस्थायां; 'at p.', 'for the p. time' अधुना, सांप्रतं, इदानीं; *See* Now. 5 उपस्थित, संनिहित, प्रत्यक्ष, सं-अभि-मुख (खी *f.*), समीपवर्तिन्; *See* NEAR; 'to be p.' उप-स्था 1 P, संनिधा- pass., समीपं वृत् 1 A; 'you should be p.' त्वयोपस्थातव्यं, संनिहितेन भाव्यं; 'to be p. in one's thoughts' हृदये-चित्ते-वस् 1 P. -*s.* भवत् *n.*; समतीतं च भवच्च भावि च (R. VIII. 78) 'the past, p. and future.' 2 वर्तमान-प्रस्तुत-कालः, तत्कालः, तत्क्षणः, आपातः. 3 (In grammar) लट्. 4 उपायनं, उपहारः, उपदा, प्र-, दानं, वितरणं, पारितोषिकं, उपग्राह्यं, प्राभृतं, प्रदेशनं, प्रीतिदानं; 'p. of money' दक्षिणा; *See* GIFT. -ABLE, *a.* उपहार्य, देय, दर्शनीय, प्रवेश्य. 2 पांक्तेय, पांक्त्य, सभ्य. -ATION, *s.* उपहरणं, अर्पणं, प्रतिपादनं, दानं ; 'p. of an oblation' बलिदानं, निर्वपणं. -LY, *adv.* अधुना, संप्रति, सांप्रतं. 2 सपदि, अनंतरं, द्राक्, तत्क्षणं-णे, तत्काले, सद्यः, अचिरात्, शीघ्रं, आशु, झटिति. -PRESENCE, *s.* संनिधिः, समुपस्थिति *f.*, उपस्थानं, सांनिध्यं, संनिधानं, प्रत्यक्षता, समक्षता, आभिमुख्यं; 'in the p. of' समक्षं, प्रत्यक्षं, संमुखं, साक्षात्, in comp. or with gen.; in the p. of fire' अग्निसाक्ष्ये आधाय (R. VII. 20); 'into the p. of' सकाशं-शे, समीपं-पे, अंतिकं, in comp. or with gen. 2 आकारः, आकृति *f.*, रूपं, शरीरसंस्था. 3 (Of mind) प्रत्युत्पन्नमति *f.*, प्रतिभा, प्रतिभानं, प्रतिभानवत्त्वं, समाहितत्वं, अव्यग्रता, असंभ्रमः, निराकुलत्वं; 'p.-chamber' दर्शनशाला, आस्थानं-नी.

PRESENTIMENT, *s.* पूर्वज्ञानं-बोधः-कल्पना; 'my mind has a p. of evil' मम मनः किमप्यशुभमाशंकते.

PRESERVE, *v. t.* रक्ष् 1 P, त्रै 1 A, पा c. (पालयति), उद्-धृ 1 P, 10, गुप् 1 P, पा 2 P, तॄ c., अव् 1 P, परि-आप् desid. (ईप्सति), (इमां परीप्सुः दुर्जातेः M. 5). 2 सं-,भृ 3 U, पुष् c., संवृध् c., पा c. (पालयति). 3 सं-धा 3 U, उपस्कृ 8 U. -*s.* संधितं, उपस्करः, मिष्ट-संधित-फलं-द्रव्यं. 2 वि(वी)तंसः, विहगस्थानं. -ATION, *s.* सं-,रक्षा-क्षणं, त्राणं, स्थितिपालनं, गोपनं, तारणं. -ATIVE, *s.* रक्षा, रक्षणं, रक्षण-त्राण-साधनं, त्रं-त्राणं in comp. -*a.* रक्षक, पालक, तारक.

PRESIDE, *v. i.* (Over) अधि-ष्ठा 1 P, अध्यास् 2 A (with acc.); अधीश् 2 A, प्र-भू 1 P (with gen.); अवेक्ष् 1 A, अध्यक्षः-अधिपतिः-भू. अभिमन् 4 A; अग्न्यायभिमानिनीभिर्देवताभिः (S. B. 725) 'p.-ing over fire &c.' -ENCY, *s.* अध्यक्षता, अधिष्ठानं, अधिकारः. 2 आधिपत्यं, अधिष्ठातृत्वं, अध्यक्षपदं, अधीशत्वं, better by (*v.*); 'during his p.' तस्मिन्नधितिष्ठति. 3 मंडलं, भागः, देशविभागः. -ING, *a.* अध्यक्ष, अधिष्ठातृ, अभिमानिन्, अधि pr.; 'the p. deity' अधिदेवता, अधिष्ठात्री देवता; 'the soul p. over the body' शरीराभिमानी आत्मा. —PRESI-

DENT, *s.* अध्यक्षः, अधिष्ठाता, अधीशः, अधि-,पतिः, अध्यासीनः, अधिकारी, प्रभुः, नायकः. –SHIP, *s.* आधिपत्यं, अध्यक्षता; *See* PRESIDENCY.

PRESS, *v. t.* पीड् 10, निः-आ-°, निष्कृष् 1 P, निर्ह् 1 P, निर्दुह् 2 U; (together) संपीड्, सं-हन् 2 P, संह, संकुच् 1 P, संपिड् 10, संघट्ट् c. 2 Clasp, q. v.; 'p. ing him to the bosom' तं वक्षसा परिरभ्य; भुजाभ्यां आपीड्य 'p. ing in the arms' &c. 3 प्रेर् c., प्रचुद् 10, प्रणुद् 6 P or c., आकृष् 1 P, आकृ c. 4 निर्बंध् 9 P, अनु-अनुनिर्-बंध्, साग्रहं-निर्बंधेन-प्रच्छ् 6 P or याच् 1 A or अर्थ् 10 A, पुनः पुनः प्रच्छ्; *See* IMPORTUNE. 5 बलेन प्रवृत् c. or नियुज् 7 A, 10 or व्याप् c. 6 बाध् 1 A, पीड्, क्लिश् 9 P, उद्विज् c., सं-परि-तप् c., व्यथ् c. (व्यथयति). 7 मुहुर्मुहुः-पुनःपुनः-उपदिश् 6 P or कथ् 10 or अनुशास् 2 P. –*v. i.* समापत् 1 P, आ-अधि-क्रम् 1 U, 4 P, अभिद्रु 1 P; (against) संघट्ट् 1 A, प्रतिहन् 2 P, अभ्याहन्; संघट्टयन्नंगदमंगदेन (R. VI. 73); 'making his Angada ornament p. against Indra's.' 2 सवेगं प्रगम् or प्रसृ 1 P, सरभसं उपसृप् 1 P or संगम् 1 A; 'p.-ing close to the rock' शिलायामात्मानं निबिडं-निरंतरं-संसंजयन्. 3 प्र-,बाध् 1 A; 'my time p. es' कालातिपातो मया नैव कर्तुं शक्यते; 'p. through' अतीत्य-अतिक्रम्य-गम्, उल्लंघ् 1 A, 10, निस्तॄ 1 P. –*s.* पीडनं, निष्कर्षः. 2 मुद्रण-मुद्रा-यंत्रं. 3 पीडन-पेषण-यंत्रं. 4 जनसंकुलं-संमर्दः, लोकनिवहः. 5 निर्बंधः, पीडा, अतिभारः. –ER, *s.* पीडकः, बाधकः. –ING, *a.* अतिनिर्बंधक, बाधक, अत्यवश्यक, अविलंब्य, अव्याक्षेप्य, विलंबाक्षम, अनतिपात्य; 'p. business of state' आशुसंपादनीयं-विलंबाक्षमं-राजकार्यं. –INGLY, *adv.* निर्बंधेन, सनिर्बंधं, साग्रहं. –URE, *s.* पीडनं. 2 बलं, शक्ति *f.*, प्रभावः, वेगः, प्रवर्तनं, प्रेरणा, प्रणोदः, प्रोत्साहः. 3 भारः, पीडा, बाधा, क्लेशः; 'p. of business' कार्यभारः; 'having much p. of work' कार्यसमाकुल.

PRESTIGE, *s.* दीर्घरूढा प्रतिष्ठा, चिरप्रतिष्ठितं गौरवं. 2 माया, इंद्रजालं.

PRESTO, *adv. See* QUICKLY.

PRESUME, *v. t.* (अविचार्य-अनिश्चित्य) तर्क् 10, सं-भू c., अनु-मा 3 A, 2 P. 2 धृष् 5 P, धर्षेण आक्रम् 1 U, 4 P, उत्सह् 1 A, प्र-भू 1 P; प्रगल्भ् 1 A, दृप् 4 P, साहसं कृ 8 U; कः पतिदेवतामन्यः परिमार्ष्टुमुत्सहेत (S. 6) 'p to lay hands on &c.'; तद्दोषनिरूपणरूपं साहसं मा कुरु 'do not p. to find fault with him'. –PRESUMPTION, *s.* तर्कः, कल्पना, भावना, अनुमानं, ग्रहणं. 2 साहसं, धाष्टर्यं, प्रागल्भ्यं. 3 अवलेपः, दर्पः, अभिमानः, अहंकारः, गर्वः. 4 संभाव्यता, संभवः. –PRESUMPTIVE, *a.* आनुमानिक (की *f.*), अनुमानसिद्ध, संभावित; 'p. proof' अनुमाननिर्णयः. –PRESUMPTUOUS, *a.* साहसिक (की *f.*), धृष्ट, धृष्णु, प्रगल्भ. 2 अवलिप्त, अत्यभिमानिन्; 'a p. statement' साहसोक्ति *f.*, साहसं. –LY, *adv.* साहसेन, धृष्टवत्, प्रगल्भं, सावलेपं, सगर्वं. –NESS, *s.* धृष्टता, प्रागल्भ्यं; प्रतिभा, प्रतिभानं.

PRESUPPOSE, *v. t.* पूर्वं कृप् c. or भू c. –ITION, *s.* पूर्वकल्पना-भावना.

PRETEND, *v.* अप-व्यप-दिश् 6 P, छलं-कपटं-व्याजं कृ 8 U, ध्वजीकृ; gen. ex. by मिथ्या, कृतक, कपट, व्याज, छद्म in comp. or by भू c., दृश् c.; 'p. ing to be asleep' सुप्तमिव आत्मानं संदर्श्य, व्याजसुप्त, सुप्तलक्षण, मिथ्यासुप्त; 'p. ing to be affected by poison' भावितविषवेगः; 'p. s not to hear' अश्रुतिमभिनयति; 'p. ing to be just' आर्यध्वजिन्-लिंगिन्; 'p. ed weeping' कपट-व्याज-रोदनं. 2 अभिमन् 4 A, मिथ्या मन्; 'he p. s to know everything' अहं सर्वज्ञोस्मीति तस्याभिमानः (अवलेपः). 3 मिथ्याहेतुं दृश् c. or वद् 1 P. –ED, *a.* छाद्मिक-कौटिक (की *f.*), व्याज-कपट-छद्म-कूट-मिथ्या in comp.; 'p. ascetic' छद्मतापसः, तापसध्वजी-लिंगी; *See* HYPOCRITE; *See* (*v.*) also. –EDLY, *adv.* सकपटं, सव्याजं, छलेन, मिथ्या. –ING, *a.* –ER, *s.* छाद्मिकः, कापटिकः, अभिमानी-ध्वजी-लिंगी-मन्यः-अभियोगी in comp.; 'p. in learning' पंडितंमन्यः, विद्याभिमानी; 'p. in religion' धर्मध्वजी, आर्यलिंगी, धार्मिकवेशधारी, कपटधर्मी; 'p. to the throne' राज्याभियोगी. –PRETENCE, PRETEXT, *s.* व्याजः, अप-व्यप-देशः, छद्मन् *n.*, उपधिः, कपटं, छलं, उपधा, कूटः-टं, कैतवं, मिषं, मिथ्याहेतुः, निमित्तं. 3 अभिमानः, अभियोगः. –PRETENSION, *s.* अभिमानः, अभियोगः, स्वत्वप्रतिपादनं; 'lay p. s to' *See* CLAIM. 2 महात्वाकांक्षा, यशोलिप्सा, लोभः; 'p. s to the throne' राज्यं मदीयमिति प्रतिपादनं, राज्याभियोगः.

PRETERITE, *a.* भूत, परोक्ष; 'p. tense' लङ्.

PRETERITION, *s.* अतिक्रमः-मणं, अत्ययः.

PRETERMIT, *v. t. See* OMIT.

PRETERNATURAL, *a.* अद्भुत, विलक्षण, निसर्ग-प्रकृति-बाह्य. –LY, *adv.* अद्भुतं, वैलक्षण्येन.

PRETTY, *a.* सु in comp., चारु, शोभन, कमनीय, वाम, सुंदर; *See* BEAUTIFUL, LOVELY. –*adv.* ईषत्, स्तोकं, अल्पं; आ, कल्प, देश्य, देशीय in comp.; 'p. warm' मंदोष्ण, कोष्ण, कदुष्ण; 'p. clear' शुद्धकल्प-प्राय; 'p. ripe' आपक्व, पक्वप्राय. 2 (P. nearly) प्रायेण, प्रायशः, बहुशः, कल्प-भूयिष्ठ-प्राय in comp.; 'p. nearly furnished' समाप्तभूयिष्ठ &c. –LY, *adv.* चारु, सुंदरं, चारु-सु in comp. –NESS, *s.* चारुता, सौंदर्यं, लावण्यं.

PREVAIL, *v. i.* अभिभू 1 P, प्र-भू, पराभू, पराजि 1 A, आक्रम् 1 U, 4 P; अति-शी 2 A, अतिरिच् pass., प्रबल-क्षम-*a.* भू; *See* EXCEL. 2 (In) प्रचलित-प्रवृत्त-*a.* भू, प्र-चल्-र् 1 P, प्रवृत् 1 A; 'darkness p. ed everywhere' सर्वं तमोवृतं आसीत्. 3 सिध् 4 P, निष्पद् 4 A; 'p. with, on, or upon' अनुनी 1 P, प्रवृत् c., प्रोत्सह् c.; *See* PERSUADE; 'p. against' मुर्च्छ् 1 P, (मारुतस्य रंहः शिलोच्चये न मूर्च्छति R. II. 34). -ING,-PREVALENT, *a.* प्रचलित, साधारणी-बहुली-भूत, प्रसिद्ध, प्रचल, प्रवृत्त, साधारण (णी *f.*); 'universally p.' सर्वत्र प्रचालित, सर्वप्रवृत्त; 'long since p.' चिरप्रवृत्त. 2 प्रबल, प्रधान, अतिरिक्त, अधिकबल, प्रभविष्णु, सप्रभाव. -INGLY, *adv.* प्राबल्येन, सप्रभावं. —PREVALENCE, *s.* प्रचारः, प्रवृत्ति *f.*, प्रचलनं, प्रसिद्धि *f.*, साधारण्यं. 2 प्राबल्यं, प्राधान्यं, आधिक्यं, अतिरेकः.

PREVARICATE, *v. i.* सापह्नवं मिथ्योत्तरं दा 3 U, अप-व्यप-दिश् 6 P, छलं कृ 8 U, अपलप् 1 P, अप-नि-ह्नु 2 A, वाक्छलं कृ; 'when he p. ed' यदा वाक्यभेदान् बहूनकथयत् (Mu. 2). -ING, *a.* अपलापिन्, निह्नवकारिन्, व्यपदेशिन्. -ION, *s.* वाक्छलं, अपलापः, अप-नि-ह्नवः, व्यप-अप-देशः, वक्रोक्ति *f.*, छद्मवादः, उत्तराभासः.

PREVENT, *v. t.* वृ c., नि-विनि-°, रुध् 7 U, प्रति-अव-नि°, प्रति-नि-षिध् 1 P, प्रतिकृ 8 U, बाध् 1 A, प्रतिबंध् 9 P, प्रतिष्टंभ् 9 P, प्रति-व्या-हन् 2 P, प्रत्या-ख्या 2 P, निवृत् c., अंतरायःभू- परिपंथीभू 1 P; 'do not p. me from fighting' युध्यमानं मां मा रुंद्धि, युध्यमानस्य मेंऽतरायो मा भूः. -ION, *s.* प्रति-,रोधः, नि-, वारणं, प्रतिबंधः, प्रतिकारः, व्याघातः, प्रतिषेधः; 'p. is better than cure' प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरं. -IVE, *a.* हर (री *f.*), घ्न (घ्नी *f.*) in comp., निवारक, प्रतिबंधक, निरोधक. -*s.* वारणं, प्रतिबंधकं.

PREVIOUS, *a.* पूर्व, प्राग्भूत, भूत, गत, अतीत, पूर्ववृत्त-गत, प्राक् in comp. -LY, *adv.* पूर्वं, प्राक्, पुरस्तात्, पूर्वं in comp.

PREVISION, *s.* अग्रनिरूपणं-दृष्टि *f.*

PREY, *s.* आमिषं (fig. also); मांसं, भक्ष्यं, अन्नं, खाद्यं, भोज्यं; 'fell a p. to enemies' द्विषामामिषतां ययौ (R. XII. 11). -*v. i.* भक्ष्यं आ-अप-हृ 1 P. 2 (Upon) भक्ष् 10; संतप् c., बाध् 1 A, क्रमशः नश् c.

PRICE, *s.* मूल्यं, अर्घः, पण्यं, अवक्रयः, वस्नं; 'high p.' महार्घः, बहुमूल्यं. -*v. t.* मूल्यं स्था c. (स्थापयति) or संकॢप् c. -ED, *a.* कृतमूल्य; 'high-p.' महार्घ-र्ह, बहुमूल्य, दुर्मूल्य; 'low-p.' अल्पमूल्य. -LESS, *a.* अनर्घ-र्घ्य, अमूल्य.

PRICK, *v. t.* व्यध् 4 P, निर्-,भिद् 7 P, तुद् 6 P, पीड् 10; व्यथ् c. (व्यथयति), क्लिश् 9 P or c. 2 प्रेर् c., उत्तिज् c., प्रोत्सह् c., प्रणुद् 6 P or c. 3 (Ears) उन्नम् c. (नमयति), उच्छ्रि 1 U, स्तब्धीकृ 8 U; 'with ears p. ed' स्तब्धकर्ण. -*s.*, -ING, *s.* प्रतोदः, तोत्रं, तोदनं; सूचि *f.*, शल्यं, कंटकः. 2 वेधः-धनं, तोदनं. 3 यातना, तीव्रव्यथा, आतंकः, शूलः-लं. -ED, *a.* विद्ध, भिन्न, शल्य-सूचि-विद्ध-भिन्न; 'p. at heart' भिन्न-विद्ध-मर्मन्. -ER, *s.* वेधकः. 2 तोत्रं; *See* (*s.*).

PRICKLE, *s.* कंटकः, सूचि-ची *f.*, शल्यं, शूकं. -Y, *a.* सकंटक, सशूक, बहुकंटक-शूक.

PRIDE, *s.* (Good) अभिमानः. 2 अहंकारः, गर्वः, उत्सेकः, अवलेपः, दर्पः, औद्धत्यं, मदः, मादः, आटोपः, अहंमानः, मानः, चित्तसमुन्नति *f.*, अवष्टंभः, चित्तोद्रेकः, स्मयः; (impudent) प्रागल्भ्यं, धृष्टता, प्रतिभा-भानं. 3 अलंकारः, अवतंसः, ललामं, अभिमानास्पदं-भूमिः. -*v. t.* (Oneself upon) आत्मानं श्लाघ् 1 A or विकत्थ् 1 A, अभिमन् 4 A, or ex. by (*s.*); 'p.-ing himself on his learning' पंडितमानी, पंडितंमन्यः, विद्याभिमानी, जातज्ञानावलेपः; 'p. ing herself upon her beauty' रूपगर्विता. —PROUD, *a.* (In a good sense) अभिमानिन्. 2 दृप्त, गर्वित, अवलिप्त, सगर्व, सदर्प, उत्सिक्त, उद्धत, उत्सेकिन्, अभिमानिन्, साटोप, साहंकार; अहंमानिन्, उत्-,मत्त, समुन्नद्ध; प्रगल्भ, धृष्ट, प्रतिभावत्, गर्वितचित्त, मदोद्धत; दर्पाध्मात, स्मयाकुल. 3 (Building &c.) उत्तुंग, प्रोच्छ्रित, विशाल, सप्रताप; 'p. of one's birth' कुलाभिमानिन्; रूपगर्वित, यौवनोन्मत्त, &c.; 'to be p.' दृप् 4 P, गर्व् 1 P, प्रगल्भ् 1 A. -LY, *adv.* सदर्पं, सगर्वं, सावलेपं, साटोपं, साहंकारं, उद्धतं.

PRIEST, *s.* (Family) पुरोहितः, पुरोधस् *m.*, कुलाचार्यः. 2 (Sacrificial) ऋत्विज् *m.*, याजकः, अध्वर्युः, होता, याज्ञिकः. 3 (Vedic) श्रोत्रियः, मंत्रविद् *m.*, ब्राह्मणः, द्विजः, विप्रः. 4 आचार्यः, गुरुः, उपाध्यायः, पुरोहितः, धर्माचार्यः, धर्माध्यक्षः. 5 (Of a deity) पूजकः, उपासकः, अर्चकः; 'p.-craft' उपाध्यायछलं-कैतवं; 'p.-ridden' पुरोहिताधीन. -ESS, *s.* होत्री, याजिका. -HOOD, *s.* पौरोहित्यं, उपाध्यायपदं-वृत्ति *f.* 2 पुरोहिताः, पुरोहित-याज्ञिक-गणः-वर्गः, पौरोहित्यं. -LY, *a.* याजकीय, पौरोहित्यसंबंधिन्, (*s.*) in comp.

PRIG, *s.* दांभिकः, दंभिन् *m.*, रूपगर्वितः. -GISH, *a.* दांभिक (की *f.*), आत्माभिमानिन्.

PRIM, *a.* अतिविनीत, अतिसूक्ष्म.

PRIME, *s.* आदिः, आरंभः, पूर्व-प्रथम-भागः. 2 उत्तमदशा, प्रौढता, उत्तमभागः-अंशः; 'in the p. of youth' प्रथमे वयसि; 'the p. of youth' प्रथमं वयः, नव-अक्षत-यौवनं, यौवनश्रीः; 'being in the p. of youth' अक्षत-नव-यौवन. -*a.* प्रथम, आद्य. 2 मुख्य, प्रधान, प्रमुख, अग्र्य; 'p. minister' मुख्यमंत्री, प्रधानामात्यः, महामंत्री. 3 उत्कृष्ट, श्रेष्ठ, परम,

उत्तम, विशिष्ट ; *See* PRINCIPAL. -LY, *adv.* प्रथमं, श्रेष्ठं. -NESS, *s.* उत्तमता, विशिष्टता. —PRIMARY, *a.* प्रथम, आद्य, आदिम, पूर्व, मौल (ली *f.*), मूल-आदि in comp. ; 'p. cause' आदिकारणं-बीजं, निदानं, मूलहेतुः ; 'p. sense' मूलार्थः. 2 प्रधान, मुख्य, प्रमुख, अग्र्य; *See* PRIME. -ILY, *adv.* प्रथमं-मतः, आदौ, पूर्वं, मुख्यशः, प्राधान्येन. -INESS, *s.* प्रथमता, प्राधान्यं. -PRIMATE, *s.* प्राधानोपाध्यायः. -PRIMER, *s.* प्रथम-आरंभ-पुस्तकं. -PRIMEVAL, *a.* आद्य, आदिम, प्राक्कालीन, पूर्वकालीन, प्राक्तन (नी *f.*), मौलिक-प्राथमिक- (की *f.*).-PRIMITIVE, *a.* प्राथमिक, प्रथम, आद्य ; *See* PRIMEVAL. 2 मूल in comp., अव्युत्पन्न ; *See* PRIMARY. 3 प्राक्तनमार्गसेविन्. -LY, *adv.* आदौ, आरंभे, प्रथमं-मतः. 2 प्राक्तनव्यवहारानुसारेण.

PRIMOGENIAL, *a.* प्रथम-आदि-जात, मूल in comp.

PRIMOGENITOR, *s.* प्रथम-कुल-पुरुषः. -PRIMOGENITURE, *s.* पूर्वजत्वं, ज्येष्ठत्वं, अग्रजत्वं, वयोज्येष्ठता.

PRIMORDIAL, *a.* आद्य ; बीजभूत, मौल (ली *f.*); *See* PRIMEVAL.

PRINCE, *s.* कुमारः, राजपुत्रः-सुतः, युवराजः. 2 नृपः, राजन् *m.*, पार्थिवः ; *See* KING. 3 भर्तृदारकः, कुमारः, (in dramas). -DOM, *s.* राज्यं, राष्ट्रं, विषयः. 2 यौवराज्यं. -LIKE,-LY, *a.* राजयोग्य-सदृश (शी *f.*), राजार्ह, नृपोचित; नृपोपम, राजकीय, प्रतापवत्, ऐश्वर्यवत्; प्रताप-वैभव-शालिन्. 2 राजवंश्य, राजकुलज ; 'p. birth' राजवंशप्रसूतिः; 'p. merits' राजोचिता गुणाः -PRINCESS, *s.* कुमारी, राजपुत्री, नृपात्मजा, नृपसुता ; भर्तृदारिका.

PRINCIPAL, *s.* अध्यक्षः, अधि-,पतिः नायकः, मुख्यः ; *See* LEADER. 2 मूलं, मूलधनं, नीवि-वी *f.*, परिपणः. -*a.* मुख्य, परम, प्रधान-वर in comp., प्रमुख, अग्र, अग्रय, प्रवर, श्रेष्ठ, विशिष्ट, उत्कृष्ट, उत्तम, अनुत्तम, वर्य, वरेण्य, परार्ध्य, अग्रि(म्री)य, प्राग्रहर ; नायक, अग्रणी, मुखर, धुर्य, धुरीण, धूर्वह, धुरंधर ; oft. ex. by व्याघ्र, पुंगव, ऋषभ, कुंजर, सिंह, शार्दूल, नाग, प्रकांड, in comp.; *See* EXCELLENT ; 'p. door' सिंहद्वारं ; 'p. queen' अग्र-पट्ट-महिषी; 'p. minister' प्रधानामात्यः. -ITY, *s.* राष्ट्रं, प्रदेशः, मंडलं, राज्यं. -LY, *adv.* प्रधानतः, प्राधान्येन, मुख्यशः, विशेषतः, विशेषेण.

PRINCIPLE, *s.* तत्त्वं, मूलतत्त्वं, बीजं, सारः. 2 कारणं, हेतुः, आदिबीजं-हेतुः, मूलं, अंगं, अवयवः, साधनं, मूलांगं-द्रव्यं. 3 नियमः, विधिः, सूत्रं, उत्सर्गः, स्थिति *f.*, व्यवस्था. 4 गुणः, भावः, धर्मः, स्वभावः. 5 क्रमः, रीति *f.*, मार्गः, मर्यादा, धारा, पद्धति *f.* 6 आधारः, आश्रयः, उपष्टंभः, मूलं ; (opp. of practice) आगमः, शास्त्रं ; 'grounded in p. s' आगमिन्, शास्त्रनिपुण ; 'having good p. s' सुनियमनिष्ठ, सुवृत्त; 'of bad p. s' खंडितवृत्त, भ्रष्टचरित.

PRINT, *v. t.* मुद्रयति (D.), अंक् 10, मुद्राक्षरैः अंक्. -*s.* चिह्नं, अंकः, मुद्रा ; 'foot-p.' पदं, पदमुद्रा-चिह्नं. 2 मुद्रणयंत्रं. 3 मुद्रणं ; 'in p.' मुद्र्यमाण. -ED, *a.* मुद्रित, मुद्रांकित, मुद्राक्षरांकित. -ER, *s.* मुद्रकः, मुद्रणकृत् *m.* -ING, *s.* मुद्रणं, मुद्रांकनं ; 'p.-house' मुद्रणयंत्रालयः, मुद्रणशाला ; 'p.-press' मुद्रणयंत्रं.

PRIOR, *a.* प्रधान, गरीयस्, गुरुतर, पूर्व, अग्रय, आदिम, आद्य, पूर्व-आदि-प्राक् in comp. ; 'p. existence' प्राग्भावः, पूर्व जन्म ; 'p. and subsequent' पूर्वापर, परापर, परावर. -*s.* मठाध्यक्षः, मठाधिपतिः, विहारपालः. -ITY, *s.* पूर्वता, प्रथमता. 2 (Of rank) अग्रपदंमानः, श्रेष्ठपदं, प्राधान्यं. -Y, *s.* मठः, विहारः, आश्रमः.

PRISM, *s.* क्रकचायतं. -PRISMATIC, *a.* क्रकचायत.

PRISON, *s.* कारा, बंदिशाला-गृहं, बंधनालयः, कारागृहं, चारः-रकः, गुप्तिस्थानं; 'escaped from the p.' बंधनं भित्त्वा पलायांचक्रे ; 'keep in p.' बंधने निरुध् 7 U. -ER, *s.* बंदि-दी *f.*, कारागुप्तः, रुद्धः, कारागारस्थः. 2 (Of war) युद्धगृहीतः.

PRISTINE, *a.* प्राक्तन (नी *f.*), पुराण, पूर्व, पूर्वकालिक (की *f.*), प्राचीन, प्राक्कालीन.

PRIVATE, *a.* विजन, विविक्त, निर्जन, एकांत, निभृत, निःशलाक. 2 स्व, आत्मीय, असाधारण (णी *f.*), असामान्य, विविक्त, स्व-आत्म in comp. 3 गुप्त, गूढ, रहस्य, प्र,-छन्न, अप्रकट, अव्यक्त, रहस्-मिथः-अंतः-in comp. 4 अनधिकारिन्, अनधिकारिक (की *f.*); 'p. profit' आत्महितं, स्वलाभः; 'p. road' गूढप्रच्छन्नमार्गः; 'p. door' अंतर्द्वारं, गूढद्वारं, प्रच्छन्नं; 'p. apartments' अंतःपुरं, अवरोधगृहं, अंतर्गृहं; 'now is the time to be p.' रहस्यमधुना (Bh. II. 97); 'p. talk' रहःसंकथा, मिथोजल्पः; 'p. parts' गुह्यं, उपस्थः; 'p. room' अंतःशालाकोष्ठः, उपरोधकं. -*s.* सैनिकः. -LY, 'in p.' *adv.* रहः, रहसि, मिथः, रहस्ये, निभृतं, विविक्ते, एकांते, विजने, उपांशु, गूढं, प्रच्छन्नं, गुप्तं, अप्रकाशं, अप्रकटं. -NESS, -PRIVACY, *s.* रहस् *n.*, विविक्तं, विजनं, रहोभावः, विविक्त-एकांत-वासः; रहस्यं, गुप्तता, छन्नता, अप्राकाश्यं. 2 रहःस्थानं-स्थलं, विविक्त-निर्जन-स्थानं, निर्जनदेशः.

PRIVATION, *s.* अभावः, विरहः, राहित्यं, हानि *f.* क्षयः, लोपः, नाशः. 2 कष्टं, कृच्छ्रं, आपद्-विपद् *f.* 3 आहारविरहः, आहाराभावः, सुखसाधनलोपः, अन्नवस्त्रहानिः.-PRIVATIVE, *a.* हानि-क्षय-लोप-कर (री *f.*). 2 अभावात्मक, अभावरूप, अभाववाचिन्. -*s.* अभावशब्दः, नञ्पदं. -LY, *adv.* अभावरूपेण.

PRIVILEGE, *s.* विशेषाधिकारः, असामान्याधिकारः, स्वाधिकारः, अधिकारः, स्वत्वं. -*v. t.* विशेषाधिकारं दा 3 U. -ED, *a.* अधिकारविशिष्ट, साधिकार, विशेषाधिकारयुक्त.

PRIVY, *a.* गूढ, प्रच्छन्न, विविक्त, रहः in comp.; *See* PRIVATE. 2 (To) संसर्गिन्, सहाय, सहकारिन्; सहज्ञानिन्, सहवेदिन्; 'p. council' गूढसभा; 'p. councillor' गूढसभासद्. –*s.* शौचस्थानं-कूपः, उच्चारप्रस्रावस्थानं. –LY, *adv.* रहसि, गूढं; *See* PRIVATELY.–PRIVITY, *s.* सहकारिता, सहायता, संसर्गः, सहज्ञानं. 2 गुह्य-गुप्त-स्थानं-इंद्रियं, अधोंगं.

PRIZE, *s.* पारितोषिकं, उपायनं, प्रतिफलं. 2 रत्नं, बहुमूल्यं वस्तु, महार्घद्रव्यं. 3 युद्धजितं धनं-द्रव्यं. 4 जय-सिद्धि-फलं-लाभः. 5 स्पर्धा-पण-जेयं, पणः; 'p.-fighter' मल्लः; 'p.-fighting' मल्लयुद्धं, स्पर्धायुद्धं. –*v. t.* बहु मन् 4 A, अवेक्षया पा c. (पालयति), संमन् c. 2 मूल्यं-अर्घं-निरूप् 10 or निर्णी 1 P. –ED, *a.* बहुमत, अभीप्सित, इष्ट.

PRO, PREFIX, प्र, अग्रे; 'p. s and cons' विधिनिषेधपक्षौ.

PROBABLE, *a.* संभाव्य, सत्यसंकाश; gen. ex. by सं-भू 1 P, उप-पद् 4 A, युज् pass. or by (*adv.*); 'it is p.' एतत् उपपद्यते, संभवति, युज्यते, स्यान्नाम एवं. –PROBABLY, *adv.* प्रायेण, प्रायः, प्रायशः, किल, नाम, स्यात्; by pot. pass. part. of भू; एतेन मम प्रियमित्रेण भाव्यं 'he is p. my dear friend.' –PROBABILITY, *s.* संभवः, संभाव्यता, अनुमानं, better by (*adv.*).

PROBATE, *s.* मृतलेखप्रमाण.

PROBATION, *s.* परीक्षा-क्षणं. –ARY, *a.* परीक्ष्यमाण. –ER, *s.* परीक्ष्यमाणः; अंतेवासिन् *m.*, नवशिष्यः, प्राथमकल्पिकः.

PROBE, *s.* शलाका, एषणी. –*v. t.* शलाकया परीक्ष् 1 A. 2 निपुणं-सूक्ष्मं-परीक्ष् or आलोच् 10. –ATOR, *s.* परीक्षकः. –ING, *s.* क्षतपरीक्षणं.

PROBITY, *s. See* HONESTY.

PROBLEM, *s.* प्रश्नः, विकल्प-विवाद-प्रश्न-विषयः. 2 कृत्यं, उपायं. 3 (Question) उद्देशकः (in Math.); 'its solution' न्यासः (Lit.) –ATICAL, *a.* सदिग्ध, अनिश्चित, वैकल्पिक (की *f.*).

PROBOSCIS, *s.* प्रोथः; करः, शुंडा, हस्तः.

PROCEED, *v. i.* प्रचल् 1 P, प्र-या 2 P, प्रगम्-सृ 1 P, अग्रे गम्, प्र-स्था 1 A. 2 प्रवृत् 1 A, न विरम् 1 P; 'the play still p. s' क्रीडा अद्यापि प्रवर्तते एव. 3 पुनः वक्तुं प्रवृत्. 4 प्रवृत्, आरभ् 1 A, प्र-उप-क्रम् 1 A; (with) प्रस्तु 2 U or c., प्रवृत् c.; (प्रारब्धं) सं-पद् c., निष्पद् c., निर्वह् c.; 'p. with your tale' तत-स्ततः, ततः, परं कथय; 'p. with the matter at issue' प्रस्तूयतां विवादवस्तु (M. 2); 'you may p. with your dinner preparations in honor of the worthy Brâhma*n*as' प्रवर्त्यतां भगवतो ब्राह्मणानुद्दिश्य पाकः (Mu. 1). 5 प्र-उत्-सं-भू 1 P, प्रवृत्, उत्पद् 4 A, प्र-,जन् 4 A, उद्-इ 2 P, निःसृ, निर्गम्; oft. ex. by कारणं, मूलं, निमित्तं, हेतुः; 'from what cause does thy disorder p.' किन्निमित्तं ते संतापः (S. 3). 6 (Against) अभियुज् 7 A, 10, राजकुले निविद् c. –ING, *a.* उत्पन्न, जात, प्रभव, उद्भव, उत्थित, मूल, कारण, निमित्त, हेतु in comp.; *See* (*v.*).–*s.*,–PROCEDURE, *s.* कार्यं, व्यवहारः, व्यापारः, चरितं, चेष्टितं, आचारः, वृत्तं, कृति *f.*, विधानं, अनुष्ठानं. 2 रीति *f.*, क्रमः, संप्रदायः, मार्गः, पर्यायः; 'legal p.' व्यवहारविधिः, व्यवहारक्रमः. –PROCEEDS, *s.* उत्पन्नं, उदयः, लाभः, फलं. –PROCESS, *s.* प्रसरः, प्रगमः, प्रवृत्तिः, प्रयाणं. 2 क्रमः, रीतिः, मार्गः, पर्यायः, विधिः, गतिः, परिपाटि-टी *f.*, सरणि-णी *f.*, पद्धति *f.* 3 व्यवहारः, कार्यं; 'in p. of time' कालक्रमेण, दिनेषु गच्छत्सु, गच्छता कालेन. —PROCESSION, *s.* यात्रा, जन-लोक-यात्रा-श्रेणी. 2 प्रगमनं, प्रस्थानं, प्रचलनं, प्रवृत्तिः. –AL, *a.* यात्रारूपं.

PROCLAIM, *v. t.* घुष् 10, उत्-वि-°, प्र-ख्या c. (ख्यापयति), प्रकाश् c., प्रकटयति (D.), प्रकटीकृ, कृत् 10, उच्चर् c. 2 Outlaw, q. v. –ER, *s.* घोषकः, प्रख्यापकः. –PROCLAMATION, *s.* घोषः-षणं-णा, ख्यापनं, प्रकाशनं, उत्कीर्तनं; 'written p.' घोषणपत्रं, राजाज्ञापत्रं.

PROCLIVITY, *s.* प्रावण्यं, प्रवृत्ति *f.*, शीलता in comp. –PROCLIVIOUS, *a.* प्रवण, शील in comp.

PROCRASTINATE, *v.* विलंब् 1 A, व्याक्षिप् 6 P, कालं क्षिप् or हृ 1 P, चिर(रा)यति (D.), मंदायते (D.). –ION, *s.* विलंबः, दीर्घसूत्रता, व्याक्षेपः, कालयापनं-हरणं-क्षेपः. –OR, *s.* दीर्घ-सूत्रः-त्री, चिरक्रियः.

PROCREATE, *v. t.* प्र-सू 2, 4 A, उत्पद् c., जन् c. (जनयति). –ION, *s.* प्रसवः, प्रसूति *f.*, जननं, उत्पत्ति *f.*, प्रजोत्पादनं. –IVE, *a.* उत्पादक, सावक, जनयितृ. –OR, *s.* जनकः, उत्पादयिता.

PROCTOR, *s.* प्रतिहस्तः, प्रतिनिधिः.

PROCUMBENT, *a.* शयान, पतित.

PROCURE, *v. t.* आ-नी 1 P, संपद् c., घट् c. (घटयति). 2 लभ् 1 A, आप् 5 P, अधिगम् 1 P, विद् 6 U, आ-समा-सद् c.; *See* GET. –ER, *s.* प्रापकः, संपादकः. 3 विटः, नर्मसचिवः, संचारकः, कुंडाशिन् *m.* –ESS, *s.* कुट्ट(ट्टि)नी, शंभली, दूती-तिका, संचारिका, सु-,रततालो.

PRODIGAL, *a.* मुक्तहस्त, अति-अमित-बहु-व्ययिन्, उत्सर्गिन्, अतिव्ययशील-पर, अतित्यागिन्.–*s.* मुक्तहस्तः, व्ययपरः. –ITY, *s.* अतिव्ययः, अपचयः, बहु-अमित-व्ययः, अतित्यागः, अत्युत्सर्गः, अर्थोत्सर्गः, मुक्तहस्तत्वं. –LY, *adv.* महाव्ययेन, मुक्तहस्तेन, अत्युत्सर्गेण.

PRODIGY, *s.* अद्भुतं, अद्भुत-अपूर्व-विषयः-वस्तु, उत्पातः, महाश्चर्यं, अनन्यसाधारणं वस्तु. 2 (Of persons) अद्भुतशक्ति, अद्भुतबुद्धिसंपन्न. –IOUS, *a.* महाप्रमाण, अतिमहत्-बृहत्, विकट-राक्षस-शरीर, अद्भुताकार; *See* GIANT. 2 अद्भुत, अपूर्व, विलक्षण, विचित्र, आश्चर्य.

—IOUSLY, *adv.* अद्भुतं, साश्चर्यं. —IOUSNESS, *s.* अद्भुतता, अतिमहत्त्वं.

PRODUCE, *v. t.* निर्मा 3 A, 2 P, सृज् 6 P, उत्पद् c., जन् c. (जनयति), उत्-सं-भू c., साध् 5 P or c., कृ 8 U, वि-धा 3 U, क्लृप् c., घट् c. (घटयति), वि-, रच् 10. 2 प्र-,सू 2, 4 A, उत्पद् c., सं-प्र-जन् c. 3 प्र-,दृश् c., आ-उपा-नी 1 P, प्रद्द c., पुरस्कृ, पुरो नि-धा, अग्रे स्था c. (स्थापयति) or निविश् c., आविष्कृ, प्रकटीकृ, निष्कृष् 1 P. 4 प्र-,दा 3 U. 5 वृध् c. —*s.* फलं, उत्पन्नं, लाभः, उत्पत्ति *f.*, प्रसवः. —ED, *a.* उत्पन्न, उत्पादित, निर्मित, घटित, सृष्ट, जनित, जात, उद्भूत ; 'to be p.' जन् 4 A, उत्पद् 4 A, उत्था 1 P, सं-उद्-भू 1 P; *See* ARISE ; gen. ex. by ज, जात, जन्य, प्रभव, उद्भव, हेतु, प्रवृत्त, प्रयुक्त in comp.; 'p. from water' अंभोज, जलोद्भव, &c. ; 'p. from flowers' कुसुमभव &c. —ER,-ING, *s.*, *a.* उत्पादक, प्रसविन्, प्रद, द, दायिन्, आवह, कारिन्, कर (री *f.*), in comp. —PRODUCT, *s.* फलं, उत्पन्नं, लाभः. 2 परिणामः, फलं, उत्तरफलं. 3 गुणनफलं, वधः, घातः, फलं, गुणाकारः. —ION, *s.* उत्पादनं, निर्माणं, सृष्टि *f.*, घटनं, विधानं, निष्पादनं. 2 जननं, उत्पत्तिः, प्रसवः, उद्भवः, संभवः, जन्मन् *n.* 3 निर्मितद्रव्य-वस्तु, शिल्पनिर्माणं. —IVE, *a.* शस्यप्रद-दायिन्, सफल, अवंध्य. 2 उत्पादक ; दायिन्, द, प्रद, कारिन्, आवह in comp. ; 'p. of gain' लाभप्रद, लाभावह. 3 लाभफल-प्रद-कर.

PROEM, *s. See* PREFACE.

PROFANE, *v. t.* अपवित्रीकृ 8 U, दुष् c. (दूषयति). 2 लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अतिचर् 1 P. 3 Contemn, q. v. —*a.* अपवित्र ; अपुण्य, अमेध्य, अशुद्ध ; not 'Holy' q. v. 2 अधार्मिक (की *f.*), धर्म-ईश्वर-द्वेषिन्, धर्म-ईश्वर-निंदारूप. 3 असंस्कृत, अप्रतिष्ठित, संस्कारहीन. 4 लौकिक-सांसारिक-प्रापंचिक (की *f.*) —ATION, *s.* दूषणं, अपवित्रीकरणं, अतिक्रमः-मणं. —LY, *adv.* धर्मनिंदापूर्वं, अधार्मिकवत्. —NESS, *s.* धर्म-ईश्वर-निंदा-द्वेषः, धर्म-ईश्वर-अवज्ञा-अतिक्रमः.

PROFESS, *v. t.* प्रति-ज्ञा 9 A, प्रकाश् c., प्रतिज्ञापूर्वं कथ् 10 or वद् 1 P, स्वी-अंगी-कृ 8 U, उ(ऊ)रीकृ, अभ्युपगम् 1 P. 2 छद्म-छलं-कृ. दृश् c., भू c.; *See* PRETEND ; oft. by नाम ; तव कन्या नाम भवेयं (D. K. II. 5) 'I shall p. myself to be your daughter'. 3 उद्यम् 1 A, चेष्ट् 1 A. —ED, *a.* स्वीकृत, अंगीकृत, प्रकाशित, प्रकटित, व्यक्तोदित, प्रकाश. —EDLY, *adv.* प्रतिज्ञापूर्वं, प्रकाशमेव, सप्रतिज्ञं. —ION, *s.* प्रतिज्ञा, उक्ति *f.*, वचनं, अंगी-स्वी-कारः, प्रकाशवादः-वचनं, ख्यापनं. 2 Pretension, q. v. ; 'p. s of love' कृत्रिमप्रीतिः, अलीकः रागाविर्भावः. 3 वृत्ति *f.*, आ-उप-जीविका, आजीवः, व्यवसायः, व्यापारः; 'military p.' शस्त्राजीवः, क्षत्रवृत्तिः. —IONAL, *a.* वृत्तिमत्, व्यवसायिन्, (*s.*) in comp. —OR, *s.* अध्यापकः, गुरुः. 2 ख्यापकः, प्रकाशकः, प्रतिज्ञातृ *m.*, स्वीकर्ता. —ORSHIP, *s.* अध्यापकपदं-पदवी.

PROFFER, *v. See* OFFER.

PROFICIENT, *a.* प्रवीण, कुशल, निपुण, अभिज्ञ, विचक्षण, पारंगत, अभ्यंतर, निष्णात, व्युत्पन्न, लब्धप्रतिष्ठ, पटु. —PROFICIENCE,-CY, *s.* प्रावीण्यं, वैचक्षण्यं, प्रतिष्ठा, कौशलं, पाटवं ; 'has attained p. in all sciences' सर्वशास्त्रेषु परां प्रतिष्ठां गतः, परं कौशलमवाप, सकलशास्त्रपारंगतः.

PROFILE, *s.* पार्श्वदृश्यं, अर्धमुखदर्शनं.

PROFIT, *s.* लाभः, हितं, उपकारः, अर्थः, कल्याणं. 2 फलं, लाभः, आयः, उदयः, वृद्धि *f.*, कलांतरं, लभ्यं ; 'p. and loss' लाभालाभौ ; 'capital with p. thereon' मूलकलांतरं. —*v. t.* हितमावह् 1 P, उपकृ 8 U, हिताय भू 1 P. —*v. i.* (Oneself) फलं-लाभं-प्राप् 5 P or विद् 6 U. 2 वृध् 1 A, उन्नतिं-उत्कर्षं-या 2 P, प्र-उप-चि pass. ; *See* IMPROVE. —ABLE, *a.* लाभ-अर्थ-कर(री *f.*), लाभप्रद, लाभफल-द, फल-लाभ-आवह. 2 हित, हितकर, हितावह, उपयुक्त, उपकारिन्, सोपकार. —ABLENESS, *s.* साफल्यं, फलदता, उपयुक्तता. —ABLY, *adv.* सलाभं, सफलं, सहितं, अमुधा. —LESS, *a.* निष्फल, अफल, अहित, व्यर्थ, निरर्थक.

PROFLIGATE, *a.* खंडितवृत्त, दुश्चरित्र, दुराचार, पापनिरत-अभिनिविष्ट, व्यसनिन्, दुर्वृत्त, भ्रष्ट-नष्ट-चरित्र, भोगविषय-आसक्त. —*s.* व्यसनी, लंपटः, विषयी, भोगासक्तः. —LY, *adv.* सव्यसनं, दुर्वृत्ततया. —PROFLIGACY, *s.* व्यसनिता, भ्रष्टचरितं, दुराचारः, भ्रष्टता, भोगासक्ति *f.*, दुर्वृत्तता.

PROFOUND, *a.* प्र-,गाढ, अतिग(गं)भीर, घन, अगाध. 2 परम, गाढ, घन, अत्यंत, सु-अति-pr. ; 'p. respect' परमादरः, आदरातिशयः. 3 गहन, नि-, गूढ, गूढार्थ, दुर्बोध, दुर्ज्ञेय, परमगहन. 4 (Of persons) निष्णात, पारंगत, परम, व्युत्पन्न, अभिनिविष्ट, गूढतत्वज्ञ. —LY, *adv.* गंभीरं, गाढं, अत्यंतं, भृशं, सु-अति pr. —NESS,-PROFUNDITY, *s.* गांभीर्यं, अगाधता. 2 घनता, गाढता. 3 गहनता, गूढता. 4 अभिनिवेशः.

PROFUSE, *a.* प्रचुर, प्रभूत, अपरिमित, विपुल, बहु, अत्यधिक, अतिरिक्त, समृद्ध, उद्रिक्त, अतिशय-सु-अति in comp. 2 मुक्तहस्त, अतिव्ययिन्, व्ययपर ; *See* PRODIGAL; 'he is a p. writer' वागुपचयप्रियः, प्रचुरवाक्यानि लेखे प्रयोजयति. —LY, *adv.* प्रचुरं, भृशं, भूरि, बाहुल्येन, अत्यंतं, सु-अति pr. ; अतिव्ययेन, अपरिमितं. —NESS,-PROFUSION, *s.* अतिव्ययः, अमितव्ययः, अत्युत्सर्गः. 2 समृद्धि *f.*, प्राचुर्यं, उद्रेकः, अतिरेकः, उपचयः, बाहुल्यं.

PROG, *s.* भोजनं, अन्नं, भैक्ष्यं.

PROGENITOR, *s.* पिता, प्रजापतिः, पूर्वजः, पूर्व-कुल-पुरुषः, जन्मदः, जनयिता ; *See* ANCESTOR.

PROGENY, *s.* संतानः, अपत्यं, संतति *f.*, प्रजा.

PROGNOSTIC, *s.* निमित्तं, अजन्यं, शकुनः-नं, लक्षणं ; *See* OMEN. –*a.* प्र-उद्-बोधक, अग्रसूचक. –ATE, *v. t.* पूर्व-अग्रे-सूच् 10 or दृश् c.; *See* FOREBODE. –ATION, *s.* पूर्वसूचनं-ना. –ATOR, *s.* पूर्वलक्षणज्ञः, अग्रसूचकः.

PROGRAMME, *s.* सूचिपत्रं ; कार्यक्रमः-परिपाटी.

PROGRESS, *s.* प्र-,वृद्धि *f.*, उत्कर्षः, क्रमशः वृद्धिः, उत्कर्षक्रमः. 2 प्राप्ति *f.*, आगमः ; 'p. in learning' विद्यागमः, विद्याभिनिवेशः. 3 प्र-गमनं, प्रयाणं, यानं, यात्रा, प्रस्थानं, प्रसरः, क्रमः-मणं, अयनं; *See* MARCH; 'difficult p.' संक्रमः, दुर्गसंचरः. –*v. i.* उत्कृष् pass., वृद्धि-उन्नतिं-या 2 P, प्र-,वृध् 1 A, प्र-उप-चि-pass.; *See* IMPROVE. 2 प्रगम्-चल्-सृ 1 P, प्रया 2 P, प्र-स्था 1 A; *See* ADVANCE. –ION, *s.* श्रेढी, श्रेढीव्यवहारः ; 'first term' मुखं, वदनं, आदिः ; 'common difference' चयः ; 'geometric mean' चयो गुणः ; 'sum' श्रेढीफलं ; 'number of terms' गच्छः. –IVE, *a.* आनुक्रमिक (की *f.*), क्रमिक, अधिकाधिक, उत्तरोत्तर, क्रमशः वर्धमान. –IVELY, *adv.* क्रमशः, अनुक्रमेण, उत्तरोत्तरं, अधिकाधिकं.

PROHIBIT, *v. t.* नि-प्रति-षिध् 1 P, प्रत्यादिश् 6 P, निवृ c., प्रत्या-ख्या 2 P, नि-अव-रुध् 7 U. –ION, *s.* नि-प्रति-षेधः, प्रत्यादेशः, निरोधः, निवारणं, बाधा. –OR, *s.* निवारकः, निषेधकः. –IVE, –ORY, *a.* निषेधक, निवारक, नि-प्रति-षेधिन्, निषेधार्थक, निषेधवाचिन्.

PROJECT, *s.* उपायः, प्र-,युक्ति *f.*, कल्पना, प्रयोगः, संकल्पः, प्रबंधः. 2 अभिप्रायः, आशयः, उद्देशः. –*v. i.* प्रलंब् 1 A, बहिर्लंब्, उपरि लंब्. बहिः स्था 1 P or भू 1 P or वृत् 1 A. –*v. t.* प्र-,क्षिप् 6 P, प्रास् 4 U, निपत् c., प्रमुच् 6 P; *See* THROW. 2 (मनसा) क्लृप् c., निरूप् 10, चिंत् 10, युज् 10, आलोच् 10, अनुसं-धा 3 U. –ILE, *a.* प्रक्षेपणीय, दूरवेधिन्. –*s.* अस्त्रं; *See* MISSILE. –ING, *a.* प्र-,लंब, उन्नत, उदग्र, उत्तुंग, बहिर्वर्तिन्; oft. by उत्सेध, उत्सेधिन्; 'with a p. nose' प्रलंबनास, घोणोन्नत, उन्नस; 'having p. teeth' उदग्रदत्, करालदंत; 'having p. breasts' स्तनाभोगवती, उन्नतस्तनी; 'shattered by falling over (her) p. breasts' पयोधरोत्सेधनिपातचूर्णिताः (K. v. 24). –ION, *s.* प्रलंबता, उदग्रता. 2 आभोगः, उत्सेधः; निर्यूहः, दंतकः. 3 छेद्यकं. –OR, *s.* चिंतकः, योजकः.

PROLAPSE, PROLAPSUS, *s.* भ्रंशः. –*v. i.* भ्रंश् 1 A, 4 P.

PROLATED, *a.* प्लुत (vowel), दीर्घोच्चारित.

PROLEGOMENON, *s.* प्रस्तावना, उपोद्घातः.

PROLEPSIS, *s.* पूर्वग्रहणं, पूर्वादानं.

PROLIFIC, *a.* अवंध्य, बहुप्रज-प्रसव-अपत्य, प्रसवशील, सुतिन्, बहुसंतान. 2 बहुफलप्रद, बहुफल; *See* PRODUCTIVE. –ALLY, *adv.* प्राचुर्येण, विपुलं.

PROLIX, *a.* सु-अति-विस्तर, प्रपंचित, सुदीर्घ, दीर्घसूत्रिन्, अत्यायत. –ITY, *s.* अतिविस्तरः, प्रपंचः, वाग्विस्तरः-प्रपंचः, वागुपचयः; दीर्घसूत्रता, अतिविस्तारः. –LY, *adv.* विस्तरशः; अतिविस्तरेण, सप्रपंचं.

PROLOGUE, *s.* प्रस्तावना, आमुखं, प्रास्ताविकी विज्ञप्तिः; 'benedictory p.' नांदी.

PROLONG, *v. t.* दीर्घीकृ 8 U, प्र-वि-तन् 8 U, वि-प्र-सृ c., विस्तॄ c., आयम् 1 A or c. 2 व्याक्षिप् 6 P or विलंब् c.; 'a p. ed note' तानः. –ATION, *s.* विस्तारः, वितति *f.*, आयतिः, दीर्घीकरणं.

PROLUSION, *s.* *See* PRELUDE.

PROMENADE, *v. t.* विहृ 1 P, विचर् 1 P, विहारार्थं परिभ्रम् 1, 4 P. –*s.* विहारः, परिभ्रमणं. 2 विहारस्थानं.

PROMINENT, *a.* प्रधान, प्रमुख, श्रेष्ठ, मुख्य, विशिष्ट, परम; *See* PRINCIPAL. 2 सुस्पष्ट, सुप्रकाश, सुव्यक्त, सुदृश्य. 2 उन्नत, उदग्र, उत्तुंग, प्रलंब, साभोग, उत् pr.; *See* PROJECTING. –LY, *adv.* प्राधान्येन, विशेषतः, सुप्रकाशं, सुस्पष्टं, उन्नतं. –PROMINENCE, *s.* प्राधान्यं, विशिष्टता, श्रेष्ठता, उत्कर्षः, परमपदं. 2 उन्नति *f.*, उत्सेधः, उत्तुंगता, आभोगः.

PROMISCUOUS, *a.* प्र-सं-कीर्ण, संकुल, अविविक्त, निर्विशेष, अपरिच्छेद, अभेद, संमिश्रित ; 'p. union' संकरः, सांकर्यं. –LY, *adv.* निर्विशेषं-षेण, संकीर्णं, अभेदेन, अक्रमेण, अपरिच्छेदेन. –NESS, *s.* संकीर्णता, संकुलता, अभेदः, संकरः.

SHARP, a. तीक्ष्ण, in all senses; तीक्ष्णा बुद्धिः, तीक्ष्णा वर्षधारा, तीक्ष्णो दंडः &c. ; नि-,शात, नि-,शित, प्र-,खर, तिग्म, तीव्र, तीक्ष्ण-शित-धार, सूच्यग्र, तीक्ष्णाग्र; 's. descending arrows' निशितनिपाताः शराः (S. 1). 2 (Intellect) अतिप्रदीप्त, सूक्ष्म, तीक्ष्ण, सूक्ष्म-शीघ्र-ग्राहिन् ; (of persons) तीक्ष्णमति, कुशाग्रबुद्धि-मति, सूक्ष्म-शीघ्र-तीव्र-मति, प्रदीप्तप्रज्ञ, विदग्ध, निपुण, पटु, चतुर, कुशल; (in action) शीघ्र, आशु-क्षिप्र-कारिन्, तीक्ष्णकर्मन् . 3 सरस, विदग्ध, रसिक. 4 अम्ल, शुक्त. 5 कटु, उग्र, (smell &c.). 6 कटु, उग्र, तीव्र, तीक्ष्ण, परुष, अरुंतुद, मर्मस्पृश्-भिद् ; 's. pain' तीव्रवेदना; 's. language' परुषवचनं, वाग्विषः ; 's. sound' कर्कशध्वनिः; 's.-edged' तीक्ष्ण, निशितधार, धारासनाथ; 's.-pointed' तीक्ष्णाग्र, सूच्यग्र; 's.-set' तीव्रक्षुधाग्रस्त, अतिप्रबलक्षुधावसन्न; 's.-shooter' लक्ष्यवेधिन्; 's.-sighted' तीक्ष्ण-सूक्ष्म-दृष्टि, &c. -s. उदात्तः, उदात्त-उच्च-स्वरः. -EN, v. t. नि-,शो 4 P, उत्तिज् c., शाणयति (D.), तीक्ष्णीकृ 8 U, क्ष्णु 2 P; (appetite) उत्-,बुध् c., प्र-,रुच् c., दीप् c. -ER, s. वंचकः, धूर्तः; *See* ROGUE. -LY, adv. तीक्ष्णं, तीव्रं, प्रखरं, उग्रं, परुषं, &c. -NESS, s. तीक्ष्णता, कुशाग्रमतित्वं, मतिप्रकर्षः, पाटवं, पारुष्यं, कार्कश्यं &c.

SHATTER, v. t. वि-,शॄ 9 P, वि-,दॄ 9 P or c., खंडशः-लवशः-भंज् 7 P, लवशः चूर्ण् 10 or निष्पिष् 7 P ; 'why am I not s. ed into a thousand pieces.' दीर्यं किं न सहस्रधाहं (U. 6) ; यथा यथायं वैनाशिकसमय उपपत्तिमत्त्वाय परीक्ष्यते तथा तथा विदीर्यत एव (S. B. 580) 'the more is this V. theory put to a logical test, the more is it s. ed to pieces (does it give way).' -v. i. विदॄ &c. pass.

SHAVE, v. t. मुंड् 1 P, 10, क्षुरेण कृत् 6 P or छिद् 7 P or लू 9 U, आवप् c., क्षुर्-खुर् 6 P. 2 तक्ष् 1, 5 P; *See* PARE. -ER, s. क्षौरिकः, नापितः, क्षुरिन् m., मुंडकः. -ING, s. क्षौरं, मुंडनं. 2 तष्टं, विदलं, शकलं, खंडः.

SHE, pron. सा; in comp. ex. by f. terminations, 's.-goat' अजा, 's.-sparrow' चटका &c.

SHEAF, s. (शस्य-) मुष्टि m. f., स्तंबः, गुच्छः, स्तबकः.

SHEAR, v. t. लू 9 U, कृत् 6 P, छिद् 7 P, आवप् c., मुंड् 1 P, 10, वि-,शॄ 9 P. 2 अपहृ 1 P, निर्हृ; 'shorn of' वीत, हृत, निर्, हीन in comp.; *See* DESTITUTE; 'was shorn of his arms' छिन्नबाहुः कृतः or तस्य बाहू व्यशीर्यिताम्. -ER, s. लोमच्छिद् m.-च्छेदिन्, छिद् in comp. -ING, s. लवनं, कर्तनं, वपनं, छेदः-दनं. -SHEARS, s. खंडधारा, कर्तरिका, कर्तरी, कृपाणी.

SHEATH, s. कोशः-षः, पिधानं, आधारः; आ-,वेष्टनं, पुटः-टं, आच्छादनं. 2 दलं. —SHEATHE, v. t. कोशे नि-धा 3 U or निविश् c. 2 आ-परि-वेष्ट् 1 A or c., पि-धा, आवृ 5 U, आच्छद् 10.

SHED, v. t. नि-,पत् c., वि-,मुच् 6 P or c., विसृज् 6 P, गल् c.; 's. tears' बाष्पं विहृ 1 P, अश्रूणि वि-,मुच् or पत् c. 2 (Blood) स्रु c., पत् c., मुच्, मोक्ष् 10 ; 's. influence' फल् 1 P ; 'the moon s. s her white glory' इंदुर्धवलरश्मिजालं विकिरति. 3 (Light) क्षिप् 6 P, विसृज्, प्रकृ 6 P, प्रसृ c. -s. शाला; 's. for cattle' गोशाला, गोष्ठं. -DER, s. स्रावकः, मोचकः, पातकः.

SHEEN, a. उज्ज्वल, दीप्तिमत्; *See* BRIGHT. -s. प्रभा, तेजस् n.

SHEEP, s. मेषः, अविः, उरभ्रः, ऊर्णायुः; *See* RAM; 'a female s.' मेषी, एडका; 'goats and s.' अजाविकं; 'flock of s.' औरभ्रं. -ISH, a. अप्रतिभ, लज्जाशील, जनभीत; निस्तेजस्, निष्प्रभ, हत-नष्ट-गत-वीर्य, मेषस्वभाव-शील.

SHEER, a. शुद्ध, केवल, मात्र in comp.; *See* BARE, MERE. -v. i. वि-,अपसृ-सृप् 1 P.

SHEET, s. उत्तरच्छदः, प्रच्छदः, प्रच्छदपटः-वस्त्रं, शय्याच्छादनं. 2 (Of paper) पत्रं, फलकं, खंडः, एकभागः. 3 पत्रं, फलकः-कं (of metal) ; 'winding-s.' प्रेत-शव-वस्त्रं; 's. of water' जलसंघातः, तोयराशिः.

SHELF, s. काष्ठफलकः.

SHELL, s. कोशः-षः, कंचुकः, कवचः-चं, त्वच् f. (of fruit &c.); पुटः-टं; 'bivalve s.' कंबुः-बु; 'conch-s.' शंखः, कंबुः; 'oyster-s.' शुक्ति f.; 'dealer in s. s' शंखकारः, शांखिकः; कांबविकः; 's. of a pea' शिंबा, बीजकोशः; तुषः (of rice). 2 आ-परि-वेष्टनं, पुटः, कोशः (envelope). 3 बहिर्भागः; 's.-cutter' कांबविकः; 's.-fish' कंबुस्थः, शंखस्थः. -v. t. कोषं-त्वचं &c. अपनी 1 P or निर्हृ 1 P, निस्त्वचीकृ 8 U. -Y, a. शंखिन्, कंबुमय (यी f.),- पूर्ण.

SHELTER, *s.* सं-आ-श्रयः, शरणं, निवासस्थानं. 2 रक्षणं, त्राणं; 'able to give s.' शरण्य; 'take s. with' आ-समा-श्रि 1 U, शरणं या 2 P or गम् 1 P, शरणार्थं या. –*v. t.* 'give s.' रक्ष् 1 P, त्रै 1 A; *See* PROTECT; प्र-,छद् 10, व्यव-धा 3 U; आश्रयं दा 3 U, शरणं भू; 's. ed from the wind' निर्वात. –LESS, *a.* निराश्रय, निरालंब, अशरण.

SHELVE, *v. i.* अवसृप् 1 P, प्रवणीभू 1 P. –*v. t.* निष्कस् c., निराकृ 8 U. –ING, *a.* अवसर्पिन्, प्रवण.

SHEPHERD, *s.* अविपालः, मेषपालः. –ESS, *s.* मेषपाली, मेषरक्षिणी.

SHERD, *s.* खंडः-डं, शकलः-लं.

SHEW, *v. t. See* SHOW.

SHIELD, *s.* चर्मन् *n.*, फलकः-कं, फलं; 'armed with a s.' चर्मिन्, फलकपाणि, फलभृत्; 'having sword and s.' खड्गचर्मधर. 2 आश्रयः, शरणं, रक्षणं, गुप्ति *f.* –*v. t.* रक्ष् 1 P, त्रै 1 A, आ-, छद् 10; *See* PROTECT.

SHIFT, *s.* उपायः, प्र-,युक्ति *f.*, गति *f.*, साधनं, प्रयोगः. 2 छलोपायः, कपटं, छद्मन् *n.*, छलं, अप-व्यप-देशः. 3 अंतरीयं, अधोंशुकं, अधोवसनं. –*v. i.* परि-व्या-वृत् 1 A. 2 वि-,चल् 1 P, स्थानांतरं गम् 1 P or चल्. 3 वस्त्रांतरं परि-धा 3 U; 's. for oneself' वृत्तिं-जीविकां-उपपद् c. or प्रक्लृप् c. –*v. t.* परि-व्या-वृत् c., अन्यथा कृ 8 U, विकृ. 2 विचल् c., स्थानांतरं गम् c. or चल् c. –Y, *a.* छल-कपट-प्रिय.

SHIN, *s.* अग्रजंघा, पादः; *See* LEG.

SHINE, *v. i.* प्रकाश् 1 A, प्र-,भा 2 P, वि-,द्युत् 1 A, शुभ् 1 A, दीप् 4 A, राज् 1 U, भास् 1 A, स्फुर् 6 P, भ्राज्-भ्राश्-भ्लाश् 1 A, चकास् 2 P, प्र-,रुच् 1 A, ज्वल् 1 P, विलस् 1 P; 'stars s. by their own light' स्वतःप्रकाशाः तारकाः. –*s.* प्रकाशः, द्युति *f.*, प्रभा; *See* LIGHT. –ING, *a.* भास्वत्, द्युति-दीप्ति-मत्, भासुर, रुचिर, तेजस्विन्, कांतियुक्त, भ्राजमान, द्योतमान, &c. –Y, *a.* भास्वत्; *See* above.

SHINGLE, *s.* शर्करा, शिलाखंडः. 2 फलकः-कं.

SHIP, *s.* पोतः; यानं, प्रवहणं, (the sense being clear); बृहन्नौका-तरणि-णी *f.*; 's.-master' नौकाधिपतिः, पोताध्यक्षः. –*v. t.* (Off) पोतेन प्र-स्था c. or प्र-हि 5 P, पोतं आरुह् c., नौकायां प्रविश् c. 2 स्वस्थाने निविश् c. –SHIPWRECK, *s.* यान-पोत-भंगः, नौव्यसनं-भंगः-भेदः; (fig.) विध्वंसः, उच्छेदः, प्रणाशः; 'suffered a s.' यानभंगेन सागरे निमग्नः. –*v. t.* नावं-पोतं-भंज् 7 P or नश् c.; 'her hopes were s. ed' सर्वा आशा उन्मूलिताः, मूलच्छिन्ना इव.

SHIRK, *v.* सव्यीजं-छलेन-परिह् 1 P or त्यज् 1 P or हा 3 P; अप-व्यप-दिश् 6 P, छलं-छद्म-कृ 8 U; व्यपसृप् 1 P, व्यपक्रम् 1 U, 4 P, पलाय् 1 A. –ER, *s.* कार्यत्यागिन् *m.*

SHIRT, *s.* युतकं, चोलः, अधोवसनं-वस्त्रं.

SHIVER, *v. i.* कंप्-वेप्- 1 A, सीत्कारं मुच् 6 P; 's.-ing with cold' शीतकंपिततनु, शीतार्तत्वात् कंपमान; 'with s. ing force' सतरलवेगं. 2 बहुखंडशः भिद्-विद्-pass., शकलीभू 1 P. –*v. t.* शकलीकृ 8 U, बहुखंडशः भिद् 7 P or विद् 9 P or c., सहस्रधा भंज् 7 P. –*s.* प्र-,कंपः, वेपथुः, सीत्कारः, देह-गात्र-कंपः. 2 शकलः-लं, खंडकः, सूक्ष्मलवः, दलं, छेदः, भिन्नं; 'went to a hundred s. s' शतखंडीभूतः, शतधा भिन्नः.

SHOAL, *s.* गाधस्थलं, सैकत, पुलिनं. 2 संघः (मत्स्यादीनां), संघातः; 's. of fish' पोताधानं.

SHOCK, *s.* आ-अभि-घातः, निर्घातः, सं-वि-क्षोभः, संघट्टः, आकस्मिकक्षोभः; 'Oh hard s. of fate' अहह दारुणो दैवनिर्घातः (U. 2). 2 भयावेशः, साध्वसाक्रमः. 3 राशिः, उत्करः, चयः. –*v. t.* उप-अभि-हन् 2 P, वज्रेण व्यध् 4 P or तड् 10, अकस्मात् उद्विज् c. or त्रस् c.; 'I am s. ed to hear this from you' एतत्त्वन्मुखाच्छ्रुत्वा वज्रताडित इवास्मि-प्रचकितोस्मि. 2 सं-वि-क्षुभ् c., संघट्ट् c. –ED, *a.* आकस्मिकसाध्वसोपहत. –ING, *a.* उद्वेगकर (री *f.*), साध्वसकारिन्, बीभत्स.

SHOE, *s.* उपानह् *f.*, पादुका, पादूः, पादत्रं; (for horses &c.) खुरत्रं-त्राणं. –*v. t.* पादुकया तड् 10 or प्र-ह 1 P. 2 खुरत्रेण सनाथीकृ 8 U, खुरत्रं बंध् 9 P; 's.-black,-cleaner' पादुकामार्जः; 's.-maker' चर्मकारः, पादूकृत्; 's.-string' पादुकाबंधनी.

SHOOT, *s.* पल्लवः-वं, किस(श)लयः-यं, प्रवालः; प्ररोहः, अंकुरः, नवपल्लवः; उद्भिद् *m.*, उद्भिज्जं. –*v. i.* आग्नेयास्त्रं-शरं &c. मुच् 6 P or अस् 4 P. 2 (Forth) निर्गम् 1 P, अंकुरयति (D.), उद्भिद् pass., प्ररुह् 1 P, स्फुट् 6 P, सहसा प्रादुर्भू 1 P; 'the bud though long shot forth' चिरनिर्गतापि कलिका (S. 6); better ex. by (*s.*); 'the seed has not (yet) shot forth' अंकुरोदयो नास्ति, प्ररोहाभिमुखमपि न दृश्यते बीजं (after K. v. 60). 3 निः-सृ 1 P, प्रवृत् 1 A. 4 मर्माणि भिद् 7 P or व्यध् 4 P. –*v. t.* प्र-,मुच्-क्षिप् 6 P, प्रास्, विसृज् 6 P, पत् c., ईर् c. 2 आग्नेयास्त्रेण-गुलिकाक्षेपेण-शरेण &c. हन् 2 P or प्रह 1 P or क्षण् 8 P or क्षि 5 P, हत्वा निपत् c.; 'shot (at) them only' तौ शरव्यमकरोत् स नेतरान् (R. XI. 27); 'shot in the eye' (गुलिका-)विद्धनयनः. 3 उत्-वि-सृज्, निरस्, निः-सृ c. –ER, *s.* भेत्तृ *m.*, वेधिन् *m.* –ING, *a.* उद्भिद्-ज्ज, प्ररोहिन्. –*s.* शरप्रक्षेपः, शरासनं, बाणमोक्षणं. 2 गुलिकाप्रक्षेपः. 3 तीक्ष्ण-तीव्र-वेदना; 'one skilled in s.' कृतहस्तः, कृतपुंखः, सुप्रयोगविशिखः. –SHOT, *s.* क्षेपः, प्रहारः, ताडनं &c. 2 अस्त्रं, मुक्तं, आग्नेयास्त्रं, गुलिका. 3 शरपातः, शरायणं. 4 विषयः, गोचरः. 5 लक्ष्यभेदप्रवीणः, लक्ष्यवेधी.

SHOP, *s.* शाला, पण्य-विक्रय-शाला-गृहं ; आपणः, विपणि *f.*; 'work-s.' उद्योगशाला ; 's.-keeper' आपणिकः, पण्याजीवः, विपणिन् *m.*, क्रयविक्रयिकः.

SHORE, *s.* कूलं, तीरं, तटं, वेला, रोधस् *n.*; 'brought on the s.' उत्कूलित.

SHORT, *a.* (Of time) अल्प, स्तोक, स्वल्प; 'of s. duration' अल्पकालीन-कालिक (की *f.*), अचिरस्थायिन्. 2 (In size &c.) ह्रस्व, खर्व, वामन; अतुंग, नीच, क्षुद्र, लघु; ह्रस्वपरिमाण, अल्प-क्षुद्र-प्रमाण; क्षुद्रतनु, अल्पमूर्ति, पृश्नि. 3 अविस्तीर्ण, लघु, संक्षिप्त. 4 अपूर्ण, अपर्याप्त, ऊन, न्यून. 5 अनायत, अदीर्घ. 6 हीन, विकल, रहित. 7 (Vowel) ह्रस्व, लघु ; 'in a s. time' अचिरेण, अचिरात्; 'for a s. time' कंचित्कालं, अल्पकालं-मात्रं ; 'in s.' किं बहुना, समासेन, संक्षेपतः, संक्षेपेण, समासतः; 's. of' विना, अंतरेण, मुक्त्वा, ऋते; 'I shall be satisfied with nothing s. of Râma's banishment' नान्येन तुष्येयमृते रामविवासनात्; 'cut s.' आक्षिप् 6 P; संहृ 1 P, संक्षिप्; 'come or fall s.' न्यूनीभू 1 P, क्षि-अपचि-pass.; *See* FAIL; 'a s. cut' अवक्रः-सरलः-मार्गः; 'stop s.' अकस्मात् स्था 1 P, मार्गमध्ये स्था ; 's.-coming' दोषः, प्रमादः, स्खलितं, छिद्रं, वैकल्यं, न्यूनता, अतिपातः, अपराधः; 's.-hand' संक्षिप्तलिपि *f.*; 's.-lived' क्षणध्वंसिन्-स्थायिन्-जीविन्-भंगुर, अचिरस्थायिन्, अल्पायुस् ; 's.-sighted' अदूरदर्शिन्, अदीर्घदर्शिन्, ह्रस्वदृष्टि; 's.-winded' श्वासकृच्छ्राभिभूत, दुःश्वासिन्. -EN, *v. t.* संक्षिप् 6 P, ह्रस् c., न्यूनी-अल्पीकृ 8 U, संकुच् 1 P, संहृ. 2 खर्वी-वामनीकृ. -*v. i.* ह्रस्वीभू 1 P, ह्रस् 1 P. 2 तनुतां गम् 1 P, क्षि pass., न्यूनीभू, अल्पीभू. -LY, *adv.* अचिरात्, अचिरेण, शीघ्रं, सपदि, झटिति; *See* QUICKLY. 2 संक्षेपतः, संक्षेपेण, समासतः; अविस्तरेण, आविस्तरशः. -NESS, *s.* ह्रस्वता, क्षुद्रता, लघुता, अल्पता, खर्वता; अविस्तरः, संक्षेपः, न्यूनता, अपर्याप्ति *f.*, &c.

SHOULD, Ex. by pot. pass. part.; 'I s. think so' अहं तावदेवं मन्ये, इति मम मतिः.

SHOULDER, *s.* स्कंधः, अंसः, भुजशिरस् *n.* -*v. t.* स्कंधे कृ 8 U or स्था c. (स्थापयति), स्कंधेन वह् 1 P. 2 स्कंधेन तड् 10 or प्रहृ 1 P.

SHOUT, *s.* रवः, कलकलः, उत्क्रोशः, निनादः, महाशब्दः-स्वनः-नादः, प्रणादः, घोषः-षणा, कोलाहलः, संहूति *f.*; (of victory) जयघोषः-ध्वनिः-शब्दः, हर्षनादः, सिंहनादः. -*v. i.* आ-वि-उत्-क्रुश् 1 P, उच्चैः-स्वन्-नद् 1 P or क्रुश्, मुच् 6 P or कृ with (*s.*), उद्-घुष् 10, मुक्तकंठं रु 2 P.

SHOVE, *v. t.* प्र-सृ c., संचल् c.; *See* PUSH; 's. off' अपसृ c. -*s.* प्रसारणं, अपसारणं.

SHOVEL, *s.* खनित्रं, अभ्रि *f.*, काष्ठकुद्दालः.

SHOW, *v. t.* दृश् c. (with acc. or dat. of person'; प्र-सं-°. 2 निर्दिश् 6 P, सूच् 10, प्रकाश् c., व्यंज् 7 P or c., व्यक्तीकृ 8 U; आविष्कृ, प्रकटीकृ; आ-उप-दिश् 6 P or c. (way). 3 कथ् 10, आ-, ख्या 2 P, बुध् c., ज्ञा c. (ज्ञापयति), आ-नि-विद् c.; 's. me the way' आदेशय मे मार्गं; 's. a favour' उपकृ, अनुग्रह् 9 P; 's. off' दंभार्थं दृश् c.; 's. to be true' प्रति-पद् c. -*v. i.* Appear, q. v. -*s.* दर्शनं, आलोकः, प्रेक्षास्थानं, कौतुकं. 2 दृश्यं, स्थानं. 3 आभासः; by अव-आ-भा 2 P or भास् 1 A. 4 व्यपदेशः, व्याजः; *See* PRETEXT. 5 आडंबरः, दंभः. -ER, *s.* प्र-,दर्शकः. -Y, *a.* दृष्टिहारिन्, सुभगालोक; अतिदर्शनीय, एकांतशोभन.

SHOWER, *s.* वृष्टि *f.*, वर्षः, आसारः; धारासंपातः, धारासारः; 's. of arrows' शरवृष्टिः, इषुवर्षः; 's. of tears' अश्रुधारा, बाष्पासारः-धारा; 's.-bath' धारागृहं, धारायंत्रगृहं. -*v. t.* वृष् 1 P, (fig. also). -Y, *a.* वृष्टिमत्, बहुधार, वर्षुक.

SHRED, *s.* खंडः-डं, शकलः-लं; वस्त्र-पट-खंडः. -*v. t.* खंडशः व्यवच्छिद् 7 P.

SHREW, *s.* वक्र-वाम-शीला, कर्कशा, उग्र-कटु-शीला, कैकेयी. 2 छुछुंदरी, गंधमुखी (s.-mouse). -ISH, *a.* वक्र-वाम-कटु-शील, कर्कश, कर्कशस्वभाव.

SHREWD, *a.* चतुर, विदग्ध, विचक्षण, निपुण, सूक्ष्मधीमति. 2 वैदग्ध्यप्रयुक्त, विदग्ध in comp. -LY, *adv.* चातुर्येण, विदग्धवत्. -NESS, *s.* वैदग्ध्यं, चातुर्यं, &c.

SHRIEK, *v. i.* परुषं आक्रंद् 1 P, वि-उत्-आ-क्रुश् 1 P, उच्चैः रु 2 P, आरट् 1 P, कर्कशं क्रुश्. -*s.* आ-,क्रंदितं, क्रंदनं, रावः, रवः, उत्क्रोशः, कर्कशनादः-रवः; *See* SCREAM.

SHRIKE, *s.* कलिंगः, पिंगः, धूम्या(म्रा) टः.

SHRILL, *a.* कर्कश, परुष, तीव्र, पटु, कर्णकटु, कर्णवेधिन्. -NESS, *s.* कार्कश्यं, कटुता.

SHRIMP, *s.* इंचाकः, जलवृश्चिकः.

SHRINE, *s.* पुण्यस्थानं, देवायतनं, तीर्थं.

SHRINK, *v. i.* संकुच्-आकुंच्-संहृ-संक्षिप्- pass., संकोचं इ-या 2 P, निमील् 1 P (lotus). 2 (Withdraw) सकंपं-सभयं-परावृत् 1 A, वित्रस् 1, 4 P, उद्विज् 6 A, भयेन-सहसा-अपसृ 1 P or अपक्रम् 1 U, 4 P; (into) गात्रसंकोचेन प्रविश् 6 P. -*v. t.* संकुच् 1 P, आकुंच् c., संहृ 1 P. -ING, *s.* संकोचः, आकुंचनं.

SHRIVEL, *v. i.* संकुच्-आकुंच्-विशॄ- pass. -*v. t.* संकुच् 1 P, विशॄ 9 P or c.; better by 's.-ed'. -LED, *a.* संकुचित, आ-कुंचित, विशीर्ण ; (into wrinkles) वलिपूर्ण, वलिमत्, वलिन-भ.

SHROUD, *s.* आच्छादनं, आवरणं, पिधानं. 2 शव-प्रेत-वस्त्रं-वसनं-आच्छादनं. -*v. t.* आ-,छद् 10 ; पि-धा 3 U, गुह् 1 U, गुप् 1 P; *See* COVER, CONCEAL.

SHRUB, *s.* गुल्मः-ल्मं, विटपिन् *m.*, स्तंबः, क्षुपः, वी-

लवृक्षः. —BY, *a.* गुल्मावृत. —SHRUBBERY, *s.* गुल्मवाटिका.

SHRUG, *v.* (असंतोषदर्शनार्थं स्कंधौ) धू 5, 9 U, संकुच् 1 P, संचल् c. —*s.* स्कंधधूननं-संकोचः.

SHUDDER, *v. i.* वेप्-कंप् 1 A, प्र-वि-°, वि-प्र-स्फुर् 6 P. —*s.*,—ING, *s.* प्र-,कंपः, वेपथुः, अंगकंपः-स्फुरणं-वेपनं. —ING, *a.* संजातवेपथु, सकंप.

SHUFFLE, *v. i.* नि-अप-ह्नु 2 A, अप-व्यप-दिश् 6 P, छद्म-छलं-कृ 8 U; *See* PREVARICATE. 2 वंच् 10; *See* CHEAT. —*v. t.* इतस्ततः संचल् c. or विक्षिप् 6 P. 2 संमिश्र् 10, बहुधा विकॄ 6 P, संकरीकृ 8 U, संकुलीकृ. —*s.*,—ING, *s.* वंचना, छलं, छद्मन् *n.*, अप-व्यप-देशः, अप-नि-ह्नवः, निह्नवोक्ति *f.* 2 संचालनं, विक्षेपः, संमिश्रणं. —ER, *s.* छद्म-कपटवृत्तिः, छलिन् *m.*

SHUN, *v. t.* परि-हृ 1 P, वृज् 10, परि-वि-°,परि-,त्यज् 1 P, हा 3 P; न उपगम् or उपसृ 1 P, संगमं परिहृ (a person).

SHUT, *v. t.* अपि-पि-धा 3 U, सं-आ-वृ 5 U, नि-अवरुध् 7 U, बंध् 9 P, (book, hand &c.); (eye) नि-,मील् 1 P or c., मुकुलयति (D.). 2 संहृ 1 P, संकुच् 1 P, संवृ, संहन् 2 P, संपीड् 10. 3 रुध्, स्तंभ् 9 P or c., प्रतिबंध्. —*v. i.* नि-,मील् pass., मुकुलायते (D.). —in, निरुध्; बंध् &c.—out, निवार् 10, निषिध् 1 P, बहिष्कृ 8 U, निराकृ, व्यावृत् c. —up, संनि-रुध्, पि-धा. 2 मुखं स्तंभ्; 's. up in a box' संपुटीकृ, मंजूषायां निविश् c. —TER, *s.* कपा(वा)टः-टी-टं; अवरोधकं, आच्छादनं.

SHUTTLE, *s.* मल्लिकः, सूत्रवेष्टः-ष्टनं, त(त्र)सरः.

SHY, *a.* सलज्ज, शालीन, विनीत, सव्रीड. 2 कातर, भीरुस्वभाव; लोक-जन-भीत, भीरु, आलापविरक्त. —*v. i.* भी 3 U; 'the horse s. ed at a rock' पाषाणं दृष्ट्वाऽश्वः सहसा भीतः-चकितः. —NESS, *s.* शालीनता, कातर्यं, भीरुता, भीति *f.*

SIBILANT, *s.* ऊष्मन् *m.*, ऊष्मवर्णः.

SIBYL, *s.* सिद्धा, सिद्धस्त्री.

SICK, *a.* आतुर, पीडित, व्याधित, रुजार्त, रोगार्त, रुग्ण, रोगिन्, विकृत, अस्वस्थ, सामय, अभ्यांत, आमयाविन्, अपटु, अभ्यमित. 2 (Mentally) संतप्त, पीडित, व्यथित, उपतप्त. 3 विवमिषु, वमनोन्मुख, वमनेच्छु. 4 निर्विण्ण, विरक्त, वितृष्ण, वीतस्पृह, द्वेषिन्; 's. of eating flesh' मांसाशनेन निर्विण्ण; 's. of the world' संसारविरक्त, उदीर्णवैराग्य; 'a man on a s.-bed' शय्यागतो रोगी; 'to be s.' वम् 1 P, छर्द् 10. —EN, *v. t.* निर्वेद-वितृष्णा-विरक्तता-उत्पद् c. 2 वम् c.; रोगार्तीकृ 8 U. —*v. i.* व्याधिना अभिभू-pass., भू with (*a.*). 2 बध् desid. (बीभत्सते); *See* ABHOR. —ENING, *a.* बीभत्स, बीभत्सावह. —LY, *a.* रुग्ण, अस्वस्थ, अशक्त; गदोपसृष्ट; *See* (*a.*). 2 नित्य-सदा-रोगिन्, रोगशील; 's. by nature' जन्मप्रकृति-रोगिन्.—NESS, *s.* व्याधिः, रोगः, गदः, रुज् *f.*, अस्वास्थ्यं, आमयः, विकारः, उपतापः. 2 विवमिषा, वमनेच्छा, प्रच्छर्दिका, छर्दि-र्दी *f.*, वमः-मि *f.*

SICKLE, *s.* दात्रं, लवित्रं, शस्यकर्तनी.

SIDE, *s.* पार्श्वः-र्श्वं; पक्षः, in all senses; कुक्षिः, पार्श्व-पक्ष-भागः; 'left s.' वामांगं, वामपार्श्वः; 'opposite s.' वि-प्रति-पक्षः; 'first s.' (of arguments) पूर्वपक्षः; उत्तरपक्षः, &c.; 'at one's s.' पार्श्वतः, पार्श्वे; 'staying at the s.' पार्श्वगत-स्थित. 2 प्रांतः, सीमा, उपांतं, अंतः. 3 (Of a mountain) उत्संगः, कटकः-कं, नितंबः. 4 भागः; 'outer s.' बाह्यभागः; पूर्वभागः, &c. 5 (Direction) दिश्-शा; gen. ex. by त्र, तः affixed; 'on both s. s' उभयतः, उभयत्र; 'on the other s.' परतः, पारे; 'on the left s.' वामतः; 'on all s. s' सर्वत्र, सर्वतः, विश्वतः, समंतात्, समंततः, चतुर्दिक्षु; 's. by s.' पार्श्वापार्श्वि. 6 (Party, faction) पक्षः; 'one of the opposite s.' वि-प्रति-पक्षः; 'of the same s.' सपक्षः, स्वपक्षीयः, स्वपक्षावलंबी; 'relations on the father's s.' पितृपक्षाः बांधवाः. 7 (In geometry) भुजः, पार्श्वः, दोस् *m. n.*, बाहुः; (of a river) पारः-अवारः; 's.-long'; वक्र, तिरश्चीन, अपांग-साचि-तिर्यक् in comp.; (*adv.*) पार्श्वतः, तिर्यक्, साचि, तिरः; 's.-long look' नयनोपांतविलोकितं, साचिवीक्षणं, अपांगदृष्टि *f.*, तिर्यग्दृष्टिः, कटाक्षः; 's.-look' अपांगदर्शनं, कटाक्षः, &c.; 's.-ways', 's.-wise' तिरश्चीनं, तिर्यक्, तिरः. —*a.* पार्श्व, पक्ष in comp.; पार्श्वस्थ, पार्श्विक-पाक्षिक (की *f.*); 's. breeze' पक्षवातः; पक्षद्वारं, &c. —*v. i.* 'to be on the s. of' पक्षे भू, पक्षं ग्रह् 9 P or आश्रि 1 U or आ-अवलंब् 1 A; 'one who s. s' पक्ष्यः. —ER, SIDESMAN, *s.* पक्षपातिन् *m.*, पक्षीयः, पक्षोद्ग्राही; *See* PARTIZAN.

SIDEREAL, *a.* तारा, नक्षत्र in comp.

SIDLE, *v. i.* तिर्यक् गम् 1 P or या 2 P. —ING, *a.* तिर्यग्गति *f.*

SIEGE, *s.* उप-,अव-,रोधः, परिवेष्टनं; 'lay s. to' उप-अव-रुध् 7 U.

SIEVE, *s.* चालनी, तितउः.

SIFT, *v. t.* पृथक् कृ; वि-,शुध् c., तितउना शुध् c., निर्गल् c. 2 सूक्ष्मं-निपुणं-निरूप् 10 or परीक्ष् 1 A or आलोच् 10 or अनुसं-धा 3 U. —ING, *s.* शोधनं, निर्गालनं.

SIGH, *s.* नि(निः)श्वासः, उच्छ्वासः, उच्छ्वसितं, दीर्घश्वासः-निश्वासः &c. —*v. i.* दीर्घं नि-उत्-श्वस् 2 P, निश्वासं मुच् or सृज् 6 P; 's. ing deep and hot' दीर्घं उष्णं च निश्वस्य. 2 शुच् 1 P, रुद् 2 P; *See*

Lament. -ing, *a.* निश्वासिन्, उच्छ्वासिन्, दीर्घनिश्वासिन्, सनिश्वास.

Sight, *s. See* under See.

Sign, *s.* चिह्नं, लक्षणं, लिंगं, अभिज्ञानं, लांछनं, व्यंजनं-कं ; 'a bad s.' अव-दुर्-लक्षणं. 2 संज्ञा, संकेतः, इंगितं. 3 Portent, q. v. 4 राशिः. 5 चिह्नं (in Math. &c.) ; 's. manual' स्वहस्तः, स्वाक्षरं, स्वहस्ताक्षरं; 'under one's own s. manual' स्वहस्तपरिचिह्नित (Y. II. 93). 6 ध्वजः; 's.-post' ध्वजस्तंभः. -*v.*; 'make a sign' संज्ञां दा 3 U ; 'understand the s.' संज्ञां ग्रह् 9 P; 'makes a s. to Vidûshaka' विदूषकं संज्ञां लंभयति; 's. ed to him by her eyes to come' नेत्रसंज्ञया तं आह्वयत्; गुरुं नेत्रसहस्रेण नोदयामास वासवः (K. II. 29) 's. ed to speak &c.'. 2 नाम लिख् 6 P or निविश् c. (with loc.); स्वाक्षरेण अंक् 10 or चिह्नयति (D.). -ature, *s.* नामलेखनं-निवेशनं. 2 नामाक्षरं, हस्ताक्षरं. —Signal, *s.* संज्ञा, संकेतः. -*a.* अपूर्व, अनन्यसाधारण (णी *f.*), विशिष्ट, स्मरणार्ह, अत्युत्कृष्ट, विशेष in comp. -ize, *v. t.* प्रसिद्धी-विश्रुती-कृ 8 U; (oneself) कीर्ति-प्रतिष्ठां-यशः-प्राप् 5 P or लभ् 1 A. -ly, *adv.* अति, नितरां, अत्यंतं, अपूर्वतया. -Signet, *s.* मुद्रा ; 's.-ring' मुद्रासनाथमंगुलीयं, अंगुलिमुद्रा. —Signify, *v. t.* बुध् c., गम् c., सुत् c., अभि-धा 3 U; *See* Indicate, Mean; oft. ex. by अर्थः; 'what does it s.' अस्य कोर्थः, किमनेन गम्यते, &c.; 'it s.es much' गुर्वर्थमेतत् 2 by गौरवं, महत्त्वं, भारः; 3 by शक्ति *f.*, बलं. -icant,-icative, *a.* सार्थ, चरितार्थ, अर्थयुक्त, समर्थ, अर्थान्वित, अर्थवत्, पूर्णार्थ. 2 हेतुगर्भ, साकूत, अभिप्रायगर्भ ; 'casting at me a s. look' साकूतं मां निर्वर्ण्य. 3 वाचक, अभिधायक, दर्शक, सूचक. 4 गुरु, महत्. -icantly, *adv.* अर्थवत्, साकूतं, सार्थं, पूर्णार्थतः. -ication, *s.* अर्थः. 2 शक्तिः.

Signior, *s.* आर्यः.

Silent, *a.* तूष्णीक, अनालापिन्, मूक, मौनिन्, निःशब्द, नीरव. 2 रुद्ध-बद्ध-मुख, निरुत्तर, अनुत्तर ; 'habitually s.' तूष्णींशील, अल्पभाषिन्, वाग्यत, वाचंयम ; 'when the lute was s.' वीणायां मूकीभूतायां ; 'become or remain s.' (after speaking) उपशम् 4 P, विरम् 1 P ; एवमुक्त्वा उपशशाम, उपशांतवचसि तस्मिन् &c. -ly, *adv.* तूष्णीं, जोषं, निःशब्दं, निभृतं, मौनीभूय. —Silence, *s.* मौनं, मूकभावः, निःशब्दता; अनालापः, तूष्णींभावः, अभाषणं ; 'keeping s.' वाक्स्तंभः-रोधः-यमनं, मुखबंधनं ; 'one who holds s.' वाचंयमः, मौनव्रती; 'keep s.' तूष्णीं-जोषं-आस् 2 A or स्था 1 P; मौनं आस्था-भज् 1 A, वाचं यम् 1 P or निरुध् 7 U, मुखं बंध् 9 P. 2 प्र-,शांति *f.*, स्तिमितता ; 'in the s. of night' प्रशांतायां रात्रौ. -*interj.* तूष्णीं भव, मौनं कुरु. -*v. t.* मौनं लभ् c. (लंभयति) or अवलंब् c., विरम् c., प्र-उप-शम् c. 2 निरुत्तरीकृ 8 U, अधरीकृ, मुखं बंध्. -ed; *a.* निरुत्तर, अनुत्तर, निरुत्तरीकृत, रुद्ध-बद्ध-मुख.

Silk, *s.* कौशेयं, कौशं, कीटसूत्रं ; पट्टः, क्षौमं, दुकूलं कौशांबरं, कौशिकं (s.-cloth) ; 'China s.' चीनांशुकं ; 'bleached s.' पत्त्रोर्णं, धौतकौशेयं; 's.-cotton tree' शाल्मलिः-लः, शाल्मलिवृक्षः, पिच्छिला; 's.-worm' कोश(ष)कारः, पट्टकीटः, तंतुकीटः-कृमिः, कौशस्थः. -en, *a.* कौशेय (यी *f.*), क्षौम (मी *f.*), कौशिक (की *f.*), कौश (शी *f.*) ; 's. cloth' दुकूलं, कौशांबरं, क्षौमं, &c. 2 मृदु, कोमल.

Sill, *s.* देहली, शिला, गृहावग्रहणी.

Silly, *a.* मूर्ख, बालिश, मूढ, अल्पधी-मति, दुर्मति, निर्बुद्धि ; *See* Foolish ; 'what a s. boy' अहो मूढो बालकः.

Silt, *v. t.* (up) अवरुध् 7 U, अवष्टंभ् 9 P.

Silvan, *a.* वन in comp., वन्य, वनस्थ, अरण्यज ; 's. goddess' वनदेवता; 's. scenery' वनशोभा-श्रीः.

Silver, *s.* रूप्यं, रजतं, श्वेतं, दुर्वर्णं, खर्जूरं, कलधौतं; 's.-leaf' रूप्यपत्रं ; 's.-smith' रूप्यकारः, स्वर्णकारः. -*a.* राजत (ती *f.*) (*s.*) in comp., रजतनिर्मितकृत, रौप्य (प्यी *f.*). -*v. t.* रूप्येण आच्छद् 10, रजतयति (D.), श्वेतवर्णीकृ 8 U. -y, *a.* रजतोपम, रूप्यवर्ण, श्वेत-शुक्ल-वर्ण, अतिधवल.

Similar, *a.* सम, समान, तुल्य, अनुगुण, अनुरूप, सधर्मन्; *See* Like. -ity, *s.* साम्यं, सादृश्यं, तुल्यत्वं. -ly, *adv.* तद्वत्, तथैव, एवं.

Simile, *s.* उपमा, निदर्शनं. -Similitude, *s.* औपम्यं, सादृश्यं. 2 आकारः, रूपं, मूर्ति *f.*

Simmer, *v. i.* शनैः पच्-क्वथ् pass.

Simper, *v. i.* विकृतं स्मि 1 A, कुस्मितं कृ 8 U, अनर्थकं हस् 1 P.

Simple, *a.* निरवयव, असंकीर्ण, असमस्त, शुद्ध, केवल, अमिश्र. 2 सरल, ऋजु, अमाय, शुद्धात्मन्, अवक्र, निर्व्याज, निष्कपट, मायाहीन. 3 (Dress) विनीत, (विनीतवेषेण प्रवेष्टव्यानि तपोवनानि S. 1). 4 स्पष्ट, व्यक्त, सुगम, सुबोध, भिन्नार्थ, अगूढार्थ ; *See* Plain. 5 मुग्ध, बालिश, मूढ, दुर्मति. -*s.* ओषधि-धी *f.* -Simpleton, *s.* मूढः, मूढधीः, सुविश्वास्यः, क्षुद्रः, क्षुद्रमतिः. -Simplicity, *s.* शुद्धता, अमिश्रता, सरलता, आर्जवं, सारल्यं, निर्व्याजता, अनुपधित्वं, अमाया, अव्याजः, निष्कापट्यं. 2 विनीतत्वं, शुद्धता. 3 स्पष्टता, सुबोधता, सुगमत्वं. 4 बालिश्यं, मूढता. -Simplify, *v. t.* ऋजूकृ 8 U, विशदीकृ, सुगमीकृ, व्यक्तीकृ; *See* Explain. -Simply, *adv.* एव, केवलं, मात्रं in comp.

Simulate, *v. t. See* Pretend.

Simultaneous, *a.* एक-सम-कालिक (की *f.*), यौ-

गपदिक. -LY, *adv.* समं, युगपत्, एक-सम-कालं-ले, यौगपद्येन, एकदैव, सममेव. -NESS, *s.* यौगपद्यं, एक-सम-कालता, युगपद्भावः.

SIN, *s.* पापं, पातकं, एनस् *n.*, कल्मषं, दुरितं, अघं, दुष्कृतं, वृजिनं, अंहस् *n.*, किल्बिषं, पंकः-कं, पाप्मन् *m.*, कलुषं; दोषः, अपराधः, पाप-अप-कर्म, कुकर्म, दुष्कृति *f.* -त्यं ; 'heinous s.' महा-घोर-पातकं; 'destroying s.' पापनाशन-नाशिन्, अघमर्षण, पापापह. -*v. i.* पापं &c. आचर् 1 P or कृ, अपराध् 4, 5 P, दुष् 4 P.-NER, *s. See* SINFUL below ; 'an atrocious s.' महा-घोर-पातकिन्-पापिन्, पापराशिः-निधिः. -FUL, *a.* पापिन्, पातकिन्, पापकर (रीf.), पाप्मन्, पापकृत्, पापात्मन्, कुकर्मन्, दुष्कर्मन्, एनस्विन्, पाप-दुष्ट-कर्मन्, अपराधिन्, किल्बिषिन्, पापनिरत-बुद्धि-मति, पापात्मक. 2 (Of acts) पाप in comp., दुष्ट; कलुष; 's. act' पापं, दुष्कर्म; *See* (*s.*). -FULLY, *adv.* पापवत्, सपापं, दुष्टवत्. -FULNESS, *s.* सपापता, पापमति-निरति *f.*, दुष्टता, &c. -LESS, *a.* अनघ, निष्पाप, अपाप, अकल्मष, पापरहित, निर्दोष, निरपराध, and sim. comp.

SINCE, *prep.* प्रभृति, आरभ्य, (with abl.), आ with abl. or in comp.; sometimes also ex. by gen. abs.; अस्य कतिपये संवत्सरास्तपस्तप्यमानस्य (U. 4) 'it is several years s. he began to practise penance'; 's. then' तदाप्रभृति; '4 years s.' इतः पूर्वं चतुर्वर्षं; 'long s.' चिरं; 'ever s.' यतः-प्रभृति. 2 पूर्वं, प्राक्, गत-पूर्व-काले. -*conj.* यतः, यस्मात्, यत्, हि (not at beginning); by abl. of abstract noun; *See* BECAUSE.

SINCERE, *a.* अकृत्रिम, निर्व्याज, निष्कपट, निर्व्यलीक, दक्षिण, ऋजु, सरल, विशुद्ध, अमाय; यथार्थ, सत्य, तात्त्विक-वास्तविक (की *f.*) ; (of persons only) शुद्धमति-भाव, शुद्धात्मन्, विमलात्मन्, शुचि, सत्यशील-व्रत-वादिन्; *See* FRANK, HONEST. -LY, *adv.* निर्व्याजं, निर्व्यलीकं, अमायया, शुद्धहृदयेन-भावेन, विमलात्मना. -ITY, -NESS, *s.* सारल्यं, दाक्षिण्यं, आर्जवं, निष्कापट्यं, अमाया, विमलात्मता, शौचं, यथार्थता, &c.

SINE, *s.* ज्या, ज्यापिंडः.

SINECURE, *a.* अकर्माधिकृत, कर्मशून्याधिकारिन्.

SINEW, *s.* स्नायु *f.*, स्नसा; (s. s) बलं, शक्ति *f.*, सामर्थ्यं. -Y, *a.* स्नायुमय (यी *f.*). 2 प्र-स-बल.

SING, *v. i.* गै 1 P; (of birds) कूज् 1 P, रु 2 P. -*v. t.* गै; गानेन वर्ण् or कृत् 10, उत्कृत्, अभिगै; 'they sang his praises' तं स्तुतिभिरुपतस्थिरे. -ER,-SONGSTER, *s.* गायकः, गातृ *m.*, गायकः. -ING,-SONG, *s.* गीतं, गीति *f.*, गेयं, गानं. 2 कूजनं, रुतं, रावः, रवः.

SINGE, *v. t.* ईषद् दह् 1 P, अग्निना स्पृश् 6 P.

SINGLE, *a.* एक, एकाकिन्, अद्वितीय, केवल, असहाय; अद्वैध (धी *f.*). 2 भिन्न, व्यक्त, अविभक्त. 3 Simple, q. v. 4 अनूढ, अविवाहित, अकृतोद्वाह, निःसंग; 's. combat' द्वंद्वयुद्धं, नियुद्धं, बाहुयुद्धं ; 's.-handed' एक, एकाकिन्, बाहुसहाय, भुजमात्रसहाय; 's.-hearted' अनन्यवृत्ति, एकचित्त ; 's. stick' यष्टि *f.*, दंडः. -*v. t.* (Out) (बहूनां मध्यात्) वृ 5 U, उद्धृ 1 P, उद्-ग्रह् 9 P; निरूप् 10, निर्दिश् 6 P. -NESS, *s.* कैवल्यं, अद्वितीयता, &c. 2 शुद्धि *f.*, अनन्यता, अनन्यभावः. -SINGLY, *adv.* Ex. by (*a.*). 2 एकैकं, एकैकशः, प्रत्येकं, एकशः, पृथक्, पृथक् पृथक्; *See* SEPARATELY.

SINGULAR, *a.* अपूर्व, अप्रतिम, अद्वितीय, अप्रतिरूप, अनुपम. 2 अनन्यसाधारण (णी *f.*), लोकोत्तर, अनन्यसामान्य; अपरूप, विलक्षण, अद्भुत, लोकबाह्य, अलौकिक (की *f.*); 's. number' एकवचनं. -ITY, *s.* अपूर्वता, अप्रतिमता, असामान्यता, वैलक्षण्यं, वैचित्र्यं, असंगति *f.*, लोकोत्तरता. -LY, *adv.* अपूर्वं, विशेषतः, अद्भुतं, लोकोत्तरप्रकारेण.

SINISTER, *a.* अमंगल, अशुभ, अकल्याण (णी *f.*), अभद्र. 2 दुष्ट, वक्र, वाम, कुटिल, अनृजु. 3 वाम, सव्य; 'of s. motives' दुराशय, पापमति; उमां स पश्यन्नृजुनैव चक्षुषा (K. v. 32) 'looking at Umâ with no s. eye'. -SINISTRALLY, *adv.* वामतः, वामदिशि. -SINISTROUS, *a.* वामस्थ, वामपार्श्ववर्तिन्.

SINK, *v. i.* नि-,मस्ज् 6 P; 'sank in deep mire' महापंके निमग्नः; सद् 1 P, अव-नि-°, अधः गम् 1 P or पत् 1 P or या 2 P, अवपत्. 2 ह्रासं-क्षयं या-इ 2 P, क्षि pass., ध्वंस् 1 A; *See* DECAY, DECLINE. 3 (Down) अव-वि-सद्, परि-,म्लै-ग्लै 1 P, स्रंस् 1 A; *See* DROOP; 'my heart s. s down' सीदति मे हृदयं; 'limbs, s. ing down through excessive thirst' प्रबलपिपासावसन्नानि अंगकानि (Ka. 36); 'his heart sank within him' तस्य धैर्यमहीयत; स लुप्त-स्खलित-धैर्यः. -*v. t.* नि-मस्ज् c. (मज्जयति); अधः गम् c. or पत् c. 2 (A well &c.) खन् 1 P. 3 अवसद् c., परि-,म्लै c. (spirits &c.). 4 न्यूनीकृ 8 U, अल्पीकृ, लघयति (D.), ह्रस् c., अपाचि 5 U; क्षि 5 P. -*s.* जलनिर्गमः, गुप्तनाली.

SINUOUS, *a.* कुटिल, वक्र, अराल, जिह्म. -SINUOSITY, *s.* वक्रिमन् *m.*; कौटिल्यं.

SINUS, *s.* नाडि-डी-लि-ली *f.*

SIP, *v. t.* आचम् 1 P; उपस्पृश् 6 P, ईषत्-अल्पशः-पा 1 P. -*s.* आचमनं, उपस्पर्शः, ईषत्पानं.

SIPHON, *s.* उत्क्षेपणी, वक्रनाली.

SIR, (Voc.) आर्य; भवन्, भोः; 'holy s.' भगवन्; 'gentle or good s.' भद्र, भद्रमुख.

SIRE, *s.* (In addressing) देव, श्रीमद्देव, महाराज,

राजन्. 2 भगवन् (of holy men). 3 तातः, जनकः, पिता.

SIREN, *s.* वि-,मोहिनी, (गानेन) लोभयित्री, मायिनी.

SIRRAH, *interj.* रे, अरे, अरेरे.

SIRRUP, *s.* स्वादु-मधुर-रसः-पेयं.

SISTER, *s.* स्वसृ, भगिनी, सोदर्या, जा(या)मिः-मी. 2 धर्मभगिनी; 'elder s.' अग्रजा; 'younger s.' अवरजा ; 's.'s son' भागिनेयः, स्वस्रेयः ; 's.'s daughter' स्वस्रीया, भागिनेयी; 's.'s husband' आवुत्तः; 's.-in-law' यातृ, ननांदृ, श्याली, भ्रातृजाया, प्रजावती (expressing different relations). —HOOD, *s.* भगिनीत्वं, भगिनीसंबंधः. 2 भगिनीसमाजः, स्त्रीगणः. —LY, *a.* भगिन्यनुरूप, स्वस्रीय, स्वसृयोग्य.

SIT, *v. i.* आस् 2 A, नि-,सद् 1 P, उपविश् 6 P; 'please s. here' अत्रास्यतां, इदमासनमलंकरोतु भवान्. 2 कार्यं निर्वह् c. 3 (Fit) Ex. by शुभ् 1 A; 'this crown s. s well on you' नितरां तवेदं मुकुटं शोभते, शोभसे एतेन मुकुटेन ; 's. by' उपास्, अन्वास्; 's. up' स्था 1 P, सम्यक् (अनतकायं) स्था; 'half s. ing up in the bed' पूर्वार्धविसृष्टतल्पः (R. XVI. 6); जागृ 2 P.

SITE, *s.* सन्निवेशः, सं-,स्थिति *f.*, स्थानं, पदं, स्थलं, आस्पदं, भूमि *f.*; (of a house) वास्तु *m. n.*, वेश्मभूः, गृहपोटः ; 'purificatory ceremony of a s.' वास्तुशमनं.

SITUATE,-ED, *a.* अव-,स्थित, निविष्ट; दिश्य, स्थ, वर्तिन् in comp.; 's. to the east' पूर्वदिश्य, पूर्वस्थ; (of persons) स्थ, स्थित, अवस्थ in comp., अवस्थापन्न; 'so s.' एतदवस्थ; 'badly s.' दुःस्थ, दुःस्थित, कृच्छ्रगत, कष्टदशापन्न. —ION, *s.* सन्निवेशः, अवस्थानं, अव-,स्थितिः. 2 पदं, नियोगः, अधिकारः, पदवि-वी *f.* 3 अवस्था, दशा, स्थितिः, भावः, वृत्ति *f.*, आस्पदं.

SIX, *a.* षष्; 's.-fold' षड्गुण; 's.-faced' षण्मुखः, षडाननः; 'having s. mothers' षाण्मातुरः; 'collection of s.' षट्कं; 'in s. ways' षड्धा, षोढा; 'of s. months standing' षाण्मासिक (की *f.*), षण्मास्य. —TH, *a.* षष्ठ (ष्ठी *f.*) —SIXTEEN, *a.* षोडशन्. —TH, *a.* षोडश (शी *f.*). —SIXTY, *a.* षष्टि *f.* —IETH, *a.* षष्टितम (मी *f.*).

SIZE, *s.* प्र-परि-माणं, मानं; 'of great s.' महाप्रमाण, पृथु; 'of a big s.' बृहत्प्रमाण. 2 आकारः, आकृति *f.*, रूपं, आकारमानं; 'of the s. of' ex. by (*s.*) or मात्र in comp.; 'of the s. of a mustard seed' सर्षपमात्रं (छिद्रं); बिल्वमात्रं, अंडपरिमाणं, &c.

SKAIN, SKEIN, *s.* पं(पिं)जि-जी *f.*-जिका.

SKATE, *s.* हिमविसर्पणपादुका.

SKELETON, *s.* कंकालः; 'mules reduced to s. s' कंकालशेषाः खराः (U. 3); अस्थिपंजरः. 2 आकारः, संस्थानं. 3 वस्तुमात्रं.

SKETCH, *v. t.* वर्ण् 10, आलिख् 6 P, स्थूलवर्णनं-पांडुलेख्यं-कृ 8 U. —*s.* वर्णनं; आलेख्यं; 'rough s.' स्थूललेख्यं, पांडुलेखः; 's. of a painting' पांडुचित्रं, चित्रारंभः, रेखामात्रं. 2 वस्तुमात्रं.

SKEWER, *s.* शलाका, कीलः-लकः, शंकुः.

SKIFF, *s.* तरीः, नौ *f.*, लघुनौका.

SKILFUL, SKILLED, *a.* कुशल, निपुण, प्रवीण, पटु, विचक्षण, दक्ष, विदग्ध, चतुर, विशारद, पेशल, युक्तिमत्, कृतिन्, विज्ञ, अभिज्ञ-ज्ञ-विद् in comp. —LY, *adv.* सपाटवं, सनैपुण्यं, दक्षतया, चतुरं, कुशलतया, विज्ञवत्, सवैदग्ध्यं, &c. —NESS, SKILL, *s.* कौशलं, नैपुण्यं, पटुता, पाटवं, प्रावीण्यं, चातुर्यं, वैदग्ध्यं, युक्ति *f.*, विज्ञता, &c.

SKIM, *s.* मंडः-डं, फेनः-णः. —*v. t.* फेनं गल् c. or अपनी 1 P or निर्हृ 1 P. —*v. i.* जवेन-वेगात् परिसृप् 1 P or परि-द्रु 1 P, लघुगत्या विसृप्. —MED, *a.* हृत-मंड-फेन; 's. milk' घोलं, मथिततक्रं. —MER, *s.* झर्झरी-रं, खजः-कः.

SKIN, *s.* चर्मन् *n.* (of animals), त्वच् *f.*; (hide) अजिनं, दृतिः, कृत्ति *f.*; (of snakes) निर्मोकः, कंचुकः; 'reduced to mere s. and bones' त्वगस्थिमात्रशेष. 2 Rind, q. v.; 's.-deep' चर्मगत ; *See* SUPERFICIAL; 's.-flint' अतिकृपणः, कदर्यः; *See* MISER. —*v. t.* चर्म-त्वचं-अपनी 1 P or निर्हृ 1P or उल्लिख् 6 P, निस्त्वचीकृ 8 U. —NY, *a.* चर्मभूत, त्वङ्मात्र, चर्ममात्रावशेष, क्षीण, कृश; *See* LEAN.

SKIP, *v. i.* प्लु 1 A, वल्ग् 1 P, नृत् 4 P. —*s.*,-PING, *s.* प्लुतं-ति *f.*, प्लवनं, प्लुतगति *f.* —PING, *a.* प्लुतगतिगामिन्.

SKIRMISH, *s.* डिंबाहवः, डिंबः, डिंबयुद्धं. —*v. i.* कृ 8 U with (*s.*).

SKIRT, *s.* प्रांतः, पर्यंतः, अंतः, प्रांत-पर्यंत-भागः, परिसरः, सीमा, धारा; 's. s of a mountain' पर्यंतभूः. 2 अंचलः, दशा-वस्ति *m. f.* (pl.); वस्त्रांचलः, वसनांतः. —*v.* Ex. by (*s.*), प्रांतयति (D.); *See* BORDER.

SKITTISH, *a.* चंचल, चपल, तरल. 2 क्रीडा-खेला-शील-पर.

SKULK, *v. i.* निभृतं-अलक्षितं-स्था 1 P or वृत् 1 A, प्रच्छन्नं आस् 2 A.

SKULL, *s.* कपालः-लं, कर्परः, शिरोस्थि *n.*; 's. for alms' भिक्षाकपालं; *See* SCULL.

SKY, *s.* नभस् *n.*, वियत् *n.*, व्योमन् *n.*, गगनं-णं, आकाशः-शं, अंबरं, अंतरि(री)क्षं, खं, नाकः, दिव् *f.*, द्यो *f.*, विहायस् *m. n.*, विहायसः, अभ्रं, पुष्करं, अनंतं, सुरवर्त्मन् *n.*, विष्णुपदं, तारापथः; 'roaming through the s.' नभश्चरः, खेचरः, &c.; 's.-

coloured' व्योम-नील-वर्ण ; 's.-lark' भ(भा)र-द्वाजः; व्याघ्राटः; 's.-light' आकाशप्रकाशः; 's.-touching' अभ्रंलिह्-लिख्, नभोलिह्, व्योमस्पृश्, गगनचुंबिन्.

SLAB, *s.* शिला, शिलातलं-पट्टः-फलकः.

SLABBER, *v. i.* लालायते (D.), लालां स्रु c.

SLACK, *a.* शिथिल, प्र-,श्लथ, स्रस्त, गलित. 2 मंद, अतीव्र, अतीक्ष्ण, प्रमत्त, अनवहित; *See* REMISS. –EN, *v.t.* शिथिलयति (D.), श्लथ् 10, शिथिली-श्लथी-कृ 8U, मंदीकृ ; रथस्य मंदीकृतो वेगः (S. 1) 'I have s.-ed the speed' &c.; प्र-शम् c. (शमयति) ; 'will not s. (the bonds of) her love' न अनुरागं शिथिलयति (V. 2) ; 's. your pace a little' गतिवेगं किंचित् शिथिलय ; 'who have s. ed their efforts' शिथिलितप्रयत्नाः, श्लथोद्यमाः. –*v. i.* शिथिली-श्लथी-भू, शिथिलायते (D.), मंदीभू; *See* RELAX. –ENED, *a.* शिथिलित, शांतवेग-रय. –LY, *adv.* शिथिलं, प्रमादतः, अनवधानेन. –NESS, *s.* शैथिल्यं, &c.

SLAKE, *v. t.* प्र-,शम् c. (शमयति), छिद् 7 P, (thirst). 2 जलेन संमिश्र् 10 or संसृज् 6 P. –*v. i.* प्र-,शम् 4 P.

SLAM, *v. t.* (Door) तीव्राघातेन पि-धा 3 U or बंध् 9 P.

SLANDER, *s.* अप-परि-वादः, पैशुन्यं, पिशुनवचनं, अभि-, असूया, निर्वादः; *See* SCANDAL. –*v. t.* परि-अप-वद् 1 A, असूयति (with dat.) ; अपभाष् 1 A, कलंकयति (D.), अभिशंस् 1 P; *See* DEFAME, LIBEL. 2 सूच् 10, उपजप् 1 P, कर्णे जप्. –ER, *s.* परि-अप-वादकः, अभि-,असूयकः, पिशुनः, सूचकः, कर्णेजपः, उपजापकः. –EROUS, *a.* पिशुन, साभ्यसूय, सपरिवाद, सापवाद, परिवाद-अपवाद-गर्भ, परिवादात्मक. –EROUSLY, *adv.* सापवादं, पिशुनं, सपरिवादं.

SLANG, *s.* प्रलापः, अपभाषा, अश्लीलं,-भाषणं, खलोक्ति *f.*

SLANT,-ING, *a.* तिर्यंच्, वक्र, कुटिल, तिरश्चीन ; अवसर्पिन्, प्रवण ; 'striking s.-ly with the tusks' तिर्यग्दंतप्रहारिन् ; 's. blow' तिर्यक्प्रहारः. –*v. t.* आवृज् 10, वक्रीकृ 8 U, प्रवणीकृ. –*v. i.* वक्रीभू, अवसृप् 1 P, प्रवणीभू, आनम् 1 P. –INGLY, *adv.* तिर्यक्, तिरः, साचि, तिरश्चीनं.

SLAP, *s.* चपेटिका, चपेटः, तल-चपेट-प्रहारः-आघातः, आस्फोटनं. –*v. t.* चपेटेन प्रहृ 1 P or तड् 10 or आहन् 2 U, आस्फुट् c.

SLASH, *v. t.* दीर्घं छिद् 7 P or कृत् 6 P, व्यवच्छिद्, विनि-कृत्, क्षतविक्षतीकृ 8 U. –*s.* दीर्घ-महा-छेदः, महाक्षतं-ति *f.* –ING, *a.* दीर्घच्छेदकारिन् ; (fig.) अरुंतुद, मर्मच्छिद्-भिद्, तीक्ष्ण; *See* SHARP.

SLATTERN, *s.* वेशप्रमत्ता, अपरिष्कृतवेशा.

SLAUGHTER, *v. t.* विशस् 1 P, हन् 2 P or c. (घातयति), व्या-पद् c., प्र-मी 9 U, आलभ् 1 A (beast); *See* KILL. –*s.* विशसनं, वैशसं, घातनं, प्रमाथः, कंदनं, संहारः, प्रमापणं; *See* KILLING; 's.-house' सू-(शू)ना, वध्यस्थानं, वधभूमि *f.*, घातस्थानं. –ER, *s.* घातकः, विशसितृ *m.*, सौ(शौ)निकः.

SLAVE, *s.* दासः, प्रेष्यः, चेटः, किंकरः, भृत्यः, दासेयः-रः, भुजिष्यः; *See* SERVANT; 'born a s.' गर्भदासः; 'domestic s.' गृहदासः; 'a female s.' दासी, चेटी, भुजिष्या; 's.-trade' दासविक्रयः; 's.-dealer' दासविक्रयी; (fig.) दासः, or ex. by वश, अधीन in comp.; 'a s. to carnal passions' इंद्रियसुखवशगः, विषयसुखाधीनः; 's. to love' कामपरवशः. –RY, *s.* दास्यं, दासत्वं, दासभावः, दास्यवृत्ति *f.* –ISH, *a.* दासवत् *adv.*, दास in comp., दासोचित; *See* SERVILE.

SLAVER, *s.* *See* SALIVA.

SLAY, *v. t.* विशस् 1 P, हन् 2 P, व्या-पद् c., मृ c. –ER, *s.* घातकः, हंतृ *m.*, हन् in comp.; *See* KILL,-ER.

SLEDGE, *s.* अचक्रयानं.

SLEDGE-HAMMER, *s.* मुद्गरः, महाघनः.

SLEEK, *a.* मृदु, श्लक्ष्ण, स्निग्ध, सुखस्पर्श.

SLEEP, *v. i.* स्वप् 2 P, शी 2 A, संविश् 6 P, नि-द्रा 2 P, निद्रायते (D.); 'I also do not s. over this matter' मयाप्यस्मिन् वस्तुनि न शयानेन स्थीयते (Mu. 1). –*s.* निद्रा, स्वप्नः, स्वापः, सुप्ति *f.*, शयनं, संवेशः; 'go to s.' निद्रां या 2 P; *See* (*v.*); 'fall into s.' निद्रया अभिभू pass. or आक्रम् pass.; 'he fell into a deep s.' गाढनिद्राभिभूतः-विधेयः-बभूव; 'death-s.' घोर-काल-निद्रा; 'roused from s.' विनिद्र, भग्ननिद्र, प्रबोधित. –ER, *s.* निद्रालुः, शयालुः, better by (*v.*). –ING, *s.* शयनं, निद्रा, &c.; 's.-house' शयनमंदिरं-गृहं. –*a.* निद्राण, शयित, शयान, सुप्त; 's. draught' निद्राकरमौषधं. –LESS, *a.* नष्टनिद्र, उन्निद्र, अ-वि-निद्र, निर्निद्र; 'passes s. nights' उन्निद्राः-उत्सन्ननिद्राः-क्षपा गमयति. –LESSNESS, *s.* निद्रानाशः, निर्निद्रता, निद्राभावः. –Y, *a.* निद्रालु, शयालु, तंद्रालु, निद्राशील. 2 निद्राक्रांत, निद्रापर-वश-विधेय-अभिभूत-आकुल-ग्रस्त. 3 निद्राप्रद-जनन (नी *f.*), स्वापकर (री *f.*). 4 सुषुप्सु, शिशयिषु, शयनेच्छु; 'to feel s.' स्वप्-शी- desid.; 'I feel s.' निद्रयाऽपह्रिये-पराभूये, सुषुप्सामि.

SLEET, *s.* शीकरः, तुषार-शीकर-वर्षः-आसारः.

SLEEVE, *s.* पिप्लवः; 'to laugh in one's s.' अंतर् हस् 1 P.

SLEIGHT, *s.* (Of hand) हस्तलाघवं-कौशलं, माया, इंद्रजालं.

SLENDER, *a.* प्र-,तनु, कृश, क्षीण, क्षाम; 'having a s. waist', 's.-waisted' क्षीण-तनु-मध्य-मध्यम, कृशोदर, मृग-सिंह-कटि-मध्य ; 's.-waisted woman'

सुमध्यमा, कृशोदरी, तनुमध्या, वेदिविलग्नमध्या. 2 अल्प, क्षुद्र, लघु, तनु; ‘possessed of s. means’ क्षीणविभव. -NESS, *s.* तनुता, कृशता, कार्श्यं, तानवं, अल्पता.

SLICE, *s.* खंडः-डं, शकलः-लं, छेदः, भागः, लवः. -*v. t.* खंड् 10, छिद् 7 P, खंडशः छिद्.

SLIDE, *v. i.* अव-वि-सृप् 1 P; ‘s. up and down’ आरोहावरोहं कृ 8 U. 2 च्यु 1 A, स्खल् 1 P, भ्रंश् 1 A, 4 P. -ING, *s.* विसर्पः, अवसर्पणं, स्खलनं.

SLIGHT, *a.* सु-,अल्प, स्तोक, क्षुद्र, तनु, लघु, ईषत् in comp.; ‘a s. blow’ लघुप्रहारः, ईषदाघातः; ‘in a s. degree’ ईषत्, किंचित्, मनाक्, स्तोकं, कियत्; ‘not in the s. est degree’ न मनागपि-किंचिदपि-स्तोकमपि. -*v. t.* उपेक्ष् 1 A, अवधीर् 10, अव-ज्ञा 9 U, तृणीकृ 8 U, तृणाय मन् 4 A, अवमन् 4 A, अवगण् 10; *See* CONTEMN. -*s.* उपेक्षा, अवधीरणं-णा, अवज्ञा, अवमानः, अनादरः, अवगणनं-ना. -ER, *s.* उपेक्षकः, मंदादरः. -ING, *a.* सावज्ञ, अनादरपूर्वक, सावमान. -INGLY, *adv.* सोपेक्षं, अनादरेण. -LY, *adv.* ईषत्, मनाक्, किंचित्, स्तोकं, अल्पमात्रं, by आ pr.; ‘s. blue’ आनील, ईषन्नील.

SLIM, *a. See* SLENDER.

SLIME, *s.* पंकः, श्यानकर्दमः, सांद्र-श्यान-पंकः. -Y, *a.* श्यान, पंकिल, चिक्कण, सांद्र.

SLING, *s.* क्षेपणः, भिंदि(द)पालः, गोफणा. 2 दोला, काचः, शिक्यं, भारयष्टि *f.* -*v. t.* क्षेपणेन क्षिप् 6 P or प्रास् 4 P. 2 उद्-बंध् 9 P, काचयति-आंदोलयति (D.).

SLINK, *v. i.* अलक्षितं-निभृतं-अपया 2 P or अपगम् 1 P or अपसृप् 1 P or अपक्रम् 1 U, 4 P, छलेन अप-या, &c.

SLIP, *v. i.* प्र-,स्खल् 1 P, (fig. also); वचनानि स्खलयन् पदे पदे (K. IV. 12) ‘making their words s.’ &c.; चल् 1 P. 2 सहसा-अलक्षितं-अज्ञानतः-निर्गम् 1 P or अपसृप् 1 P. 3 (Off) च्यु 1 A, प्र-,भ्रंश् 1 A, 4 P, स्रंस् 1 A, निर्-,गल् 1 P, पत् 1 P; ‘s. away’ व्यप-या 2 P, अपसृप्-गम्; *See* SLINK; ‘s. in’ अलक्षितं आ-प्र-विश् 6 P; ‘let s. an opportunity’ अवसरं-समयं न ग्रह् 9 P or अवक्षिप् 6 P. -*v. t.* अलक्षितं नि-धा 3 U or प्र-नि-विश् c. 2 वि-,मुच् 6 P, क्षिप्, भ्रंश् c.; अवगण् 10, उपेक्ष् 1 A, च्यु c., त्यज् 1 P, *See* NEGLECT. 3 शिथिलीकृ 8 U, स्रंस् c., शिथिलयति (D.); *See* LOOSE. -*s.* स्खलनं, स्खलितं, (fig. also); ‘s. as to names’ गोत्रस्खलितं; प्र-,भ्रंशः, च्युति *f.*, पतनं. 2 दोषः, प्रमादः, अपराधः, भ्रमः, स्खलितं. 3 विटपः, शाखा, पल्लवः, कांडः. 4 खंडः-डं. -PERY, *a.* पिच्छिल, मेदुर, चिक्कण, स्निग्ध, श्लक्ष्ण; ‘s. ground’ निपत्या, पिच्छिलभूमिः. 2 अस्थिर, चल, लोल, तरल, अनवस्थित, चपल, चंचल; *See* FICKLE.

SLIPPER, *s.* (लघु) पादुका, पादत्रं, उपानह् *f.*

SLIT, *s.* दीर्घच्छेदः-वेधः-छिद्रं.

SLOBBER, *v. i.* लालां स्रु c.

SLOP, *s.* (S. s) अधोंशुकं, अधोवसनं. 2 अमेध्यं-अपवित्रं-जलं, मलिनं-समलं-जलं. 3 कर्दमः, पंकः. -*v. t.* इतस्ततः प्रमादात् पत् c. or क्षिप् 6 P. -PY, *a.* पंकिल, अनूप, सकर्दम.

SLOPE, *v. i.* अवसृ 1 P, प्रवणीभू 1 P, क्रमशः निम्नीभू. -*v. t.* आवृज् 10, प्रवणीकृ 8 U.-*s.* प्रावण्यं; प्रवणभूमिः, अवसर्पिणी भूमिः; क्रमशः निम्नता. 2 (Of a mountain) नितंबः, उत्संगः, कटकः-कं; ‘mountain s.’ गिरिनितंबः; अवसर्पिणी भूः. -ING, *a.* प्रवण, अवसर्पिन्, क्रमशः निम्न, पातुक.

SLOTH, *s.* तंद्रा, आलस्यं, तंद्रि-द्री *f.*, तंद्रिका, कार्यविमुखता. -FUL, *a.* अलस, तंद्रिल, तंद्रालु; *See* LAZY.

SLOUCH, *v. i.* अलसं चल् or गम् 1 P. -ING, *a.* प्रलंब, निम्न.

SLOUGH, *s.* निर्मोकः, कंचुकः, अहि-भुजंग-त्वच् *f.* 2 महापंकः, पंकिलस्थानं, पंकाढ्यस्थलं.

SLOVENLY, *a.* मलिन, अव्यवस्थित; अविनीत, अपरिष्कृत, अविनीत-अपरिष्कृत-वेश. -INESS, *s.* अव्यवस्था, अपरिष्कारः, मालिन्यं.

SLOW, *a.* मंद, (in all senses); मंदाग्निः, मंदगतिः, मंदमतिः, मंदविषं, &c.; मंदगति-गामिन्, अद्रुत; अक्षिप्र, अशीघ्र; मंथर; ‘a mind s. to discriminate’ मंथरविवेकं चेतः; ‘s. in recognizing’ प्रत्यभिज्ञानमंथर (S. 4). 2 विलंबित; कालातीत, अतीतसमय; *See* LATE. 3 मंदमति-धी-बुद्धि, जड-स्थूल-बुद्धि-मति, &c.; *See* DULL. 4 दीर्घसूत्र-त्रिन्, चिरक्रिय; ‘s. time’ विलंबितवृत्ति *f.*; ‘s. fever’ जीर्णज्वरः. -LY, *adv.* मंदं, मंदं मंदं, मंथरं; शनैः, शनैः शनैः, अशीघ्रं, अद्रुतं, विलंबेन. -NESS, *s.* मांद्यं, मंदता; विलंबः, दीर्घसूत्रता, &c.

SLUGGARD, *s.* मंदः, अलसः, जडः, तुंदपरिमृजः, शीतकः, आलस्यशीलः, तंद्रालुः, स्थूल-जड-मतिः. —SLUGGISH, *a.* मंद, अलस, तंद्रालु, मंदगति, आलस्यशील; *See* DULL. -LY, *adv.* मंदं, अलसवत्. -NESS, *s.* मांद्यं, आलस्यं, तंद्रा, जाड्यं.

SLUICE, *s.* (जल-) प्रवाहः, प्रपातः. 2 द्वारं, परि(री)-वाहः, जलनिर्गमः.

SLUMBER, *v. i.* प्र-,स्वप् 2 P; अनिर्भरं स्वप्; (fig.) अनुपयुक्त-अव्यापृत-*a.* स्था or भू 1 P. -*s.* लघु-अल्प-अगाढ-निद्रा.

SLUR, *s.* कलंकः, दूषणं, अकीर्तिचिह्नं. -*v. t.* ‘cast a s. on’ कलंकयति-मलिनयति-(D.), मलिनीकृ 8 U, दुष् c. (दूषयति). 2 प्र-,छद् 10, गुह् 1 U.

SLUSH, *s.* कर्दमः, सजलपंकः.

SLUT, *s.* बंधकी, अविनीता, पुंश्चली; *See* PROSTITUTE. -TISH, *a.* अविनीत, अपरिष्कृतवेश.

SLY, *a.* धूर्त, कितव, कापटिक-छाद्मिक (की *f.*), समाय,

सव्याज, वंचन-कपट-पटु. 2 चतुर, विदग्ध; 's. laugh' अंतर्हासः. -LY, *adv.* चतुरं, धूर्ततया, वैदग्ध्येन, सव्याजं, समायं. 2 निभृतं, अलक्षितं. -NESS, *s.* व्याजः, छलं, छद्मन् *n.*, कापट्यं, माया, धूर्तता, वैदग्ध्यं, चातुर्यं.

SMACK, *v. t.* Ex. by गंध, स्वाद in comp.; आ-अव-भास् 1 A; *See* SAVOUR. -*v. t.* आ-,स्फुट् c.; आस्फल् c. 2 सशब्दं चुंब् 1 P. -*s.* आ-,स्वादः, रसः, गंधः. 2 आस्फोटनं, आस्फालनं; पहषस्वनः. 3 सशब्द-चुंबनं.

SMALL, *a.* अल्प, स्तोक, (of quantity). 2 लघु, तनु, अणु, क्षुद्र; अल्प-क्षुद्र-तनु, अल्पशरीर, अगुरु, अ-बृहत्, अमहत्; oft. ex. by क affixed; *See* LITTLE; 's. tree' वृक्षकः; 's. boy' बालकः &c. 3 (Voice) नीच, अगुरु; 's.-pox' मसूरी-रिका, वि-स्फोटकः; शीतला, वसंतरोगः (modern names).

SMART, *a.* तीक्ष्णमति, कुशाग्रबुद्धि, प्रदीप्तप्रज्ञ, चतुर, विदग्ध. 2 तीव्र, तीक्ष्ण, शीघ्र, द्रुत, लघु; आशु-शीघ्र-कारिन्. 3 (Speech &c.) सरस, मार्मिक (र्की *f.*), रसिक, रसगर्भ. 4 शोभन, सुवेश, प्रफुल्ल, सु pr. 5 (Pain &c.) तीव्र, तीक्ष्ण, उग्र, दुर्विषह; वेगवत्. -*s.* तीव्रवेदना, तीक्ष्णव्यथा-वेदना; शूलः-लं. -*v. i.* व्यथ् 1 A, तप् pass., तीक्ष्णव्यथां अनुभू 1 P; 'I am s. ing under the defeat' पराभवो मम हृदि प्रत्युतं शल्यमिव; न्यक्कारो हृदि वज्रकील इव मे तीव्रं परिस्पंदते (Vi. 5). -LY, *adv.* तीक्ष्णं, तीव्रं, शीघ्रं, द्रुतं; लाघवेन, शोभनं, सु pr. -NESS, *s.* तीव्रता, तीक्ष्णता; शीघ्रमतित्वं, मार्मिकता, सरसता; शोभा, &c.

SMASH, *v. t.* चूर्ण् 10, वि-,मृद् 9 P, निष्पिष् 7 P, भंज् 7 P, प्रमंथ् 9 P, निर्दल् c. (दलयति); *See* BREAK. -*s.* प्रमाथः, निर्दलनं, विमर्दः, चूर्णनं, निष्पेषः-षणं.

SMATTERER, *s.* चुंबकः, पल्लवाग्राहिपंडितः. -SMATTERING, *s.* पल्लवाग्राहि पांडित्यं; oft. ex. by किंचित्, अल्पमात्रं; 's. of knowledge' अत्यल्पं ज्ञानं.

SMEAR, *v. t.* लिप् 6 P, वि-प्र-आ-अव-°, अभि-,अंज् 7 P or c., दिह् 2 U. -ING, *s.* लेपः-पनं, अंजनं.

SMELL, *s.* घ्राणं; 'sense of s.' घ्राणेंद्रियं, घ्राणशक्ति *f.*, गंधग्रहणशक्तिः. 2 आ-,घ्राणं, गंधग्रहणं. 3 गंधः, वासः, आमोदः; *See* ODOUR, FRAGRANCE. -*v. t.* घ्रा 1 P, आ-उपा-° -*v. i.* Ex. by गंध in comp. or सगंध-तुल्यगंध- *a.*; 's. ing of honey' मधुगंधि; 's. ing like fat' वसागंधि; 'the flower s. s sweet' मधुरोस्य कुसुमस्य गंधः; 'it s. s of smoke' धूमस-गंधमेतत्. -ING, *a.* गंधग्राहिन्. 2 गंधयुत, सगंध, वासयुक्त.

SMELT, *v. t.* वि-ली c., वि-द्रु c. -ER, *s.* लोहद्रावकः; लोहकारः.

SMILE, *v. i.* स्मि 1 A, मंदं विहस् 1 P, ईषद् हस्, मंदस्मितं-मंदहास्यं-कृ 8 U; 's. on' अनुग्रह् 9 P; प्र-सद् 1 P, प्रसन्न-कृपार्द्रदृष्टि- *a.* भू (with loc.); 'fortune s. s on you' भाग्यशाली भवान्. -*s.* स्मितं, मंदहासः-हास्यं-स्मितं, विहसितं, विहसनं; 'speaking with a s.' स्मितपूर्वाभिभाषिन्; 'with a s.' सस्मितं. -ING, *a.* स्मेर, सस्मित, स्मयमान, प्रसन्न, प्रफुल्ल; 's. sweetly' शुचिस्मित, चारुहासिन्; 'a s. countenance' स्मेर-हास्य-मुखं, प्रसन्न-प्रफुल्ल-वदनं. -INGLY, *adv.* सस्मितं, विहस्य.

SMIRCH, *v. t.* मलिनीकृ 8 U.

SMIRK, *s.* विकृतहासः, विलक्षस्मितं. -*v. i.* कृ 8 U with (*s.*).

SMITE, *v. t.* हन् 2 P, प्र-हृ 1 P, तड् 10, नि-अप-कृ 8 U, तुद् 6 P; व्यध् 4 P; 's.en with anxiety' संस्पृष्टमुत्कंठया (S. 4); 's.en by love' मदन-बाणहत, कामोपहत, कामार्त, मदनसंतप्त, अनंगपीडित. 2 हन्, मृ c., सूद् 10; *See* KILL. -ER, *s.* हंता, सूदनः, घातकः.

SMITH, *s.* शिल्पिन् *m.*, कारः in comp.; 'iron. s.' लोहकारः, अयस्कारः; स्वर्णकारः, &c. -ERY,-Y, *s.* शिल्प-कर्म-शाला, लोहकारशाला.

SMOCK, *s.* (स्थूल) शाटकः, अधोवसनं.

SMOKE, *s.* धूमः-मिका, धूपः-पिका; 'a quantity of s.' धूम्या; 'cloud of s.' धूमपटलं-ओघः. -*v. t.* (धूमनालीं) पा 1 P, सेव् 1 A. 2 धूमेन शुध् c. or शुष् c., धूप् 1 P, 10, धूमयति-धूपयति (D.). -*v. i.* धूमायते (D.), धूमं उत्क्षिप् 6 P or उद्-गॄ 6 P or निः-सृ c. or उत्सृज् 6 P; 's. ing food' धूमं वि-सृजत् (प्रोष्णं) अन्नं. 2 धूमनालीं पा. -ER, *s* धूमपाः, धूमपायिन्-सेविन् *m.* -ING, *s.* धूमपानं. 2 धूमो-त्क्षेपः-पणं. -LESS, *a.* निर्धूम, धूमहीन-रहित. -Y, *a.* सधूम, धूमावरुद्ध, धूमबहुल. 2 धूम्र, धूमाभ, धूमल, धूमाकार. 3 धूमगंध-स्वाद.

SMOOTH, *a.* सम; श्लक्ष्ण, मृदु (fig. also); स्निग्ध, मसृण, अरूक्ष; अपरुष, अकटु, अकर्कश (sound); 'by s. words' श्लक्ष्णया गिरा, सांत्ववादेन, मृदुभिर्व-चोभिः; 'by s. remedies' सामोपायैः. 2 धारावाहिन्, विसारिन्, सततप्रवाहिन्; निरुपद्रव, निर्विघ्न, निरंतराय, निर्बाध, (business &c.); शांत, अक्षुब्ध, प्रसन्न, अ-नुत्तरंग, निर्वात (water). -*v. t.* समीकृ 8 U, श्ल-क्ष्णीकृ. 2 अविघ्न- *a.* &c. कृ, निर्विघ्नीकृ. -LY, *adv.* सु-खेन, निर्विघ्नं, निरंतरायं, अनायासेन. -NESS, *s.* श्लक्ष्ण-ता, स्निग्धता, मृदुता, अक्षोभः, प्रसादः, &c.

SMOTHER, *v. t.* श्वासं अव-नि-रुध् 7 U, श्वासावरोधं कृ 8 U. 2 प्रति-,स्तंभ् 9 P, निग्रह् 9 P, नियंत्र् 10, नियम् 1 P -ED, *a.* रुद्धश्वास-प्राण.

SMOULDER, *v. i.* अंतर् ज्वल् 1 P or स्फुर् 6 P or दह् pass., better by 's. ing'; 'just as a s.-ing tree bursts into flame' अंतःप्रसुप्तदहनो ज्वलतीव वनस्पतिः (U. 4). -ING, *a.* अंतर्दाहिन्-ज्वालिन्, गूढदाहवत्, प्रसुप्तदहन.

SMUGGLE, *v. i.* प्रतिषिद्धानि भांडानि आह 1 P or आनी 1 P.

SMUT, *s.* मसी, मलं. 2 अश्लीलवाच् *f.*, दुरुक्तं, दुर्वचनं. –*v. t.*, SMUTCH, *v. t.* मलिनीकृ 8 U, मलीमसीकृ, मलिनयति (D.). –TY, *a.* मलिन, मलीमस. 2 अश्लील, दुरुक्त, अवाच्य.

SNACK, *s. See* SHARE, REPAST.

SNAFFLE, *s.* लघुवल्गा.

SNAIL, *s.* शंबूकः, कोष-कवच-स्थः. 2 मंथरः.

SNAKE, *s.* सर्पः, भुजगः, भुजंगः-गमः, पन्नगः, अहिः, नागः, उरगः, उरंगमः, विषधरः, भोगी, व्यालः, आशीविषः, फणी, दर्वीकरः, जिह्मगः, पवनाशनः, कुंभीनसः, दंदशूकः, चक्री, द्विजिह्वः, द्विरसनः, सरीसृपः, कुंडली, गूढपाद्, चक्षुःश्रवस्, काकोदरः, दीर्घपृष्ठः, बिलेशयः; 'hooded s.' फणभृत्, भोगधरः, भोगी; 's. without poison' राजि(जी)लः, डुंडुभः; 's. with a spotted skin' मालुधानः, मातुलाहिः; चित्रसर्पः; 'that has cast off his slough' निर्मुक्तः, मुक्तकंचुकः; 'his venom' क्ष्वेडः, गरलं, विषं; 'his hood' स्फटा, फटा, फणा, स्फोटा, दर्वी; 'charmer of s. s' अ(आ)हितुंडिकः, व्यालग्राही. –Y, *a.* (*s.*) in comp.; आहेय (यी *f.*).

SNAP, *v. t.* (अकस्मात्) त्रुट् c., भंज् 7 P, खंड् 10, छिद् 7 P. 2 आ-,स्फल् c., सहसा ग्रह् 9 P or उद्-हृ 1 P. 3 अकस्मात् दंश् 1 P; 's. the fingers' अंगुली स्फुट् c., छोटिकां दा 3 U or कृ 8 U. –*v. i.* (सहसा) त्रुट् 4, 6 P, दल् 1 P, स्फुट् 6 P, भंज्-भिद्-pass. 2 क्वण् 1 P. 3 भष् 1 P. 4 दंश् 1 P, दंतैः ग्रह् 9 P. –*s.*,–PING, *s.* त्रोटनं, आस्फालनं, आस्फोटनं, आकस्मिकभंगः. 2 छोटिका, मुकु(चु)टी, अंगुलिभंगः. 3 आकस्मिकदंशः. –PISH, *a.* दंशनशील, दिदंक्षु. 2 कर्कश, परुष, दुःशील, कुक्कुरस्वभाव.

SNARE, *s.* पाशः, वागुरा, जालं; 'take in a s.' जाले बंध् 9 P; (fig.) उन्मार्गेण-अपथेन-प्रवृत् c. or गम् c. (गमयति). –*v. t.* पाशे पत् c., पातयित्वा बंध् 9 P, पाशीकृ 8 U, जाले बंध्.

SNARL, *v. i.* भष् 1 P, रै 1 P; गर्ज् 1 P. 2 परुषंकर्कशं-वद् 1 P. –ER, *s.* भषकः, कर्कशः, अशीलःस्वभावः.

SNATCH, *v. t.* (away) आच्छिद् 7 P, (कृपाणपातविषयात् आछिदतः प्रेयसीं Mal. 5); आक्षिप्य ग्रह् 9 P, झटिति ग्रह् or कृष् 1 P or हृ 1 P or धृ 1 P, 10 or आ-कल् 10 (कलयति). –at, ग्रहीतुं प्रवृत् 1 A, सवेगं ग्रह् desid. (जिघृक्षति). –off, अपहृ, मुष् 9 P, चुर् 10. –out, उत्-कृष्, निर्हृ, उद्धृ, उन्मूल् 10, विउत्-पट् 10. –up, उत्क्षिप् 6 P, (उत्क्षिप्यैनां ज्योतिरेकं जगाम S. 5). –*s.*,–ING, *s.* आकस्मिकग्रहणं-धरणं; आच्छेदः, सहसा आकलनं. 2 अल्पांतरं, अल्पावकाशः. 3 क्षण-आकस्मिक-प्रवृत्ति *f.*; 'by s. es' खंडशः; 's. es of moonlight' कादाचित्काः चंद्रप्रकाशाः. –ING, *a.* लोलुप, गृध्नु; *See* GREEDY.

SNEAK, *v. i. See* SLINK. –ING, *a.* कुत्सितवृत्ति, अधम, कापुरुषवृत्ति; *See* MEAN.

SNEER, *v. i.* (at) अव-उप-हस् 1 P (with acc.), सहासं अवज्ञां सूच् 10; अव-ज्ञा 9 U, अवमन् 4 A; *See* DERIDE. –*s.* अव-उप-हासः; अवज्ञाहासः. –INGLY, *adv.* सोपहासं, सावज्ञं.

SNEEZE, *v. i.* क्षु 2 P, कृ 8 U with (*s*). –*s.*, –ING, *s.* क्षुतं, क्षवः, क्षवथुः, क्षुत् *f.*, हंजिः, छिक्का.

SNICKER, SNIGGER, *v. i.* अंतर् हस् 1 P.

SNIFF, *v. t.* नासाद्वारेण निश्वस् 2 P.

SNIP, *v. t.* अग्रभागं-अग्रं-लू 9 U; *See* NIP.

SNIPE, *s.* दीर्घचंचुः. 2 Fool, q. v.

SNIVEL, *s.* नासामलं, सिंहा(घा)णं-नं. –*v. i.* मलं स्रु c.; 'he s. s' तस्य नसः मलं स्रवति.

SNOB, *s.* सभ्यंमन्यः, भद्रमानिन् *m.*

SNOOZE, *See* NAP.

SNORE, *v. t.* घर्घरायते (D.), घर्घररवं कृ 8 U. –ING, *s.* घर्घरः, घर्घररवः, क्रथनं.

SNORT, *s.* फू(फु)त्कारः. –*v. i.* फूत्कृ 8 U, फुत्कारं मुच् 6 P.

SNOT, *See* SNIVEL.

SNOUT, *s.* प्रोथः, नासा, पोत्रं.

SUM, *s.* योगः, संकलनं, संयोजनं (in Math.). 2 साकल्यं, समाहारः, समवायः. 3 सारः, तात्पर्यं, सारांशः. 4 राशिः. 5 संग्रहः, संक्षेपः. 6 (Of money) राशिः, धनभागः-अंशः, oft. not ex.; 'spending a large s. of money' भूरिद्रव्यव्ययः; 'small s. of money' अल्पधनं; बहुधनं &c. 7 परा कोटिः, सारः; 's. and substance'; *See* SUBSTANCE. –*v. t.* संयुज् 10. सं-कल् 10 (कलयति). 2 (up) संक्षेपेण कथ् 10, समासतो वद् 1 P, (उक्तं) उपसं-हृ 1 P. —SUMMARY, *a.* संक्षिप्त, सामासिक (की *f.*). 2 क्षिप्र, अविलंबित. –*s.* संक्षेपः, सारः, संग्रहः. –ILY, *adv.* संक्षेपतः, संक्षेपेण, समासतः.

SUMMER, *s.* ग्रीष्मः, निदाघः, घर्मः, तपः, उष्णः, उ-(ऊ)ष्मागमः, उ(ऊ)ष्मकः, ग्रीष्मसमयः-कालः &c.; 's.-house' केलि-विलास-गृहं-मंदिरं; 's.-house with fountains &c.' जलमंदिरं, धारायंत्रगृहं.

SUMMIT, *s.* शिखरः-रं, शृंगं, सानु *m. n.*, चूडा, शिखा, अग्रं, कूटः-टं; 'reclining on the s. of the western mountain' अस्ताचलचूडावलंबिन्. 2 (fig.) परा काष्ठा-कोटिः.

SUMMON, *v. t.* ह्वे 1 P, आकृ c., आनी c., आवह् c.; 'to s. up courage'; *See* COURAGE. –SUMMONS, *s.* आह्वानं; 'written s.' आह्वानपत्रं; 'he who disobeys a s.' आहूतोऽनागच्छन् (V. M. 4).

SUMMUN-BONUM, *s.* निःश्रेयसं, परमार्थः, अपवर्गः.

SUMPTER,-HORSE, *s.* स्थू(स्थौ)रिन् *m.*, पृष्ठ्यः.

SUMPTUARY, *a.* व्ययविषयक, व्ययनियमसंबंधिन्.

SUMPTUOUS, *a.* महार्ह-र्घ, बहुव्ययसाध्य, महा-बहु-मूल्य. 2 विशिष्ट; 's. feast' भोजनविशेषः. –LY, *adv.* अतिव्ययपूर्वं, महार्घ्येण. –NESS, *s.* महा-अति-व्ययः.

SUN, *s.* रविः, सूर्यः, आदित्यः, भानुः, सवितृ, अर्कः, भास्करः, दिनकरः, दिवाकरः, मार्तंडः, मरीचिन्, विवस्वत्, मित्रः, खगः, पूषन्, भास्वत्, and comp. of 'Hot' with 'Ray', 'Ray' with सहस्र, पतिः with 'Day'; उष्णरश्मिः, सहस्रकिरणः, सहस्रधामा, दिनपतिः &c. 2 आतपः; 'morning-s.' बालातपः, बालार्कः; 'exposed to the sun' आतपे दत्तं, आतपायोज्झितं (धान्यं); 's.-beam' सूर्यकिरणः, अंशुः; *See* RAY; 's.-day' रविवारः-वासरः, भानुवासरः; 's.-dial' सूर्यघटी; 's.-rise' सूर्योदयः, उदयः; 's.-set' अस्तमनं, अस्तः, दिनांतः; 'at s.-set' अस्तं गते रवौ; समुदिते रवौ 'at s.-rise'; 'from, s.-stroke' आतपलंघनात् (S. 3); 's.-shine' सूर्यातपः, प्रकाशः, सूर्यालोकः. –NY, *a.* सौर (री *f.*)

(*s.*) in comp. 2 सूर्यतप्त, आतपव्याप्त, आतपाक्रांत; आतपवत्, सातप.

SUNDER, *See* SEPARATE.

SUNDRY, *a.* बहुविध, नानाविध, विविध, अनेक-नाना in comp.

SUP, *v. i.* रात्रौ भुज् 7 A. –SUPPER, *s.* रात्रिभोजनं.

SUPER, A prefix rendered by अति, अधिक, अतिशय in comp.; 's.-abound' अतिबहुलीभू; 's.-abundant' अतिबहुल, उपचित.

SUPER-ANNUATED, *a.* वयोधिक, वार्धक्येन कार्याक्षम.

SUPERB, *a.* अतिशोभन; *See* MAGNIFICENT.

SUPERCILIOUS, *a.* अवलिप्त, अत्युद्धत, अतिदृप्त.

SUPEREROGATORY, *a.* विध्यतिरिक्त, नियमातिरिक्त. –SUPEREROGATION, *s.* नियमातिरेकः, अत्याचारः.

SUPERFICIES, *s.* तलं, पृष्ठं. —SUPERFICIAL, *a.* बाह्य, बहिःस्थ, बहिः-पृष्ठ in comp.; 's. contents' पृष्ठफलं; 's. view' बाह्यालोकः. 2 गाध, पल्लवग्राहिन्, अल्प, असूक्ष्म, अनिपुण, अगाढ; 's. scholar' अल्पज्ञः, चुंबकः. –LY, *adv.* बाह्यतः, बहिः.

SUPERFINE, *a.* अतिसूक्ष्म, सर्वोत्कृष्ट.

SUPERFLUOUS, *a.* अधिक, अतिरिक्त, व्यर्थ, अपेक्षातिरिक्त; oft. ex. by पुनरुक्त; 'render s.' पुनरुक्ततां नी 1 P, (इदमुत्पाद्य सरःसलिलं अमृतरसमुत्पादयता पुनरुक्ततामिव नीता स्वसृष्टिः Ka. 124); 'when there is clear moonlight, torches are s.' अभिव्यक्तायां चंद्रिकायां किं दीपिकापौनरुक्त्येन (V. 3); आशास्यमन्यत्पुनरुक्तभूतं (R. v. 34). –NESS,-SUPERFLUITY, *s.* आधिक्यं, पुनरुक्तता, अतिरेकः,वैयर्थ्यं.

SUPERHUMAN, *a.* अ-अति-मानुष (षी *f.*), अतिमर्त्य, अपौरुष (षी *f.*), मानुषातिग.

SUPERINCUMBENT, *a.* उपरिस्थित, अधिशयान, उपरिवर्तिन्.

SUPERINDUCE, *v. t.* अध्याहृ c., अधिनि-विश् c.

SUPERINTEND, *v. t.* पर्यवेक्ष् 1 A, अधि-ष्ठा 1 P, अध्यास् 2 A. –ENCE, *s.* अधिष्ठानं, अवेक्षा, अधिकारः, अध्यक्षता, अवेक्षणं, कार्यदर्शनं. –ENT, *s.* पर्यवेक्षकः, अधीशः, अध्यक्षः, अधिकारी.

SUPERIOR, *a.* (To) ज्यायस्, गरीयस्, श्रेयस्, वरीयस्; आधिक, श्रेष्ठ, वरिष्ठ, गरिष्ठ, विशिष्ट, प्रमुख; oft. by अतिरिच्-विशिष्-pass.; *See* EXCEL; 'truth is s. to thousands of horse-sacrifices' अश्वमेधसहस्रेभ्यः सत्यमेवातिरिच्यते-विशिष्यते (H. 4); 'of s. merits' गुणाधिक, विशिष्टगुण. –*s.* गुरुः, ज्येष्ठः, श्रेष्ठः, वरिष्ठः, अध्यक्षः. –ITY, *s.* आधिक्यं, ज्येष्ठता, श्रेष्ठता, विशिष्टता, उत्कर्षः, प्राबल्यं, प्राग्भावः.

SUPERLATIVE, *a.* सर्वोत्कृष्ट; परम, अत्युत्तम, अतिशय in comp. –LY, *adv.* अत्यंतं, परमं.

SUPERNATURAL, *a.* अलौकिक (की *f.*), अ-अति-मानुष- (षी *f.*), प्रकृतिबाह्य, मानुषातिग. –LY, *adv.* अलौकिकतया.

SUPERNUMERARY, *a.* अतिरिक्त; अधिक, संख्यातिरिक्त.

SUPERSCRIBE, *v. t.* बाह्यनाम लिख् 6 P or दा 3 U. –SUPERSCRIPTION, *s.* बाह्यनाम; (fig.) बहिर्देशः, बाह्यभागः.

SUPERSEDE, *v. t.* उल्लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, निरस् 4 U, निराकृ 8 U; 's. ed him in the office' तमतिक्रम्य तत्पदमवाप. 2 वि-,लुप् c., खंड् 10, निवृत् c. –ED, *a.* निरस्त, विलोपित; 'a s. wife' अधिविन्ना, अध्यूढा.

SUPERSTITION, *s.* मूढविश्वासः, अतिविश्वासः-भक्ति *f.*, मिथ्याधर्मः; अविधिनिष्ठा-श्रद्धा. –SUPERSTITIOUS, *a.* मूढ, विश्वासनिष्ठ; असत्य-मिथ्या-धर्मिन्, अत्याचारनिष्ठ. 2 मूढविश्वासमूलक.

SUPERSTRUCTURE, *s.* भवनं, मंदिरं; *See* BUILDING.

SUPERVENE, *v. i.* अकस्मात् उप-स्था 1 P, or उपनम् 1 P.

SUPERVISE, *v. t.* पर्यवेक्ष् 1 A. –ER, *s.* पर्यवेक्षकः; *See* SUPERINTEND.

SUPINE, *a.* उत्तानशय, अवाङ्शायिन्, उत्तान, ऊर्ध्वमुख (खी *f.*). 2 अलस, निरीह, उदासीन. –NESS, *s.* आलस्यं, तंद्रा.

SUPPLANT, *v. t.* निष्क्रम् c., स्थानं व्याप् 5 P or अधि-ष्ठा 1 P, अप-निः-सृ c., निराकृ 9 U, निरस् 4 U.

SUPPLE, *a.* कोमल, सुनम्य, अदृढ, मृदु, चपल, लघु, नमनशील.

SUPPLEMENT, *s.* परिशिष्टं, परिपूरणं, उत्तरखंडः, शेषपूरणं. –*v. t.* पूर् 10, न्यूनतां निराकृ 8 U. –AL, –ARY, *a.* परिशिष्ट in comp.

SUPPLIANT, SUPPLICANT, *s.* अर्थिन् *m.*, प्रणयिन्, प्रार्थकः, शरणागतः; 'service to s. s' प्रणयिक्रिया. –*a.* प्रणत, नम्र, कृतांजलि, बद्धांजलि, शरणार्थिन्. –LY, *adv.* सानुनयं, प्रणतिपूर्वं, कृतांजलि.

SUPPLICATE, *v. t.* अनु-नी 1 P, अर्थ् 10 A, सांजलि याच् 1 A. –ION, *s.* प्रार्थना-नं, अनुनयः, सविनयप्रार्थना. –ORY, *a.* सानुनय, सविनय, प्रणतिपूर्व.

SUPPLY, *v. t.* उपाहृ 1 P, परि-उप-क्लृप् c., संयुज् 10; 'he was s. ed with food' अन्नमुपकल्पितं तस्य; सं-भृ 3 U, उप-स्था c. (स्थापयति), परि-,पूर् 10. 2 (An ellipsis) अध्याहृ, अभ्यूह् 1 U, पूर्. –*s.* संभारः, संचयः, सामग्री, उपकल्पनं. 2 (S. s) वीवधः; *See* PROVISION.

SUPPORT, *v. t.* उप-सं-अव-उत्-स्तंभ् 9 P or c., आ-अव-लंब् 1 A, सं-,धृ 1 P, 10, आलंबं-अवलंबं-दा 3 U; 'how shall I s. my life' कथं जीवितं धारयिष्यामि (S. 4); 's. by the hand' हस्तं दा, (सेवाविचक्षणहरीश्वरदत्तहस्तः R. XIII. 69); *See* LEAN. 2 भृ 1, 3 U, ग्रासाच्छादनं दा 3 U, पुष् 1, 9P

or c., (अन्नादिना) पा c. (पालयति), संवृध् c.; ' s. oneself ' उदरपूरणं कृ. 3 वि-,सह् 1 A; *See* BEAR. 4 उपकृ 8 U, अनुग्रह् 9 P, साहाय्यं कृ. 5 समर्थ् 10, दृढयति (D.); *See* PROVE; न ह्ययं मंत्रः स्वातंत्र्येण कंचिदपि वादं समर्थयितुमुत्सहते (S. B. 356) ' cannot, by itself, s. any theory '. 6 अभिनंद् 1 P, अनुमुद् 1 A, अनुकूलयति (D.). –*s.* आ-अव-लंबः-लंबनं, धारणं; ' s. of life असुधारणं, प्राणयात्रा. 2 अवष्टंभः, आश्रयः, आधारः, आ-अव-लंबः, उपस्तंभः, उपघ्नः; ' a tree of s. ' संश्रय-आश्रय-द्रुमः, उपघ्नतरुः. 3 भरणं, पोषणं, पालनं, संवर्धनं. 4 (Means) आजीवः; उपजीविका; *See* LIVING. 5 साहाय्यं, अनुग्रहः, आनुकूल्यं; अभिनंदनं. –ED, *a.* साधार, सावष्टंभ, उत्तंभित, दत्तहस्त (with the hand). 2 समभाग. –ER, *s.* आधारः, अवष्टंभः, आलंबी, उद्वहः. 2 पोषकः, वर्धयितृ *m.*, पालकः.

SUPPOSE, *v. t.* वि-सं-भू c., क्लृप् c., उपन्यस् 4 U. 2 मन् 4 A, ऊह् 1 A, अनु-मा 3 A, अवगम् 1 P, वि-, तर्क् 10; *See* INFER; ' s. ing that ' ex. by अथ, यदि, (अथ मरणमवश्यमेव जंतोः Ve. 3). –ITION, *s.* सं-,भावना, कल्पना, उपन्यासः; तर्कः, ऊहः, अनुमानं; ' on this s. only ' एवं कल्पिते एव, अनेन एव उपन्यासेन. –SUPPOSITITIOUS, *a.* कूट in comp., कृत्रिम, कल्पित; ' s. child ' पुत्रप्रतिनिधिः, कूटपुत्रः.

SUPPRESS, *v. t.* सं-नि-यम् 1 P, निग्रह् 9 P, अव-सं-नि-रुध् 7 U, नि-वृ c., नियंत्र् 10; धृ 10, स्तंभ् 9 P or c., प्र-,शम् c. (शमयति), निवृत् c.; ' s. ing the emotions of sorrow ' नियम्य शोकावेगं; अंतर् in comp.; ' who s. es his tears ' अंतर्बाष्पः; अंतःकोपः &c.; ' s. ing disturbance ' संक्षोभशमनं-निवारणं; (the passions) जि 1 P, दम् c. (दमयति), नि-सं-यम् , निग्रह्; *See* CONTROL. 2 गुह् 1 U, छद् 10, गुप् 1 P, संवृ 5 U, अपलप् 1P; *See* CONCEAL. –ION, *s.* सं-नि-यमः-मनं, निग्रहः, अव-नि-रोधः, नियंत्रणं, स्तंभनं, निवारणं, प्र-,शमनं, अवष्टंभः; (of the passions) दमः-मनं, जयः, निग्रहः, &c. 2 गहनं, गोपनं, छादनं.

SUPPURATE, *v. i.* पाकं व्रज् 1 P, पच् pass., सपूय-*a.* भू. –ION, *s.* परि-,पाकः, सपूयत्वं.

SUPREME, *s.* परम, अतिश्रेष्ठ, निरतिशय; ' s. soul ' परमात्मा, परब्रह्म, जगदात्मा. 2 मुख्य, प्रभविष्णु, प्रधान, विशिष्ट; *See* PRINCIPAL; ' s. power ' साम्राज्यं, पारमेष्ठ्यं, प्रधानाधिकारः, ऐकपत्यं; ' s. monarch ' अधीश्वरः, सम्राट्, परमराजः; ' be s. to ' अतिरिच्-विशिष्-pass., (with abl.); *See* EXCEL. –LY, *adv.* परमं, अत्यंतं, परं, अति-सु pr. –SUPREMACY, *s.* आधिपत्यं, प्रभुत्वं, प्रभविष्णुता, स्वाम्यं; प्राधान्यं, मुख्यता, श्रेष्ठता, विशिष्टता.

SURCHARGE, *v. t.* अत्यंतं पूर् 10. –ED, *a.* अतिभाराक्रांत, पूर्णगर्भ.

SURD, *s.* करणी.

SURE, *a.* निश्चित, असंदिग्ध, ध्रुव, निःसंशय, स्थिर, नियत; *See* CERTAIN; (of persons) दृढनिश्चय, जातप्रत्यय, संशयहीन; ' I am s. ' दृढं मन्ये, मम दृढप्रत्याशा विद्यते, नूनं खलु, or एव with verbs; ' he is s. of success ' सिद्धिं ध्रुवां मन्यते; ' she is s. of heaven ' तस्याः स्वर्गवासोऽवस्थित एव; तं हतं विद्धि ' be s. that he will be killed '. 3 निर्भय; अकुतोभय; *See* SECURE, SAFE. –LY, *adv.* नियतं, नूनं, खलु, ध्रुवं, अवश्यं, निश्चितं, निःसंदेहं, निःसंशयं ; *See* CERTAINLY. –TY, *s.* प्रतिभूः, बंधकः, लग्नकः; ' s. for recognizance ' दर्शनप्रतिभूः. 2 प्रत्ययः, निर्णयः, निश्चयः. –TYSHIP, *s.* प्रातिभाव्यं.

SURF, *s.* लहरी, तरंगः, कल्लोलः.

SURFACE, *s.* तलं, पृष्ठं, मुखं, दृश्यांगं, तल-पृष्ठ-भागः, पीठं ; ' s. of the earth ' क्षितितलं, धरापीठं, &c.

SURFEIT, *v. t.* अतिपूर् 10, अतिभोजनं कृ c., अत्यंतं तृप् c., सौहित्यं-निर्वेदं-जन् c.; *See* GLUT. –*s.* अतिभोजनं, अतिपूरणं, अतितृप्ति *f.*-सौहित्यं.

SURGE, *v. i.* उच्चल् 1 P, उद्भ्रम् 1 P, उत्क्षिप् pass.; ' s. ing waters ' कल्लोलाकुलं-तरंगक्षुभितं-जलं. –*s.* कल्लोलः, महोर्मि *f.*

SURGEON, *s.* शल्यतंत्रविद्, शस्त्रवैद्यः. –SURGERY, *s.* शल्यं, शल्यतंत्रं-शास्त्रं, शस्त्रविद्या. –SURGICAL, *a.* (*s.*) in comp.

SURLY, *a.* कर्कश, रूक्ष, परुष, प्रतीप, वक्र, दुःशील.

SURMISE, *v.* आ-,शंक् 1 A, तर्क् 10, सं-भू c. –*s.* वि-,तर्कः, आ-,शंका.

SURMOUNT, *v. t.* तॄ 1 P, सं-उत्-,° अतिक्रम् 1 U, 4 P, लंघ् 1 A, 10, पारं गम् 1 P.

SURNAME, *s.* उपनामन् *n.*, कुलनाम. –*v. t.* Ex. by (*s.*) ; ' s. ed Vyása ' व्यासकुलोत्पन्नः, व्यासोपनामा.

SURPASS, *v. t.* अति-शी 2 A, अतिक्रम् 1 U, 4 P, अतिरिच्-विशिष्- pass., जि 1 P ; *See* EXCEL. –ING, *a.* अति in comp. ; ' s. the strength of man ' अतिमानुष; *See* BEYOND.

SURPLICE, *s.* धौतावारः, उपरिच्छदः.

SURPLUS, *s.* उद्-वृत्तं, उद्वर्तः, अतिरिक्तभागः.

SURPRISE, *v. t.* वि-स्मि c. (स्माययति, स्मापयते), साश्चर्य- *a.* कृ, विस्मयेन उपहन् 2 P, विस्मयाकुल-आश्चर्यचकित- *a.* कृ. 2 अतर्कित-सहसा-आपत् 1 P or आसद् c. or अवस्कंद् 1 P ; सन्निपत्याभियुक्तः (U. 3) ' was s. ed and attacked.' –*s.*,-AL, *s.* विस्मयः, आश्चर्यं, चमत्कारः, चमत्कृति *f.*, अद्भुतं. 2 अतर्कितः आपातः-अवस्कंदः, सहसाक्रमः-अवस्कंदनं. –ED, *a.* विस्मित, विस्मापित, विस्मयाकुल, साश्चर्य, आश्चर्यचकित,

विस्मयोपहत-अन्वित-आपन्न; 'to be s.' विस्मि 1 A. 2 सहसाक्रांत. -ING, *a.* आश्चर्य-विस्मय-कर (री *f.*), अद्भुत, वि-,चित्र, आश्चर्य-विस्मयावह.

SURRENDER, *v. t.* उपा-हृ 1 P, उपा-नी 1 P, सं-,ऋ c. (अर्पयति), निक्षिप् 6 P, प्र-दा 3 U, प्रति-पद् c. 2 परि-,त्यज् 1 P, उत्सृज् 6 P, हा 3 P, संन्यस् 4 U. 3 (Oneself) शरणं गम् 1 P or या 2 P or प्र-पद् 4 A, वशं गम्-या. -*s.* समर्पणं, प्रदानं, परि-,त्यागः, उत्सर्गः. 2 प्रणति *f.*, वशीभवनं.

SURREPTITIOUS, *a.* मोषेण-चौर्येण-छलेन-कृत-प्रकाशित-निवेशित, &c. -LY, *adv.* छलेन, सकपटं.

SURROUND, *v. t.* परि-वृ 5 U or c., परिक्षिप् 6 P, परि-इ 2 P, परिगम् 1 P, परि-,वेष्ट् 1 A or c., परि-स्तृ 1 P; oft. by मेखला, रसना, वलय in comp.; 'the earth s. ed by ocean' समुद्ररसना-उदधि-वलया-रत्नाकरमेखला-उर्वी. -ING, *a.* समंततः वर्तिन्, आभोग-पर्यंत-वर्तिन्; परिसरस्थ; *See* NEAR. -*s.* परिवेष्टनं, संवलनं.

SURTOUT, *s.* उत्तरीयं, प्रावारः.

SURVEILLANCE, *s.* अवेक्षा-क्षणं, निरूपणं.

SURVEY, *v. t.* प्र-,परि-,मा 3 A or c. (मापयति). 2 (With the eye) संदृश् 1 P, परि-अव-ईक्ष् 1 A, विलोक् 1 A, 10, निरीक्ष्, निरूप् 10. -*s.* अव-आ-लोकः-कनं, निरीक्षा, निरीक्षणं. 2 मापनं. -OR, *s.* क्षेत्र-भू-मापकः.

SURVIVE, *v. t.* अति-जीव् 1 P; जीव् with पश्चात् (with gen.) or उत्तरं (with abl.); 's. danger' आपदं उत्तॄ 1 P. -*v. i.* धृ pass., अव-स्था 1 A. -AL, *s.* अतिजीवनं, अवस्थानं. -ING, *a.*,-OR, *s.* शेष, अवशिष्ट, अतिजीविन्, ध्रियमाण, अवस्थित.

SUSCEPTIBLE, *a.* योग्य, उचित, ग्राहिन्, ग्रहण-वेदन-क्षम-शक्त, गमनीय, ग्राहक; *See* ADMIT (of); 'I am made s. of an emotion' विकारस्य गमनीयास्मि संवृत्ता (S. 1); 'youth is s.' विकारि यौवनं (Mal. 1); 's. of anger' सुलभकोप, क्रोधशील, शीघ्रकोपिन्. -SUSCEPTIBILITY, *s.* ग्राहकत्वं, ग्रहण-वेदन-शीलता-क्षमता.

SUSPECT, *v. t.* शंक् 1 A, वि-आ-परि-°, सं-शी 2 A, न प्रति-इ 2 P or विश्वस् 2 P; 'excessive affection s. s evil' अतिस्नेहः पापशंकी (S. 4). 2 मन् 4 A, वि-,तर्क् 10. -SUSPICION, *s.* आ-, शंका, संदेहः, संशयः, विकल्पः, वि-,तर्कः. -SUSPICIOUS, *a.* आ-,शंकिन्, जातशंक, शंका-संशय-शील-बुद्धि, साशंक, संदिग्धचित्त-मति, अविश्वासिन्. 2 आ-, शंक्य, शंकावह, शंकास्थानं-आस्पदं-पात्रं.

SUSPEND, *v. t.* उद्-,बंध् 9 P, प्र-अव-लंब् c., वि-अव-संज् c.; विटपविषक्तवल्कलेषु (S. 1) 'the bark-garments s. ed from the branches'; आंदोलयति (D.). 2 व्याक्षिप् 6 P, विलंब् c. 3 (From office) नियतकालं यावत् अधिकारात् निष्कस् c. or प्रच्यु c. or भ्रंश् c. -ED, *a.* उद्बद्ध, प्र-अव-लंबित, विषक्त, आंदोलित, &c.; 's. ed in a loop' काचित, शिक्यित; 's. ed from the neck' कंठलंबिन्-लग्न. -SUSPENSE, *s.* अनिश्चयः, संदेहः, संशयः, विकल्पः, दोलावृत्ति *f.*, द्वैधीभावः; धृतद्वैधीभावकातरं मे मनः (S. 1) 'my mind is held in s. and hence anxious'; 'being in s.' दोलायमान, संशयदोलारूढ, संदेहदोलास्थ. -SUSPENSION, *s.* उद्बंधनं, अवलंबनं. 2 विलंबनं, व्याक्षेपः. 3 विच्छेदः, निवृत्ति *f.*, निरोधः.

SUSTAIN, *v. t.* भृ 3 U, सं-वृध् c., पा c. (पालयति) &c. 2 सं-,धृ 10, (शोकक्षोभं हृदयं प्रलापैरेव धार्यते U. 3); सं-स्तंभ् 9 P or c.; *See* SUPPORT; 's. life' प्राणधारणं-प्राणयात्रां-कृ 8 U, जीवितं धृ, प्राणसारं भृ; *See* LIVE, MAINTAIN. 3 प्रवृत् c. 4 प्रति-उप-पद् c.; *See* PROVE. 5 सह् 1 A, अनु-भू 1 P. -SUSTENANCE, *s.* जीवनं, उपजीविका, वृत्ति *f.*, अन्नं, आहारः; *See* MAINTENANCE, LIVING.

SUTURE, *s.* संधिः, सीवनं.

SWADDLE, *v. t.* क्षौमेण परिवृ c. or परि-वेष्ट् c.; 's.-ing clothes' बालपरिवेष्टनं.

SWAGGER, *v. i.* प्र-,गल्भ् 1 A, विकत्थ् 1 A; *See* BOAST.

SWAIN, *s.* ग्रामिकः, असभ्यः, ग्रामीणः. 2 Agriculturist, q. v.

SWALLOW, *v. t.* ग्रस् 1 A, नि-,गॄ 6 P. -*s.* ग्रासः, गिलनं. 2 निगरणस्रोतस् *n.*, अन्नमार्गः; 's.-wort' अर्कः, वसु(सू)कः, आस्फोटः, गणरूपः, विकी(कि)रणः, मंदारः, अर्कपर्णः.

SWAMP, *s.* कच्छभूः, अनूपो देशः, अनूपभूः. -*v. t.* आ-प्लु c.; *See* PLUNGE. -Y, *a.* कच्छ, अनूप.

SWAN, *s.* मरालः, राजहंसः, श्वेतगरुत् *m.*

SWARD, *s.* शाद्वलं, सतृणभूमि *f.*

SWARM, *s.* संघः, समूहः, गणः, वृंदं, कुलं; *See* MULTITUDE. -*v. i.* गणशः संनिपत् 1 P or संमिल् 6 P, संघशः गम् 1 P or या 2 P. -ING, *a.* (with) व्याप्त, संकुल, आ-सं-कीर्ण, जुष्ट, उपसेवित.

SWARTHY, *a.* श्याम, कृष्ण, कृष्णवर्ण.

SWATH, *s.* पट्टः, दीर्घखंडः. -*v. t.* (पट्टेन) वेष्ट् 1 A or c., परि-वृ c., परिच्छद् 10.

SWAY, *s.* शासनं, आधिपत्यं, ईशत्वं, प्रभुत्वं, वशः-शं, अधीनता. -*v. t.* शास् 2 P. 2 प्रवृत् c., प्र-,नी 1 P, प्रेर् c., प्रयुज् 10, प्रचुद् 10; *See* INFLUENCE, SUBJECT; 'not s. ed by avarice' अवशो लोभस्य, अनाकृष्टः लोभेन, लोभाप्रेरित, &c. -*v. i.* प्रेंख् 1 P, इतस्ततः चल् 1 P or कंप् 1 A; नम् 1 P, आ-प्र-लंब् 1 A.

SWEAR, *v. i.* शप् 1, 4 U, शपथं शप्. -*v. t.* शप्

c., शपथं ग्रह् c. -ER, s. शपथकृत् m. -ING, s. शपथं, शापः.

SWEAT, v. i. प्र-,स्विद् 4 P; *See* PERSPIRE. 2 परिश्रम् 4 P; तम् 4 P (tire). -v. t. स्विद् c.-s. स्वेदः, घर्मः, स्वेदजलं. 2 परिश्रमः, आयासः; 'by the s. of thy brow' आत्मनः परिश्रमेण. -ING,-Y, a. सस्वेद, घर्मलिप्त, स्वेदवत्.

SWEEP, v. t. मृज् 2 P or c., सं-परि-प्र-°; 's. away' अव-अप-मृज्, अपवह् c., (रयेण) अपनी; 's. across', 's. over' जवेन अतिक्रम् 1 U, 4 P or अति-इ 2 P. -s. प्रसरः, गोचरः, विषयः; *See* RANGE. -ER, s. संमार्जकः, खलपूः, बहुकरः. -ING, s. सं-,मार्जनं-ना, मलापहरणं. -INGS, s. अवकरः, अव(प)स्करः, मलं, संकरः, उच्छिष्टं.

SWEET, a. मधुर; मिष्ट, सुरस, स्वादु, मधुमय (यी f.), (of taste only). 2 चारु, मंजुल, ललित, कोमल, मनोज्ञ; *See* PLEASANT; 's. smile' चारु-मधुर-स्मितं; 's. song' चारुगीतं, &c. -s. मधु n., मिष्टं, आस्वादः. 2 सुखं, सौख्यं; 's. s of royalty' राज्य-सुखानि; 's.-heart' वल्लभ, प्रणयिन्, दयित, कांत, रमण (णी f.), प्रियतम; 's.-meat' मिष्टान्नं, मोदकः, वायनं; 's.-smelling' सुगंधि, सुरभि; 's.-speaking, -toned,-voiced' मंजुलस्वन, चारुभाषिन्, प्रियंवद, मधुरवाक्. -EN, v. t. मधुरीकृ 8 U, मिष्टीकृ, स्वादूकृ. -v. i. मधुरीभू. -LY, adv. मधुरं, चारु, मधुर in comp.; 'smiling s.' चारुहासिन्. -NESS, s. माधुर्यं, स्वादुता, &c.

SWELL, v. i. श्वि 1 P or pass., प्र-उत्-°, स्फाय् 1 A, वृध् 1 A, उत्सद् 1 P; प्र-उप-चि pass., बहुलीभू 1 P; 'a heart s. ing with joy' हर्षोत्फुल्लं हृदयं; *See* INCREASE. -v. t. श्वि c., स्फाय् c. (स्फावयति), वृध् c. (with air), उद्-प्र-आ-ध्मा 1 P; *See* PUFF. -s., -ING, s. स्फीति f., वृद्धि f., उपचयः. 2 श्वयथुः, शोथः; शोफः, गंडः. 3 (Of the sea) ऊर्मिप्रलोठनं, संक्षोभः. -ING, a. शूयमान, उत्सर्पिन्; 'a s. sea' प्रचलदूर्मिमालाकुल. -SWOLLEN, a. शून, स्फीत, प्रवृद्ध, &c.

SWERVE, v. i. प्र-वि-चल् 1 P, भ्रंश् 4 P, 1 A, पराङ्मुखीभू 1 P, च्यु 1 A, व्यति-इ 2 P, व्यतिक्रम् 1 U, 4 P, (with abl.); अतिचर् 1 P, अति-वृत् 1 A (with acc.); *See* DEVIATE; 's. ing from the right path' सन्मार्गभ्रष्ट, &c.

SWIFT, a. जवन, वेगवत्, त्वरित, सत्वर, शीघ्र-द्रुत-लघु-गामिन्, प्र-,जविन्, शीघ्रग, प्रजवन, तरस्विन्, महावेग; 's. of foot' धावने महाजव; 'as s. as the wind' वायुगति, वायुवेग. -LY, adv. शीघ्रं, जवेन, सवेगं, सत्वरं. -NESS, s. शीघ्रता, वेगः, तरस् n.

SWIG, SWILL, v. अतिपानं कृ 8 U.

SWIM, v. t. प्लु 1 P; प्लु 1 A; 'swam across the sea with their arms' पयः अतारिषुर्भुजैः (Si. XII. 77); 's. ing against the waves' बाहुभ्यां लहरीश्छिंदन्; 'the Earth s. s in blood' रुधिराप्लाविता मही. -v. t. तॄ (with acc.), पारं गम् 1 P. -MER, s. तरण-प्लवन-कृत् m. -MING, s. तरणं, प्लवनं;' s. against the current' प्रतीपतरणं.

SWINDLE,-ER, *See* CHEAT.

SWINE, s. शू(सू)कराः, वराहाः. -ISH, a. सौकर (री f.), सूकरशील-वृत्ति.

SWING, s दोला-ली, प्रेंखा, प्रेंखोलनं, हिंदोलः; काचं, शिक्यं (with a loop). 2 दोलनं, प्रेंखणं. 3 रयः, वेगः, गति f. -v. t. प्रेंख् 1 P, दोलायते (D.), इतस्ततः सं-वि-चल् 1 P. -v. t. प्रेंख् c., आंदोलयति-प्रेंखोलयति (D.), इतस्ततः सं-वि-चल् c. -ING, a. प्रेंखत्, दोलायमान; काचित, शिक्यित.

SWINGE, v. t. बलवत् तड् 10, प्रतुद् 6 P, परुषं ग्रह् 1P.

SWIRL, v. i. घूर्ण् 6 P, 1 A, भ्रम् 1, 4 P.

SWITCH. s. पिंजा; पल्लवः.

SWOON, v. i. मुह् 4 P, प्र-वि-व्या-°, मुर्च्छ् 1 P. -s मूर्च्छा, मोहः; 'he fell in a s.' मोहपरायणा बभूव, मूर्च्छापन्नः. -ING. a. मूढ, मुग्ध, मूर्च्छापन्न, मोहवश.

SWOOP, s. अवपातः, सहसाक्रमणं-आपतनं. -v. i. सहसा अवपत्य ग्रह् 9 P or आक्रम् 1 U, 4 P.

SWORD. s. असिः, खड्गः, निस्त्रिंशः. कृपाणः, करवा-(पा)लः, चंद्रहासः, रिष्टिः, मंडलाग्रः, कौक्षेयकः; 's.-belt' त्सरुबंधनं; 's.-stick' कूटासिः; 's.-man' खड्गिन्, खड्गधरः, आसिकः.

SYCOPHANT, s. चाटुकारः-पटुः, अतिलालनपरः, अत्यनुरोधिन् m. -SYCOPHANCY, s. चाटूक्ति f., चाटुकारित्वं; *See* FLATTER,-Y.

SYLLABLE, s. अक्षरं; 'of one s.' एकाच्, एकाक्षर; 'of many s. s' अनेकाच्, बह्वक्षर.

SYLLABUS, s. सारः, संक्षेपः, सारांशः.

SYLLOGISM, s. न्यायः. -SYLLOGISTIC, a. न्यायसंगत, न्याय्य, न्याय in comp.

SYLPH, s. तन्वंगी, तनुगात्री. 2 विद्याधरी, दिव्यांगना.

SYMBOL, s. चिह्नं, लक्षणं, लिंगं, संज्ञा, प्रतिरूपं. -IC, a. लाक्षणिक-सांकेतिक (की f.), संकेतरूप.

SYMMETRY, s. सौष्ठवं, चतुरस्रता, यथाप्रमाणता, अंगसंयोगः, अवयवसंगति f. -ICAL, a. सम, चतुरस्र, सम-यथा-स-प्रमाण, संगतावयव.

SYMPATHY, s. सहानुभवः, संवेदनं, अनुकंपा, समदुःखता, समदुःखिता; समसुखिता, oft. by समदुःख-सुख; 'the birds even screamed as if out of s.' विहगाः समदुःखा इव चुक्रुशुः (R. VIII. 39). 2 स्वभाव-प्रकृति-साम्यं, आनुगुण्यं, साधर्म्यं, आनुरूप्यं. -ETIC, a. समदुःख-दुःखिन्, सदय, स्निग्ध, सहदुःखिन्,-सुखिन्. -IZE, v. i. सह-सम-दुःखिन्- a. भू &c.; *See* (s.); 'I s. with

you in your distress' त्वद्दुःखदुःखितोहं, त्वत्स- मदुःखभागहं; 'many s. with us in our success' बहवः अस्मदभ्युदयेन सुखभाजो भवंति-मोदंते-प्रीयंते &c.

SYMPHONY, *s.* एकतानता, ऐकस्यं, साम्यं; *See* HARMONY. -IOUS, *a.* सम-संगत-एक-तान.

SYMPTOM, *s.* लिंगं, लक्षणं; *See* INDICATION. -ATIC, *a.* सूचक, बोधक.

SYNAGOGUE, *s.* समाजः, सभागृहं.

SYNCHRONOUS, *a.* एक-सम-कालीन. -SYNCHRONISM, *s.* यौगपद्यं, समकालीनता. -SYNCHRONIZE, *v. i.* युगपत्-एककालि-वृत् 1 A or भू 1 P or जन् 4 A.

SYNCOPE, *s.* मूर्छा.

SYNOD, *s.* समाजः, सभा, परिषद् *f.* -IC, *a.* चंद्र in comp.; (चंद्रमासः).

SYNONYM, *s.* पर्यायः, तुल्यार्थशब्दः, पर्यायशब्दः. -OUS, *a.* समानार्थ, तुल्य-एक-अर्थ, सहार्थ.

SYNOPSIS, *s.* सारसंग्रहः-पत्रकं. -SYNOPTICAL, *a.* सारभूत.

SYNTAX, *s.* कारकप्रक्रिया, वाक्यरचनाविचारः.

SYNTHESIS, *s.* संयोगः, संकलनं. -SYNTHETICAL, *a.* सांयोगिक (की *f.*); संयोग in comp., संयोगात्मक.

SYPHILIS, *s.* उपदंशः.

SYRINGE, *s.* शृंग-णकं, वस्ति *m. f.*

SYSTEM, *s.* पद्धति *f.*, रीति *f.*, सरणि-णी *f.*, क्रमः, पर्यायः; *See* MANNER. 2 कल्पना, प्रयोगः. 3 शाखा. 4 (Of the body) कायव्यूहः. 5 (Of philosopy) दर्शनं; 'the solar s.' सौरं जगत्. -ATIC, *a.* अनुज्झितक्रम, यथापद्धति, यथाक्रम, क्रमानुगत. -ATICALLY, *adv.* यथाक्रमं, यथापद्धति. -ATIZE, *v. t.* व्यव-स्था c. (स्थापयति), यथाक्रमं रच् 10 or विन्यस् 4 U; *See* METHOD, -IZE, &c.

T.

TABARD, *s.* तनुत्राणः.

TABASHEER, *s.* *See* MANNA.

TABBY, *a.* चित्र, शबल, कर्बुरित.

TABERNACLE, *s.* पटवेश्मन् *n.*, पटमंडपः, दूष्यं; (fig.) अचिरस्थायी आवासः.

TABES, *s.* क्षयः, क्षयथुः.

TABLATURE, *s.* *See* PICTURE.

TABLE, *s.* फलकः-कं, आधारः, मंचः; 't. for writing' लेखनाधारः, लिपिसज्जाधारः. 2 पत्रं. 3 (Of metal &c.), पत्रं, फलकं; 'sitting at the same t.' सहभोजिन्, पांक्तेयः; 't. of contents' सूची-निर्घंट-पत्रं, सूचि-ची *f.*, अनुक्रमणिका; 't. of numbers' अंकपत्रं-जालं; 'be at t.' भुज् 7 A; 'to keep good t.' भोजनविशेषान् उपकृ c.; 't.-land' अधित्यका, ऊर्ध्वभूमि *f.*, मालं क्षेत्रं, सानु *m. n.*, प्रस्थः; 't.-talk' विश्रंभालापः-कथा. -TABLET, *s.* पट्टिका, पट्टः, फलकः, पत्रं; 'on the t. of your heart' हृत्पट्टिकायां. -TABULAR, *a.* पत्राकार.

TABOO, *See* INTERDICT.

TABOR, *s.* मुरजः, मृदंगः.

TACIT, *a.* तूष्णीं दत्त, मानस (सी *f.*); 't. consent' मानसाज्ञा; 't. obedience' निर्विकल्प-निर्विवाद-आज्ञापालनं. -LY, *adv.* तूष्णीं, जोषं, मूकभावेन, मनसा; निर्विकल्पं.

TACITURN, *a.* संवृतिमत्, मौनिन्, अनालापशील, तूष्णीक, तूष्णींशील, भाषणविरक्त, मितवाक्-कथ. -ITY, *s.* संवृति *f.*, मौनं, मूकभावः, अनालापः, मितवाक्, कथाविरक्ति *f.*, वाग्यमः.

TACK, *v. t.* आ-बंध् 9 P, पि-आ-नह् 4 P. 2 (a vessel) नौमार्गं परि-व्या-वृत् c. -*s.* कीलकः, गुणः. -ING, *s.* नौमार्गपरिवृत्ति *f.*

TACKLE,-ING, *s.* (नौ-)सज्जा, रज्ज्वादिसामग्री. -*v. t.* सज्जीकृ 8 U, संनह् c.

TACT, *s.* कौशलं, नैपुण्यं, वैदग्ध्यं, युक्ति *f.*, चातुर्यं; *See* SKILL. -TACTICS, *s.* युक्तिकौशलं; (of war) बलविन्यासकौशलं, व्यूहरचनाविद्या. -TACTICIAN, *s.* युक्तिकुशलः, व्यूहपंडितः.

TACTILE, *a.* *See* TANGIBLE.

TADPOLE, *s.* भेकशिशुः-शावकः.

TAG, *s.* अग्रं.

TAIL, *s.* लांगू(गु)लं, पुच्छः-च्छं, लूमं; बालहस्तः, बालधिः (bushy end). -ED, *a.* पुच्छिन्, लांगूलयुक्त.

TAILOR, *s.* सौचिकः, तुन्नवायः, सूचिकः; 't.'s work' सूच्या सेवनं, सूचिकर्मन् *n.*

TAINT, *v. t.* दुष् c. (दूषयति), लिप् 6 P, कलंकयति (D.). -*s.* दूषणं, कलंकः, दोषः; *See* STAIN.

TAKE, *v. t.* ग्रह् 9 P, प्रति-परि-° (in all senses); अगृहीते राक्षसे (Mu. 1); उपदेशं गृहाण &c.; आ-दा 3 A, प्रति-इष् 6 P; स्वी-अंगी-कृ 8 U. 2 धृ 1 P, 10, आ-अव-लंब् 1 A. 3 (A word in a sense) परि-,ग्रह्; तत्रार्थशब्द आनंतर्यार्थः परिगृह्यते (S. B. 23) 'is t. en in the sense of' &c. 4 नी 1 P, वह् 1 P, हृ 1 P. 5 उपलभ् 1 A, अवगम् 1 P. 6 अनुभू 1 P; *See* SUFFER, AFFECT. 7 लभ्, प्राप् 5 P, अधिगम्, आ-सद् c.; *See* GET. 8 Captivate, q. v.; 't. food' आहारं सेव् 1 A; 't. the field' रणभूमिं अवतॄ 1 P, रणांगणे युध् 4 A; 't. rest' विश्रम् 4 P; 't. root' मूलं बंध् 9 P; 't. heart' समाश्वस् 2 P, धैर्यं अवलंब्-अवष्टंभ् 9 P; *See* COURAGE; 't. fire' दह् pass., अग्निं उप-इ 2 P; 't. in hand' प्रतिपद् 4 A, उ(ऊ)रीकृ;

't. place'; *See* HAPPEN; 't. part in' हस्तं दा 3 U, संगिन्-सहकारिन्-सहाय- *a.* भू; 'took part in the massacre' विशसने सहायो बभूव; 't. aim' संधा 3 U; 't. one's way' सिध्-साध् c. (साधयति). साधयामो वयं (S. 1); 't. effect' फल् 1 P, सफलीभू 1 P; 't. possession of' आक्रम् 1 U, 4 P, आविश् 6 P; 't. to task' निर्भर्त्स् 10 A, परुषं निंद् 1 P. **–***v. i.* सिध् 4 P, संपद् 4 A, गुणं आवह् 2 आश्रि 1 U, व्रज् 1 P. –away, अप-वि-नी 1 P, अप-,हृ 1 P, अप-ऊह् 1 U, विनुद् c.; *See* REMOVE. –back, सं-प्रतिसं-हृ, प्रत्या-दा, प्रत्या-नी. –down, अवरुह् c., नि-अव-पत् c., अधो नी. 2 लिख् 6 P. –for, मन् 4 A; *See* CONSIDER; 'mischievousness is t. en for assiduity' चापल्यमुद्योगितां भजते. –in, ग्रह्, सेव्; (in the stomach) ग्रस् 1 A, नि-,गॄ 6 P. 2 विप्र-लभ् 1 A; *See* CHEAT. –off, अपनी, अवतॄ c., उन्मुच् 6 P, अवकृष्. –out, बहिर्नी, अपनी. –to, सेव्, आश्रि, अवलंब्. –up, प्रतिपद्, अंगी-स्वी-कृ. 2 आरभ् 1 A, प्रवृत् c. 3 Occupy, Engross, q. v. –upon, (oneself) अंगीकृ, प्रति-पद्, उ(ऊ)रीकृ; (निर्वाह: प्रतिपन्नवस्तुषु Mu. 2). –ER, *s.* ग्रहीतृ *m.*, ग्राहिन्-हारिन्-हृत् in comp. –ING, *a.* मोहिन्, मनोहारिन्, चित्ताकर्षिन्, मनोज्ञ; *See* CHARMING. 2 ग्राहिन्, &c. –*s.* आदानं, ग्रहणं, स्वीकार:.

TALE, *s.* कथा, उप-,आख्यानं, आख्यायिका. 2 परि-, गणना, संख्यानं; 't.-bearer' सूचक:, कर्णेजप:; 't.-bearing' पैशुन्यं, उपजाप:.

TALENT, *s.* मति *f.*, बुद्धि *f.*, धीशक्ति *f*, प्रज्ञा, बुद्धि-मति-प्रभाव:-विभव:, बुद्धिकौशलं. 2 गुण:. –ED, *a.* धीमत्, प्रज्ञ, सुधी, गुणिन्, गुणवत्.

TALISMAN, *s.* कवच:-चं, माया, रक्षाकरंडक:.

TALK, *v. i.* आ-सं-लप् 1 P, सं-,भाष् 1 A, संवद् 1 P, संमंत्र् 10 A; *See* CONVERSE. –*s.* आलाप:, संवाद:, सं-,कथा, सं-,भाषणं, कथाप्रसंग:. 2 किंवदंती, प्रवाद:; *See* REPORT; 'idle t.' प्र-,जल्पितं, प्रलाप:; 'popular t.' जनप्रवाद:; 'fine t.' शाब्दपांडित्यं; 'mere t.' वाङ्मात्रं. –ATIVE, *a.* बहुभाषिन्, जल्पनशील, जल्प(ल्पा)क, वावदूक. –ATIVENESS, *s.* वावदूकता, जल्पकता, बहुभाषित्वं. –ER, *s.* कथक:, वक्तृ *m.*, आलापिन् *m.*

TALL, *a.* उच्च, तुंग, उन्नत, उच्छ्रित, प्रांशु; 't. in stature' उच्च-दीर्घ-देह-मूर्ति; 't. person' प्रांशु:. –NESS, *s.* उच्चता, उत्तुंगता, उन्नति *f*, उच्छ्राय:; 't. of stature' देहदीर्घता-उच्चता.

TALLOW, *s.* (मेषादीनां) वसा, वपा; 't.-chandler' वसाविक्रयिन् *m.*

TALLY, *v. i.* सं-वद् 1 P, तुल्य-अनुरूप-अनुगुण-*a.* भू 1 P; 't.-ing of hands' अक्षरसंवाद:. –*s.* Match, q. v.

TALON, *s.* नख:-खं नखर:-रं.

TAMARIND, *s.* चिंचा, तिंतिडी-डिका, अम्लिका, आम्लि-(म्ली)का.

TAMARIX, *s.* पिचुल:, भानुक:.

TAMBOURINE, *s.* *See* DRUM.

TAME, *v. t.* वि-नी 1 P, दम् c. (दमयति), निग्रह् 9 P, वशीकृ 8 U; (fury) शम् c. (शमयति). –*a.* विनीत, दांत, वशग, अधीन. 2 ग्राम्य, गृहपुष्ट, गृह्य, गृह-ग्राम- in comp; 't. dove' गृहकपोत:; 't. hog' ग्राम्यशूकर:, विट्चर:. 3 निस्तेजस्, नष्टवीर्य; नीरस, नि:सत्त्व; *See* SPIRITLESS. –ED, *a.* दांत, शांतक्रौर्य, विनीत. –ER, *s.* विनेतृ *m.*, दमयिता. –ING, *s.* दमनं. –LY, *adv.* नष्टवीर्यवत्-कापुरुषवत्, क्लीववत्. –NESS, *s.* वशता, गृह्यता, &c.

TAMPER, (with) *v. i.* Meddle, q. v. 2 (Witness &c.) कपटेन-छलेन-वशीकृ 8 U; दुष् c. (दूषयति), अन्यथा कृ, विकृ.

TAN, *v. t.* श्यामीकृ 8 U, सं-धा 3 U, शुध् c; परिष्कृ c. –NER, *s.* चर्मकार:, चर्मशोधनकृत् *m.*

TANGENT, *s.* स्पर्श:, स्पर्शरेखा.

TANGIBLE, *a.* स्पर्शनीय, स्पृश्य. 2 स्पर्शनीय, प्रकट, सुस्पष्ट, विभाव्यमान.

TANGLE, *v.* Entangle, q. v. –ED, *a.* जटिल, संमिश्र, संकुल, संकीर्ण.

TANK, *s.* तडाग:-गं, जलाशय:, कासार:, वापी, दीर्घिका (large t.); *See* POND.

TANKARD, *s.* चषक:.

TANTALIZE, *v. t.* आशां-तृष्णां-वृध् c., आशां वर्धयित्वा विप्रलभ् 1 A, जाताशा: खड् 10 or भंज् 7 P. 2 (general) Cheat, q. v.

TANTAMOUNT, *a.* सम, तुल्य, समार्थक, तुल्यार्थक.

TAP, *v. t.* लघु आ-अभि-हन् 2 U or प्र-हृ 1 P. 2 छिद्रयति (D.), छिद्रं कृ 8 U. –*s.* मृदु-लघु-चपेट:, लघ्वाघात:-प्रहार:.

TAPE, *s.* दीर्घपट्ट:-बंधनी.

TAPER, *s.* दीपिका, क्षुद्रदीप:.

TAPERING, *a.* वृत्तानुपूर्व (K. I. 35); गोपुच्छाकार, शुंडाकृति.

TAPESTRY, *s.* चित्रयवनिका.

TAPEWORM, *s.* कृमि:, अंत्रकीट:.

TAR, *s.* अ-,राल:, सर्जरस:; *See* PITCH.

TARDY, *a.* चिरक्रिय, दीर्घसूत्रिन्, मंद; *See* SLOW.

TARGET, *s.* क्षुद्रचर्मन् *n.* 2 शरव्यं, लक्ष्यं-क्षं. –EER, *s.* चर्मधर:.

TARIFF, *s.* (पण्य-) शुल्कपत्रिका.

TARNISH, *v. t* दुष् c. (दूषयति). कलंकयति (D.); *See* STAIN. –*v. i.* मलिनीभू 1 P, क्षुभ् 4 P.

TARRY, *v. i.* विलंब् 1 A, चिर(रा)यति (D.); अव-स्था 1 A.

TART, *a.* अम्ल, शुक्त. -*s.* आम्लीयं.

TARTAR. *s.* दंतशर्करा, मल, दंतास्थिका.

TASK, *s.* कार्यं, नियुक्तं कर्म, कर्तव्य, कार्यभा(भ)-रः, व्रतं; 'one who does a t. imposed' व्रातीनः; 'to take to t.' आधाक्षिप् 6 P, निर्भर्त्स् 10 A; *See* REPROACH. -*v. t.* कार्यभारं न्यस् 4 U, गुरुकार्ये नियुज् 7 A, 10.

TASTE, *v. t.* आ-,स्वाद् 1 A or c., रस् 10, प्राश् 9 P, लिह् 2 U. -*v. i.* Oft. by (*s.*). -*s.* आ-,स्वादः, रसः. 2 आ-,स्वादनं, रसनं. 3 (Sense of t.) रसनं, रसनेंद्रियं, रुचि *f.* 4 अभि-,रुचिः, प्रवृत्ति *f.*, शीलं, व्यसनं; 't. s differ', 'different men have different t. s' भिन्नरुचिर्हि लोकः; 'he was not to her t.' स न त या रुच्यं बभूव (R. VI. 44); 'of like t. s' समानशील. 5 रसज्ञता, रसिकता; 'devoid of t.' अरसिक, अरसज्ञ. -ER, *s.* आस्वादकः. -Y, -FUL, *a.* रुचिकर (री *f.*), स्वादु, मिष्ट, सरस, सुरस, रुच्य. 2 हृद्य, मनोहर, हृदयग्राहिन्. -FULLY, *adv.* सकौशलं; रसज्ञतया, यथारुचि. -LESS, *a.* नीरस, विरस, रसहीन.

TATTER, *s.* चीरं, चीरचारं, नक्तकः, कर्पटः; *See* RAG. -ED, *a.* जीर्ण, जर्जरित.

TATTLE,-ER, *See* BABBLE,-ER.

TATTOO, *v. t.* रंज् c. -*s.* पटहप्रणादः.

TAUNT, *v. t.* आ-अधि-क्षिप् 6 P, निंद् 1 P, उपालभ् 1 A; *See* CENSURE. 2 सोल्लुंठनं-सोत्प्रासेन-वद् 1 P; 'enough of t. ing' अलमलमुपालभ्य. -*s.* आ-अधि-क्षेपः, उपालंभः, सोल्लुंठनोक्ति *f.* -ING, *a.* साक्षेप, सोपालंभ, आक्षेपगर्भ; *See* SARCASTIC.

TAURUS, *s.* वृषभः,-राशिः.

TAUTOLOGY, *s.* पुनरुक्ति *f.*, पुनरुक्तत्वं, पौनरुक्त्यं. -OUS, *a* पुनरुक्त, पुनरुक्तभूत.

TAVERN, *s.* गंजा, शुंडागारं, शुंडा; पथिकाश्रमः; 't.-keeper' शौंडिकः.

TAWDRY, *a.* बहिरुज्ज्वल,बाह्यशोभन, मिथ्याशोभायुक्त.

TAWNY, *a.* पिंग, पिंगल, पिशंग (गी *f.*), कपिल, कडार, कद्रु.

TAX, *s.* करः, बलिः; शुल्कः-ल्कं, राजस्वं. 2 भारः. -*v. t.* करं न्यस् 4 P (with loc.) or दा c. (दापयति) or ग्रह् 9 P (with abl.). 2 आयस् c., अत्यंतं पीड् 10. 3 निंद् 1 P, दोषं ग्रह् 9 P; *See* CENSURE. -ABLE, *a.* करार्ह, शुल्क-कर-अधीन. -ATION, *s.* करग्रहणं-आधानं, शुल्कसंस्थापनं.

TEACH, *v. t.* अधि-इ c. (अध्यापयति), शिक्ष् c., पठ् c., उपदिश् 6 P, शास् 2 P. -ER, *s.* अध्यापकः, शिक्षकः, गुरुः, उपदेष्टा, शास्ता; 'religious t.' उपाध्यायः, आचार्यः. -ING, *s.* अध्यापनं, शिक्षा-क्षणं, उपदेशः.

TEAK *s.* अर्जुः; 't.-wood' अर्ज्, अर्जकाष्ठं.

TEAM, *s.* युग्मं or by pl.

TEAR, *s.* अश्रु-स्रु *n.*, बाष्पः, अस्रं, नेत्रांबु *n.* -जलं-उदकं, नयनवारि, and sim. comp.; 'with t. s in eyes' सबाष्पं, सास्रं, बाष्पाकुलनयन- *a.*; 'starting of t. s' बाष्पोद्गमः, उद्बाष्पत्वं; 'flood of t. s' धाराश्रु, अश्रुधारा; 'having the eyes filled with t. s' बाष्पाकुल, अश्रुनयन, सास्र, अश्रुमुख, अश्रुपरिप्लुतेक्षण, पर्यश्रु. 2 छिद्रं, विदरः, भिदा; *See* RENT. -*v. t.* वि-,दॄ 9 P or c., वि-,शॄ 9 P, विदल् c., भिद्-निर्भिद्- 7 P; 'she tore her hair for grief' विललाप विकीर्ण मूर्धजा (K. IV. 4); 't. to pieces' शकलीकृ, चूर्ण् 10. -down, अवकृष् 1P, निकृष्. -off, आच्छिद् 7 P, अप-नी 1 P, व्यपह 1 P, निर्ह 1 P; 't. off the hair' केशान् उल्लुंच् 1 P; *See* PULL also; 'I am unable to t. myself off from the cane-bower' निर्गंतुं सहसा न वेतसगृहाच्छक्नोमि (S. 3). -up, उन्मूल् 10, उत् -वि-पट् 10, उद्-धृ 1 P, उच्छिद्, उत्खन्, व्यपरुह् c. -*v. i.* विदॄ-विभिद्-pass. 2 सवेगं चल् 1 P. -FUL, *a.* सबाष्प, साश्रु, अश्रु-संकुल-पूर्ण-परिप्लुत. -FULLY, *adv.* सास्रं, सबाष्पं, साश्रु. -ING, *s.* वि-,दारणं, विभेदनं, पाटनं, &c.

TEASE, *v. t.* दु 5 P, क्षभ् c., अर्द् 1 P or c., बाध् 1 A, पीड् 10; *See* INJURE.

TEAT, *s.* वृंतं. 2 चूचकं, स्तनाग्रं.

TECHNICAL, *a.* पारिभाषिक-सांकेतिक (की *f.*). -ITY, *s.* पारिभाषिकशब्दः, परिभाषा. 2 पारिभाषिकत्वं. -LY, *adv.* परिभाषानुसारेण.

TECHNOLOGY, *s.* परिभाषा. 2 शिल्प-कला-विज्ञानं; 'school for t.' शिल्पशाला.

TEDIOUS, *a.* अतिदीर्घ, दीर्घसूत्र, दीर्घतर; 'passes the night grown t. by sorrow' गमयति रजनीं विषाददीर्घतरां (S. 4). 2 श्रमावह, क्लांति-खेद-कर (री *f.*). 3 मंद, मंथर, दीर्घसूत्रिन्, चिरक्रिय. -LY, *adv.* अति-सु-दीर्घं. -NESS, *s.* अतिदैर्घ्यं, श्रमावहता; दीर्घता: ex. by (*a.*).

TEEM, *v. i.* Abound, q. v. 2 बाहुल्येन उत्पद् c. or प्र-सू 2, 4 A. -ING, *a.* परिपूर्ण, पूर्णगर्भ, आढ्य, समाकुल, आकीर्ण, प्रचुर; *See* ABUNDANT.

TEGUMENT, *s.* आवेष्टनं, आवरणं, कवचः-चं, पुटः-टं.

TELEGRAM, *s.* विद्युत्प्रेरितवार्ता, विद्युत्संदेशः-वार्ता. -TELEGRAPH, *s.* विद्युद्यंत्रं, विद्युद्वार्तावहः.

TELEOLOGY, *s.* मीमांसा, हेतुविद्या.

TELESCOPE, *s.* दूरदर्शनयंत्रं.

TELL, *v. t.* कथ् 10, आचक्ष् 2 A, शंस् 1 P, आ-नि-विद् c., आ-,ख्या 2 P or c. (ख्यापयति), (with

dat.); वर्ण् 10, कृत् 10, श्रु c., नि-,गद् 1 P, व्या-हृ-उदा-हृ 1 P, अभि-धा 3 U, निरूप् 10; *See* SAY also. 2 गण् 10, सं-परिसं-ख्या; 't. beads' जप् 1 P. –*v. i.* सिध् 4 P, सफलीभू 1 P, गुणं-कार्यं-कृ, यशः-सिद्धिं-दा 3 U. 2 (upon) गुणं-कार्यं-जन् c. or उत्पद् c.; अवसद् c., अप-चि 5 U, क्षि 5 P or c. 2 दुर्बलीकृ; *See* IMPAIR; 't.-tale' सूचकः, पिशुनः, कर्णेजपः. –ER, *s.* कथकः, आख्यायकः. –ING, *s.* कथनं, शंसनं, &c.

TEMERITY, *s.* साहसं, क्षिप्रकारिता, असमीक्ष्य-अविमृश्य-कारिता; *See* RASHNESS.

TEMPER, *v. t.* संमिश् 10, संयुज् 10, संसृज् 6 P. 2 मृदूकृ 8 U, स्निग्धीकृ, प्र-,शम् c. (शमयति), लघूकृ, लघयति (D.), नियम् 1 P; *See* MODERATE. –*s.* शीलं, प्रकृति *f.*, स्व-,भावः; 'good t.' सुशीलं, सद्भावः, सौजन्यं; *See* under GOOD. 2 समता, अक्षोभः, असंभ्रमः, संयमः, रोषाभावः, चित्तस्वास्थ्यं,-समता; 'to lose t.' क्षुभ् 4 P, क्रुध्-कुप् 4 P. 3 Anger, q. v. –TEMPERAMENT, *s.* प्रकृतिः, स्वभावः. देह-शरीर-प्रकृति-स्वभावः; 'of a choleric t.' पित्तप्रकृति. –TEMPERATE, *a.* परि-,मित, समर्याद, नियत. 2 प्र-,शांत, अक्षुब्ध, धीर, अकोपन, अचंड. 3 संयत, संयमिन्, संयतवृत्ति, संयमशील; 't. in eating' मिताहार, अल्पाहार, मिताशिन्, संयताहार; 't. in drinking' &c.; *See* MODERATE. 4 समशीतोष्ण, मंदोष्ण. –LY, *adv.* धीरं, शांत्या, अक्षोभेण, निरुद्वेगं, शांतचेतसा. –TEMPERANCE, *s.* संयमः, निग्रहः, परिमितता, नियमः, नियतत्वं, मिताहारः, मिताशनं, मितपानं, पानाप्रसक्ति *f.*, &c.

TEMPERATURE, *s.* उष्ण-घर्म-परिमाणं.

TRMPEST,-OUS, *See* STORM,-Y.

TEMPLE, *s.* देवालयः, देवतायतनं-निकेतनं, सिद्धायतनं, देवगृहं-भवनं-मंदिरं; and sim. comp.; मठः, विहारः (Jaina t.); 'endowment of a t.' देवस्वं. 2 कुंभः, कपोलः, शंखः.

TEMPORAL, *a.* ऐहिक-सांसारिक-ऐहलौकिक-प्रापंचिक-लौकिक- (की *f.*).

TEMPORARY, *a.* अचिरस्थायिन्, अचिर- अल्प-कालिक (की *f.*), अशाश्वत (ती *f.*), असनातन (नी *f.*), अचिर, अनित्य, क्षणिक. –ILY, *adv.* स्वल्पकालं, अचिरं, अशाश्वतं.

TEMPORIZE, *v. i.* यथाकालं-यथासमयं-व्यवहृ 1 P; छंदोनुवृत् 1 A. –ING, *a.* समयानुवर्तिन्, कालानुरोधिन्.

TEMPT, *v. t.* प्र-वि-लुभ् c., वि-आ-कृष् 1 P, वि-,मुह् c.; *See* ALLURE. 2 परीक्ष् 1 A. –ATION, *s.* प्र-वि-लोभनं, आकर्षणं, विकारहेतुः, विकारहेतौ सति विक्रियंते येषां न चेतांसि त एव धीराः (K. I. 59) 'there being t. s &c.'; 'liable to t. s' प्रलोभनाग्पदं. –ER, *s.* प्र-वि-लोभकः, मोहकः. –ING, *s.* आकर्षिन्, वि-,मोहिन्, प्रलोभिन्.

TEN, *a.* दशन्; 'in t. ways' दशधा; 't. times' दशकृत्वः. –TH, *a.* दशम (मी *f.*).

TENABLE, *a.* रक्षणीय, प्रतिपादनीय.

TENACIOUS, *a.* ग्राहिन्, संलग्नशील. 2 धारणावत्; *See* RETENTIVE. 3 साग्रह, प्रतिनिविष्ट, आग्रहिन्; दृढसंकल्प, स्वमताग्रहिन्; *See* OBSTINATE. 4 श्यान, सांद्र, चिक्कण. –NESS,-TENACITY, *s.* ग्राहकत्वं, धारणाशक्ति *f.* 2 ग्राहः, (एको ग्राहस्तु मीनानां), आ-,ग्रहः, अभिनिवेशः, दृढता, श्यानता.

TENANT, *s.* भूम्यधिवासिन् *m.*; (in general) गृहनिवासिन्. –*v. t.* परभूमिं अधिवस् 1 P or अधि-ष्ठा 1 P.

TEND, *v. i.* प्रवणी-भू 1 P, प्रवृत् 1 A, प्रवह् 1 P, उद्दिश् 6 P, अभिसं-धा 3 U; oft. by आलु, शील in comp.; 't. ing to fall' पतयालु, पतनशील, पिपतिषु; 't. ing to the same object' तद्दिश; 't. s to the centre' केंद्राभिमुखीभवति. 2 (to) आवह् 1 P; क्लृप् 1 A, संपद् 4 A (with dat.), (निष्पन्नप्रायमपि प्रभुप्रयोजनं न मे धृतिमावहति Rat. 1); कल्पते रक्षणाय &c.; oft. by dat. with or without भू; *See* LEAD. –*v. t.* चर् c., पा c. (पालयति), रक्ष् 1 P (of cattle only). –ENCY, *s.* प्रवृत्ति *f.*, प्रवणता, प्रावण्यं, स्वभावः, शीलता-आलुता in comp.

TENDER, *a.* सुकुमार, कोमल मृदु, पेलव; *See* DELICATE, SOFT. 2 सुलभवेदन-दुःख, दुःखज्ञ, मृदु. 3 बाल, कौमार (री *f.*). 4 सदय, करुणार्द्र, करुण, स्निग्ध, दयालु; 't.-hearted' करुणात्मक, कोमल-मृदु-चित्त, क्लिन्नहृदय, दयार्द्रचित्त. –*v. t.* उपानी 1 P, उपह् 1 P. 2 उपक्षिप् 6 P, उपन्यस् 4 U. –*s.* उपन्यासः, प्रस्तावः. –LY, *adv.* सकरुणं, सदयं, सानुकंपं, सादरं, करुणार्द्रदृष्ट्या. –NESS, *s.* मार्दवं, कोमलता, स्निग्धता, कारुण्यं, दयालुता, वात्सल्यं, &c.

TENDON, *s.* शि(सि)रा; स्नायु *f.*, स्नसा. –TENDINOUS, *a.* शिराल; स्नायुमय (यी *f.*).

TENDRIL, *s.* तंतुः; (of creepers) प्रतानं, किसलयः-यं; *See* SHOOT.

TENEMENT, *s.* भवनं, आयतनं; 'earthly t.' देहः. 2 स्थावरं.

TENET, *s.* मतं, अभिप्रायः.

TENOUR, *s.* भावः, भावार्थः, अभिप्रायः, तात्पर्यं. 2 क्रमः, अन्वयः.

TENSE, *s.* कालः.

TENSION, *s.* आ-,तति *f.*

TENT, *s.* वस्त्र-पट-वेश्मन् *n.*, दूष्यं-श्यं, पटमंडपः-गृहं; 'royal t.' उपकार्या, उपकारिका; 'pitch a t.' दूष्यं रच् 10 or उप-क्लृप् c.

TENUOUS, *a.* *See* THIN.

TEPID, *a.* कोष्ण, कवोष्ण, ईषदुष्ण, मंदोष्ण.

TERGIVERSATION, *s.* वाक्छलं, अपलापः ; *See* PREVARICATION.

TERM, *s.* पर्यंतः, अंतः. 2 मर्यादा, अवधिः, सीमा; 'the utmost t.' परमावधिः; 't. of life' आयुर्मर्यादा, आयुःसीमा; 'the t. of life is small' स्वल्पं आयुः. 3 कार्यनिर्वाहसमयः-कालः. 4 पदं, शब्दः, संज्ञा. 5 व्यवहारः, वृत्ति *f*, भावः; 'on friendly t. s' मित्रभावेन, सद्भावेन, प्रीत्या, सुखेन; 'ill t. s' अप्रीति *f.*, विरोधः, असंतोषः. 6 (Math.) पदं. 7 अवयवः (of a syllogism). 8 (T. s) समयः, संकेतः, संविद् *f.*, प्रतिज्ञा. –*v. t.* आ-ख्या 2 P, अभि-धा 3 U, आह्वे 1 P; *See* CALL, NAME. –LESS, *a.* निरवधि, अनंत. –TERMINABLE, *a.* अंत्य, सीमा in comp. —TERMINATE, *v. t.* अव-सो 4 P, समाप् c. –*v. i.* समाप् pass. –ION, *s.* अंतः, अवसानं, परिणामः, निष्ठा, समाप्ति *f.*, निवृत्ति *f.* 2 प्रत्ययः.

TERMAGANT, *s.* अतिकलहप्रिया, कर्कशा, चंडी; *See* SHREW, SCOLD.

TERMINOLOGY, *s.* परिभाषा.

TERRACE, *s.* अलिंदः,-भूमि *f.*, प्रघा(घ)णः. 2 Roof, q. v. 3 वितर्दि *f.*, वेदिका.

TERRAQUEOUS, *a.* जलस्थलात्मक.

TERRENE, TERRESTRIAL, *a.* पार्थिव (वी *f.*), भौमिक (की *f.*), भौम (मी *f.*), भू in comp. 2 लौकिक, ऐहिक (की *f.*); *See* WORLDLY. 3 भूचर, स्थलज, भूलोकस्थ; 't. globe' भूगोलः.

TERRITORY, *s.* प्र-,देशः, राष्ट्रं, राज्यं, भूमि *f.* –IAL, *a.* राष्ट्रीय; by (*s.*) in comp.

TERROR, *s.* सं-,त्रासः, भयं, साध्वसं, शंका. 2 भयहेतुः-स्थानं, शंकास्थानं; 'a t. to the wicked' शठान् व्यथयिता (Mr. 9). –TERRIBLE,-TERRIFIC, *a.* घोर, दारुण, भीषण, भीम, उग्र, कराल, विकट. –TERRIBLY, *adv.* दारुणं, बलवत्, घोरं, उग्रं. –TERRIFY, *v. t.* सं-,त्रस् c., भी c.; *See* FRIGHT, -FUL, &c.

TERSE, *a.* लाघवान्वित, संक्षिप्त, लघुपद. –NESS, *s.* लाघवं, संक्षेपः.

TERTIAN, *s.* तृतीयकः,-ज्वरः, त्र्यैहिकाविषमः (t. ague).

TEST, *v. t.* परीक्ष् 1 A, (मायां मयोद्भाव्य परीक्षितोसि R. II. 62), विमृश् 6 P, (शास्त्रे प्रयोगे च मां विमृशतु M. 1). –*s.* परीक्षा, विमर्शः, प्रतीति *f.* 2 प्रमाणं; (something whereby to t.) निकषः, निकषग्रावन् *m.*; 'this should be put to t.' एतत्प्रतीतिहस्तायां; *See* TOUCH.

TESTACEOUS, *a.* कंबुविशिष्ट, शंखवासिन्.

TESTAMENT, *s.* मृत्युलेखः-पत्रं, इच्छापत्रं. 2 संहिता. –ARY, *a.* मृत्युपत्रदत्त.

TESTICLES, *s.* अंडः,-कोषः-शः, मुष्कः, वृषणः, फलं (in dual).

TESTIFY, *v. t.* साक्ष्यं दा 3 U, प्रमाणयति (D.), प्रमाणीकृ 8 U. 2 प्रकाश् c., विवृ 5 U, व्यंज् 7 P or c., प्रकटीकृ, आविस्कृ; (by words) ब्रू 2 U, वच् 2 P, &c.

TESTIMONY, *s.* साक्ष्यं, प्रमाणं, प्रामाण्यं. –TESTIMONIAL, *s* प्रमाणपत्रं-लेखः.

TESTY, *a. See* FRETFUL.

TETANUS, *s.* धनुर्वातः.

TETE-A-TETE, *s.* रहःसंलापः-प्रत्यासत्ति *f.*

TETHER, *s.* बंधनरज्जु *f.* -सूत्रं. –*v. t.* (रज्ज्वा) बंध् 9 P.

TETRAD, *s.* चतुष्टयं, चतुष्कं.

TETRAGON, *s.* चतुर्भुजः, चतुरस्रं. –AL, *a.* चतुरस्र, चतुष्कोण.

TEXT, *s.* मूलं, मूलपंक्ति *f.*, मूलग्रंथः. 2 उक्ति *f.*, सूत्रं, वचनं, वाक्यं. –UAL, *a.* मौलिक (की *f.*), मौल (ली *f.*).

TEXTILE. *a.* तांतव (वी *f.*), तंतुनिर्मित.

TEXTURE, *s.* विन्यासः, वि-,रचना-नं, कृति *f.*, वापः-यः. 2 तंतु-सूत्र-गुणः. 3 तांतवं.

TEW, *v. t. See* PLY.

THAN, *conj.* Ex. by abl. of word following it; मत्तिरेव बलाद्गरीयसी &c. ; with 'better' ex. by न च, न तु, न पुनः; *See* PREFER, BETTER ; oft. ex. by अपेक्ष्य (with acc.), अपेक्षया in comp.

THANK, *v. t.* उपकृत-अनुगृहीत- *a.* अस्मि इति वद् 1 P, ('Say', q. v.) ; कृतज्ञतां दृश् c. or आविष्कृ 8 U, कृतोपकारं स्तु 2 U or प्रशंस् 1 P ; 't.-ed his deliverer' भवतानुगृहीतः-उपकृतः-अस्मि इति रक्षितारमुवाद ; '(I) t. you', 'thanks' अनुगृहीतोस्मि, महानयं प्रसादः. 't. God' दिष्ट्या. –*s.* (Thanks) कृतज्ञतादर्शनं-प्रकाशनं, उपकारस्तुति *f.*, धन्यवादः; better ex. by (*v.*) ; 'accept my t. s' by (*v.*). –FUL, *a.* कृतज्ञ, कृतवेदिन्, उपकारज्ञ, कृतज्ञतादर्शिन्. –FULLY, *adv.* कृतज्ञतापूर्वं, कृतज्ञतया.–LESS, *a.* अकृतज्ञ, कृतघ्न.–THANKSGIVING, *s. See* (*s.*).

THAT, *a.* तद् (सः-सा-तत्). 2 यत् (यः-या-यत्), oft. by comp. ; 'he t. has strength' सबल, बलिन् &c. –*conj.* इति (after assertions), यथा, यत् (at beginning) with or without इति ; sometimes not ex. 2 (Purpose) इति with pot. mood or अर्थे-र्थं in comp. ; 'Oh t.' *See* WOULD.

THATCH, *s.* छदिस् *f.*, पटलं, तृणपटलं-छदिः. –*v. t.* तृणादिना आ-,छद् 10. –ER, *s.* तृणपटलकारः.

THAW, *v. i.* द्रु 1 P, वि-ली 4 A. –*v. t.* द्रु c., द्र-

वीक्, वि-ली c. ; *See* MELT. –*s.* हिम-तुषार-स्राव *f.* -स्रावः.

THE, (Article) Ex. by तद् (सः-सा-तद्) or अदस् (असौ-अदः) ; gen. not ex. 2 (With comp. adj.) by यथा यथा-तथा तथा; यथा यथा यौवनमतिचक्राम तथा तथा अनपत्यताजन्मा अवर्धतास्य संतापः (Ka. 59) 't. older he grew, t. greater his torment' &c. ; 't. sooner, t. better' यथा यथा लघु कार्यं संपाद्यते तथा तथा अधिकं श्रेयो भवेत् ; 't. more so' विशेषतः, विशेषेण.

THEATRE, *s.* रंगः,-भूमि *f.*,-शाला, नृत्य-नाट्य-शाला, नाटकगृहं. –THEATRICAL, *a.* नाटक, नाट्य in comp. ; 't. performance' नाटकप्रयोगः.

THEFT, *s. See* under THIEVE.

THEISM, *s.* ईश्वरवादः, आस्तिकवादः, आस्तिक्यं. –THEIST, *s.* ईश्वरवादिन् *m.*, आस्तिकः.

THEME, *s.* विषयः, प्रकरणं, वस्तु *n.*, प्रबंधः.

THEN, *adv.* तदा, तदानीं, तस्मिन्काले. 2 ततः, अनंतरं, अथ. 3 तर्हि ; तद् ; 'now and t.' कदापि, कदाचित् ; 'so t.' एवं, तर्हि ; 'what t.' ततः किं. –THENCE, *adv.* ततः, तस्मात्, तस्मात् स्थानात् ; 't.-forth', 't.-forward' ततः प्रभृति-आरभ्य, तदाप्रभृति.

THEOCRACY, *s.* ईश्वरप्रभुत्वं, ईश्वरकर्तृकत्वं.

THEOGONY, *s.* देवोत्पत्ति *f.*-वंशः.

THEOLOGY, *s.* ईश्वर-ब्रह्म-ज्ञानं, परमार्थविद्या, अध्यात्मज्ञानं-विद्या. –IAN, *s.* परमार्थविद् *m.*, ईश्वरज्ञानविशारदः, ब्रह्म-विद्-ज्ञानिन्, वेदांती, अध्यात्मवादी. –ICAL, *a.* Ex. by (*s.*) in comp., आध्यात्मिक-पारमार्थिक- (की *f.*).

THEOREM, *s.* प्रमेयोपपाद्यं.

THEORY, *s.* मतं, सिद्धांतः ; वादः ; 't. of evolution' परिणामवादः; नास्तिकमतं &c. 2 कल्पना, तर्कः, मनःसृष्टि *f.* 3 आगमः, शास्त्रं, उपपत्ति *f.* (as opp. to 'practice' प्रयोगः), द्वावेवाप्यागमिनौ प्रयोगनिपुणौ च (M. 3) 'well-versed in t. and practice'; oft. मंत्रतंत्रे 't. and practice'. —THEORETICAL, *a.* व्यवहारायोग्य, काल्पनिक-अव्यावहारिक (की *f.*). –ALLY, *adv.* कल्पनापूर्वं. –THEORIZE, *v. t.* मतं उपक्लृप् c.

THEOSOPHY, *s.* ईश्वरवादः-ज्ञानं.

THERAPEUTIC, *a.* शांतिकर (री *f.*), रोगघ्न (घ्नी *f.*) ; 't. s' भेषजशास्त्रं.

THERE, *adv.* तत्र, तस्मिन्स्थाने, तत्स्थले. 2 (Expletive) by अस्ति. –*interj.* पश्य, पश्य; 'here and t.' इतस्ततः; 't.-about,' (t. s) तत्रैव कुत्रापि; तत्स्थानसमीपे; (with number) उप-आसन्न in comp.; *See* NEARLY, ABOUT; '20 or t.-abouts' उप-आसन्न-विंशाः (नराः) &c.; 't.-after' ततः, तदनु, ततः परं, तदनंतरं ; 't-at' तेन, तत्र; तदुपरि ; ततः; 't.-by' तेन; तेनोपायेन, तद्द्वारेण; 't.-fore' अतः, तस्मात्, तस्मात् कारणात्-हेतोः, ततः, तत् ; इति हेतोः, अनेन कारणेन-हेतुना; 't.-in' तस्मिन्विषये; 't.-of' तत्रत्य, ततस्य, तत्र स्थ (*a.*); तस्य, अस्य, तदीय; 't.-upon' ततः, &c.

THERMOMETER. *s.* उष्णमापनयंत्रं.

THESIS, *s.* प्रतिज्ञा, पूर्वपक्षः. 2 प्रबंधः.

THICK, *a* घन, निबिड, अविरल, सांद्र, गाढ ; नीरंध्र. श्यान. 2 स्थूल, महत्, विपुल ; *See* LARGE. 3 मंद, जड, स्थूल ; *See* DULL; 't.-headed' मंदधी ; 't.-skinned' कठिन, मसृण; मंद, स्थूल. 4 पंकिल, कलुषित, आविल. 5 (Of a solid body) घन. –*s.* तमुलं, शिरस् *n.*, मूर्धन् *m.*, संकुलं; 'in the t of the fight' रणशिरसि, रणसंमर्द-मूर्ध्नि. –*adv.* अविरतं, निरंतरं, अविरलं, निबिडं, by (*a.*) in comp.: 't.-sown' घनोप्त; सांद्राच्छादित &c ; 't.-set' सु-,संहत, उपचित. –EN *v. t.* घनीकृ 8 U. निबिडीकृ &c. –*v. i.* घनीभू 1 P, निबिडीभू; 'the horizon t. ed' दिङ्मंडलं (अभ्रपटलैः) घनीभूतं, अभ्रपटलाकीर्णं. –ET, *s.* गहनं, गुल्मः-ल्मं, निबिडारण्यं, वृक्ष-तरु-गहनं. –LY, *adv.* निरंतरं, अविरलं, निबिडं, गाढं. –NESS, *s.* घनता, सांद्रता, संहति *f.*, &c. 2 वेधः, घनता, पिंडत्वं. 3 (Of voice) स्वरभंगः.

THIEVE, *v. t.* चुर् 10, मुष् 9 P, स्तेन् 10. –ISH, *a.* अपहरण-चौर्य-शील-वृत्ति. चौर्यासक्त. –ISHNESS, *s.* चौर्यासक्ति *f.* –THIEF, *s.* स्तेनः, चारः, चौरः, तस्करः, दस्युः, मोषकः, कुम्भीलकः, पा(प)टच्चरः, प्रतिरोधिः, परास्कंदिः, मलिम्लुचः, ऐकागारिकः. –THEFT, *s.* स्तेयं. मोषः, चौर्यं, चो(चौ)रिका, स्तैन्यं.

THIGH, *s.* ऊरुः (*m.*), सक्थि *n.*; 'having beautiful t. s' वामोरुः-रू.

THIMBLE, *s.* अंगुलित्राणं, अंगुलिमुखत्रं.

THIN, *a.* प्र-,तनु, सूक्ष्म, विरल, अस्थूल, श्लक्ष्ण. 2 कृश, क्षीण, शांत; 'grown t.' तन्वंग-कृशतांग (गी *f.*); 'having a t. waist' तनुमध्यम, क्षीणमध्यम ; *See* SLENDER. –*v. t.* विरलयति (D.), ऊनी-विरली-कृ 8 U, संख्यां अप-चि 5 U or क्षि 5 P or c. 2 तनूकृ, तक्ष् 1, 5 P, उच्छिद् 6 P. –LY, *adv.* विरलं, असंहतं. –NESS, *s.* तनुता, सूक्ष्मता, वैरल्यं, कार्श्यं; क्षीणता.

THING, *s.* वस्तु *n.*, द्रव्यं, पदार्थः, अर्थः. 2 विषयः, अर्थः.

THINK, *v.* चिंत् 10, ध्यै 1 P, विमृश् 6 P, आ-पर्यालोच् 10, वि-,तर्क् 10, वि-चर् c., मनसा कृ c., सं-, भू c. 2 मन् 4 A, गण् 10; *See* CONSIDER; 't. much of' बहु मन्; 'I t. so' इति मे मतिः; 'does not t. of going to his capital' नगरगमनाय मतिं न करोति (S. 2); 't. of' स्मृ 1 P, मनसि कृ;

'I never thought of winter' हेमंतः समुपस्थास्यति इति चिंता नैव मनसि कृता, इति नैवालोचितं. -ER, *s.* सूरिः, मुनिः; (lit.) चिंतकः; *See* PHILOSOPHER. —THOUGHT, *s.* (act) चिंता, ध्यानं, आलोचनं; (result also) विचारः, विमर्शः, विचारणं-णा, भावना, मनोव्यापारः, चित्तचेष्टा. 2 मतं, अभिप्रायः, मनोरथः. 3 मति *f.*, बुद्धि *f.*, कल्पना विचारः, संकल्पः, मनोगतं, चित्त, मनस् *n.*, तर्कः, चित्त-मनो-वृत्ति *f.*, भावना; 'one's inmost t. s' अंतर्गतं मनः; 'evil t.' कुमतिः; 'benevolent t.' परहितबुद्धिः; 'swift as t.' मनोजव; 'beyond t.' अचिन्त्य; 'in t., word or (actual) deed' मनोवाक्कायकर्मभिः. -FUL, *a.* चिंताशील, विचार-विवेकशील, विमृश्य-समीक्ष्य-कारिन्, असाहसिक (की *f.*), सावधान, अप्रमत्त. 2 चिंता-कुल-पर-निमग्न, ध्यानपर. -FULLY, *adv.* विचिंत्य, विमृश्य, विचार्य, समीक्ष्य, सविवेकं, पर्यालोच्य. -FULNESS, *s.* सविचारता, विवेकिता, समीक्ष्यकारिता. -LESS, *a.* प्रमत्त, अनवहित, असावधान *See* NEGLIGENT. 2 निश्चिंत, वीतचिंत. 3 अनवेक्ष्य-अविमृश्य-कारिन्, क्षिप्रकारिन्, विवेक-विचार-हीन, सरभस, मूढ. -LESSLY, *adv.* मोहात्, रभसा, अविमृश्य, अविवेकेन, अविचारेण. -LESSNESS, *s.* अविवेकः, अविचारः, रभसः, मोहः

THIRST, *v. t.* तृष् 4 P, (fig. also); पा desid. (पिपासति), उदन्यति (D.). -*s.* तृष्णा, (fig. also); द्रव्यतृष्णा, जीविततृष्णा &c.; पिपासा, तृषा, तृष् *f.*, उदन्या, पानेच्छा. -Y, *a.* तृषित, पिपासित, तृषार्त-आकुल-आतुर, सतृष्ण, पिपासु, उदकार्थिन्, तृष्णाविष्ट-आक्रांत.

THIRTEEN, *a.* त्रयोदशन्. -TH, *a* त्रयोदश (शी *f.*).

THIRTY, *a.* त्रिंशत् *f* -IETH, *a.* त्रिंश (शी *f.*, त्रिंशत्तम (मी *f.*).

THIS, *pron. a.* एतद् (एषः-एषा-एतत्), इदं (अयं-इयं-इदं); 't. way', 't. way' इतः इतः.

THISTLE, *s.* गोक्षुरः-रकः, गोकंटकः, वनशृंगाटः, स्वादुकंटकः; पलंकषा इक्षुगंधा, श्वदंष्ट्रा, (plant).

THITHER, *adv.* तत्र. -WARD, *adv.* तं देशं प्रति.

THONG, *s.* वरत्रा, नद्ध्री, वर्ध्री, चर्मरज्जु *f.*

THORAX, *s.* उरः-वक्षः *n.*,-स्थलं.

